सरस्वतीभवन-ग्रन्थमाला

(३३)

न्यायकौस्तुभः

महादेवपुणताम्बकरविरचितः

(अनुमानखण्डात्मको द्वितीयो भागः)

वाराणसेय संस्कृत-विश्वविद्यालयः

2.4

SARASWATĪ BHAVANA GRANTHAMĀLĀ

VOL· 33

(*PART II*)

General Editor

Baladeva Upādhyāya

Director, Research Institute,

Varanaseya Sanskrit Vishvavidyalaya,

Varanasi.

THE

NYĀYAKAUSTUBHA

(ANUMĀNA KHAṆḌA)

By

Mahādeva Puṇtāmkara

VARANASI.

1967

Published by–
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Prinded by–
Vidya Mandir Press, Varanasi.
P.P. 1–458
Remaining pages Printed by–
Ghanshyam Upadhyaya,
Manager
Varanaseya Sanskrit Vishvavidyalaya Press,
Varanasi,

सरस्वतीभवन-ग्रन्थमाला

(३६)

महादेवपुणतामकरविरचितो

न्यायकौस्तुभः

(अनुमानखण्डात्मको द्वितीयो भागः)

सम्पादकः

स्वर्गीयः श्रीदामोदरलालगोस्वामी

दार्शनिकसार्वभौमः

वाराणस्याम्

१८८९ तमे शकाब्दे

प्राप्तिस्थानम् —
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी—२

मूल्यम्—१०) रूप्यकाणि

प्रास्ताविकम्

नैयायिकप्रवर-श्रीमहादेवपुणतामकरेण विरचितस्य **"न्यायकौस्तुभा"**—भिधस्य प्रमेयबहुलस्य ग्रन्थस्यानुमानखण्डात्मकमिममंशं साम्प्रतं प्रकाशनव्यापारकर्मीकृत्य कमपि प्रभूतं प्रमोदमनुभवामि । निखिलदर्शनार्णवालोडनचणैर्नव्यन्यायनदीष्णैः श्रीदामोदरलालगोस्वामिमहाभागैर्भूरिपरिश्रमेण यथाविधि सम्पादितोऽयं ग्रन्थो बहुवर्षाणि पूर्वं मुद्रितचरोऽपि दुर्दैववशात् प्रकाशनमलभमानोऽधुना भाग्यवशात् प्रकाशनं लभत इति नितरां हर्षस्थानं विपश्चिताम्, विशेषतो नव्यन्यायतत्त्वजिज्ञासूनां तार्किकाणाम् । १९३० ईशवीये वर्षे ग्रन्थस्यास्य प्रत्यक्षखण्डः प्रकाशनमभजत । साम्प्रतं १९६७ ईशवीये वर्षे षट्त्रिंशद्वर्षानन्तरं ग्रन्थस्य द्वितीयो भागोऽनुमानखण्डात्मकः प्रकाशितो भवतीत्येष भाग्यस्य कोऽपि शोभनः परिणामो विलसति ।

ग्रन्थस्यानुशीलनेन ग्रन्थकर्तुः सामान्यमैतिहासिकं परिचयमाचेतुं क्षमन्ते विपश्चितः । पुणतामकरेत्युपाधिर्महाराष्ट्रीयब्राह्मणानां पुण्यस्तम्बकरेति संस्कृतनाम्नो जायमानोऽपभ्रंशः । महाराष्ट्रप्रान्ते गोदावरीतीरे पुण्यस्तम्बेति ख्यातं किमप्यैतिहासिकमाहात्म्यमण्डितमधुनापि वरीवर्तते स्थानम् । तत्रत्या एव ब्राह्मणाः स्वीयाभिजननामोपलक्षिताः पुण्यस्तम्बकरेत्याख्यां दधते । ग्रन्थकारो महादेवो मूलतस्तत्स्थानाभिजनो वाराणस्यामेव ग्रन्थमिमं रचयामास । प्रत्यक्षकौस्तुभस्य द्वितीयपद्ये स्वीयं **मुकुन्दा**भिधं पितरं षट्शास्त्री-तत्त्वदर्शीत्युपाधिना व्यपदिशति, येन तज्जनकस्य दर्शनशास्त्रेषु किमपि पाटवमभिव्यज्यते । तस्य गुरोरभिधानं **शितिकण्ठे**ति । महादेवस्याविर्भावकालोऽनुमातुं प्रमाणोपन्यासेन साधु क्षम्यते । तद्विरचितानां ग्रन्थानामादिमो हस्तलेखः १७२७ विक्रमसंवत्सरे (= १६७० ई०), अन्तिमश्च १७५३ विक्रमे (= १६९६ ई०) समुपलभ्यते । तेन निपुणं प्रतीमो यद् महादेवो विक्रमस्याष्टादशशतकस्य मध्यभागे बभूव ।

न्यायकौस्तुभस्य निर्माणात् पूर्वं महादेवेन भवानन्दतर्कवागीशस्य ग्रन्थे व्याख्या निरमायि । **भवानन्दतर्कवागीशस्तु** (१६००–१६२५ ई०) नव्यन्याये नवद्वीपसम्प्रदायस्यालौकिको व्याख्याताऽऽसीत् ।

भवानन्देन इमे व्याख्याग्रन्था विरचिताः —

(१) तत्त्वचिन्तामणेर्व्याख्या

(२) पक्षधरमिश्रविरचितस्य तत्त्वचिन्तामण्यालोकस्य व्याख्या (=आलोकसार- मञ्जरी)

(३) रघुनाथशिरोमणिनिर्मितस्य तत्त्वचिन्तामणिदीधितिग्रन्थस्य व्याख्या (=दीधितिगूढार्थप्रकाशिका)

अन्तिमे व्याख्याग्रन्थे एव महादेवपुणतामकरेण टीकाद्वयं समुपन्यस्तम्। अन्तिमो ग्रन्थो **भवानन्दी**नाम्ना नैयायिकेषु प्रसिद्धिमलभत।

परन्तु कारणेन केनापि गौडीयनैयायिकानामसत्तर्कैः कदर्थीकृतो भवानन्दीग्रन्थो नैयायिकानां तर्कगोष्ठ्यां न कामपि प्रतिष्ठां लेभे। महादेवस्येदं व्याख्यानिर्माणकार्यं भवानन्दीग्रन्थस्य कीर्तिसमुद्धारे भृशं कारणं बभूवेति तस्य माहात्म्यं भृशमुद्घोषयितुं पारयामः। भवानन्दीग्रन्थस्य व्याख्याद्वयं निर्मितं महादेवेन। तत्र बृहती व्याख्या **भवानन्दीप्रकाशे**त्याख्यया प्रख्याता प्रत्यक्षकौस्तुभे (पृ० २४३) निर्दिष्टा वर्तते। लघ्वी व्याख्या दीधितिगूढार्थप्रकाशिकाभिधा **सर्वोपकारिणी**त्यपरनाम्ना प्रसिद्धाऽनुमानकौस्तुभे (२५६ पृष्ठे) समुल्लिखिता विराजते। अनयोर्व्याख्याग्रन्थयोर्वैशिष्ट्यं ग्रन्थकार इत्थमामनुते—

भवानन्दीप्रकाशस्तु विस्तृतो रचितो मया।
अतः संक्षेपतः कुर्वे व्याख्यां सर्वोपकारिणीम्॥

सर्वोपकारिणीव्याख्याया उपान्ते महादेवः प्रकाशं (भवानन्दीप्रकाशं) कौस्तुभं (न्यायकौस्तुभं) च स्वीयात्मजरूपेण सर्वोपकारिणीं व्याख्यां च स्वीयात्मजारूपेण निर्दिष्टवान्, येन तस्यैतेषु ग्रन्थेषु भूयसी प्रीतिर्विपुलश्च पक्षपातो ध्रुवमवधार्यते—

प्रकाशकौस्तुभौ पुत्रावात्मजामुपकारिणीम्।
बुद्धिपत्न्यामलौकिक्यां महादेवो ह्यभावयत्॥

न्यायकौस्तुभो महादेवस्य प्रतिभाविशेषमण्डितो जीवनसर्वस्वायमानो ग्रन्थो नव्यन्यायस्येतिहासे तस्य महतीं प्रतिष्ठामलौकिकीं च प्रतिभामुद्घोषयितुमलमिति दृढं वक्तुं पारयामः। ग्रन्थोऽयं श्रीगङ्गेशोपाध्यायैर्विरचितं तत्त्वचिन्तामणिं विषयविवेचनस्य क्रमे रीतिप्रस्तावे च ध्रुवमनुसरतीत्युभयोर्ग्रन्थयोर्विषयविवेचनक्रममालोचयतां विपश्चितां न परोक्षं भविष्यति। ग्रन्थस्यानुशीलनं ग्रन्थकर्तुश्चिन्तामणिव्याख्याभिः साकं नितान्तं गम्भीरं परिचयं समुद्घोषयति, विशेषतः पक्षधरमिश्रेण विरचितं चिन्तामण्यालोकं रघुनाथशिरोमणिना च निर्मितां चिन्तामणिदीधितिं महादेवो मुहुर्मुहुर्निर्दिशति। प्रत्यक्षकौस्तुभस्य पृष्ठयोः (३ तथा २५६) मण्यालोकनाम्ना, १६, ४२ तथा ५२ पृष्ठेषु च मिश्रग्रन्थ-

नाम्ना इयमेव पक्षधरनिर्मिता व्याख्या समुल्लिखिता विद्यते । अनुमानकौस्तुभे पक्षधरमिश्रोऽपि नाम्ना निर्दिष्टो ग्रन्थकारेण (३८७ पृष्ठे), चिन्तामणिदीधितेः समुल्लेखास्तु द्वात्रिंशद्वारं समुपलभ्यन्तेऽनुमानकौस्तुभे, वहुवारं प्रत्यक्षकौस्तुभेऽपि। मण्यालोकस्य व्याख्यां मधुसूदनठाकुरेण विरचितां कण्टकोद्धारनाम्नीमपि स्मरति ग्रन्थकारः प्रत्यक्षकौस्तुभे (१६ पृष्ठे) । एतेषां—टीका ग्रन्थानामुपयोगः खण्डनमण्डनकार्ययोर्विहितो ग्रन्थकर्तुर्नव्यन्यायेऽलौकिकीं विश्लेषणशक्ति तर्ककर्कशां शेमुषीं च प्रतिपदमभिव्यनक्ति । मीमांसादर्शनेऽपि महादेवस्य पाण्डित्यं प्रगल्भं निरतिशयगाढं सूक्ष्मतानुविद्धं च प्रतिपृष्ठं समीक्ष्य के न प्रमोदन्ते विपश्चितः । अनुमानखण्डस्यास्य समुपन्यस्तविषयाणां सद्यः परीक्षणं ग्रन्थकर्तुस्तर्कनैपुण्यं नव्यन्याये मौलिकीं विचारपद्धतिं च प्रकाशितुं क्षममिति दृढं वक्तुं पारयामः ।

एतस्यानुमानकौस्तुभस्य सम्पादनं न्यायधुरन्धरैः (साम्प्रतं वैकुण्ठवासिभिः) श्रीदामोदरलालगोस्वामिमहाभागैर्निपुणं व्यधायीति ते समेषां पण्डितानां धन्यवादानर्हन्ति । विषयानुक्रमण्यादिसामग्रीभिर्ग्रन्थमिमं विभूषयद्भिः श्रीदुर्गाधरझाशर्मभिर्भृशमुपकृता न्यायतत्त्वजिज्ञासव इति तेऽपि सभाजनीया अस्माकम् । अनुमानखण्डस्यास्य प्रकाशनमिदं विदुषां मुदे कल्पिष्यत इति ध्रुवो मे विश्वासः ॥

वाराणसेयसंस्कृतविश्वविद्यालयः वाराणसी २६-१-६७, पौषी पूर्णिमा सं० २०२३	श्रीबलदेव उपाध्यायः अनुसन्धानसंस्थानसञ्चालकः

—:०:—

प्रस्तावना

अथ नैयायिकप्रवरैर्महादेवपुणतामकरमहोदयैर्विरचितस्य न्यायकौस्तुभनामक-ग्रन्थस्यायमनुमानखण्डात्मको भागः प्रकाश्यते वाराणसेयसंस्कृतविश्वविद्यालयेनेति प्रभूतप्रमोदस्थानं न्यायशास्त्रानुशीलिनाम् ।

नव्यन्याये 'मूल'शब्देन प्रथितस्य तत्त्वचिन्तामणिनामकग्रन्थस्यानुक्रमेण ग्रथितोऽयं निबन्धः स्वविचारगरिम्णा भाषासौष्ठवेन च नव्यन्यायसम्बन्धिनिबन्धग्रन्थेष्वपि किमपि शीर्षस्थानमलङ्करोत्यनुक्रमणीदर्शनेनापि व्यक्तीभविष्यति, किमुत ग्रन्थानुशीलनेन ।

अस्य प्रत्यक्षखण्डान्तः प्रथमो भागः सरस्वतीभवनग्रन्थमालायां १९३० ईशवीये वर्षे म० म० डा० श्रीमदुमेशमिश्रमहाभागैः संपादितः प्रकाशितश्चेदानीमप्युपलभ्यते ।

'न्यायकौस्तुभस्य प्रत्यक्षखण्डान्तभागस्य प्रकाशनानन्तरं क्रमप्राप्तस्यास्यानुमानखण्डान्तभागस्य प्रकाशनं प्रचलतु, तत्संपादनभारं चायं जनो वहतु' इति समुपस्थापिते विश्वविद्यालयीयप्रस्तावे ज्ञातमिदं यदयमनुमानखण्डात्मकोऽपि भागः सरस्वतीभवनग्रन्थमालायामेव सुप्रसिद्धयशसां विद्वत्कुलालङ्करणानां दार्शनिकसार्वभौमन्यायतीर्थतर्कतीर्थादिपदवीभाजां तत्रभवतां श्रीदामोदरलालगोस्वामिमहाभागानामधुना दिवं गतानां संपादकत्वे मुद्रितोऽस्ति । केवलं भूमिका विषयानुक्रमणिकादीन्येव कार्याण्यवशिष्टानि सन्ति । ग्रन्थकारस्य समयादिकं च निरूपितमेव प्रथमखण्डस्य भूमिकायां तत्संपादकैः । सुतरां मयि न्यस्तस्य संपादकत्वस्य पर्यवसानमनुक्रमणिकादिनिर्माण एव जातम् । तानि यथामति विधाय मूलग्रन्थेन साकं संयोज्योपायनीक्रियते विदुषां करकमलयोरिति ॥

वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी
२६-१-६७

विज्ञापयति—
दुर्गाधरझा-शर्मा
अनुसन्धानसहायकः

न्यायकौस्तुभीयानुमानखण्डस्य विषयानुक्रमणी

	पृ०	पं०
प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे सङ्गतिप्रदर्शनम्	१	६
प्रसङ्गोपोद्घातादिभेदेन सङ्गतेः षड्भेदाः	१	१०
कारणत्ववत् कार्यत्वस्यापि सङ्गतित्वम्	१	१५
प्रकारान्तरेण सङ्गतेर्द्वैविध्यम्	२	१५
तदनुसारेण सङ्गतेर्लक्षणस्यापि द्वैविध्यम्	३	३
'नहि सङ्गतिरनन्तराभिधानव्याप्त्या' इतिदीधितिग्रन्थस्यालोचनम्	३	१६
अनुमानाभाससाधारणमनुमानलक्षणम्	३	२०
एतदनुमानलक्षणस्य लक्ष्यतावच्छेदकनिरूपणम्	४	३
प्रसङ्गात् 'घटो घटः' इत्यत्र कथं नाभेदान्वय इति प्रश्नोत्थापनम्	४	१०
विशेष्यतावच्छेदकतासम्बन्धरूपविषयनिष्ठप्रत्यासत्त्या योग्यताज्ञान-शाब्दबोधयोः कार्यकारणभाव स्वीकृत्यं समाधानम्	४	२०
अत्रैव व्युत्पत्तिवादस्थे 'तद्धर्मभेदः कारणम्' इति गदाधरमतसमालोचनम्	५	१२
अनुमानप्रमाणलक्षणम्	६	२२
अनुमितेर्लक्षणम्	७	२
परामर्शप्रत्यक्षे अनुमितिलक्षणातिव्याप्त्या आक्षेपः, तत्परिहारश्च	८	६
अत्रैव प्रसङ्गात् प्रत्यक्षं प्रति विषयस्य कारणत्वमस्ति नवेति विचारः	७	८
प्रत्यक्षं प्रति विषयस्य न कारणत्वमिति स्वमतव्यवस्थापनम् एतद्विषयक-नानामतसमालोचनं च	१४	७
साङ्कर्यात्परामर्शत्वजातिनिरासः	१७	
भावनाख्यसंस्कारसत्त्वे प्रमाणोपन्यासः, बाधकप्रमाणनिरासश्च	२०	२२
भावनाख्यसंस्कारस्य सविषयकत्वाक्षेपः, तत्परिहारश्च	२३	३
स्मरणस्य संस्कारनाशकत्वाक्षेपः, तत्परिहारश्च	३०	२
अनुभवत्वजातेः प्रामाण्याक्षेपः, तत्परिहारश्च	३०	१६

पृ०

विशेषदर्शनरूपपरामर्शजन्येऽनुमितिसमानाकारकप्रत्यक्षेऽनुमितिलक्षणा-
तिव्याप्त्युद्भावनम्, तत्परिहारश्च ३७

साध्यसाधनभेदेन व्याप्तेर्भेदादनुमितिलक्षणे असंभवोद्भावनम्, तत्परिहारश्च ४५

उदयनाचार्यसम्मतलिङ्गोपहितलैङ्गिकभानमतोपपादनम्, तन्निरासश्च ५०

मीमांसकमतेन व्याप्तिज्ञानपक्षधर्मताज्ञानयोरेवानुमितिकारणत्वम्, न्यायनये
च एतदुभयजन्यः परामर्शोऽप्यनुमितिकारणम्, अनयोर्मतयोरुप-
पादनम्, समालोचनञ्च ७३

अनयोर्मीमांसकमते एव ग्रन्थकारस्य पक्षपातः ८४

पक्षविशेष्यकपरामर्शव्याप्यविशेष्यकपरामर्शयोरुभयोरपि परामर्श-
योरनुमितिहेतुत्वम्, पक्षविशेष्यकपरामर्शस्यैव वेति विचारः, ८४

व्याप्तिनिरूपणस्योपक्रमः ८७

केवलसाध्यसामानाधिकरण्यरूपव्याप्तिमतखण्डनम् ८७

अव्यभिचरितसाध्यसामानाधिकरण्यं व्याप्तिरिति मणिकारानुयायिनां
मतोपपादनम् ८७

व्यभिचारनिश्चयानुमित्योः प्रतिबन्ध्यप्रतिबन्धकभावविचारः ८७

व्याप्तिलक्षणघटकमव्यभिचारित्वं हेतुव्यापकत्वरूपम् तच्च हेतुसमाना-
धिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नत्वरूपम् ।
अवच्छेदकत्वञ्च पारिभाषिकम् ९२

अथवा हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वरूप-
व्यापकत्वमेव निवेश्यम् इति मते स्वकीया सम्मतिः, उभयमत-
समालोचनञ्च ९३

व्यभिचारज्ञानाभावसहकृतं सहचारज्ञानमेव व्याप्तेर्ग्राहकम् ९७

नवीनमते साध्याभाववदवृत्तित्वमेव व्याप्तिः, तन्मतसमानलोचनञ्च ९७

'विशेषाभावकूट एव सामान्याभावः' इत्येतन्मतोपन्यासपूर्वकं तदतिरिक्तस्य
सामान्याभावस्य साधनम् १००

व्याप्तिशब्दस्य योगार्थानुसारेण व्यापकत्वमात्रमर्थः १०३

अनेकविधव्याप्तिलक्षणानां प्रदर्शनम् १०५

	पृ०	पं०
व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावस्वीकर्तॄणां सौन्दरमतानुयिनां व्याप्तिलक्षणानामुपन्यासः, तत्र रत्नकोशकृतामभिमतं प्रथमलक्षणम्, तत्परिस्कारश्च	१०७	८
उक्तप्रथमलक्षणे दोषप्रदर्शनपूर्वकं द्वितीयलक्षणोपन्यासः	११३	१२
व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्वीकारे साधकबाधक-युक्तीनां प्रदर्शनम्	११७	६
कूटघटितव्याप्तिलक्षणोपन्यासः, तत्समालोचनं च	१२३	
साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्तीति चक्रवर्ति-लक्षणत्वेन गदाधरेणोपन्यस्तम् रत्नकोशकारमतानुयायिनां लक्षणम्, तत्परिष्कारश्च	१२७	१७
पक्षधरमिश्रोक्तसाजात्यघटितलक्षणोपन्यासः, तत्समालोचनं च	१३१	३२
वीप्सितयत्तत्पदघटितादुदाहरणवाक्यात् व्यापकत्वबोधः संभवति न वेति विचारः, प्रसङ्गात् वीप्सापदार्थनिर्वचनश्च	१३७	८
हेतुव्यापकसाध्यसामानाधिकरण्यरूपाया व्याप्तेः पुनः समालोचनम्, व्याप्तिनिर्णस्य स्थलभेदेन यथायथं सर्वप्रमाणजन्यत्वनिरूपणश्च	१४५	८
व्याप्तिग्रहे व्यभिचारज्ञानाभावसहचारज्ञानयोरपि कारणत्वम्	१४६	६
व्यभिचारशङ्कानिवारकतया तर्कस्यानुमान उपयोगः, तर्कस्य लक्षणादिकं तत्सम्बन्धिनानमतसमालोचनं च	१४६	५
तर्कस्योपयोगे विविधकल्पनिरूपणपुरस्सरं स्वमतव्यस्थापनम्	१६०	१०
उपाधिनिरूपणस्योपक्रमः	१६४	१४
चिन्तामणिकृदभिमतमुपाधेर्लक्षणम्	१६६	५
दीधितिकाराभिप्रेतमुपाधेर्लक्षणम्	१६६	१७
एतद्ग्रन्थकारसम्मतमुपाधेर्लक्षणम्	१६७	७
उपाधिलक्षणस्य लक्ष्यतावच्छेदकविमर्शस्योपक्रमः	१६७	१६
तत्र मणिकृदभिमतः पक्षः	१६७	२०
दीधितिकारमतेन उपाधिलक्षणलक्ष्यतावच्छेदकनिर्वचनम्	१६८	१३

पृ०

दीधितिकारमतसमालोचनम् १६८
पक्षेनरत्वे उपाधिलक्षणातिव्याप्तिप्रदर्शनस्योपक्रमः १७१
पक्षेतरत्वस्याप्युपाधित्वमिष्टमेवेति नवीनमतम् १७१
'धूमवान् वह्नेः' इत्यादौ आर्द्रेन्धनमुपाधिः ? आर्द्रेन्धनप्रभववह्निर्वा
उपाधिः ? इति विचारस्योपक्रमः १७१
आर्द्रेन्धनप्रभववह्निरेवोपाधिरिति चिन्तामणिकृन्मतोपन्यासः १७१
एतन्मतद्वयसमालोचनम् १७१
उद्भूतत्वविचारः १७४
नाशत्वेन जन्यभावत्वेन कार्यकारणभावस्य समालोचनम् १७५
पक्षधर्मतापदार्थस्योपक्रमः १८७
तद्घटकतया पक्षताविषयकप्रश्नः १८७
सन्दिग्धसाध्यधर्मवत्त्वमिति प्राचीनपक्षतालक्षणोपन्यासः,
तन्मतसमालोचनं च १८७
एतल्लक्षणस्य दीधितिकरसम्मतः परिष्कारः तद्विवरणं च १८८
साध्यसन्देहरूपायाः पक्षतायाः मणिकृदुक्तं खण्डनम् २०२
'मणिकृन्मते सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव पक्षता' इत्यादिना
पक्षतासिद्धान्तलक्षणस्योपन्यासः २०३
पक्षतासिद्धान्तलक्षणघटकसिषाधयिषापदस्य विवरणम् २०३
सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतानिष्ठानुमितिकारणताया
अवच्छेदकीभूतसम्बन्धविचारः २१३
चिन्तामणिकृदुक्तपक्षतालक्षणस्य यज्ञपत्युपाध्यायमतेन विवरणम्
दीधितिकृतां तत्खण्डनप्रकारश्च २१५
उपाध्यायमताक्षेपपरिहारः स्वमतेन २१८
प्रभाकरानुयायिनां मते पक्षताया अनुमितिहेतुत्वनिरासः २१९
अनुमितिकरणत्वविचारस्योपक्रमः, आचार्यमते ज्ञायमानलिङ्गस्यैवानु-
मितिकरणत्वमिति प्रतिपादनम् २१९

	पृ०	पं०
ज्ञायमानलिङ्गस्यानुमितिकरणत्वे प्रमाणोपन्यासः	२२०	१
मणिकारमतेन लिङ्गज्ञानस्यैवानुमितिकरणत्वप्रदर्शनम्	२२४	१६
अत्रैव दीधितिकृन्मतप्रदर्शनम्	२२४	२२
केवलान्वय्यादिभेदेनानुमानस्य त्रैविध्यम्	२२५	३
व्याप्तिग्राहकसहचारभेदादेवानुमानभेद इति आचार्यमतानुयायिनां मतस्य प्रदर्शनम्	२२५	८
गृहीतव्याप्तिभेदेनैवानुमानभेद इति चिन्तामणिमतानुयायिनां मतोल्लेखः तदनुसारिदीधित्युक्तस्य प्रकृतहेतुकप्रकृतसाध्यकानुमितिहेतुज्ञान-विषयव्याप्तित्वव्यापकप्रकृतसाध्यकव्याप्तिकत्वम् केवलान्वयित्वम्' इति केवलान्वयिलक्षणस्योल्लेखस्तत् समालोचनं च	२२६	१६
केवलान्वय्यनुमाने दीधितिकृतामसम्मतिः, तन्मतालोचनं च	२३६	८
केवलव्यतिरेक्यनुमाननिरूपणोपक्रमः	२४४	१७
आचार्यसम्मतं केवलव्यतिरेक्यनुमानलक्षणम्	२४४	२२
चिन्तामणिकृदभिमतं केवलव्यतिरेक्यनुमानलक्षणम्	२४५	२
केवलव्यतिरेक्यनुमानं स्वीकर्तव्यं नेति विचारः	२४५	४
व्यतिरेकव्याप्तिजनिता प्रमितिः नानुमानरूपा किन्त्वर्थापत्तिरूपेवेति दीधितिकृन्मतोपन्यासः, तन्मतसमालोचनं च	२४८	४
अन्वयव्यतिरेक्यनुमाननिरूपणस्योपक्रमः	२४९	१४
आचार्यसम्मतमन्वयव्यतिरेक्यनुमानलक्षणम्	२४९	१६
चिन्तामणिकाराभिप्रेतमन्वयव्यतिरेक्यनुमानलक्षणम्	२४९	२१
चार्वाकमतेनानुमानस्य प्रमाण्याक्षेपः, तत्समालोचनं च	२५०	३
स्वार्थपरार्थभेदेन अनुमानस्य द्वैविध्यम्	२५६	२
परार्थानुमानस्य न्यायसाध्यत्वान्न्यायनिरूपणस्योपक्रमः	२५६	४
न्यायलक्षणम् प्रतिपदव्यावृत्तिपुरस्सरम्	२५६	१०
न्यायस्य प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्ताः पञ्चावयवाः	२५६	१४
न्यायावयवलक्षणम्	२५६	१८

पृ०

प्रतिज्ञालक्षणस्योपक्रमः, तत्परिष्कारश्च २५७

हेत्ववयवस्य लक्षणम् २५७

उदाहरणस्य लक्षणम्, तत्समन्वयश्च २६१

यो यो धूमवान् सः स बह्निमान् यथा महानसमित्याद्युदाहरणवाक्य-

घटिकायाः यो यः इत्यादिवीप्सायाः फलस्वरूपादिविचारः २६१

आचार्यमतेन व्यभिचारशङ्कानिवृत्तिरेव वीप्सायाः फलम् २६२

मणिकारानुयायिनां मते उदाहरणवाक्ये वीप्सायाः प्रयोगानर्हत्त्वम् २६४

दीधितिकारानुयायिनां मत उदाहरणवाक्ये वीप्साप्रयोगस्यावश्यकत्वम् २६५

किन्तु साध्यपदस्य हेतुव्यापकसाध्यरूपलक्ष्यार्थे तात्पर्यग्राहिका न तु तद्वाचिका

उदाहरणवाक्यस्थयत्पद एव वीप्सा आवश्यकी न तु तत्पदे २६६

वीप्सा व्यापकत्ववाचिकैव, न तु तत्तात्पर्यग्राहिकेति मैथिलमतोल्लेखः,

तत्समालोचनं च २६७

वीप्साया उक्ततात्पर्यग्राहकत्वसमर्थनम् २७२

उपनयलक्षणोपन्यासः, तत्समालोचनं च २७५

उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्ये शाब्दबोधो न भवति, किन्तु

उक्तयोरैक्येऽपि विधेयांशेऽधिकावगाहिशाब्दबोधो भवतीति

प्रतिपादनम् २७६

निगमनलक्षणोपन्यासः २८०

हेतावबाधितत्वासत्प्रतिपक्षितत्वज्ञानायैव निगमनोपन्यासः, हेतावबाधितत्व-

ज्ञानमनुमितावपेक्षितं नवेति विचारश्च २८०

हेत्वाभासनिरूपणारम्भः, एकस्यैव हेत्वाभासपदस्य व्युत्पत्तिभेदेन हेतुदोष-

परत्वं दुष्टहेतुपरत्वं च २८३

यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं हेत्वाभासत्वमिति हेत्वाभासस्य

सामान्यलक्षणनिर्देशः २८३

एतल्लक्षणस्थानुमितिपदस्य पक्षः साध्यव्याप्यहेतुमान् साध्यवांश्चेत्या-

कारकानुमितिपरत्वम् २८४

	पृ०	पं०
यद्विषयकत्वेनेतिपदघटकतृतीयार्थरूपमवच्छेदकत्वमनतिरिक्तवृत्तित्वरूपं न तु स्वरूपसम्बन्धरूपम्	२८३	२१
प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिवारणाय विशिष्टान्तराघटितत्वस्य निवेशः	२६०	४
निर्वह्निः पर्वतो वह्निमान् इत्यादिस्थलीयबाधे निर्वह्निः पर्वतो वह्निमा-नित्याद्याकारकानुमितेरप्रसिद्ध्याऽतिव्याप्तिः	२६३	६
तद्वारणाय चोभयाभावघटितं दीधितौ 'अत्र वदन्ति' इत्यादिना प्रोक्तम् हेत्वाभासस्य लक्षणं तद्विवरणं च	२६३	१०
यत्र यावन्तो हेतुदोषाः संभवन्ति तावदन्यतमत्वमेव हेत्वाभासत्वमिति चिन्तामणिप्रोक्तचरमलक्षणस्योपन्यासः	३०१	६
व्यभिचारलक्षणारम्भः	३०१	१६
साधारणासाधारणानुपसंहारिभेदेन व्यभिचारस्य त्रैविध्यम् साधारण-व्यभिचारस्य लक्षणं च	३०३	१
असाधारणव्यभिचारलक्षणस्योपक्रमः	३०७	२
अनुपसंहारिव्यभिचारलक्षणस्योपक्रमः	३०७	१५
विरोधहेत्वाभासस्य लक्षणम्	३१४	२
सत्प्रतिपक्षहेत्वाभासस्य लक्षणस्योपक्रमः	३१५	२
रत्नकोशकारसम्मतायाः सत्प्रतिपक्षस्थले संशयकारानुमितेरुपक्षेपः, तमालोचनं च	३१५	११
रत्नकोशकारानुयायिनां नवीनानां मते सत्प्रतिपक्षस्थले संशयाकारानुमितेः समर्थनम्	३१५	२२
सत्प्रतिपक्षस्थले संशयाकारानुमितेः खण्डनं चिन्तामणिकृदनुयायिनां मते	३२२	६
उभयमतयोः समालोचनपूर्वकं सत्प्रतिपक्षस्थले संशयाकारानुमितेः खण्डनेनास्य प्रसङ्गस्य समाप्तिः	३२३	११
असिद्धिहेत्वाभासलक्षणस्योपक्रमः	३२३	११
आश्रयासिद्ध्यादिभेदेन असिद्धेस्त्रैविध्यम्	३२८	१०
साध्याप्रसिद्धिसाधनाप्रसिद्ध्योर्व्याप्यत्वासिद्धावेवान्तर्भावः	३२८	११

	पृ०	पं०
नीलधूमत्वादेर्हेतुतावच्छेदकस्य व्याप्यत्वावच्छेदकत्वाभावरूपव्याप्यत्वासिद्धावेवान्तर्भाव इति केषाञ्चिन्मतोपन्यासस्तत्खण्डनं च	३२९	३
बाधहेत्वाभासलक्षणोपन्यासः	३३०	६
बाधस्थले व्यभिचारादेरपि कस्यचिद्दोषस्यावश्यंभावात् तेनैव तत्रत्यस्य हेतोः हेत्वाभासता निर्वाहसंभवे बाधस्य हेत्वाभासत्वाक्षेपः	३३१	१०
बाधदोषस्यासंकीर्णोदाहरणप्रदर्शनेन तत्परिहारः	३३३	५
प्रसङ्गात् प्रतिबन्ध्यप्रतिबन्धकभावविचारारम्भः	३३५	१७
प्रतिबन्धकतावच्छेदकीभूतनिश्चयत्वविषयकप्रश्नः, तत्समाधानं च	३३६	१
संशयसमुच्चययोर्भेदकधर्मविचारस्योपक्रमः	३३९	४
संशये कोट्योः परस्परविरोधोऽपि भासते समुच्चये न तथेति केषांचिन्मतोपन्यासस्तत्समालोचनं च	३३९	१०
संशये कोटिद्वयप्रकारतानिरूपितविशेष्यताया ऐक्यम् समुच्चये तद्विशेष्यताया अपि द्वित्वमित्यपरेषां मतोल्लेखः	३४०	१४
निश्चयत्वस्य जातित्वं स्वीकृत्य प्रतिबन्ध्यप्रतिबन्धकभावोपपादनम्, तत्समालोचनं च	३४२	२३
हेत्वाभासोद्भावनस्यासाधकतासाधकत्वेन सदुत्तरत्वम्	३५६	१०
परानुमितिप्रतिबन्धोऽपि हेत्वाभासोद्भावनस्य फलम्	३५६	१८
ईश्वरसिद्धिरेवानुमानस्य चरमं प्रयोजनम्	३६०	१२
चिन्तामण्युक्तस्येश्वरानुमानप्रयोगस्योल्लेखः	३६०	१४
तदनुमानस्य पक्षतावच्छेदकादिस्वरूपनिर्वचनस्योपक्रमः	३६०	१७
उक्तानुमानसाध्यीभूतस्य सकर्तृकत्वस्य निर्वचनम्, तत्सम्बन्धिनानामतसमालोचनं च	३६२	१६
एतदुपष्टम्भेनारम्भवादस्योल्लेखः	३६८	२०
आरम्भवादप्रतिपक्षतया सांख्याभिमतस्य सत्कार्यवादस्योल्लेखः	३६८	२०
न्यायमतेन सत्कार्यवादस्य निरासोपक्रमः	३७१	२
'असदकरणात्' इत्यादि सांख्यकारिकायाः उल्लेखस्तद् व्याख्यानं च	३७२	१९

	पृ०	पं०
परमाणावेव गुरुत्वं न द्वयणुकादाविति मतोल्लेखः	३७४	१५
नव्यमतेन गुरुत्वस्वीकारे मानाभावोक्तिः।	३७४	१६
अनुमानप्रमाणेन शक्तिनाम्नः स्वतन्त्रपदार्थस्य सत्त्वप्रतिपादनोपक्रमः, तन्निरासश्च।	३७५	७
वह्न्यादौ दाहानुकूलस्वाभाविकशक्तेर्निराससम्भवेऽपि व्रीहीन् प्रोक्षतीत्यादि-वाक्याद्व्रीह्यादौ प्रोक्षणाद्याधेयाशक्तिः स्वीकार्यैवेति पूर्वपक्षोपक्रमः।	३७६	१७
प्रोक्षणादिक्रियाजन्याऽदृष्टरूपा शक्तिरपि प्रोक्षणादिकर्त्तृनिष्ठैव न व्रीह्यादि-कर्मनिष्ठेति तत्समाधानम्।	३७६	२२
कार्यकारणयोः सामानाधिकरण्यनियमेन व्रीहिनिष्ठात् प्रोक्षणात् पुरुषेऽदृष्टोत्पत्तिर्न भविष्यतीत्याक्षेपस्तत्समाधानं च।	३८०	२०
प्रोक्षणजन्यव्यापारस्य पुरुषनिष्ठत्वे लाघवोपन्यासः तत्समालोचनं च	३८०	५
व्रीह्यादेः प्रोक्षणजन्यशक्त्यानाधारत्वे प्रोक्षणक्रियाकर्मत्वानुपपत्त्या आक्षेपप्रदर्शनोपक्रमस्तत्परिहारश्च।	३८२	७
व्रीहिनिष्ठेन प्रोक्षणेन व्रीह्यावेवादृष्टं जननीयमित्यनुमानेनाक्षे-पस्तत्समाधानं च।	३८३	७
अत्र शूलपाणिमिश्रमतोल्लेखस्तत्खण्डनं च।	३८२	१६
व्यापारव्यापारिणोः सामानाधिकरण्यनियमे श्येनयागमधिकृत्य व्यभिचार-प्रदर्शनं तत्परिहारश्च	३८३	१६
'आत्मन्येवादृष्टोत्पत्तिः न तु व्रीह्यादिभौतिकपदार्थे' अस्य नियमस्य अभिमन्त्रितपयःपल्लवादौ देवताप्रतिमादौ तुलादिदिव्ये चाति देशः	३८४	७
अशोकवृक्षे कामिनीचरणाभिघातदोहदादिभिः शक्तेरुत्पत्तिविषयकप्रश्नः तत्समाधाने च मणिकारनुसम्मतम् समाधानम् समाधानान्तराणि च।	३८६	६
ताम्रादिपात्रे अम्लसंयोगादिना यस्याः शुद्धेरुत्पत्तिः सापि न शक्ति-विशेषरूपा किन्तु अशुद्ध्यभावरूपैवेति नैयायिकमतोल्लेखः	३८७	७
शुद्धिरदृष्टरूपैवेति मतान्तरम्	३८७	१०
शुद्ध्यशुद्ध्योरुभयोरप्यदृष्टरूपत्वमेवेति मतान्तरम्	३८७	१५

	पृ०	पं०
अशुद्धिरेवादृष्टरूपा तद्ध्वंसरूपं च शुद्धिरिति पक्षधरमिश्रमतोल्लेखः तत्समालोचनं च।	३८७	२०
पक्षधरमिश्रमत एव ग्रन्थकारस्यापि सम्मतिः।	३९०	१३
चिकित्सयापि रोगिणे धातुसाम्यरूपदृष्टकारणमेवारोग्यस्योत्पद्यते न वारोग्यजनिका कापि शक्तिराधीयते इति नैयायिकाभिमतोक्तिः	३९०	१६
व्रीहियवादौ कर्षणजलादिना व्रीह्यादिजनकनियताङ्कुरजनिकाया काचिच्छक्तेराधानमवश्यमङ्गीकर्त्तव्यमिति मीमांसकानामुक्तिः, तत्रापि आधेयशक्तिमनङ्गीकृत्यैव निर्वाहः संभवतीति नैयायिकानां तत्खण्डनं च	३९०	१८
कारणत्वमेव शक्तिः न तु शक्तिपदाभिधेयं किंचित् पदार्थान्तरमिति नैयायिकमतोपसंहारः	३९१	१६
कारणत्वविचारोपक्रमः	३९१	१९
कार्याभावघटितं कारणत्वस्य लक्षणम् तत्समालोचनं च	३९१	२०
प्रागभाववत्त्वमेव कारणत्वमित्येतल्लक्षणोपन्यासः	३९४	२१
कथितकारणत्वलक्षणेषु सर्वत्रदोषप्रदर्शनपूर्वकं 'अनन्यथासिद्धत्वे सति कार्यनियतपूर्ववर्त्तित्वरूपनिष्कृष्टकारणत्वलक्षणस्योपन्यासस्तद्विवरणं च	३९५	
अन्यथासिद्धत्वनिरूपकत्वस्य निर्वचनम्	३९९	२०
अन्यथासिद्धस्य पञ्च प्रकाराः	४००	२
अन्यथासिद्धत्वनिरूपकत्वस्य प्रकाशकारानुयायिनां सम्मतं निरूपणम्	४०२	१०
पञ्चानामप्यन्यथासिद्धानां लक्षणानि	४०२	१२
मणिकारानुयायिनां सम्मतमन्यथासिद्धानां त्रैविध्यम्	४११	६
अन्येषां सम्मतमन्यथासिद्धस्यैकविधत्वम्	४११	११
'अन्यथासिद्ध' शब्दो प्रकृते यौगिक एव न तु पारभाषिक इति परेषां मतोल्लेखस्तद्विवरणं च	४११	१४
अन्यथासिद्धनिरूपकत्वाघटितमेव कारणत्वलक्षणमिति नवीनमतोल्लेखः	४१२	४
कारणत्वं पदार्थान्तरमेवेति दीधितिकृदनुयायिमतोल्लेखः, अत्रैव ग्रन्थकारस्यापि सम्मतिः	४१२	१०

	पृ०	पं०
कारणवदप्रवृत्तिनिमित्तभूतं कारणत्वमन्यत्, प्रवृत्त्यौपयिकं कारणत्वं चान्यद् इति केषाञ्चिन्मतोल्लेखस्तत्समालोचनं च	४१२	२१
समवाय्यसमवायिनिमित्तभेदेन कारणत्वस्य त्रैविध्यम्	४१५	११
तत्र समवायिकारणत्वस्य लक्षणं तद्विवेचनं च	४१५	१२
असमवायिकारणत्वस्य लक्षणं तद्विवेचनं च	४१५	२०
निमित्तकारणत्वस्य लक्षणं तद्विवेचनं च	४२०	१४
निरूपितस्यानुमानस्य मोक्षानुपयोगितया निरूपणानर्हत्वाक्षेपस्तत्समाधानं च	४२२	२२
मोक्षस्य आत्यन्तिकध्वंसरूपकत्वम्	४२३	१६
आत्यन्तिकदुःखात्यन्ताभाव एव मोक्ष इति मतान्तरम्	४२४	१८
आत्यन्तिकदुःखप्रागभाव एव मोक्ष इति प्राभाकराणां मतोल्लेखः	४२५	१०
प्राभाकरमतखण्डनं च	४२६	५
नत्यसुखाभिव्यक्तिरेव मोक्ष इति भाट्टमतोल्लेखः	४२६	१८
भाट्टमतखण्डनम्	४२७	८
ज्ञानसुखादिस्वरूप आत्मैव मोक्ष इति अद्वैतवेदान्तिनां मतोल्लेखस्तद्विवेचनं च	४२८	३
अविद्याया भावरूपत्वाक्षेपस्तत्परिहारश्च	४३०	१५
भावरूपाज्ञानसत्त्वेऽनुमानप्रमाणप्रदर्शनम् तत्र दोषोद्भावनं च	३३२	१८
भावरूपाज्ञानसत्त्वे शब्दप्रमाणोल्लेखस्तेषामन्यथोपपत्तिश्च	४३३	२१
अद्वैतवादखण्डनोपक्रमः	४३७	४
मोक्षतत्त्वज्ञानयोः कार्यकारणभावविचारः	४३७	१६
तत्त्वज्ञानान्मोक्षोत्पत्तिक्रमश्च	४३८	३
तत्त्वमस्यादिमहावाक्यजनितशाब्दात्मसाक्षात्कार एव मोक्षजनक इति प्राचीनवेदान्तिनां मतोल्लेखः	४४२	११
नवीनवेदान्तिनां मते तत्खण्डनम्	४४४	१८
जीवविषयकं तत्त्वज्ञानं मोक्षहेतुः ? उत ईश्वरविषयकं तत्त्वज्ञानम् ? किं वात्मविषयकं तत्त्वज्ञानम् ? एषु पक्षेषु कः साधीयान् इति विवेचनम्	४४५	२२

	पृ०	पं०
काशीमरणान्मुक्तिविचारः	४४६	८
शूद्रस्य काशीमरणात्कथं मुक्तिरिति विचारः	४५१	१
न्यायवैशेषिकशास्त्रयोः कथं मोक्षार्थिनां प्रवृत्तिरिति विवेचनम्	४५३	१०
वेदप्रामाण्यप्रयोजकविषये नैयायिकमीमांसकयोर्मतभेदनिराशप्रयासः	४५३	१६
शास्त्राणाम् उद्देशलक्षणपरीक्षाभेदेन त्रिसृणां प्रवृत्तीनां निरूपणम्	४५५	४
ग्रन्थोपसंहारः	४५७	२१

उद्धृता ग्रन्थकाराः

अद्वैतवादिनो वेदान्तिनः—४२८

आचार्यानुयायिनः—२२५, २६१

आचार्यमते—२२४, २४९

ईश्वरकृष्णः—३७२

उपाध्यायाः—२१५, २१८

उदयनाचार्यः—४३६, ४३७

चार्वाकमतानुयायिनः—२५०

दीधितिकारः—३, ९, १९, २१, ३९, ४४, ५३, ६५, १३७, १५६, १५९, १६०, १६५, १६६, १६८, १८८, १९२, २०२, २०७, २१५, २१९, २२०, २२४, २३२ २४५, २४७, २४८, २९०, ३१८, ३४२, ३७९, ४३९

दीधितिकृदनुयायिनः—१५९, २६५, २९२, ३६४, ४१२

नवीनतार्किकाः—१३७

नवीनवेदान्तिनः—४४४

नैयायिकधुरन्धराः—२५०

पक्षधरमिश्रः—३८७

पक्षधरमिश्रानुयायिनः—३८७

प्रकाशकारानुयायिनः—४०२

प्राचीनानुयायिनः —३४६

भाट्टाः—४२६

मणिकृतः—१६६, १७१, १७२, १७३, १९२, १९३, २०२, २१४, २२४, २४५, २४९, २६५, २६६, ३६०, ३८६, ४११, ४२३

मणिकारानुयायिनः—८७, २२९, २६४, ३२२, ४११

महर्षिणा गोतमेन—४३७

मिश्राणाम्—१३७

मैथिलाः—२६७

यदन्यैः—१२७

रत्नकोशकाराः—३१५

रत्नकोशकारानुयायिनः—१०७, १२७, ३१५

व्यासेन—४५५

शूलपाणिमिश्रः—३८३

सत्कार्यवादिनः सांख्याः—३६८

—:०:—

उद्धृतग्रन्थानां नामानि

ईश्वरवादः	३६८
ईश्वरकृष्णकारिका	३७२
उपस्कारः	१८
काशीखण्डे	४५०
गीता	४३५, २७५
जाबालश्रुतिः	४४७
द्रव्यकिरणावली	४३८
पक्षतावादः	२१६
पदार्थखण्डनम्	३७६
पाणिनिः	२६२
बौद्धाधिकारः	४३८
भवानन्दीयव्याख्यायां सर्वोपकारिण्याम्	२५६
मत्कृतौ	३२६

उद्धृतश्लोकादीनां सूची-पत्रम्

अघानां यौगपद्ये तु	३८८
अथ जन्तोः प्राणेषूत्क्रममाणेषु	४४७
अशरीरं वावसन्तम्	४३८
असक्तोऽद्विषंश्च	४३८
असदकरणाद्	३७२
अहो तार्किकता	४२६
आगमेनानुमानेन	४४१
आत्मानमरणिं कृत्वा	४५२
आरुरुक्षोर्मुनेर्योगम्	४५३
इत्येषासहकारिशक्तिरतुल्या	४३६
इन्द्रियेभ्यः परं मनः	४४४
ऋतं पिबन्तौ	४३४
ज्ञानमुत्पद्यते पुंसाम्	४३४
ज्ञानेन तु तदज्ञानम्	४३५
तत्तत्कर्म कृतं यदेव	२७५
तं त्वौपनिषदं पुरुषम्	४४२–४४५
तदपदर्शनसिद्धान्तसंक्षेपः	४३८
तेनापि योऽसौ सुभगे तवागतः	२७३
तमेव विदित्वा	४५०
तमेतं वेदानुवचनेन	४५२
दिशामि तारकं ह्यन्ते	४५०
दुःखजन्मेत्यादि	४३६
ध्यात्वा शिवाङ्घ्रियुगलम्	१
नान्यः पन्था विद्यतेऽयनाय	४४७
नित्यविप्सयोः	१४३, २६२, २६७

निःश्रेयसं पुनः	४३७
प्रायः पापं विजानीयात्	४२६
प्रत्यक् प्रवणता बुद्धेः	४५३
प्राचीननव्यान्निखिलान्निबन्धान्	४५७
ब्रह्मज्ञानेन मुच्यन्ते	४५०
वहूनां जन्मनामन्ते	४५०
महादेवेनानुमानम्	४५८
यद्यत्पापं प्रतिजहि	२७३
यद्यदाचरति श्रेष्ठः	२७५
यदा चर्मवदाकाशम्	४५०
यां यां प्रियां प्रैक्षत	२७४
सप्रसङ्ग उपोद्घात	१
सम्वद्धं वर्त्तमानं च	८
साधुचन्द्रमसि	२७३
संचारिणीं दीपशिखेव	२७४
हेतूच्छेदे पुरुषव्यापारात्	४३८

तत्त्वचिन्तामणिसन्दर्भास्तद्दीधितिसन्दर्भाश्चैतदतिरिक्ताः सन्ति तान् ग्रन्थकारः सूचीदर्शनेनावगमयन्तु ।

श्रीश्रीगौरकृष्णः शरणम् ।

न्यायकौस्तुभेऽनुमानखण्डम् ।

ध्यात्वा शिवाङ्घ्रियुगलं विबुधैरुपास्यं—
नत्वा गुरोश्चरणपङ्कजमादरेण ॥
भूयो विभाव्य सुधिया तदुदीरितार्थं—
विद्वन्मुदे किमपि कौतुकमातनोमि ॥ १ ॥

अथानुमानं निरूप्यते—

अत्रासङ्गतं न प्रयुञ्जीतेत्यभियुक्तवचनात् प्रत्यक्षासङ्गतमनुमानं कथं प्रत्यक्षानन्तरं निरूप्यते? इति न शङ्क्यम् ;

व्याप्तिज्ञानाद्यात्मकानुमानस्येन्द्रियात्मकप्रत्यक्षकार्यतया कार्यत्वरूपसङ्गतेरेव सुवचत्वाद् ,

न च

"सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा ।
निर्वाहकैककार्यत्वे षोढा संगतिरिष्यते"—

इत्यभियुक्तोक्तप्रसङ्गत्वादिसंगतिविभाजकोपाधिषट्कान्यतमानाक्रान्तस्य कार्यत्वस्य कथं सङ्गतित्वमिति वाच्यम् ?

तत्रत्यहेतुतापदस्याजहत्स्वार्थलक्षणया तादात्म्यनिरूपकत्वान्यतरसम्बन्धेन हेतुतासम्बन्धिपरतया कार्यत्वस्य तादृशसम्बन्धिरूपसङ्गतिविभाजकोपाध्याक्रान्तत्वाद्,

न च प्रत्यक्षस्याप्यदृष्टद्वाराऽनुमानकार्यत्वेन पूर्वाभिहितानुमानकारणप्रत्यक्षसाधारणं कार्यत्वं कथं संगतिः; अनन्तराभिधानव्याप्या हि संगतिरित्यभियुक्तोक्त्याऽनन्तराभिधानव्याप्यत्वस्यैव संगतिलक्षणत्वेन तदनाक्रान्तत्वादिति वाच्यम् ?

सम्बन्धविशेषस्यैव सङ्गतिपदार्थतया विशेषस्य चैकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिरीत्या स्मृतिद्वाराऽनन्तराभिधानप्रयोजकतारूपत्वेन तादृशानन्तराभिधानप्रयोजकसम्बन्धित्वस्य तादृशप्रयोजकताविशेषसम्बन्धेनानन्तराभिधानविशिष्टसम्बन्धित्वस्यैव वा सङ्गतिलक्षणलक्ष्यताऽवच्छेदकत्वेन प्रत्यक्षनिष्ठानुमानकार्यत्वस्य तदनाक्रान्ततयाऽनुमाननिष्ठप्रत्यक्षकार्यत्वस्यैव तदाक्रान्ततथा तस्य सङ्गतिलक्षणाक्रान्ततया सङ्गतित्वोपपत्तेः;

एवमेव यत्र कार्यनिरूपणानन्तरं कारणानिरूपणं तत्र कारणत्वस्यापि सङ्गतिलक्षणाक्रान्तत्वं सूपपादम् ,

अत्रेदं बोध्यं–सर्वत्र सङ्गतिर्द्विविधा–पूर्वाभिहितनिरूपितानन्तराभिधेयनिष्ठाऽनन्तराभिधेयनिरूपितपूर्वाभिहितनिष्ठा च, अनुमाननिष्ठप्रत्यक्षकार्यत्वमाद्या प्रत्यक्षनिष्ठमनुमानकारणत्वं च द्वितीया, परस्परसङ्गतेरैवौचित्यावार्जितत्वेन सम्प्रदायसिद्धत्वाद् द्वयोरप्यनन्तराभिधनप्रयोजकसम्बन्धत्वरूपसङ्गतिपदप्रवृत्तिनिमित्ताक्रान्तत्वेनैकशेषस्य कर्तुमशक्यत्वाच्च,

यत्र चाधारादिनिरूपणानन्तरं प्रसङ्गादिसङ्गत्याऽऽधेयादिनिरूपणं तत्राप्याधेयादावाधेयत्वादेराधारादिनिरूपितसङ्गति-

त्ववदाधाराद्दात्वव्याधारत्वादेराधेयादिनिरूपितसङ्गतित्वसम्भवेन सर्वत्रैव सङ्गतेः परस्परानिरूपितत्वमव्याहतम् ,

एवं चानन्तराभिधानव्याप्यत्वमाद्यसङ्गतेर्लक्षणं, पूर्वाभिधानव्याप्यत्वं च द्वितीयसङ्गतेर्लक्षणम् , अनन्तराभिधेयनिष्ठत्वपूर्वाभिहितनिष्ठत्वसहितमनन्तराभिधानप्रयोजकत्वं यथाक्रमं लक्ष्यताऽवच्छेदकम् , अनन्तराभिधानप्रयोजकसम्बन्धत्वं-चोभयसाधारणं सङ्गतिमात्रलक्षणं तल्लक्ष्यताऽवच्छेदकं च, अनन्तराभिधानव्याप्त्या हि सङ्गतिरित्यादिसंगतिलक्षणपरा प्राचीनोक्तिरपीतरोपलक्षिका द्रष्टव्या,

न चानन्तराभिधानप्रयोजकसम्बन्धत्वस्य लक्ष्यताऽवच्छेदकतया लक्षणत्वासम्भव इति वाच्यम् ?

लक्ष्यताऽवच्छेदकस्य लक्षणत्वे बाधकाभावस्यान्यत्रोपपादितत्वात् शास्त्रीयसङ्गतिव्यवहारविषयत्वस्यैव लक्ष्यताऽवच्छेदकत्वसम्भवाच्च,

एवं चानन्तराभिधानव्याप्त्या हि सङ्गतिरिति प्राचीनोक्तेरुक्तरीत्या सामञ्जस्ये "न हि सङ्गतिरनन्तराभिधानव्याप्ये"तिदीधितिकारोक्तिश्चिन्त्येति प्रतिभाति, अधिकमस्मत्कृतभवानन्दीयप्रकाशेऽनुसन्धेयमिति संक्षेपः ।

तत्रानुमितिकरणमनुमानम् ,

अत्रानुमितिकरणत्वं लक्षणम् , अनुमानत्वं च लक्ष्यताऽवच्छेदकम् ,

नन्वत्रानुमानत्वस्यानुमितिकरणत्वरूपतया लक्षणलक्ष्य-

ताऽवच्छेदकयोरभेदः

न च शास्त्रीयानुमानव्यवहारविषयत्वमेवात्र लक्ष्यताऽवच्छेदकमिति वाच्यं ?

भावव्युत्पत्त्याऽनुमितावपि शास्त्रीयानुमानव्यवहारविषयत्वेन तत्साधारणस्य लक्ष्यताऽवच्छेदकत्वासम्भवात्

न च लक्षणलक्ष्यताऽवच्छेदकयोरभेदे न दोष इत्युक्तमेवेति वाच्यम् ?

तथाऽपि घटो घट इत्यादाविव पौनरुक्त्येन लक्षणवाक्यजन्यशाब्दबोधानुपपत्तेः,

अथ घटो घट इत्यादौ कथं न शाब्दबोधः ? अन्यत्र क्लृप्तशाब्दबोधसामग्र्यास्तत्रापि सत्त्वादिति चेत् ?

शाब्दबोधसामग्र्या विषयभेदेन भिन्नतया घटो घट इत्यादौ शाब्दबोधाननुभवेन तत्सामग्र्यप्रसिद्ध्याऽऽपादकाभावात् ,

न च योग्यताज्ञानस्यात्मनिष्ठप्रत्यासत्त्या हेतुत्वे विशेष्यताऽवच्छेदकभेदेनानन्तहेतुताऽऽपत्तिरिति विशेष्यताऽवच्छेदकानिष्ठप्रत्यासत्त्यैव तस्य हेतुतया द्रव्यं घट इत्यादिस्थलीयशाब्दसामग्र्येवापादिकेति वाच्यम् ?

अप्रामाण्यज्ञानोत्तेजकत्वाद्यनुरोधेन योग्यताज्ञानस्य विशेष्यताऽवच्छेदकभेदेनात्मनिष्ठप्रत्यासत्त्यैव हेतुत्वात्,

अस्तु वा विशेष्यताऽवच्छेदकनिष्ठप्रत्यासत्त्या तस्य हेतुत्वं तथाऽपि न क्षतिः; विशेष्यताऽवच्छेदकतासम्बन्धेन घटत्वाद्यवच्छिन्नप्रकारताशालिशाब्दबोधं प्रति घटत्वाद्यनवच्छिन्ना या वि-

श्येयता तदवच्छेदकतासम्बन्धेनैव घटत्वाद्यवच्छिन्नप्रकारताशालियोग्यताज्ञानस्य हेतुतया घटो घट इत्यादौ तादृशकारणाभावेन शाब्दबोधासम्भवात्,

अत्र कार्यतादिशि घटत्वाद्यवच्छिन्नत्वं घटत्वादिपर्याप्तावच्छेदकताकत्वं, तेन घटो नीलघट इत्यादौ न व्यभिचारः, अत्र कार्यतादिशि विशेष्यतायां घटत्वाद्यनवच्छिन्नत्वनिवेशान्नोक्तव्यभिचार इति न शङ्क्यं; तथाऽपि द्रव्यं नीलघट इति योग्यताज्ञानाद् द्रव्यं घट इति शाब्दाननुभवेन कारणतादिशि शुद्धघटत्वाद्यनवच्छिन्नत्वस्य निवेशनीयतया द्रव्यं नीलघट इत्यत्र व्यभिचारवारणाय कार्यतादिशि तन्निवेशस्यावश्यकत्वात्,

अस्तु वा तथा; तथाऽपि नास्माकं क्षतिः,

नवीनास्तु—विशेष्यताऽवच्छेदकतया घटत्वाद्यनवच्छिन्नप्रकारताशालिशाब्दबोधे घटत्वादिभेदस्यातिरिक्तहेतुतामङ्गीकृत्य घटो घट इत्यादौ शाब्दबोधं वारयन्ति,

तच्चिन्त्यं—तथा सति घटो नीलघट इत्यादौ व्यभिचारवारणाय शुद्धघटत्वाद्यनवच्छिन्नत्वस्यैव प्रकारतायां निवेशेनावश्यापेक्षायां नीलघटो नीलघट इत्यादिशाब्दबोधवारकनीलघटत्वादिभेदहेतुतायां घटो नीलघट इत्यादौ विशिष्टस्यानतिरिक्ततया घटत्वादौ नीलघटत्वादिभेदाभावेन व्यभिचारात्, उपदर्शितरीत्या क्लृप्तयोग्यताज्ञानहेतुताऽवच्छेदकसम्बन्धघटकविशेष्यतायां घटत्वाद्यनवच्छिन्नत्वनिवेशनैवोपपत्तौ घटत्वादिभेदस्यातिरिक्तानन्तहेतुत्वकल्पने गौरवाच्च,

एतेन तदनवच्छिन्नप्रकारताऽवच्छेदकत्वात्मकतदविषयकप्र-
तीतिविषयत्वरूपपारिभाषिकतद्भेदहेतुताऽङ्गीकारेण घटो घट इ-
त्यादौ शाब्दबोधवारणं सम्भवति घटत्वादौ पारिभाषिकनील-
घटत्वादिभेदसत्त्वेनोक्तव्यभिचारासम्भवादित्यपि निरस्तम् ,

तथाऽप्यतिरिक्तानन्तहेतुताप्रयुक्तगौरवस्य दुर्वारत्वादिति चेत्?

मैवम्-अनुमितिव्यावृत्तशास्त्रीयानुमानव्यवहारविषयताविशेषस्य तादृशविषयताविशेषसम्बन्धेनानुमानव्यवहारवत्त्वस्यैव वा लक्ष्यताऽवच्छेदकत्वेन लक्षणवाक्यजन्यशाब्दबोधानुपपत्त्यभावात् ,

यद्वाऽनुमानशब्दवाच्यत्वमेव लक्ष्यताऽवच्छेदकम् ,

न चानुमाननामकपुरुषविशेषसाधारण्यान्नैतस्य लक्ष्यताऽवच्छेदकत्वसम्भव इति वाच्यम् ?

तादृशपुरुषविशेषस्याधुनिकानुमानपदसङ्केतविषयत्वेऽप्यनुमानपदवाच्यत्वाभावस्यान्यत्रोपपादितत्वात् ,

वस्तुतस्तु—अनुमानशब्दवाच्यत्वेऽनुपूर्वमाधातुतदुत्तरल्युड्भ्यां स्वस्वशक्तिग्रहजन्यपदार्थोपस्थितिद्वारा जायमानपरस्परान्वयबोधविषयत्वं ; न तु यथाश्रुतं—व्याप्तिज्ञानादिरूपानुमाने तस्याभावात् ,

एवं चानुमाननामकपुरुषसाधारण्यसम्भावनाऽपि नेति सारम् ,

प्रकारान्तरं चान्यत्र मत्कृतौ द्रष्टव्यमिति सङ्क्षेपः ।

इदं चानुमानमात्रलक्षणम् अनुमानप्रमाणलक्षणं च प्रमाऽनु-

मितिकरणत्वम्, एवमुपमानादावप्यग्रे बोध्यम्।

परामर्शजन्यं ज्ञानमनुमितिः,

अत्र परामर्शजन्यज्ञानत्वं लक्षणम्, अनुमितित्वजातिर्लक्ष्यताऽवच्छेदिका,

न च परामर्शप्रत्यक्षस्य विषयतया परामर्शजन्यत्वेन तत्रातिव्याप्तिरिति वाच्यम्?

परामर्शत्वेन जनकताया अग्रे विवक्षणेनानतिप्रसङ्गाद्,

अत्र वदन्ति–प्रत्यक्षं प्रति विषयस्य हेतुत्वे प्रमाणाभावादेवानतिप्रसङ्गः,

अत्र केचित्–प्रत्यक्षं प्रति विषयस्याहेतुत्वे विनष्टरूपादीनां–प्रत्यक्षापत्तिः; तत्रापि चक्षुःसंयुक्तसमवायरूपकारणसत्वाद्,

न च यत्क्षणाव्यवहितपूर्वक्षणावच्छेदेन यत्र देशे कारणताऽवच्छेदकसम्बन्धेन कारणं तत्क्षणावच्छेदेन तत्र कार्यमित्येवंरूपसामग्रीव्याप्तिस्वीकाराद् न विनष्टरूपादीनां प्रत्यक्षमापादयितुं शक्यते; तत्र कार्याव्यवहितपूर्वक्षणे रूपस्यासत्वात् तन्निष्ठचक्षुःसंयुक्तसमवायाधिकरणतायास्तादृशक्षणानवच्छिन्नत्वाद् अवच्छेद्याधिकरणस्यैवावच्छेदकत्वादिति वाच्यम्?

उक्तसामग्रीव्याप्त्यादरे समानविशेष्यकत्वप्रत्यासत्त्या ज्ञानेच्छाऽऽदीनां कार्यकारणभावानुपपत्तेः, अनागतपाकादिविषयकज्ञानादनागतपाकादिविषयकेच्छोत्पत्त्याऽनागतविषये च कार्याव्यवहितपूर्वक्षणावच्छेदेन विषयतारूपकारणताऽवच्छेदकप्रत्यासत्त्या ज्ञानस्य सत्वात् तदनुरोधेन यत्क्षणाव्यवहितपूर्वक्षणवृत्तिकारणस्य

कारणतावच्छेदकसम्बन्धेन यदधिकरणं तत् तत्क्षणसम्बद्धकार्या-धिकरणमित्येवंरूपव्याप्त्यादरे विनष्टरूपस्यापि तादृशकारणता-ऽधिकरणतयाऽऽपत्तेर्दुर्वारत्वात्, तथा च तद्वारणाय लौकिकवि-षयतासम्बन्धेन प्रत्यक्षं प्रति तादात्म्यप्रत्यासत्त्या विषयत्वेन हेतुत्वमित्याहुः,

अत्रेदं चिन्त्यते-यत्क्षणाव्यवहितपूर्वक्षणसम्बद्धकारणाधि-करणं यत् तत् तत्क्षणसम्बद्धकार्याधिकरणमित्येवंरूपसामग्रीव्या-प्त्यादरे बाधबुद्धिद्वितीयादिक्षणेऽपि विशिष्टबुद्ध्यापत्तेः; तत्क्षणा-व्यवहितप्राक्क्षणसम्बद्धस्य बाधाभावस्यान्यक्षणावच्छेदेन तादा-त्म्यवृत्तित्वात् तथा च कार्यताऽवच्छेदककारणताऽवच्छेदकभेद-भिन्ना सामग्रीव्याप्तिरुपगन्तव्या, आवश्यकश्च विषयविशेषविश्र-मः, यत्तत्त्वस्य सर्वसाधारणस्य दुर्वचत्वाद्,

इत्थं च संयुक्तसमवायादिहेतुतायां पूर्वोक्तसामग्रीव्याप्ते-रादरणीयतया नानुपपत्तिगन्धोऽपि,

केचिद्-विषयस्याहेतुत्वे घटादिविनाशोत्पत्तिकाले तत्प्र-त्यक्षापत्तिः-तदव्यवहितपूर्वक्षणावच्छेदेन तत्र सन्निकर्षादिसत्त्वाद्,

न चेष्टापत्तिः; प्रत्यक्षस्य वर्तमानमात्रविषयकत्वनियमात् तदुक्तं—

"सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिने"ति,

विषयस्य हेतुत्वे च तस्य कार्यसहभावेन तथात्वाभ्युपगमे न काऽप्यनुपपत्तिरित्याहुः,

तदपि न साधीयः-घटादिविनाशोत्पत्तिकाले तत्प्रत्यक्षाभ्युप-

गमे क्षतिविरहाद्, उपदर्शितप्रवादः स्थूलकालमादायैव वर्त्तमानत्वावलम्बितत्वाद् अत एव संख्याग्रन्थे द्वित्वादिनाशकालेऽपि तत्प्रत्यक्षमुररीकृतं दीधितिकृता,

अथ वा–प्रकृतस्थले तत्क्षणावच्छेदेन सन्निकर्षाधिकरणत्वे सति तदव्यवहितपूर्वक्षणावच्छेदेन सन्निकर्षाधिकरणं यत्तत् तत्क्षणावच्छेदेन प्रत्यक्षाधिकरणमित्येवं सामग्रीव्याप्त्युगमाद्, विनाशकाले च घटस्यासत्त्वेन तत्र तत्क्षणावच्छेदेन सन्निकर्षानधिकरणत्वान्न तदानीं प्रत्यक्षापत्तिः,

वस्तुतस्तु–तत्क्षणसम्बद्धं सत् तत्क्षणाव्यवहितप्राक्क्षणावच्छेदेन सन्निकर्षाधिकरणं यत्तत् तत्क्षणावच्छेदेन प्रत्यक्षाधिकरणमित्येवंरूपव्याप्तिरुपगन्तव्या, घटादेश्च विनाशक्षणासम्बद्धतया न तत्क्षणावच्छेदेन प्रत्यक्षापत्तिः,

इत्थं च न विनश्यदवस्थसंनिकर्षाद्विषयसत्त्वेऽपि प्रत्यक्षानुत्पाद इष्टापत्तिः,

अथ घटचाक्षुषस्य विषयतया पट आपत्तिवारणाय विषयस्य तत्तद्व्यक्तित्वेन हेतुत्वस्यावश्यकत्वाद् "यद्विशेषयोरि"ति न्यायेन सामान्यहेतुत्वमायास्यतीति चेद् ?

न–घटपटोभयसन्निकर्षकाले समूहालम्बनस्यैवोत्पत्त्या घटे पटप्रत्यक्षस्योत्पत्तेरिष्टत्वात् कालान्तरोत्पन्नप्रत्यक्षव्यक्तीनां च घटेऽप्यापत्तिसत्त्वात्तद्वारककारणतया पटेऽपि तदापत्तेर्वारणसम्भवाद्,

अथ पटादिसन्निकर्षदशायां बाधाभावादिवलाद् घटसन्निक-

र्षादिकं विनैव समवायेनात्मनि घटादिविशिष्टबुद्ध्यापत्तिः;

तद्धर्मावच्छिन्नयत्किञ्चिद्व्यक्तिनिष्ठविषयताप्रत्यासत्त्यवच्छिन्नकार्यतानिरूपितकारणताऽवच्छेदका यावन्तो धर्मा ऐकाधिकरण्यापन्नाः; प्रत्येकतदवच्छिन्नसमूहात्मकविषयनिष्ठकार्योत्पादकसहकृतबाधाभावादिघटितात्मनिष्ठसामग्र्याः समवायसम्बन्धेन फलोपधायकत्वाद्, उक्तस्थले च भूतलं घटवदित्यादिप्रत्यक्षे यत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणताऽवच्छेदकीभूतचक्षुःसंयोगत्वाद्यवच्छिन्नानां पट एव सत्त्वात्; तथा च तादृशापत्तिवारणाय तत्तद्व्यक्तिप्रत्यक्षं प्रति तत्तद्व्यक्तित्वेन विषयस्य हेतुत्वमावश्यकं; तथा च सति तादृशयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणताऽवच्छेदकयावदन्तर्गतघटव्यक्तित्वावच्छिन्नस्य तादात्म्यसम्बन्धेन पटेऽसत्त्वाद् घटे चक्षुःसंयोगादीनामसत्त्वादैकाधिकरण्यापन्नतादृशकूटात्मकसामग्र्याः कुत्राप्यसत्त्वेन नापत्तिरिति चेद् ?

न–घटाद्यवच्छेदेनैकाधिकरण्यापन्नतादृशकारणकलापसहकृतबाधाभावादीनामेव फलोपधायकत्वाभ्युपगमात्तादृशहेतुत्वानभ्युपगमेऽप्यापत्तेरसम्भवात्,

केचित्तु–विषयस्याहेतुत्वेऽतीन्द्रियगुरुत्वादीनां प्रत्यक्षापत्तिः सन्निकर्षरूपकारणसत्त्वादिति लौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति विषयस्य लौकिकविषयतावत्त्वेन हेतुत्वमभ्युपेयमिति,

अथैवं रूपमहत्त्वादीनामपि हेतुत्वं विलीयेत गगनादीनामपि लौकिकविषयतावत्त्वविरहेणैव प्रत्यक्षवारणसम्भवादिति चेद् ? विलीयत एव एतावताऽपि क्षतिविरहादित्याहुः,

तत्र तथा सति गुरुत्वादीनां लौकिकविषयत्वाभावस्य लौकिकविषयताशालिप्रत्यक्षविरहप्रयुक्ततयाऽन्योन्याश्रयप्रसङ्गात् लौकिकविषयताविरहाप्रयोजकीभूताभावप्रतियोगिकारणान्तरकल्पने विषयस्य तादृशरूपेण हेतुताया अकिञ्चित्करत्वाद्,

अस्तु वा लौकिकविषयतात्वेन हेतुता; लौकिकविषयतात्वेन हेतुत्वेनानन्तविषयतानामवच्छेदकत्वेन गौरवात्,

केचित्तु—सूक्ष्मावयवावच्छेदेन सन्निकर्षदशायां महत्तरघटादीनां प्रत्यक्षवारणाय हस्तादिपरिमितद्रव्यचाक्षुषे वितस्त्यादिपरिमाणवदवयवावच्छिन्नसन्निकर्षत्वेन हेतुतायाः कल्पनाद् दशहस्तपरिमितपटे वितस्त्यवच्छेदेन सन्निकर्षसत्त्वे तत्रैकहस्तादिद्रव्यचाक्षुषापत्तिरिति तद्वारणाय तादृशद्रव्यचाक्षुष एकहस्तद्रव्यत्वादिना विषयस्य हेतुत्वमावश्यकमित्याहुः,

तदप्यसत्—तत्रापि लाघवात्तादृशविलक्षणपरिमाणहेतुताया एव न्याय्यत्वाद्,

एतेन घटत्वनिर्विकल्पकोत्तरं घटमहं जानामीतिप्रत्यक्षवारणाय विषयतासम्बन्धेन तादृशप्रत्यक्षं प्रति घटत्वप्रकारकत्वेन विषयस्य हेतुत्वमावश्यकमित्यपि परास्तम्,

घटत्वप्रकारतात्वेन तादृशप्रकारतानामवच्छेदकत्वापेक्षया घटत्वप्रकारितात्वेन घटप्रकारिताया हेतुत्वस्यैवोचितत्वाद्,

एवं द्रव्यान्यद्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषवच्चक्षुःसंयुक्तसमवायत्वेन हेतुतायाः क्लृप्तत्वाद्घटादिष्वपि तादृशकारणसत्त्वेन द्रव्यान्यद्रव्यसमवेतप्रत्यक्षापत्तिरिति द्रव्यान्यप्रत्यक्षं प्रति

द्रव्यान्यत्वेन विषयस्य हेतुत्वमावश्यकं—

न च घटविषयकप्रत्यक्षस्यावश्यं रूपादिविषयकतया तत्र द्रव्यान्यद्रव्यसमवेतप्रत्यक्षं विषयतयोत्पद्यत एवेति वाच्यम् ?

द्रव्यान्यरूपादिविषयकप्रत्यक्षस्य विषयतासम्बन्धेन त्रुटावुत्पत्त्या तत्र चाक्षुषत्वचक्षुःसंयुक्तसमवायरूपकारणविरहेण व्यभिचारः स्यात्; तद्वारणाय द्रव्यान्यद्रव्यसमवेतवृत्तिविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति तादृशसन्निकर्षत्वेन हेतुत्वं कल्पनीयम्,

इत्थं च घटादावपि तादृशसम्बन्धेन चाक्षुषापत्तिवारणाय द्रव्यान्यत्वेन हेतुत्वमावश्यकमित्यपि न सम्यग्; द्रव्यभेदवत्त्वेन हेतुत्वापेक्षया द्रव्यभेदत्वेन हेतुताया एव कल्पयितुमुचितत्वात्, जात्यतिरिक्तपदार्थनिष्ठावच्छेदकतायाः किञ्चिद्धर्मावच्छिन्नत्वनियमेन भेदवत्त्वेनैव भेदस्यावच्छेदकताया व्यक्तत्वात्तदपेक्षया स्वरूपतो भेदत्वस्यावच्छेदकत्वे लाघवाद्,

यत्तु—पटाकाशसंयोगादीनां चाक्षुषवारणाय सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकचाक्षुषविषयत्वाभावाभावस्य द्रव्यान्यसद्वृत्तिविषयतासम्बन्धेन चाक्षुषं प्रति हेतुत्वं स्वीकरणीयं—शुद्धविषतायाः कार्यताऽवच्छेदकसम्बन्धत्वेन त्रसरेणुप्रत्यक्षेत्वादिप्रत्यक्षे च व्यभिचारः स्यात्; तद्वारणाय द्रव्यान्यमद्रव्यवृत्तिविषयतात्वेन तथात्वम्,

इत्थं च घटविशेषत्वचैत्रत्वादौ तादृशकारणसत्वात्तत्र द्रव्यान्यसद्वृत्तिविषयतासम्बन्धेन प्रत्यक्षापत्तिवारणाय सद्वृत्तिविषयतासम्बन्धेन प्रत्यक्षं प्रति सत्त्वेन हेतुत्वमावश्यकमि-

ति तत्र द्रव्यान्यसद्वृत्तिसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकचाक्षुषविषयत्वाभावाभावस्यैव हेतुतया तस्य च त्रसरेण्वादिषु सत्त्वेन व्यभिचारानवकाशात्, शुद्धविषयताया एव कार्यताऽवच्छेदकमत्यासत्तित्वाभ्युपगमात्तादृशप्रत्यासत्त्या च चैत्रत्वादौ प्रत्यक्षोत्पत्तेरिष्टत्वात्,

युज्यते चायमेव प्रकारः---द्रव्यान्यसद्वृत्तीविषयतायाः कार्यताऽवच्छेदकसम्बन्धत्वमते पटाकाशसंयोगादौ सद्भिन्नचाक्षुषापत्तिवारणाय तत्र सद्भिन्नत्वेन हेतुताया आधिक्यप्रसङ्गात्,

यत्तु—मनःसंयुक्तसमवायबलाददृष्टसंस्कारादीनां प्रत्यक्षवारणाय गुणमानसत्वावच्छिन्नं प्रति ज्ञानादिरूपविषयस्य विजातीयगुणत्वेन हेतुत्वमावश्यकमिति,

तदप्यनुपादेयमेव,

विजातीयगुणत्वेन हेतुत्वेऽपि तज्जन्यताऽवच्छेदकानाक्रान्तस्य सत्ताऽऽदिमानसस्य प्रसिद्ध्या सामान्यसामग्रीबलादापत्तिसम्भवाद् मानससामान्यं प्रत्यदृष्टादीनां विजातीयगुणत्वेन प्रतिबन्धकताया आवश्यकत्वात्तादृशहेतुताया अकिञ्चित्करत्वात्,

यत्तु—आत्ममानसं प्रति मनःसंयोगस्य हेतुतया तस्य च शरीरादावपि सत्त्वात्तस्य मानसापत्तिस्तद्वारणायात्ममानसत्वावच्छिन्नं प्रति विषयस्यात्मत्वेन हेतुत्वमावश्यकं—

न च विजातीयमनोयोगस्यैव मानसहेतुत्वात् शरीरादौ च विजातीयमनोयोगाभावान्न मानसापत्तिरिति वाच्यम्?

एवमपि विजातीयमनोयोगस्य मनस्यपि सत्त्वेन मनःप्रतियोगिकसंयोगत्वेन हेतुत्वे च विनिगमनाविरहेण कारणताबाहुल्यान्मानसापत्तिस्तद्वारणायात्मत्वेन हेतुत्वमात्रश्यकमित्याहुः,

तन्न—आत्ममानसं प्रति विजातीयसंयोगसम्बन्धेन मनस्त्वेन हेतुत्वात् स्वस्मिंश्च मनसस्तादृशसम्बन्धेनासत्त्वादेव मानसवारणसंभवादिति सङ्क्षेपः,

तस्मात्प्रत्यक्षं प्रति विषयत्वेन हेतुताया अभावान्नातिव्याप्तिरिति ।

ननु परामर्शत्वस्यानुगतस्य दुर्वचतया कथमुक्तस्य लक्षणत्वं मानाभावेन परामर्शत्वस्य जातित्वासिद्धेः,

न चानुमितित्वावच्छिन्नजन्यतानिरूपितजनकताऽवच्छेदकतया परामर्शत्वस्य जातित्वसिद्धिरिति वाच्यम् ?

तुल्ययुक्त्या परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यताऽवच्छेदकतयैवानुमितित्वस्य जातित्वासिद्धेर्वक्तव्यतयाऽनुमितित्वस्य जातित्वासिद्धावनुमितित्वावच्छिन्नजन्यताग्रहे तन्निरूपितजनकताऽवच्छेदकतया परामर्शत्वस्य जातित्वसिद्धिः, परामर्शत्वस्य जातित्वसिद्धौ च परामर्शत्वावच्छिन्नजनकताग्रहे तन्निरूपितजन्यताऽवच्छेदकतयाऽनुमितित्वस्य जातित्वसिद्धिरित्यन्योन्याश्रयात् ,

न च यागस्वर्गादिस्थल इवानुमितित्वसामानाधिकरण्येन परामर्शजन्यताग्रहे तन्निरूपितजनकताऽवच्छेदकतया परामर्शत्वस्य जातित्वसिद्धौ परामर्शत्वावच्छिन्नजनकताग्रहे तन्निरूपि-

तज्जन्यतावच्छेदकतयाऽनुमितित्वस्य जातित्वसिद्धिरिति नान्यो-न्याश्रय इति वाच्यम् ?

तथाऽपि जातित्वज्ञाने जातिसांकर्यज्ञानस्य प्रतिबन्धकतया परामर्शत्वे चाक्षुषत्वादिना साङ्कर्यज्ञानरूपप्रतिबन्धकसत्त्वेन परामर्शत्वस्य जातित्वासिद्धेरसम्भवात् ,

न च तस्य ग्राह्याभावानवगाहित्वेन प्रतिबन्धकत्वासम्भव-इति वाच्यम् ?

ग्राह्याभावानवगाहित्वेऽपि भूतत्वादि मूर्त्तत्वादिसङ्कीर्णमिति ज्ञानसत्त्वे भूतत्वादौ जातित्वज्ञानानुदयस्यानुभवसिद्धतया मणि-मन्त्रादिन्यायेन स्वातन्त्र्येणैव प्रतिबन्धकत्वाङ्गीकारात् ,

न च सर्वेषां तादृशानुभवाभावान्नैवमिति वाच्यम् ?

सर्वेषामनुभवाभावे प्रेक्षावतामनुभवबलेनैव शास्त्रे हेतुत्वस्य प्रतिबन्धकत्वस्य चाङ्गीकारात् ,

अन्यथा न्यायवैशेषिकतन्त्रानभिज्ञानां विदुषामपि व्याप-कसामानाधिकरण्यादिरूपव्याप्तिज्ञानसत्त्व एवानुमितिः; साध्या-भाववद्वृत्तित्वरूपव्यभिचारज्ञानसत्त्वे च न तादृशव्याप्तिज्ञानामि-त्यनुभवाभावेनानुमितौ तादृशव्याप्तिज्ञानहेतुत्वं तादृशव्याप्तिज्ञाने च तादृशव्यभिचारज्ञानस्य मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वं-च न सिद्ध्येत् ,

न च साङ्कर्यज्ञानप्रतिबन्धकत्वं न कस्यापि प्रेक्षावतोऽनु-भवसिद्धमिति वाच्यम् ?

विषयतया जातित्वज्ञानप्रतिबन्धकताऽवच्छेदकत्वरूपजा-

तिबाधकत्वाक्रान्तानां मध्ये साङ्कर्यं परिगणितवतामाचार्याणां प्रेक्षावत्त्वाभावस्य केनापि वक्तुमशक्यत्वात्,

किञ्चानुभवसन्देहे लाघवतर्कस्य निर्णायकत्वं सर्वतन्त्रसिद्धं; कथमन्यथा बाधादौ प्रत्यक्षताऽऽदिविवादे लाघवेनातीन्द्रियत्वाद्याकारो नैयायिकानां परेषां चाख्यातादौ कर्तृवाचकताऽऽदिविवादे स्वाभिमततत्तल्लाघवप्रदर्शनेन तत्तत्प्रत्यक्षाङ्गीकारः, तथा च लाघवेन सांकर्यज्ञानप्रतिबन्धकत्वमावश्यकम्,

तथा हि—तादृशप्रतिबन्धकत्वे जातित्वाभावव्याप्यमूर्त्तत्वसंकीर्णभूतत्वसमानकालीनोपाधित्ववद् भूतत्वमित्यादितदभावव्याप्यवत्त्वज्ञानत्वेन मूर्तत्वसंकीर्णभूतत्वसमानकालीनोपाधित्वंजातित्वाभावावच्छेदकमित्यवच्छेदकत्वनिर्णयविशिष्टमूर्त्तत्वसङ्कीर्णभूतत्वसमानकालीनोपाधित्ववद्भूतत्वमित्याद्यवच्छेदकधर्मदर्शनत्वेन च गुरुरूपेण जातित्वज्ञाने प्रतिबन्धकत्वं न कल्प्यते तादृशज्ञानकाले साङ्कर्यज्ञानस्यावश्यकतया तत्प्रतिबन्धकतयैवोपपत्तेः,

एवं प्रत्यक्षेच्छाविशिष्टमूर्त्तत्वसंकीर्णभूतत्ववद् भूतलमित्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसामग्र्याः गुरुभूताया जातित्वानुमित्यादौ प्रतिबन्धकत्वं न कल्प्यते तादृशसामग्रीकाले तद्घटकविशेषणताऽवच्छेकप्रकारकनिर्णयात्मकसाङ्कर्यज्ञानस्यावश्यकतया तत्प्रतिबन्धकतयैवोपपत्तेः,

न च तज्जातिसमानाधिकरणभेदप्रतियोगिताऽवच्छेदकत्वे

सति तज्जात्यवच्छिन्नप्रतियोगिताकभेदसमानाधिकरणत्वे सति तज्जातिसामानाधिकरण्यस्यैव तत्तज्जातिसाङ्कर्यरूपतया साङ्कर्यं-नानुगतमिति वाच्यम् ?

तावता क्षत्यभावात्, स्वसमानाधिकरणभेदप्रतियोगिताऽव-च्छेदकत्वस्वावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यस्वसामा-नाधिकरण्यैतत्रितयसम्बन्धेन जातिमत्त्वस्यैवानुगतसाङ्कर्यरू-पत्वसम्भवाच्च,

अधिकमन्यत्र मत्कृतौ द्रष्टव्यम्।

अथ परामर्शत्वस्य स्मृतित्वव्याप्यतया न साङ्कर्यं—

न च चाक्षुषत्वादिव्याप्यत्वमादाय विनिगमनाविरह इति वाच्यम् ?

सर्वत्र चाक्षुषादिसामग्र्या असम्भवात् स्मृतेर्निश्चयत्वनि-यमेन परामर्शजनकतायां निश्चयत्वानिवेशप्रयुक्तलाघवस्यैव वि-निगमकत्वाच्च,

अत एव मानससामग्र्याः सर्वत्र सम्भवेऽपि न मानसत्व-व्याप्यत्वमादाय विनिगमनाविरहः,

न चानुमित्यादेरपि निश्चयत्वनियमेनानुमितित्वादिव्या-प्यत्वमादाय विनिगमनाविरह इति वाच्यम् ?

अनुमित्यादिसामग्र्या अपि सर्वत्रासम्भवाद् अनुमितित्व-व्याप्यत्वेऽनवस्थाऽऽपत्तेश्च,

न च स्मृतित्वव्याप्यत्वे परामर्शेऽननुगतोद्बोधकहेतुताऽऽ-पत्त्या मानसत्वव्याप्यत्वमेव सम्यग्,

विशिष्टानुभवे विशेषणज्ञानस्य हेतुतया मानसत्वव्याप्यत्वेऽपि तत्तद्विशेषणज्ञानहेतुताऽऽपत्त्या साम्यादिति चेद् ? न-स्मृतित्वव्याप्यत्व उपेक्षाऽऽत्मकपरामर्शादनुमित्यपलापापत्तेः,

न चैवं मानसत्वव्याप्यत्वमेवास्त्विति शङ्क्यम् ?

भक्तित्वश्रद्धात्वयोर्मानसत्वव्याप्यजातित्वस्योपस्कारसम्मततया युक्तिसिद्धतथा च तत्साङ्कर्यस्य दुर्वारत्वादिति चेद् ?

मैवं—व्याप्तिविशिष्टपक्षधर्मताज्ञानस्यैव परामर्शत्वाद्,

न चैवमपि विशेषणज्ञानविधया परामर्शजन्ये विशिष्टबुद्धिमात्रेऽतिव्याप्तिरिति वाच्यम् ?

परामर्शत्वेन जनकताया विवक्षितत्वात्,

न चासम्भवः समानविशेषणत्वानुरोधेन व्याप्यत्वपक्षनिश्चयत्वेनैवानुमितिहेतुतया निरुक्तपरामर्शत्वेनाजनकत्वादिति वाच्यम् ?

व्याप्यवत्पक्षनिश्चयत्व एव व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वस्य तात्पर्यात्,

न च तथाऽपि वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधे विशेषणताऽवच्छेदकप्रकारकनिश्चयविधया व्याप्यवत्पक्षनिश्चयत्वेन हेतुतया विशिष्टस्मरणे चानुभवविधया तादृशनिश्चयत्वेन हेतुतया तत्रातिव्याप्तिरिति वाच्यम् ?

अभावाविषयकत्वेन जन्यज्ञानस्य विशेषणीयतया व्याप्तिघटकतयाऽभावविषयके तत्रातिव्याप्तेरसम्भवात्,

अधिकमन्यत्र मत्कृतौ द्रष्टव्यम्,

न च तथाऽपि व्याप्तेः साध्यादिभेदेन स्वरूपभेदेन चभिन्नतया पक्षस्य च स्वरूपभेदेन भिन्नतयैकोपादानेऽन्यपक्षकान्यसाध्यकानुमितावव्याप्तिरिति वाच्यम् ?

जातिघटितलक्षणकरणेनादोषाद् , अत एव दीधितिकारेण व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानमनुमितिरिति चिन्तामणिकारोक्तलक्षणवाक्यं वाह्निव्याप्यवत्पर्वतनिश्चयत्वाच्छिन्नकारणताप्रतियोगिकाभावाविषयकवृत्तिकार्यतायाः सामानाधिकरण्येनावच्छेदिका या जातिस्तद्वत्यनुमितिरित्यर्थकतयाव्याख्यातम् ,

वस्तुतस्तु—अभावाविषयकत्वं लक्षणे नोपादेयमेव प्रयोजनाभावात् ,

न चैवमुक्तविशिष्टवैशिष्ट्यबोधेऽतिप्रसङ्गः कथं वारणीय इति वाच्यम् ?

इच्छाऽऽदिप्रत्यक्षे व्यभिचारवारणाय विशिष्टवैशिष्ट्यबोधे विशेषणताऽवच्छेदकप्रकारकगुणत्वेनैव हेतुतयाऽतिप्रसङ्गाभावाद् अन्तरा विषयस्मरणकल्पने गौरवात् ,

यत्तु—आपत्तावापाद्यव्याप्यवत्तानिश्चयत्वेन हेतुतया तत्रातिप्रसङ्गवारणायाभावाविषयकत्वमवश्यमुपादेयमिति,

तन्न—आपत्तेरापादकसंशयानिवृत्तिफलकत्वानुरोधेन संशयनिश्चयसाधारणापाद्यव्याप्यवत्ताज्ञानत्वेनैव तत्र हेतुतया तत्र पक्षधर्मतांशेऽप्रामाण्यानिश्चयास्कान्दितापाद्यव्याप्यवत्तानिश्चयत्वेन हेतुतया वाऽतिप्रसङ्गाभावात् ,

अथ वाऽऽपत्तावापाद्यव्यतिरेकनिर्णयस्य हेतुतया तत्राति-व्याप्तिवारणाय तन्निवेशनमावश्यकमिति चेद् ?

न—तथाऽपि लाघवेन मानसान्यत्वस्यैव जातौ निवेशात्,

यदपि—अभावप्रत्यक्षे प्रतियोगिताऽवच्छेदकप्रकारकप्रतियो-गिनिश्चयस्य हेतुतया वह्निव्याप्यधूमवान् पर्वतो नास्तीत्याद्यभा-वप्रत्यक्षेऽतिप्रसङ्गवारणायाभावाविषयकत्वमुपादेयमिति तदपि न

अभावप्रत्ययो हि विशिष्टवैशिष्ट्यमर्यादां नातिशेत इति तत्र प्रतियोगिताऽवच्छेदकप्रकारकप्रतियोगिनिश्चयत्वेन स्वातन्त्र्ये-णाहेतुत्वात् ,

न चोक्तविशिष्टस्मरणेऽतिप्रसङ्गवारणायापि तदुपादेयमिति वाच्यम् ?

चरमज्ञानपदस्यानुभवपरतयैव तत्रानतिप्रसङ्गात् ,

वस्तुतो—ज्ञानपदस्यानुभवपरत्वमपि नादरणीयं, कारणता-याः कार्यताऽवच्छेदककारणताऽवच्छेदकसम्बन्धभेदेन भिन्नतया परामर्शस्य येन सम्बन्धेनानुमितौ कारणता तत्सम्बन्धघटितकार-णताया एव लक्षणे निविष्टतयाऽनतिप्रसङ्गाद् अनुभवस्य वि-शिष्टस्मरणे वक्ष्यमाणरीत्या संस्कारद्वारा हेतुत्वेनानुभवस्य व्या-पारसम्बन्धावच्छिन्नकारणतारूपकरणत्वानुरोधेन स्वजन्यसंस्का-रसम्बन्धेनैवानुभवस्य विशिष्टस्मरणे हेतुत्वात् ,

तथा हि—सर्ववादिसम्मतम् अन्वयव्यतिरेकासिद्धं तावद-नुभवस्य स्मरणहेतुत्वं, तच्च व्यापारद्वारैव विनष्टेऽप्यनुभवे स्मर-णोदयाद् व्यापारश्च संस्कारविशेषो भावनाऽऽख्यः,

न च निर्युक्तिकोऽयं संस्कारः स्मरणेऽनुभवस्य स्वध्वंस-द्वारैव हेतुत्वसम्भवात् प्रतियोगिध्वंसयोरेककार्यजनकत्वानियमस्याप्रयोजकत्वादिति वाच्यम् ?

तस्य हि द्वारत्वे कालरोगयोरस्मरणप्रयोजकत्वानुपपत्तेः संस्कारनाशकतयैव तयोस्तथात्वाद् नोपपद्यते च पुनः पुनः स्मरणस्य झटिति स्मृतिप्रयोजकता; विजातीयसंस्काराधायकत्वेनैव तत्सम्भवात्,

न चोद्बोधकस्य झटिति सम्पत्तिरेव तथा तथा स्मृतिप्रयोजकेति वाच्यम् ?

एकस्मादेवानुगतोद्बोधकविशेषात् पुनः पुनः स्मृतस्यानुभूतस्य च स्मरणमवश्यं जायते नातथाभूतस्येति सार्वलौकिकानुभवस्य तादृशोद्बोधकसहकारिविजातीयसंस्कारोपगमेन विनोपपादनासम्भवाद्, अननुगतोद्बोधककल्पनायां च गौरवाद् अतएवाह दीधितिकारोऽपि–"जायते च पुनः पुनः स्मरणाद् दृढतरः संस्कार" इति, एवं यस्य पुंसः पञ्चसु दिनेषु घटस्यानुभवानन्तरं द्वित्र्यादिप्रत्यक्षोत्पत्तेरव्यवहितकाल एव पञ्चस्मरणान्युपेक्षाऽऽत्मकानि तस्य तद्दिने स्मरणोत्तरमपि घटस्मरणापत्तिः; अनुभवध्वंसस्य विद्यमानत्वात् पञ्चानामुद्बोधकानां विशेषतः स्मरणहेतुत्वकल्पने गौरवात्,

अस्मन्मते तु पूर्वं प्रत्यक्षसामग्र्याः प्रतिबन्धात्परतः संस्कारस्य फलनाश्यतया तदसत्त्वादेव नापत्तिः,

किंचैतन्मत उपेक्षाभेदाः स्मृतिजनकताऽवच्छेदककोटावेव

निवेशनीयास्तेषां च विशेषणविशेष्यभावभेदादतीव गौरवम्; उपेक्षात्वस्यानुगताननतिप्रसक्तस्यैकस्याभावेनैकभेदनिवेशायोगात् ,

अस्मन्मते च संस्काराद्यनुत्पत्त्यैवास्मरणसम्भवेन तत्र तेषामनिवेशात् ,

न च संस्कारजनकतायां तन्निवेशात्साम्यमित्याशङ्कनीयम् ?

उपेक्षाज्ञानानां संस्कारप्रतिबन्धकत्वोपगमात् ,

न चैवमुपेक्षाऽनन्तरमपेक्षाज्ञानात्संस्कारानुपपत्तिः ?

उपेक्षाव्यक्तिनाशानन्तरमेव तत्र संस्कारोपगमात् , तृतीयक्षण इव द्वितीयक्षणेऽपि संस्कारोपपत्तौ क्षतिविरहेण तद्व्यक्तेः प्रतिबन्धकत्वस्यैव वा कल्पनीयत्वात् , स्मृतौ तु न तेषां प्रतिबन्धकत्वसम्भवः तद्विनाशे स्मरणप्रसङ्गात् ,

न च तद्ध्वंसानां तथात्वम् ?

उपेक्षाज्ञानानन्तरमपेक्षाज्ञानात्स्मरणानुपपत्तेः ,

अथ वायुसंयोगव्यक्तीनां प्रतिबन्धकत्वमादाय विनिगमनाविरह इति चेत् ?

तर्हि-एकैकमुपेक्षाभेदमवच्छेदकीकृत्य दण्डचक्रादिवत् कारणताः कल्पनीयाः,

न चैवमविरलक्रमोत्पन्नोपेक्षाद्वयानन्तरं संस्कारापत्तिः ? तदुभयान्तर्गतद्वितीयव्यक्तिभेदावच्छिन्नस्यैव कार्यकालवृत्तितया कारणत्वोपगमात् तदुभयभेदयोरेककारणताऽवच्छेदकत्वेऽपि बहूनां भेदानामेकत्रानिवेशेन लाघवानपायात् ,

न च स्मृतिजनकतायामप्येतादृशी रीतिरनुसर्त्तव्येति वाच्यम् ?

यत्रोपेक्षाऽऽत्मकानामेव बहूनां व्यक्तीनामतीतत्वं तत्र ध्वं-सद्वारा तत्तद्व्यक्तिभिन्नाशेषकारणसत्त्वेन स्मरणप्रसङ्गात् ,

एतेन—अस्तु भावनाऽऽख्यः संस्कारस्तस्य सविषयकत्वं-पुनरप्रामाणिकम् अपूर्वस्य यागादिव्यापारवद् निर्विषयस्यैव तथाऽनुभवव्यापारतासम्भवात् ,

न चैवमेकविषयकज्ञानाहितसंस्कारेण विषयान्तरे स्मरणा-पत्तिरिति वाच्यम् ?

समानविषयकाधियः संस्कारद्वारा स्मरणहेतुत्वाद् व्या-पारस्य सामग्रीघटकत्वाच्च ,

न चैवं तन्मते सामान्यतः संस्कारं प्रति ज्ञानत्वेनैव हेतुतया पटादिज्ञानाहितसंस्कारस्यापि घटादिज्ञानव्यापारत्वात् कथमाप-त्तिनिरास इति वाच्यम् ?

तन्निष्ठासाधारण्योपधायकतानिरूपकस्यैव तद्व्यापारत्वाद् ,

न च यत्र घटपटोभयसमूहालम्बनस्य घटांश एवोपेक्षात्वं—तत्र तादृशज्ञानस्य पटस्मारकसंस्काररूपव्यापारवलात्पटस्येव घटस्यापि स्मरणापत्तिः यस्य पुंसो घटाद्यनुभवानन्तरं पदवि-शेषात्मकसंम्बन्धिज्ञानादेव तत्स्मरणं तत्पुरुषीयघटस्मरणसामान्यं-प्रत्येवानुगततत्पदज्ञानत्वेनोद्बोधकस्य हेतुतया तत्पदज्ञानदशा-यामुद्बोधकविरहस्यापि वक्तुमशक्यत्वादिति वाच्यम् ?

घटत्वप्रकारकघटविषयकस्मरणे तदुपेक्षाव्यक्तिभिन्नतथा-विधज्ञानत्वेनैव संस्कारद्वारा हेतुत्वाभ्युपगमात् ,

तथाऽपि घटत्वप्रकारकघटसंस्कारजनकतायां तत्तद्व्यक्तिभे-

दानां निवेशनीयतया गौरवानवकाशादिति परास्तम् ,

घटादेरुपेक्षाऽऽत्मकज्ञानानामेव बहूनां संस्काराद्वारा सत्त्वस्थले तत्स्मरणस्य वारणाय स्मृतिजनकतायां तत्तद्भेदस्यैकत्र निवेशनीयतया विशेष्यविशेषणभावभेदाद्गौरवातिशयेन घटत्वप्रकारकघटविशेष्यकस्मृतिं प्रति तथाविधसंस्कारत्वेन तथाविधसंस्कारं-प्रति चोपेक्षाभेदानामेकैकविशेषितेन तादृशज्ञानत्वेन हेतुताकल्पनस्य न्याय्यतया संस्कारस्य सविषयकत्वसिद्धेः,

किञ्च—संस्कारस्य सविषयकत्वे मानसादौ स्मृतिसामग्र्याः प्रतिबन्धकतायां घटत्वादिप्रकारकघटादिसंस्कारो निवेश्यः; अन्यथा गुरुतरतथाविधघटादिधीजन्यसंस्काराणामित्यतोऽपि तत्सिद्धिः,

केचित्तु-यत्र संशयजन्यधर्मिस्मारकः संस्कारस्तत्र कोटिस्मरणवारणाय तद्धर्मिकं तत्प्रकारकस्मरणं प्रति तथाविधनिश्चयत्वेन हेतुत्वमुपेयं तत्र च ज्ञानत्वतत्प्रकारकत्वतद्भावाप्रकारकत्वादीनां विशेष्यविशेषणभावभेदाद् गुरुतरकारणताषट्कापत्तिः,

न च तत्कार्यसहभावेन तत्प्रकारकज्ञानत्वेन तदभावाप्रकारकत्वेनकारणत्व पृथगेवेति वाच्यम् ?

तत्संशयतदभावाप्रकारकविषयान्तरधीजन्यसंस्काराभ्यां तत्प्रकारकस्मरणापत्तेरतः संस्कारस्य सविषयकत्वं स्वीकृत्य तद्विशेष्यकतत्प्रकारकस्मृतौ तथाविधसंस्कारत्वेन तथाविधसंस्कारे च कार्यसहवर्त्तितया तत्प्रकारकत्वेन तदभावाप्रकारकत्वेन ज्ञा-

नत्वेन च पृथक्कारणत्वकल्पनं युज्यते,

एवं निश्चयत्वेन स्मरणं प्रति हेतुत्वे रक्तत्वविशिष्टदण्डता-दृशदण्डविशिष्टपुरुषादिरूपानन्तविषयगोचरस्मरणहेतुतासु रक्त-त्वांशे तन्निवेशनीयम्, अन्यथा दण्डमुख्यविशेष्यकरक्तत्वनि-श्चयतत्संशयात्मकरक्तदण्डादिमत्पुरुषादिधीजन्यसंस्काराभ्यां-रक्तत्वविशिष्टदण्डादिप्रकारकस्मरणापत्तेः,

मन्मते तु तद्विषयकसंस्कारसाधारणरक्तत्वविशिष्टदण्डसं-स्कारं प्रति दण्डधर्मिकरक्तत्वाभावप्रकारकान्यज्ञानत्वेन कार्यस-हभावेनैकहेतुतयैवोपपत्तिः,

अथ स्मृतौ निश्चयत्वेन हेतुत्वं मयाऽपि नोपेयं तदुपगमेऽ-पि प्रत्येककोटिनिश्चयाहितसंस्काराभ्यां संशयात्मकस्मरणस्य दुर्वारतया तत्प्रकारकस्मृतौ तदभावादिप्रकारकस्मृतिसामग्र्याः प्रतिबन्धकत्वमवश्यं वाच्यमिति चेत्?

नैवं-संशयात्प्रत्येककोटिस्मृतेरप्यनुभवविरुद्धत्वेनोपेक्षाऽऽ-त्मकानन्तसंशयभेदानिवेशप्रयुक्तलाघवेन च तत्र निश्चयत्वेन हेतु-तायास्त्वया वाच्यत्वादित्याहुः,

तच्चिन्त्यम्-उक्तस्थले संशयाजन्यसंस्कारहेतुतयैवोपपत्तेः,

अथ तत्तद्विषयकसंस्कारस्थले जातिनिवेशे लाघवात् प्र-तिविषयं संस्कारवैजात्यमेव कल्पयितुं युज्यते समूहालम्बना-दितश्च नानाविषयस्मारको नैकः संस्कार इति न जातिसंक-रापत्तिरिति चेद्?

न-अनन्तसंस्कारव्यक्तिजातिविशेषकल्पनायां गौरवात्,

न च फलमुखत्वाद्गौरवमिदं न दोषायेति वाच्यम्?

तथाविधगौरवस्यादोषत्वे तत्तल्लिङ्गकपरामर्शजन्यताऽवच्छेदकतयाऽनुमितौ जातिविशेषाणां कल्पनाऽऽपत्तेः; नानालिङ्गपरामर्शसमूहालम्बनस्थलेऽनुमितिभेदमुपगम्य तेषां मिथः सङ्करवारणसम्भवात्,

न चैवं कृतियौगपद्यस्वीकारविरोधः परस्परविजातीयचेष्टानां विंशत्यङ्गुलीषूत्पादस्थले तत्तद्विजातीयचेष्टाजनकताऽवच्छेदकतया कृतिवैजात्यानां तत्सङ्करवारणाय कृतिभेदस्य च कल्पनाऽपेक्षया तज्जातीयचेष्टासु तादृशचेष्टावृत्तिकृतिसाध्यतानिरूपितोपादानत्वावच्छेदकत्वोभयसम्बन्धेन कृतित्वेनैककृतिहेतुतांस्वीकृत्यैककृतेरेव तादृशचेष्टानां युगपदुत्पादोपपादनस्य युक्तत्वादिति वाच्यम्?

शिक्षाऽभ्यासवतामेव जनानां विंशत्यङ्गुलीषु युगपत्परस्परविजातीयचेष्टा जायन्ते नेतरेषामित्यस्य कृतिवैजात्यमनुपगम्योपपादनासम्भवात्,

न च कृतिवैजात्यनियामकानामेव चेष्टावैजात्यनियामकत्वमुपगन्तव्यम्?

कृतेरहेतुताऽऽपातात्,

किंच संस्कारस्य सविषयकत्वे समानविषयकत्वप्रत्यासत्त्यैव तस्य हेतुत्वम्; अन्यथा तु विषयभेदेन तद्भेदवैजात्यकल्पनप्रयुक्तं गौरवं समानविषयत्वं समानप्रकारत्वं वा प्रत्यासत्तिरि-

स्यत्र विनिगमनाविरहः पुनरकिंचित्कर एव, उभाभ्यामेव प्रत्यासत्तिभ्यां हेतुतोपगमाद् आत्मनिष्ठप्रत्यासत्त्यादरे विषयप्रकारयोरेकत्र निवेशनीयत्वात् प्रतिविषयं प्रकारकोटिभेदेनैव कार्यकारणभावभेदादुभयोरेव कोटित्वे कोटिकोटिकार्यकारणभावप्रसङ्गात्,

केचित्तु—संस्कारस्य सविषयत्वे स्वनिरूपितविषयतात्वमेव कार्यकारणभावघटकः सम्बन्ध इति यादृशविषयतायां संस्कारस्तस्यामेव स्मृतिर्जायते तथा च विषयस्य प्रकारस्य भेदान्न भेदः, घटवद्भूतलमित्यादिधीजन्यसंस्कारस्य च घटादावपि मुख्यविशेष्यतोपगमाद् भूतलादिभासकोद्बोधकाभावकाले तथाविधसंस्कारतो न घटादिमुख्यविशेष्यकस्मरणानुपपत्तिः,

न चैवं घटादिस्मरणोत्पत्तिदशायामनुद्बुद्धसंस्कारविषयपटादिस्मरणापत्तिः; घटादिविषयतायामप्युक्तसम्बन्धेन स्मरणोत्पत्तेः प्रयोजकसामग्रीसत्त्वादिति वाच्यम् ?

स्वनिरूपितत्वसम्बन्धेन स्मृतिं प्रति विषयताव्यक्तीनामपि तादात्म्यसम्बन्धेन हेतुतामुपगम्य सामग्र्या नियमनीयत्वादित्याहुः,

परे तु—स्मृतिनाश्यताऽवच्छेदकतयैव संस्कारविषयतासिद्धिः तद्धर्मिकतत्प्रकारकधीजन्यसंस्कारत्वापेक्षया लघोस्तद्धर्मिकतत्प्रकारकसंस्कारत्वस्यैव तादृशस्मृतिनाश्यताऽवच्छेदकत्वात्सामान्यतः संस्कारत्वस्मृतित्वाभ्यां नाश्यनाशकभावे घटादिधीजन्यसंस्कारस्य पटादिस्मृत्या नाशापत्तेः,

न च प्रतियोगितासम्बन्धेन संस्कारनाशं प्रति जनकता-

सम्बन्धेन स्मृतेः कारणत्वान्नेयमापत्तिरिति वाच्यम् ?

संस्कारस्य निर्विषयत्वे सामान्यतः स्मृतित्वसंस्कारत्वाभ्यामेव कार्यकारणभावाद्घटादिस्मारकसंस्कारस्यापि पटादिस्मृतिजनकत्वानपायात्, संस्कारस्य तत्तद्व्यक्तित्वेन स्मृतिजनकतायां मानाभावेन तस्याः संबन्धत्वमुपगम्यापत्तिनिरासायोगात्,

अथ तद्धर्मिकतत्प्रकारकसंस्कारत्वतादृशस्मृतित्वाभ्यां नाश्यनाशकभावे केवलघटादिस्मृत्या घटपटादिसमूहालम्बनधीजन्यसंस्कारनाशापत्तिः घटादिस्मृतिं विना पटादिस्मृत्या केवलघटादिसंस्कारनाशेन तद्विरहस्याकिंचित्करत्वाद् अतस्तत्तद्व्यक्तित्वेनैव नाश्यनाशकभावो वाच्यः तथा च किं संस्कारस्य सविषयकत्वेन पटादिस्मृतिव्यक्तीनां घटादिज्ञानाहितसंस्कारनाशकत्वाकल्पनेनैवानुपपत्तिविरहात्,

न च समूहालम्बनादितो नानासंस्कारोपगमाद् उक्तनापान्यरूपाभ्यां नाश्यनाशकभावेऽपि न क्षतिः; घटादिमात्रस्य स्मृत्या तज्जनकसंस्कारनाशस्येष्टत्वादिति वाच्यम् ?

घटवद्भूतलादिगोचरसंस्कारस्य घटादिमात्रस्मृत्या विनाशस्य दुर्वारत्वात् समूहालम्बनादितो नानासंस्कारोपगमे लाघवेन वैजात्यविशेषाणामेव नाश्यताऽवच्छेदकतया स्वीकर्त्तुमुचितत्वाच्चेति चेद् ?

मैवं—तत्तद्व्यक्तित्वेन नाश्यनाशकभावे गौरवात् प्रतियोगितासम्बन्धेन तद्धर्मिकतत्प्रकारकसंस्कारनाशं प्रति तादृशस्मृतित्वेनैव सामानाधिकरण्यसम्बन्धेन हेतुता स्वीक्रियते लाघवात्,

न च कालरोगादिजन्यसंस्कारनाशे व्यभिचार इति वाच्यम् ? स्वपूर्वत्वकालिकविशेषणतासामानाधिकरण्यैतत्त्रितयसंबन्धेन संस्कारविशेषणतया कारणीभूतस्मृतेः कार्यताऽवच्छेदकघटकत्वाद् घटत्वादिविशिष्टघटादिमात्रविषयकसंस्काराणां च प्रतियोगितासम्बन्धेन हेतुतोपगमाद् न घटादिमात्रस्मृत्या घटपटसमूहालम्बनादिरूपसंस्कारनाशस्तादृशप्रतियोगिघटितायाः सामग्र्यास्तत्राभावेन घटस्मृतिपटस्मृत्युभयघटितसामग्र्यन्तरस्यैव तन्नाशकत्वात्,

अथ वा–स्वनिष्ठभेदप्रतियोगिताऽवच्छेदकविषयितावत्त्वसम्बन्धेन स्मृतेः संस्कारनाशे प्रतिबन्धकत्वं कल्पनीयमतो न्यूनविषयकस्मृत्या न संस्कारनाशः प्रतिबन्धकसत्त्वाद् अविरलक्रमेण घटपटस्मृतिस्थले घटस्मृतिनाशानन्तरमेव तादृशक्रमेण घटपटकुड्यानां स्मरणस्थले च तत्तदुत्तरभाविनोत्तरस्मरणकालीनपटस्मरणेन कालविशेषेणैव वा पटसंस्कारनाशः स्वीक्रियते,

वस्तुतस्तु–आधेयतासम्बन्धावच्छिन्नप्रतियोगिताकस्मरणाभावविशिष्टविषयित्वस्य तादृशस्मरणाभावस्य वा स्वविशिष्टविषयितासम्बन्धेन प्रतियोगितया संस्कारनाशे प्रतिबन्धकत्वं प्रतिबन्धकाभावसम्पादकत्वेनैव च तस्य तन्नाशकत्वमित्युपेयम्,

न च समानाकारपुरुषान्तरीयस्मरणेन पुरुषान्तरीयसंस्कारनाशापत्तिः; तत्पुरुषीयसंस्कारनाशं प्रति तत्पुरुषीयस्मरणाभावादेरेव प्रतिबन्धकत्वात्,

एवमपि विषयभेदान्नाश्यनाशकभावभेदाविरहेणैतत्कल्पस्य

समीचीनत्वात् ,

न च स्मरणस्य संस्कारनाशकत्वमेवायुक्तं; तज्जन्यसंस्कारस्य क्षणिकत्वापातादिति वाच्यम् ?

प्रतियोगितासम्बन्धेन नाशं प्रति कालिकसम्बन्धेन स्वप्रतियोगिमत्तादात्म्यसम्बन्धेन नाशहेतुताया ज्ञानादिनाशस्थले क्लृप्ततया वस्तुमात्रस्यैव क्षणिकत्वप्रसङ्गानवकाशात् ,

यत्तु—स्मरणोत्तरमपि स्मरणोदयेनानुभवाहितसंस्कारसत्त्वे क्षतिविरहात् स्मरणस्य संस्कारनाशकत्वे मानाभावः;

न चैवं तादृशसंस्कारस्य मुक्तिपर्यन्तावस्थानापत्तिः ? कालविशेषस्यैव तन्नाशकत्वाद् भवता तस्यैव चरमस्मरणादितः संस्कारनाशकत्वोपगमात् ,

न च कालस्य तत्तद्व्यक्तित्वेनैव संस्कारनाशकत्वमुपगन्तव्यम्। अनुगतरूपेण नाशकत्वासम्भवादित्यनुभवादिजन्यसंस्कारनाशकत्वं स्मरणस्यैव युज्यते लाघवादिति वाच्यम् ?

अनुभवत्वस्यैव मन्मते संस्कारहेतुताऽवच्छेदकतया स्मरणजन्यसंस्कारासिद्धेः चरमस्मरणजन्यसंस्कारनाशकतया त्वदभिमतकालस्यैवानुभवजन्यसंस्कारनाशकतासंभवेन स्मरणस्य तथात्वकल्पनानौचित्यात् ,

न चानुभवत्वजातौ मानाभावः ? स्मरणजन्यानन्तसंस्कारकल्पनायां गौरवेण संस्कारजनकताऽवच्छेदकतयैव तत्सिद्धेः,

न च निश्चिताव्यभिचारकं ज्ञानत्वमपहाय संदिग्धव्यभिचारकेणानुभवत्वेन कारणत्वकल्पना न संभवतीति वाच्यम् ?

लाघवसत्त्वे व्यभिचारसंदेहस्यादोषत्वात् ,

न च स्मरणजन्यसंस्कारस्यासिद्धौ तद्घटितगौरवानिर्णयेन ज्ञानत्वस्य संस्कारकारणताऽवच्छेदकत्वे बाधकाभावात् , सिद्धौ तु व्यभिचारनिर्णयात् कथं तत्कारणताऽवच्छेदकत्वेनानुभवत्वजातिकल्पनेति वाच्यम् ?

स्मरणाव्यवहितोत्तरक्षणे संस्कारो जायते न वेति संशयदशायामभावकोटावेवान्यत्र क्लृप्तत्वरूपलाघवज्ञानादिसहकृतेन कालत्वरूपहेतुकताहशसंशयकोटिद्वयान्यतरसाध्यकानुमानेन तादृशाभावसिद्धौ तदव्यवहितपूर्वक्षणे तादृशाभावप्रयोजकतया संस्कारकारणताऽवच्छेदककिंचिद्धर्मावच्छिन्नाभावसिद्धेरनुभवत्वजात्यवच्छिन्नाभावपर्यवसायित्वाद् , ज्ञानत्वाच्छिन्नाभावस्य तत्रासत्त्वाद् , मा भूद्वा परोक्षत्वादिजात्या संकरादनुभवत्वं जातिस्तथाऽपि स्मृत्यन्यज्ञानत्वेनैव संस्कारकारणत्वं वाच्यम् अनन्तसंस्कारकल्पनाऽपेक्षया स्मृत्यन्यत्वस्य कारणताऽवच्छेदककोटिप्रवेशे लाघवाद् अनन्तधर्मिकल्पनाविरहलाघवानुरोधेन गुरावच्छेदकत्वबुद्धेरसहिष्णुतायां भावत्वं विहाय केवलेन जन्यत्वेन ध्वंसं प्रति कारणताऽऽपत्त्या ध्वंसानामनन्तध्वंसस्वीकारप्रसङ्गात् स्मरणान्यत्वप्रवेशे तदात्मकानन्तोपेक्षाभेदानिवेशेन लाघवाच्चेति,

तदसत्-स्मरणव्यावृत्तरूपेण संस्कारं प्रति कारणतायां पुनः पुनः स्मरणादुद्बोधकविशेषसहकारिकदृढतरसंस्कारानुपपत्त्या तत्साधारणरूपेणैव कारणतायाः कल्पनीयत्वात् , तत्कल्पने च स्मृतेः संस्कारनाशकत्वस्यावश्योपगन्तव्यत्वात् कालस्य तत्तद्व्यक्तित्वेन

विषयानुपहितसंस्कारनाशकतायां गौरवात् ,

एतेन प्रतियोगिमात्रस्य नाशहेतुत्वे घटादीनां द्वितीयक्षणे विनाशस्य घटादिव्यक्त्यन्तरस्य च स्वीकारे गौरवात् समवायिनाशादेर्द्रव्यादिनाशकत्ववत्स्मृतिजन्यानन्तसंस्कारोपगमेन गौरवात् तस्याः संस्कारविरोधित्वमुपगन्तव्यं द्वितीयाद्यनुभवजन्यसंस्कारव्यक्तीनामपि कल्पनायां गौरवात् संस्कारस्यैव वा तद्विरोधित्वं कल्पनीयं व्यक्तिकल्पनागौरवनिरासकातिरिक्तकार्यकारणभावानुपगमे क्षणभङ्गापत्तेरिति परास्तम् ,

दर्शितसंस्कारानुपपत्त्या स्मृतेः संस्कारविरोधित्वायोगात् समूहालम्बनजन्ये घटपटोभयादेरविरलस्मरणे जाते तदुभयसमूहालम्बनधीजन्यसंस्कारनाशदशायामेव घटस्मरणस्यापि नाशसत्त्वादनन्तरं घटसंस्कारासम्भवेन तत्स्मरणानुपपत्त्या संस्कारस्यापि संस्कारविरोधित्वासम्भवात् सामान्यतः संस्कारं प्रति संस्कारत्वेन विरोधित्वस्यासम्भवदुक्तिकतया तद्विषयकसंस्कारं प्रति तथाविधसंस्कारत्वेनैव तस्य कल्पनीयतया संस्कारविषयताप्रतिक्षेपायोगाच्च ,

एवं विपरीतज्ञाननाश्यताऽवच्छेदकतयाऽपि संस्कारविषयतासिद्धिः समानधर्मिकघटादिविषयकसंस्कारत्वस्य घटाभावादिनिश्चयनाश्यताऽवच्छेदकत्वात् तादृशघटादिज्ञानजन्यसंस्कारत्वस्य तथात्वे गौरवात् ,

न च स्मरणादिना संस्कारनाशाद् व्यभिचारः ?

तत्तन्नाश्यसंस्कारवृत्तिजातिविशेषस्य नाश्यताऽवच्छेदकत्वेन

कल्पनीयत्वात् ,

न च कालादीनामनुगतरूपेण नाशकताविरहात्तन्नाश्यताऽव-च्छेदकजातेरप्रामाणिकत्वेऽपि विपरीतज्ञानजन्यसंस्कारनाशे व्य-भिचारवारणाय स्मरणनाश्यताऽवच्छेदकजातिविशेषोपगमस्याव-श्यकत्वादुभयनाश्यसमूहालम्बनसंस्कारविशेषे जातिसंकरापत्ति-रित्याशङ्कनीयम् ?

द्वयोरेव जात्योः समूहालम्बनव्यावृत्तत्वात् तादृशसंस्कार-स्य चागत्या कालादिनाश्यतोपगमात् ,

नन्वेवमपि विपरीतज्ञानं स्वप्रतिबध्यज्ञानाहितमेव संस्कारं-नाशयति; अत एव शाब्दादितत्त्वज्ञानान्न दोषविशेषाधीनमि-थ्याधीजन्यवासनानाशः, तथा च घटाभावलौकिकचाक्षुष-निश्चयस्य घटप्रकारकचाक्षुषसंस्कारत्वं घटाभावनिश्चयसामान्य-स्य च लौकिकादितरघटादिप्रकारकधीजन्यसंस्कारत्वं नाश्यता-ऽवच्छेदकमुपेयमिति किं तस्य विषयतयेति चेद् ?

मैवं—पटादिगोचरघटोपेक्षाजन्यसंस्कारस्य घटाभावधीना-श्यतावारणाय घटादिविषयकतथाविधसंस्कारत्वस्यैव नाश्य-ताऽवच्छेदकत्वोपगमात्तदुपेक्षाऽन्यघटादिधीजन्यत्वनिवेशे च गौरवात् ,

एवं गुरुत्वादिधीजन्यसंस्कारमात्रस्यैव तदभावनिश्चय-नाश्यतया तत्र गुरुत्वादिविषयकसंस्कारत्वस्यैवावच्छेदकत्व-सम्भवाच्च,

न चानेकधर्मप्रकारकधीजन्यसंस्कारस्यैकधर्माभावनिश्च-

यादिना नाशवारणाय तत्तद्व्यक्तित्वेनैव नाश्यनाशकभावः कल्प-
नीय इति वाच्यम् ?

विषयान्तरधीजन्यसंस्कारेऽपि नाशकताघटकसामानाधिकर-
ण्यसम्बन्धेन घटाभावादिनिश्चयसत्त्वात्तस्य ततो विनाशवारणाय
प्रतियोगिनां तत्तद्व्यक्तित्वेन सहकारित्वकल्पनावश्यकत्वेन घटा-
दिप्रकारकसंस्कारत्वस्य नाश्यताऽवच्छेदकत्वेन प्रकारीभूता—
ये ये धर्मास्तत्तदभावनिश्चयघटितसामग्र्या एव समूहालम्बन-
संस्कारनाशप्रयोजकत्वेनानुपपत्त्यभावात् ,

यद्वा-समूहालम्बनज्ञानादेकसंस्कारस्य तत्तद्धर्मप्रकारकत्वो-
पगमे तस्यैकधर्माभावनिश्चयनाश्यत्वाभावात् तादृशनिश्चयोत्तरं त-
त्तद्धर्मप्रकारकस्मरणापत्तेः प्रकारभेदेनैव संस्कारभेदो मन्तव्यः,

अथैवं विषयभेदाभिन्ना जातिविशेषा एव नाश्यताऽवच्छेदक-
तया स्वीक्रियन्तां किं सविषयतयेति चेद् ?

न—विषयभेदेन नाश्यनाशकभावभेदे गौरवाद्विजातीयसंस्कार-
निष्ठप्रतियोगितासम्बन्धेन नाशं प्रति स्वसामानाधिकरण्यस्वी-
यविशेष्यताविशिष्टविशेष्यताकत्वोभयसम्बन्धेन सामान्यतो नि-
श्चयत्वेन कारणताकल्पनाया एव युक्तत्वात् ,

विशेष्यतावैशिष्ट्यं च स्वावच्छेदकावच्छिन्नत्वस्वानिरूपिता-
भावप्रकारतानिरूपितानुयोगितासम्बन्धावच्छिन्नप्रकारताऽवच्छेद-
करूपावच्छिन्नप्रकारतानिरूपितत्वसम्बन्धाभ्यामुपादेयं घटाभावा-
दिसंस्कारोऽपि घटाभावाभाववानित्यादिनिश्चयस्यैव नाश्यो न
तु घटवानित्यादिनिश्चयनाश्यः,

यदि च तादृशसंस्कारस्य घटवानित्यादिनिश्चयनाश्यत्वमप्यनुभवासिद्धं; तदा विशेष्यतावैशिष्ट्यनियामकद्वितीयसम्बन्धस्य निरुक्तप्रकारतानिरूपितत्वस्य निरूपितप्रकारताऽवच्छेदकावच्छिन्नाभावत्वावच्छिन्नप्रकारतानिरूपितत्वान्यतरत्वेन निवेशान्न दोषः,

न चैवं परोक्षेणापि विपरीतज्ञानेन लौकिकप्रत्यक्षाहितसंस्कारनाशापत्तिरित्याशङ्कनीयम् ?

तल्लौकिकप्रत्यक्षजन्यतत्प्रकारकसंस्कारान्यसंस्काराणामेव विपरीतनिश्चयसामान्यसहकारित्वात् ,

एवं सम्बन्धघटकाभावविषयतां लौकित्वेनादाय चाक्षुषादिजन्यविजातीयसंस्कारनिष्ठप्रतियोगितासम्बन्धेन नाशं प्रति चाक्षुषादिविपरीतनिश्चयस्य कारणत्वं कल्पनीयं; तस्य च चाक्षुषादिजन्यसंस्कार एव सहकारीति न चाक्षुषादिजन्यसंस्कारश्चाक्षुषादिविपरीतनिश्चयान्नश्यतीत्याहुः,

केचित्तु—निर्विषयकत्वे संस्कारस्योपनायकत्वासम्भवात् प्रत्यभिज्ञाऽऽदिपूर्वं तत्ताऽऽदिस्मरणस्य मानसादौ तदीयाननुगतसामग्र्याः प्रतिबन्धकत्वस्य च कल्पनया गौरवम्,

न च सविषयकत्वेऽपि संस्कारस्य नोपनायकता न तस्मादुपनीतभानापत्तिरिति वाच्यम् ?

पृथगेव तद्विषयकसंस्कारत्वेनोपनायकतास्वीकारात् तदवच्छिन्नघटितसामग्र्यां चोद्बोधकस्य घटकतयाऽऽवश्यकयोगात् ,

न च मिथो व्यभिचारः ?

कारणाव्यवहितोत्तरत्वस्य कार्यताऽवच्छेदकगर्भे निवेशनीयत्वात्,

अथ संस्कारस्य निर्विषयकत्वेऽनुद्बुद्धसंस्कारादुपनीतभानापत्त्यनवकाशात् तद्विषयकत्वेनैव तदुपनीतभानादिहेतुतासम्भवात् तत्र ज्ञातत्वं नोपादीयते न वा कृतिसाक्षात्कारपूर्वविषयस्मरणं कल्प्यत इत्यादिलाघवसम्भवात्तस्य सविषयकत्वं कल्पयित्वा पृथगुपनीतभानादिहेतुताकल्पनमयुक्तमिति चेद्?

न—संस्कारव्यावृत्तस्य कृत्यादिसाधारणजातिविशेषस्यैव कारणताऽवच्छेदकत्वोपगमात्,

मन्मतेऽप्युक्तस्थले विषयस्मरणकल्पनाविरहादिति वदन्तीति दिक्,

अत्रेदं बोध्यं—स्मृतिकारणताऽवच्छेदककोटौ धूमाधिकरणवृत्त्यभावादिविषयतानां धूमत्वाधिकरणत्ववृत्तित्वाभावत्वाद्यवच्छिन्नविषयतात्वेन न प्रवेशः तथा सति धूमत्वाधिकरणत्ववृत्तित्वाभावत्वादिना धूमाधिकरणवृत्त्यभावादीनामनुभवानन्तरं तेन रूपेण घटादिस्मृत्यापत्तेः किन्तु धूमत्वावच्छिन्नधूमादिनिष्ठविषयतात्वेनैव विषयतानां कारणताऽवच्छेदककोटौ निवेशः; अनुमितिकारणताऽवच्छेदककोटौ तु तथानिवेशे प्रयोजनविरहेण धूमत्वाद्यवच्छिन्नाविषयतात्वेनैव निवेश इति विशिष्टस्मरणे नातिप्रसङ्गशङ्काऽपीत्यभावाविषयकत्वं तत्रातिप्रसङ्गवारणाय सर्वथा नोपादेयमेव,

एतेनानुभवस्य विशिष्टस्मरणे स्वजन्यसंस्कारसम्बन्धेन न हेतुत्वं तस्य सम्बन्धत्वाभावात् किन्तु समवायेनैव, करणत्वमपि

व्यापारवत्कारणत्वमेव न तु व्यापारसम्बन्धावच्छिन्नकारणता-रूपमिति तत्रातिप्रसङ्गवारणायाभावाविषयकत्वोपादानमावश्यक-मित्यपि परास्तम् ,

तथाऽप्युक्तरीत्या तत्रातिप्रसङ्गाभावादित्यलं पल्लवनेन,

ननु विपरीतज्ञानोत्तरं विशेषदर्शने सति प्रत्यक्षनिर्णय उत्प-द्यतेऽसति च नोत्पद्यत इत्यन्वयव्यतिरेकाभ्यां विपरीतज्ञानोत्तर-प्रत्यक्षनिर्णये विशेषदर्शनस्य तत्त्वेन हेतुतया वह्निव्याप्यधूमवान् पर्वत इत्यादिविशेषदर्शनजन्ये पर्वतो वह्निमानित्याद्याकारके वि-परीतज्ञानोत्तरप्रत्यक्षनिर्णये निरुक्तानुमितिलक्षणस्यातिव्याप्ति-र्दुर्वारा,

अथ विपरीतज्ञानोत्तरं विना विशेषदर्शनं प्रत्यक्षनिर्णयवा-रणायोक्तरीत्या विशेषदर्शनहेतुत्वं नोपेयते किन्तु संशयसाधार-णविपरीतज्ञानप्रतिबन्धकतायां विशेषादर्शनवैशिष्ट्यमेव निवेश्यत इति विशेषदर्शनस्योत्तेजकतया न हेतुत्वमिति नोक्तातिव्याप्ति-रिति चेद् ?

न--विशेषदर्शनस्योत्तेजकतापक्षे विशेषदर्शनाभावविशिष्ट-विपरीतज्ञानाभावत्वेन कारणत्वे कारणताऽवच्छेदकगौरवाद् विनिगमनाविरहेण विपरीतज्ञानविशिष्टविशेषदर्शनाभावाभाव-त्वेनापि कारणताप्रसङ्गाच्च,

अथ विशेषदर्शनहेतुतामते विपरीतज्ञानाव्यवहितोत्तरप्रत्य-क्षनिर्णयत्वस्य तत्कार्यताऽवच्छेदकतया विपरीतज्ञानाव्यवहितोत्त-रत्वप्रत्यक्षनिर्णयत्वयोर्विशेष्यविशेषणभावापन्नयोरेव कार्यताऽव-

च्छेदकतयोपगन्तव्यतया तयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण विशेषदर्शनस्य कारणताऽऽधिक्यप्रसङ्ग इति चेद् ?

न—विशेषदर्शनोत्तेजकतामतेऽपि विशेषदर्शनाभावविशिष्टत्वविपरीतज्ञानत्वयोर्विशेष्यविशेषणभावापन्नयोरेव प्रतिबन्धकताऽवच्छेदकताया वाच्यतया तयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्धताऽऽधिक्यस्य दुर्वारत्वात्,

अथ विशेषदर्शनहेतुतामते विपरीतज्ञानव्यधिकरणतदव्यवहितोत्तरप्रत्यक्षनिश्चयव्यावर्तनायातीतानागतविपरीतज्ञानसमानाधिकरणप्रत्यक्षनिर्णयव्यावर्त्तनाय च विपरीतज्ञानसामानाधिकरण्यं तदव्यवहितोत्तरत्वं च विशेषदर्शनजन्यताऽवच्छेदककोटौ निवेशनीयं; तदपि यथाश्रुतमव्यावर्तकं तस्यापि यत्किञ्चिद्विपरीतज्ञानसामानाधिकरण्यसत्त्वात् यत्किञ्चिद्विपरीतज्ञानाव्यवहितोत्तरत्वाच्चेति स्वसमानाधिकरणविपरीतज्ञानाव्यवहितोत्तरत्वमेव तत्कार्यताऽवच्छेदकं वाच्यं; स्वपदं च प्रत्यक्षनिश्चयपरमिति स्वत्वाननुगमेन कार्यताऽवच्छेदकस्य तत्तद्व्यक्तिविश्रामः स्यादिति विशेषदर्शनोत्तेजकतापक्ष एव समञ्जस इति चेद् ?

न—विशेषदर्शनोत्तेजकतामतेऽप्येकक्षणावच्छिन्नैकात्मवृत्तित्वरूपसामानाधिकरण्यसम्बन्धेनैव विशेषदर्शनाभाववैशिष्ट्यं विपरीतज्ञाने निवेशनीयम्,

तदर्थश्च स्वावच्छेदकक्षणावच्छिन्नस्वानुयोग्यनुयोगिकाधारताकत्वसम्बन्धेन विशेषदर्शनाभावाधिकरणताविशिष्टत्वमिति तस्यापि गुरुशरीरतयोत्तेजकतापक्षस्यासामञ्जस्यात्,

अथैकक्षणावच्छिन्नत्वमनिवेश्य सामानाधिकरण्यसम्बन्धेनैव विशेषदर्शनाभाववैशिष्ट्यं विपरीतज्ञाने निवेशनीयं; विशेषदर्शन-समवहितज्ञाने कालान्तरावच्छेदेन स्वाधिकरणवृत्तिविशेषदर्शना-भावस्य सामानाधिकरण्यसत्त्वेऽपि तदानीं विशेषदर्शनाभावा-भावेन विशेषणाभावप्रयुक्तो विशिष्टाभावोऽक्षत एवेति तदुत्तरक्षणे प्रत्यक्षानिश्चयनिर्वाह इति चेद् ?

न- सदातनस्य विशेषणीभूतविशेषदर्शनाभावस्य विशेष्यीभूत-विपरीतज्ञानस्य सामानाधिकरण्यरूपतदुभयसम्बन्धघटकाधिकर-णताद्वयात्मरूपाधिकरणानां च सत्त्वे विशिष्टसत्त्वस्य दुर्वारतया विशिष्टाभावस्य दुर्घटनयैकक्षणावच्छिन्नत्वनिवेशस्यावश्यक-त्वात्; तथा सति यत्क्षणावच्छेदेन विशेषणविशेष्ययोस्तत्रात्मनि सत्त्वं सम्बन्धघटकतत्क्षणाभावेनैव विशिष्टासत्त्वमिति विशिष्टा-भावसौलभ्याद् अत एव पक्षतायां दीधितिकृताऽपि सिषाधयि-षाविरहस्य सिद्धौ वैशिष्ट्यम्—एकक्षणावच्छेदेनैकात्मवृत्तित्व-मित्युक्तमिति चेद् ?

मैवं—विशेषदर्शनस्योक्तप्रत्यक्षनिर्णयहेतुत्वेऽपि तस्य न विशेषदर्शनत्वेन हेतुत्वं येनोक्तरीत्याऽतिव्याप्तिः स्यात्; किन्तु विपरीतज्ञानविरोधित्वेनैवेति नातिव्याप्तिः,

तथा हि—विशेषदर्शनस्य विशेषदर्शनत्वेन यदि हेतुत्वं तदा विशेषदर्शनसत्त्व इव भूतले घटादिभासकालोकादिसमवधानवि-रहाद्यत्र भूतलं घटवन्न वेत्यादिसंशयस्तत्र तत्सत्त्व एव सत्यालो-कादिसमवधाने भूतलं घटवदित्यादिनिश्चयोत्पत्त्या तत्र विशेषद-

र्शनस्य व्यभिचारः,

एवं व्याप्यताऽवच्छेदकसम्बन्धादिभेदेन व्याप्तेर्भेदाद् ग्राह्यव्याप्यवत्ताज्ञानरूपविशेषदर्शनमननुगतमिति व्यभिचारेण विशेषदर्शनहेतुत्वासम्भवः,

एवं ग्राह्यव्याप्यवत्ताज्ञानादिव ग्राह्यावच्छेदकधर्मदर्शनादपि विपरीतज्ञानोत्तरं प्रत्यक्षमुत्पद्यते द्वयोरेव विपरीतज्ञानविरोधितयाऽविशेषादतस्तादृशकारणद्वयाननुगमादपि व्यभिचारः,

एवमाहार्यप्रत्यक्षेऽपि व्यभिचारेण विशेषदर्शनत्वेन हेतुत्वासम्भवः,

यदि च तत्तद्विशेषदर्शनाद्यव्यवहितोत्तरनिश्चयत्वस्यैव तत्तद्विशेषदर्शनादिजन्यताऽवच्छेदकत्वमुपगम्य व्यभिचारो वार्यते; तदा विपरीतज्ञानोत्तरनिश्चयसामान्यं प्रति तत्तद्विशेषदर्शनादीनामहेतुतया विशेषदर्शनादिकं विनैव विपरीतज्ञानोत्तरनिश्चयसामान्यापत्तिर्दुर्वारा,

न च यावद्विशेषसामग्रीविरहस्य सामान्यकार्याभावप्रयोजकत्वमुपगम्य सामान्यकार्यापत्तिर्वारणीयेति वाच्यम् ?

तथा सति तत्तद्व्यक्तित्वावच्छिन्ननिश्चयहेतुभूततद्विशेषणज्ञानाद्यभावेनैव सामान्यकार्यापत्तिवारणसम्भवे विशेषदर्शनत्वादिना हेतुत्वस्यैव निष्फलत्वापत्तेः; तस्माद्विशेषदर्शनालोकसमवधानादीनां विपरीतज्ञानविरोधित्वेनानुगतरूपेण हेतुत्वमुपेत्यैवोक्तव्यभिचारो वारणीयः,

न चैवमप्याहार्यप्रत्यक्षे व्यभिचारः कथं वारितः; तत्र विप-

रीतज्ञानविरोधिनः कस्याप्यभावादिति वाच्यम् ?

तत्कोटिज्ञाने तद्विरोधिजिज्ञासायाः प्रतिबन्धकतया विपरीतज्ञानविरोधिन्या इच्छाया एव तत्र सत्त्वेन व्यभिचाराभावाद् ,

न च विरोधित्वं प्रतिबन्धकत्वं तच्च प्रतिबन्धकताऽवच्छेदकाननुगतधर्माणां भेदाद्भिन्नमिति कथमननुगतेन तेन रूपेण हेतुतेति वाच्यम् ?

अननुगतस्यापि तस्य कारणीभूताभावप्रतियोगितात्वरूपानुगतप्रतिबन्धकतात्वेनानुगतीभूय कारणताऽवच्छेदकत्वाद् ,

न च कारणताप्रतियोगिताऽऽदीनां स्वरूपसम्बन्धात्मकतयाऽननुगतत्वेनोक्तप्रतिबन्धकतात्वस्य नानुगतत्वसम्भव इति वाच्यम् ?

कारणताप्रतियोगिताऽऽदीनां स्वरूपसम्बन्धरूपत्वेऽपि तत्त्वस्यानुगतप्रतीतिसिद्धस्य दुरपह्नवत्वात् ,

अथ विशेषदर्शनस्य समवायेन कारणत्वम् आलोकसंयोगादिरूपलौकिकप्रत्यक्षसामग्र्या आत्मनिष्ठपरम्परासम्बन्धेन कारणत्वमिति कारणताऽवच्छेदकधर्मानुगमेऽपि तदवच्छेदकसम्बन्धभेदेनाननुगमाद् व्यभिचारो दुर्वार इति चेद् ?

न—लौकिकान्यत्वस्य कार्यताऽवच्छेदकतयैवालोकसंयोगाद्यधीनप्रत्यक्षे व्यभिचाराभावेन समवायसम्बन्धेनैव हेतुतायाः सुवचत्वात् ,

वस्तुतस्तु विपरीतज्ञानाविरोधित्वं स्वाव्यवहितोत्तरक्षणावच्छिन्नविपरीतज्ञानाभावाधिकरणतात्वसमवेतत्वसम्बन्धेन क्षण-

विशिष्टत्वं, तच्च यत्क्षणाऽव्यवहितोत्तरक्षणे यत्रात्मनि न विपरीत-ज्ञानं तदात्मनिष्ठमनोयोगादावपि तत्र क्षणेऽस्तीत्यालोकसंयोगादिकालीनतत्तदात्मनिष्ठमनोयोगादिरेवालोकसंयोगाद्यधीनप्रत्यक्षे समवायेन हेतुः,

अथैवं विपरीतज्ञानानन्तरं विशेषदर्शनोत्पत्तिकाल एव प्रत्यक्षनिश्चयः स्याद् विशेषदर्शनाभावस्य कार्यकालवृत्तितया विपरीतज्ञानहेतुतया तदा विपरीतज्ञानानुत्पादात् तत्पूर्वकालीनमनोयोगादेरपि विपरीतज्ञानविरोधित्वादिति चेद् ?

न—इष्टत्वाद्, विपरीतज्ञानोत्पत्तिकाल एव निश्चयोत्पत्तेर्निश्चयत्वव्याघातेन स्वीकर्तुमशक्यत्वात्, तस्माद्विशेषदर्शनस्य विपरीतज्ञानोत्तरप्रत्यक्षानिर्णये विपरीतज्ञानविरोधित्वेनैव हेतुत्वमिति लक्षणे परामर्शत्वेन जनकताया निविष्टतया नातिव्याप्तिः, अत एव दीधितिकारेणाप्युक्तं विशेषदर्शनस्य च विपरीतज्ञानविरोधित्वेन तत्त्वमित्युक्तत्वादिति,

वस्तुतस्तु विपरीतज्ञानोत्तरप्रत्यक्षानिर्णये विशेषदर्शनस्य हेतुत्वकल्पने मानाभावः,

न च तदकल्पने विपरीतज्ञानोत्तरं विनैव विशेषदर्शनं-प्रत्यक्षानिर्णयापत्तिरिति वाच्यम् ?

तदभावाप्रकारकतत्प्रकारकज्ञानत्वरूपनिर्णयत्वस्य नीलेतरघटत्वादिपदार्थसमाजग्रस्ततया कस्य चित्कार्यताऽवच्छेदकत्वाभावेन तदवच्छिन्नस्यापादकाभावेनापत्त्यसम्भवात्, तदानीं प्रत्यक्षत्वावच्छिन्नोत्पत्त्यापादने त्विष्टापत्तिरेव ; तदभावकोटेरुपनय-

वशाद् भानसम्भवेन संशयात्मकप्रत्यक्षस्यैवोत्पादाद्, विशेषदर्शनसत्त्वे स्वभावकोटेर्भानासम्भवेन तद्धर्मावच्छिन्नापत्तौ निश्चयस्यैवोत्पादात्,

न च संशयोत्तरं विशेषदर्शनोत्पत्तिक्षणे प्रत्यक्षत्वावच्छिन्नापत्तावेव निर्णयापत्तिः तदा व्याप्यवत्ताज्ञानस्य कार्यसहभावेन प्रतिबन्धकस्य सत्त्वेनाभावभानासम्भवादिति विशेषदर्शनस्य कारणत्वमावश्यकमिति वाच्यम् ?

तदानीं प्रत्यक्षनिर्णयोत्पत्ताविष्टापत्तेः, द्वितीयक्षणे निर्णयोत्पादस्य सर्वसिद्धतया तत्क्षणे तत्स्वीकारे बाधकाभावात्, तस्माद्विशेषदर्शनं न हेतुः, युज्यते चैतद्—अन्यथा विपरीतज्ञानोत्तरप्रत्यक्षनिर्णये विशेषदर्शनस्य हेतुत्वेऽपि विशेषदर्शनं विनाऽपि विपरीतज्ञानोत्तरप्रत्यक्षनिर्णये सामान्यापत्तेर्दुर्वारैव, विपरीतज्ञानासत्त्वदशायां प्रत्यक्षनिश्चयोपपत्तये विशेषदर्शनाघटिताया एव सन्निकर्षादिघटितसामग्र्याः प्रत्यक्षनिर्णयोपपत्तिप्रयोजकताया अङ्गीकरणीयत्वात् तस्याश्च विपरीतज्ञानसत्त्वेऽसत्यपि विशेषदर्शने सुघटत्वात्,

अथ विपरीतज्ञानानुत्तरप्रत्यक्षनिर्णये विपरीतज्ञानाभावो हेतुस्तथा च विपरीतज्ञानाभावघटिता विशेषदर्शनघटिता च द्वयी सामग्री प्रत्यक्षनिर्णयसामान्योत्पादप्रयोजिकेति चेत् ?

तर्ह्यायातं विपरीतज्ञानस्य प्रत्यक्षनिर्णयप्रतिबन्धकत्वम्,

एवं च विशेषदर्शनस्योत्तेजकत्वमेवोचितं—

न चैवमपि विशेषदर्शनाभावविशिष्टविपरीतज्ञानाभावहेतु-

ताऽपेक्षया लाघवेन विशेषदर्शनहेतुतासिद्धिरिति वाच्यम् ?

तथा सति सर्वत्रैव प्रतिबन्धककालीनकार्य उत्तेजके हेतुताऽऽप-त्त्या सिषाधयिषाविरहविशिष्टसिद्ध्यभावादीनामनुमितिहेतुता-विलयप्रसङ्गात् ?

एवं भिन्नविषयकप्रत्यक्षादिकं प्रति सिद्धिबाधादिरूपप्रति-बन्धकाभावविशिष्टवह्निव्याप्यवत्तापरामर्शादिरूपानुमित्यादिसाम-ग्र्या अपि प्रतिबन्धकत्वमुच्छिद्येत; तुल्ययुक्त्या तादृशपराम-र्शादिकालीनघटादिप्रत्यक्षे वन्ह्याद्यनुमितिविरोधित्वेन सिद्ध्यादि-कारणतया निर्वाहात् , तस्माद्विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयो द-र्शितरीत्यैव वारणीयः,

विशेषदर्शनाभावविशिष्टविपरीतज्ञानप्रतिबन्धकतामतमपि न युक्तं गौरवाद् युक्तिविरहाच्च,

एतदाशयेनैव दीधितिकृता भ्रमसंशयोत्तरप्रत्यक्षनिर्णयं प्रति विशेषदर्शनस्य हेतुतामत इत्यत्र मत इत्युक्त्या विशेषदर्शनहेतुत्वे-ऽस्वरसः सूचितः,

एवं च विपरीतज्ञानस्य निश्चयत्वेनैव प्रतिबन्धकता, प्रत्य-क्षस्थले चालौकिकचाक्षुषत्वादिकमेव तत्प्रतिबध्यताऽवच्छेदकं; न तु प्रत्यक्षपरोक्षसाधारणमलौकिकज्ञानत्वम् आहार्यप्रत्यक्षानुरोधेन चाक्षुषत्वस्पार्शनत्वादिप्रकारकेच्छानामुत्तेजकत्वस्यावश्यकतया तासामेकत्रोत्तेजकत्वे चाक्षुषादीच्छाकाले स्पार्शनाद्यापत्तेः, पृथ-गुत्तेजकीकृत्य पृथक्प्रतिबन्धकतानामुपगन्तव्यतयाऽनुगतधर्मस्य प्रतिबध्यताऽवच्छेदकत्वे चाक्षुषादीच्छाविरहविशिष्टबाधाभाव-

स्पार्शनादौ व्यभिचाराद् ,

न चानाहार्यत्वस्य प्रतिबध्यताऽवच्छेदके निवेशेनैत्रोपप-त्ताविच्छानाप्युत्तेजकत्वमेव नोपेयत इति वाच्यम् ?

इच्छाजन्यभिन्नत्वरूपानाहार्यत्वस्य निवेश आहार्यज्ञाने वि-शिष्टेच्छाहेतुताकल्पनाऽऽपत्तेः, अनुगतरूपेण हेतुत्वेऽतिप्रसङ्गाद्,

न च तत्कल्पनमपि सम्भवति ? अनाहार्यचाक्षुषादौ व्यभि-चाराद् ,

न च विपरीतानिश्चयोत्तरचाक्षुषादेः चाक्षुषेच्छाऽऽदिजन्य-ताऽवच्छेदकतया न व्यभिचार इति वाच्यम् ?

तुल्ययुक्त्या बाधगोचराप्रामाण्यग्रहस्यापि बाधकालीनचा-क्षुषादौ हेतुताऽऽपत्त्या तदधीनचाक्षुषादौ व्यभिचारस्य दुर्वारत्वाद् उत्तेजकतामात्रोच्छेदापत्तेश्च, परोक्षस्थले च विपरीतनिश्चयस्य परोक्षत्वाच्छिन्नं प्रति पृथगेव प्रतिबन्धकत्वं, परोक्षत्वं च प्रत्य-क्षान्यत्वं जातिविशेष एव वा,

न चानुभवत्वजात्या सङ्करान्न परोक्षत्वं जातिरिति वाच्यम् ? प्रत्यक्षत्वभिन्नानुभवत्व एव मानाभावाद् अनुमित्यादौ तान्त्रि-काणामनुभवव्यवहारस्य च स्मृत्यन्यज्ञानत्वरूपोपाधिनिबन्धन-त्वादित्यलं प्रसङ्गागतविचारबाहुल्येन ।

अत्रेदं विचार्यते—

व्याप्तेः साधनभेदेन भिन्नतया सामान्यतो वह्निव्याप्यवत्प-र्वतनिश्चयत्वेन हेतुत्वाभावाल्लक्षणेऽसंभवः,

न च वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नकारणताघटित-

लक्षणे तात्पर्याद् न दोष इति वाच्यम् ?

आलोकादिलिङ्गकानुमितौ व्यभिचारेण तथा कारणताया-अप्यसम्भवाद्,

यत्तु-कारणत्वस्य कार्यताऽवच्छेदकभेदेन भिन्नतया नित्यसाधारणधर्मस्य कार्यताऽवच्छेदकतावादिमते यथा नित्यव्यक्तिपरित्यागेन तत्साधारणधर्मस्य कार्यताऽवच्छेदकत्वोपपत्तिस्तथाऽन्यलिङ्गकानुमितिव्यक्तिपरित्यागेन तत्साधारणधर्मस्य कार्यताऽवच्छेदकत्वमुपपद्यत इति ?

तदसद्-नित्यव्यक्तेरव्यवहितपूर्वक्षणाप्रसिद्ध्या परित्यागेऽपि स्वेच्छामात्रेणान्यव्यक्तिपरित्यागे पटादिव्यक्तिपरित्यागेन पटादिसाधारणधर्मस्यापि दण्डादिकार्यताऽवच्छेदकत्वापत्तेर्दुर्वारत्वात्,

अथाव्याप्यवृत्तिज्ञानादीनां कारणत्वोपपत्तये प्रतियोगिवैयधिकरण्यघटितं तदवश्यं वाच्यं; तथा च नोक्तव्यभिचार आलोकादिलिङ्गकानुमितिसमानाधिकरणस्य धूमपरामर्शाभावस्यातथात्वादिति चेद् ?

न-कारणतायां प्रतियोगिवैयधिकरण्यनिवेशे ज्ञानत्वाद्यवच्छिन्नसमानाधिकरणस्येच्छाऽभावस्य तथात्वेन ज्ञानत्वाद्यवच्छिन्नं प्रतीच्छात्वादिनाऽपि हेतुताऽऽपत्तेः,

न चानन्यथासिद्धत्वदलेनैव तद्वारणमिति वाच्यम् ? तथा सति नियतपूर्ववर्त्तित्वदलस्यैव वैयर्थ्यापत्तेः,

न चैवमव्याप्यवृत्तेः कथं कारणतानिर्वाह इति वाच्यम् ?

कार्योत्पत्त्यव्यवहितपूर्वक्षणावच्छिन्नसामानाधिकरण्यसम्ब-न्धावच्छिन्नप्रतियोगिताकप्रतियोग्यभावविशिष्टत्वस्य कारण-तावटकाभावविशेषणत्वेन तन्निर्वाहात्,

एवं चालोकलिङ्गकानुमितिसमानाधिकरणस्य धूमपराम-र्शाभावस्य तादृशविशेषणाक्रान्ततया व्यभिचारो दुर्वार एव,

यत्तु—धूमपरामर्शजन्यतत्तदनुमितिनिरूपितसमवायस्य का-र्यताऽवच्छेदकसम्बन्धत्वान्न व्यभिचार इति ?

तदसत्—तथा सत्येकविधधूमपरामर्शसत्त्वे तदन्यधूमपरा-मर्शजन्यानुमितिनिरूपितसमवायेनानुमित्यापत्तेर्दुर्वारत्वात्,

न च तत्तदनुमितिनिरूपितसमवायेनानुमितिं प्रति तत्तत्प-रामर्शत्वेनापि हेतुत्वान्न दोष इति वाच्यम् ?

तथा सति तत्तदनुमितिं प्रति तत्तत्परामर्शत्वेन हेतुताया-एवौचित्येनासंभवस्य दुरुद्धरत्वात्,

एतेन स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामानाधिकरण्यो-भयसम्बन्धेन धूमपरामर्शविशिष्टानुमितिं प्रति धूमपरामर्शत्वेन हेतुत्वकल्पनान्नोक्तव्यभिचार इति सकलसम्मतमपि परास्तम्,

एकधूमपरामर्शसत्त्वे तदन्यधूमपरामर्शघटिताव्यवहितोत्तरक्ष-णोत्पत्तिकत्वसम्बन्धेन धूमपरामर्शविशिष्टानुमितेरापत्तिवारणाय तत्तदनुमितिं प्रति तत्तत्परामर्शत्वेन हेतुत्वस्यावश्यकत्वे धूमपराम-र्शत्वेनोक्तरीत्या हेतुत्वे मानाभावात्,

किञ्चाप्रामाण्यज्ञानास्कन्दितपरामर्शादनुमित्यनुदयेनाप्रा-माण्यज्ञानाभावविशिष्टधूमपरामर्शत्वेनैव हेतुत्वं वाच्यं; तथा

च धूमपरामर्शांशेऽप्रामाण्यज्ञानात्मकधूमालोकोभयलिङ्गकपरामर्शद्वितीयक्षणोत्पन्नालोकपरामर्शजन्यानुमितौ व्यभिचारो दुर्वारः,

अथाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शाव्यहितोत्तरत्वं कार्यताऽवच्छेदके निवेश्यते; तत्त्वं च स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सत्यप्रामाण्यज्ञानाभावविशिष्टस्वाधिकरणक्षणध्वंसाधिकरणत्वं द्वित्रक्षणसाधारणमतो नोक्तव्यभिचारः, तत्राप्रामाण्यज्ञानाभावविशिष्टस्वाधिकरणक्षणाप्रसिद्ध्या तद्घटिताव्यवहितोत्तरत्वस्य कार्यताऽवच्छेदकेऽनिवेशादिति चेद् ?

न-यत्रादौ धूमपरामर्शस्ततस्तत्राप्रामाण्यावगाह्यालोकपरामर्शः समूहालम्बनस्तत आलोकपरामर्शजन्यानुमितिस्तत्र व्यभिचारस्य दुर्वारत्वाद्, ध्वंसस्य विशिष्टधर्मावच्छिन्नप्रतियोगिताकत्वाभावेन सत्यन्तेऽप्रामाण्यज्ञानाभाववैशिष्ट्यनिवेशासम्भवात् ,

ननु ध्वंसस्यापि विशिष्टधर्मावच्छिन्नप्रतियोगिताकत्वमङ्गीकृत्याप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शध्वंसाधिकरणक्षणध्वंसानधिकरणत्वरूपसत्यन्तघटितमव्यवहितोत्तरत्वं कार्यताऽवच्छेदके निवेश्यते;

इत्थं चोक्तस्थले विशिष्टधर्मावच्छिन्नप्रतियोगिताकधूमपरामर्शध्वंसाभावेन तादृशध्वंसघटिताव्यवहितोत्तरत्वस्य कार्यताऽवच्छेदकेऽनिवेशान्न व्यभिचार इति चेत् ?

तथाऽपि यत्र धूमपरामर्शो स्वस्मिन्नप्रामाण्यावगाहिनी समूहालम्बनात्मिका वह्न्यनुमितिर्जाता तत्रत्यानुमितेः कार्यताऽवच्छे-

दकानाक्रान्तत्वापत्तेः, तादृशधूमपरामर्शध्वंसस्य विशिष्टधर्मावच्छि-न्नप्रतियोगिताकत्वाभावेन तद्ध्वंसघटिताव्यवहितोत्तरत्वस्य कार्य-ताऽवच्छेदकेऽनिवेशाद् ,

अपि च तादृशसम्बन्धेन धूमपरामर्शविशिष्टानुमितित्वस्य कार्यताऽवच्छेदकत्वे विनश्यदवस्थपरामर्शजन्यानुमितेरसङ्ग्रह-प्रसङ्गः; तदनुमितेर्धूमपरामर्शविशिष्टत्वाभावात् ,

यत्तु—उपलक्षणविधया धूमपरामर्शस्य कार्यताऽवच्छेदकत्वा-न्नोक्तदोष इति बहुभिरभिहितम् ,

तदापातरमणीयं—सम्बन्धिकातिरिक्तं यदा कदा चित्तद्वि-शिष्टमेव तदुपलक्षितं न तु कालत्रयेऽप्यतादृशं, प्रलयादेरपि घटाद्युपलक्षितत्वापत्तेः,

एवं चोक्तानुमितौ कालत्रयेऽपि धूमपरामर्शाभावेन तदुपल-क्षितत्वासम्भवेन तदसङ्ग्रहस्य ब्रह्मणाऽपि वारयितुमशक्यत्वात् ,

एतेनाप्रामाण्यग्रहाभावविशिष्टस्वाधिकरणक्षणध्वंसाधिकर-णक्षणध्वंसानधिकरणत्वे सत्यप्रामाण्यग्रहाभावविशिष्टस्वाधिकर-णक्षणध्वंसाधिकरणत्वरूपमेवाऽव्यवहितोत्तरत्वं क्षणद्वयसाधारणं-कार्यताऽवच्छेदके निवेशनीयमिति न पूर्वोपदर्शितस्थले क्वापि व्यभिचारः,

न चैवमपेक्षाबुद्ध्यात्मकपरामर्शजन्यचतुर्थक्षणोत्पन्नानुमितेर-सङ्ग्रह इति वाच्यम् ?

अपेक्षाबुद्ध्यात्मकपरामर्शे मानाभावादित्यपि परास्तम्,

विनश्यदवस्थपरामर्शजन्यानुमितेरसङ्ग्रहस्य दुर्वारत्वादिति,

अत्रोच्यते—निरुक्तसम्बन्धेन धूमपरामर्शविशिष्टकृतिविशिष्टानुमितित्वं धूमपरामर्शकार्यताऽवच्छेदकमतो न कोऽपि दोषः, कृतिवैशिष्ट्यं च कालिकविशेषणतया, अत्र सम्बन्धताऽवच्छेदके धूमपरामर्शो विशेषणतया कार्यताऽवच्छेदके चोपलक्षणतया निविष्टः, कृतेश्च विशेषणतया निवेशः, विनश्यदवस्थपरामर्शजन्यानुमितेः स्वपूर्वक्षणोत्पन्नजीवनयोनिकृतिमादाय तद्घटितकार्यताऽवच्छेदकाक्रान्तत्वमक्षुण्णं यद्वा निरुक्तसम्बन्धेन धूमपरामर्शविशिष्टस्वाश्रयत्वसम्बन्धेन कृतिविशिष्टानुमितित्वं कार्यताऽवच्छेदकमिति रीतिरुक्तमायैव,

अथ निरुक्तसम्बन्धस्य विशिष्टबुद्ध्यनियामकतया सम्बन्धत्वाभावेन वृत्त्यनियामकत्वेन च तेन सम्बन्धेन परामर्शवैशिष्ट्यस्य कृतिवैशिष्ट्यस्य च कार्यताऽवच्छेदकत्वं न सम्भवतीति चेद् ?

न—पचतीत्यादावाख्यातार्थकृतावनुकूलत्वसम्बन्धेन पाकाद्यन्वयस्य सकलाभियुक्तसम्मततया जनकताविशेषात्मकानुकूलत्वस्य विशिष्टबुद्धिनियामकत्ववृत्तिनियामकत्वयोरिव जन्यताविशेषात्मकनिरुक्तसम्बन्धस्यापि तयोर्दुरपवादत्वात् ,

न च जीवनयोनियत्ने मानाभावेन नोक्तरीतिः सम्भवतीति वाच्यम् ?

उक्तरीत्या परामर्शहेतुत्वान्यथाऽनुपपत्तेरेव मानत्वाद्, अनुमितिपरामर्शकार्यकारणभावविचारे तत्र प्रमाणान्तरस्यास्माभिरावेदित्वादिति कृतं पल्लवनेन,

केचित्तु-कार्यताऽवच्छेदककोटावुक्तसम्बन्धेन परामर्शवैशि-

ष्टयानिवेशे गौरवेणानुमितौ लिङ्गोपहितलैङ्गिकभानमुपेयते; तथा च वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्य वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताशाल्यनुमितित्वादेः कार्यताऽवच्छेदकतयाऽन्यलिङ्गकानुमितौ व्यभिचाराभावेनोक्तलक्षणसामञ्जस्यमित्याचार्यमतानुसारेण वदन्ति,

तदसत्-यद्याचार्यमते वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताशाल्यनुमितित्वं कार्यताऽवच्छेदकं; तदा यत्रादौ पर्वते धूमाभावनिश्चयोऽथ वह्निव्याप्यधूमवान्पर्वत इति लौकिकप्रत्यक्षात्मकः परामर्शस्ततो लिङ्गाविषयकानुमितिस्तत्र तदनुमितेरसंग्रहापत्तिरित्यव्यवहितोत्तरत्वादिकं निवेश्य तत्तत्परामर्शविशिष्टानुमितित्वमेव तत्तत्परामर्शजन्यताऽवच्छेदकं वाच्यमित्याचार्यमतेऽपि कार्यताऽवच्छेदके परामर्शवैशिष्ट्यानिवेशप्रयुक्तलाघवाभावेन लिङ्गोपहितलैङ्गिकभानस्य निर्युक्तिकत्वात् ,

न च तदानीमनुमित्यनभ्युपगमे क्षतिविरहादनुमित्यभ्युपगम एव नास्तीति वाच्यम् ?

तदानीमनुमित्यनभ्युपगमे भिन्नविषयकप्रत्यक्षमेव स्वीकार्यं तथा च तत्र व्यभिचारवारणाय भिन्नविषयकप्रत्यक्षं प्रति तादृशानुमितिसामग्रीप्रतिबन्धकतायां धूमाभाववतद्व्याप्यतदवच्छेदकधर्मदर्शनानामेवं व्याप्त्यभाववतद्व्याप्यतदवच्छेदकधर्मदर्शनानां चाभावनिवेशेऽतिगौरवापत्त्या तदानीमनुमित्यभ्युपगमस्यैवौचित्यात् ,

ननु वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यधूमवानिति परामर्शघटितानुमितिसामग्रीप्रतिबन्धकतायामवश्यं विशिष्टपर्वतत्वावच्छेदेन वह्न्यभावलौकिकप्रत्यक्षानिर्णये पर्वतत्वादिविशिष्टे धूमाभावादिनिर्णयानामभावो लिङ्गानुपधानवादिनाऽपि निवेशनीयस्तथा च लिङ्गोपधानवादिमतेऽपि विशिष्टधर्मिकपरामर्शकाले शुद्धपर्वतत्वावच्छिन्नविशेष्यकपरामर्शस्यावश्यकत्वात्तद्घटितानुमितिसामग्रीप्रतिबन्धकतयैव विशिष्टधर्मिकपरामर्शघटितानुमितिसामग्रीकाले भिन्नविषयकप्रत्यक्षानुत्पादसम्भवेन शुद्धपर्वतत्वावच्छिन्नविशेष्यकपरामर्शघटितानुमितिसामग्र्या एवोक्तधूमाभावादिनिश्चयाभावघटितायाः प्रतिबन्धकत्वं कल्प्यत इति न लिङ्गोपधानमते गौरवावकाशः प्रत्युत प्रतिबध्यप्रतिबन्धकभावद्वयाकल्पनप्रयुक्तलाघवमेवेति चेद् ?

न—शुद्धपर्वतत्वावच्छिन्नविशेष्यकपरामर्शघटितानुमितिसामग्र्याः पर्वतो वह्निमानिति सिद्ध्यभावघटितत्वेन विशिष्टधर्मिकपरामर्शघटितानुमितिसामग्र्याश्च विशिष्टधर्मिकसिद्ध्यभावघटितत्वेन लिङ्गोपधानमतेऽपि विशिष्टधर्मिकपरामर्शघटितानुमितिसामग्र्याः पर्वतो वह्निमानितिसिद्ध्यभावमनिवेश्य विशिष्टधर्मिकसिद्ध्यभावं निवेश्य पृथक् प्रतिबन्धकत्वकल्पनस्यावश्यकत्वात् ,

लिङ्गानुपधानमते विशिष्टधर्मिकपरामर्शकाले शुद्धपर्वतपक्षकपरामर्शस्यावश्यकतया धूमाभावादिनिर्णयकालेऽपि ततोऽनुमित्युत्पादे बाधकाभावेन विशिष्टधर्मिकपरामर्शघटितानुमिति-

प्रतिबन्धकतायामुक्तधूमाभावादिनिर्णयाभावस्यानिवेशाच्च,

अथ लिङ्गानुपधानमते हेतुताऽवच्छेदकभेदेनानुमिति-परामर्शयोः कार्यकारणभावभेदेन गौरवं लिङ्गोपधानमते तु हेतु-ताऽवच्छेदकनिष्ठप्रत्यासत्त्यैवानुमितिपरामर्शयोः कार्यकारण-भावकल्पनसम्भवेन तद्भेदेन न कार्यकारणभावभेद इति-लाघवेन लिङ्गोपधानं प्रामाणिकमेवेति चेद् ?

मैवं—लिङ्गानुपधानमतेऽपि हेतुताऽवच्छेदकमनिवेश्यैवानु-मितिपरामर्शयोः कार्यकारणभावकल्पनप्रकारस्यानुमितिपराम-र्शकार्यकारणभावविचारेऽस्माभिरुपपादनात्,

एवं चान्यलिङ्गकानुमितौ व्यभिचाराभावेन परामर्शकार्यता-ऽवच्छेदककोटावव्यवहितोत्तरत्वादिसम्बन्धेन परामर्शवैशिष्ट्य-निवेशे प्रयोजनाभावेन लिङ्गानुपधानमते तन्निवेशप्रयुक्तगौर-वोद्भावनमपि सुदूरपराहतमेव ; अत एव वह्निव्याप्यवत्पर्वतनि-श्चयत्वावच्छिन्नेति दीधितिस्वारस्यमपि, अन्यथा वह्निव्याप्य-धूमवत्पर्वतनिश्चयत्वावच्छिन्नेत्यस्यैवौचित्येन तदसंगतेः,

न चैवमपि व्याप्तेर्नानात्वेनान्यव्याप्तिघटितपरामर्शजन्यानु-मितौ व्यभिचारेण तत्तद्व्याप्तिघटितपरामर्शवैशिष्ट्यमवश्यं निवे-श्यमिति वाच्यम् ?

व्याप्तेरेकविधत्वस्याग्रे वक्ष्यमाणत्वादिति दिक् ।

ननूक्तरीत्याऽनुमितिपरामर्शयोः कार्यकारणभावः केन स-म्बन्धेनेति चेद् ?

अत्र साम्प्रदायिकाः—समवायेनैव तयोः कार्यकारणभावः,

न चैवं कायव्यूहदशायामेकशरीरावच्छेदेन परामर्शादन्यशरीरावच्छेदेनानुमित्यापत्तिरिति वाच्यम् ?

कार्यताऽवच्छेदके कारणताऽवच्छेदके च तत्तच्छरीरावच्छिन्नत्वस्यापि निवेशात्,

न चैवं सति शरीरनिष्ठावच्छेदकत्वप्रत्यासत्त्यैव तयोः कार्यकारणभावोऽस्तु शरीरात्मकावच्छेदकाप्रवेशेन लाघवादिति वाच्यम् ?

तथाऽपि परपुरप्रवेशदशायामेकशरीरावच्छेदेनैकात्मनि परामर्शसत्त्वेऽप्यन्यात्मन्यनुमित्यनुत्पादाय पुरुषनिवेशस्यावश्यकत्वेन तुल्यतया लाघवाभावादित्याहुः,

अन्ये तु—एवमपि शरीरादिनिष्ठप्रत्यासत्त्यैव कार्यकारणभावः, शरीरापेक्षया पुरुषाणामल्पत्वेन लाघवादित्याहुः,

वस्तुतस्तु—समवायेनावच्छेदकतया च तयोः पृथक् कार्यकारणभावद्वयं कल्प्यते पुरुषशरीरोभयानिवेशेन लाघवादित्येव तत्त्वम्,

अपरे-तु जनकतासम्बन्धेन सामानाधिकरण्यसम्बन्धेन वा पर्वतोद्देश्यकवह्निविधेयकानुमितित्वाद्यवच्छिन्नं प्रति तादात्म्येन वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयत्वादिना हेतुता,

न च सामानाधिकरण्येनानुमितेरात्मवृत्तिधर्मान्तरेऽप्युत्पत्त्या तत्र तादात्म्येन धूमपरामर्शासत्त्वाद्व्यभिचार इति वाच्यम् ?

धूमपरामर्शवृत्तिसामानाधिकरण्यस्यैव प्रत्यासत्तित्वात्,

न च कालान्तरीयधूमपरामर्शादावपि धूमपरामर्शवृत्ति-

सामानाधिकरण्येनानुमित्युत्पत्त्या तत्रानुमित्यव्यवहितपूर्वक्षणा-वच्छेदेन तादात्म्येन धूमपरामर्शासत्त्वाद्व्यभिचार इति वाच्यम् ?

तत्र–तादृशक्षणावच्छेदेन तादात्म्यसम्बन्धेन धूमपरामर्श-स्यैव तादात्म्यसम्बन्धेन तत्परामर्शाभावस्याप्यसत्त्वेन व्यभि-चाराभावात् कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यताऽवच्छेदक-सम्बन्धेन कार्याधिकरणे कारणताऽवच्छेदकसम्बन्धावच्छिन्न प्रतियोगिताककारणाभावसत्त्वस्यैव व्यभिचारत्वात् ,

एवं च कार्यताऽवच्छेदकेऽव्यवहितोत्तरत्वाप्रवेशेन पूर्वमता-पेक्षया लाघवमपि; अन्यलिङ्गकपरामर्शधूमपरामर्शवृत्तिसा-मानाधिकरण्यसम्बन्धेनानुमित्यनुत्पादेन तदनिवेशोऽपि व्य-भिचाराभावात् ,

एवं पूर्वमते पर्वतविशेष्यकत्ववह्निव्याप्यधूमप्रकारकत्वसं-शयान्यत्वज्ञानत्वानां मिथोविशेष्यविशेषणभावे विनिगमना-विरहेण कारणताबाहुल्यमवच्छेदकगौरवं च,

अस्मन्मते च तादात्म्येन पर्वतविशेष्यकत्वादिना पृथ-क्कारणताया वक्तव्यतया न विनिगमनाविरहेण कारणताबा-हुल्यमवच्छेदकगौरवं वा; महानसविशेष्यकवह्निव्याप्यधूमनिश्च-यसत्त्वे पर्वतविशेष्यकघटादिनिश्चयसत्त्वे पर्वतविशेष्यकवह्नि-व्याप्यधूमसंशयसत्त्वे पर्वतविशेष्यकवह्निव्याप्यधूमप्रकारकसं-स्कारसत्त्वे च पर्वतो वह्निमानित्यनुमित्यापत्तेस्तादात्म्येन तेषां कारणतयैव वारणसम्भवात् तादात्म्येन तावतां कारणा-नामेकत्रासत्त्वात् पूर्वमते तूक्तापत्तेर्भिन्नकारणतया वारणासम्भवेन

तेषामेकत्र निवेशस्यावश्यकतयोक्तरीत्या गौरवं दुर्वारमेव,

एवमस्मन्मते कारणताऽवच्छेदके पुरुषशरीरानिवेशादिनाऽपि लाघवम्,

अथैवमेकपुरुषस्य परामर्शसत्त्वे तच्छून्यपुरुषान्तरात्मन्येकशरीरावच्छेदेन परामर्शसत्त्वे शरीरान्तरावच्छेदेन च समवायादिना सिद्ध्यभावादिबलात् समवायादिना पर्वतोद्देश्यकवन्हिविधेयकानुमित्यापत्तिर्दुर्वारा तदानीं धूमपरामर्शवृत्तिसामानाधिकरण्यसम्बन्धेनानुमित्युत्पादकसामग्र्याः पुरुषान्तरीयतत्परामर्शे शरीरान्तरावाच्छिन्नतत्परामर्शे च सत्त्वादिति चेन्न?

न—समवायादिना धूमादिपरामर्शं विना तत्सम्बन्धावच्छिन्नप्रतियोगिताकेन धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावादिना फलाजननेन विना च तादृशसिद्ध्यभावादिकं समवायादिना धूमपरामर्शादिना फलाजननेन समवायादिप्रत्यासत्त्या हेतुत्वमते तेषां परस्परसहकारित्ववदस्मन्मतेऽपि विना तादात्म्यसमवेततच्छरीरावच्छिन्नधर्मे तादात्म्येन धूमपरामर्शादिकं तादृशसिद्ध्यभावादिना समवायादिना फलाजननेन विना च तादृशसिद्ध्यभावादिकं तादात्म्येन धूमपरामर्शेन धूमपरामर्शादिवृत्तिसामानाधिकरण्यसंबन्धेन फलाजननेन परस्परं तेषां सहकारित्वाभ्युपगमात्,

उपदर्शितस्थले च तदात्मसमवेततच्छरीरावच्छिन्नधर्मे तादात्म्यसम्बन्धेन धूमपरामर्शाद्यसत्त्वेन तादृशसिद्ध्यभावादिबलात्समवायादिना पर्वतोद्देश्यकवह्निविधेयकानुमित्यापत्तेरसम्भवात्;

एतेन सिद्ध्यादिमदात्मसमवेतासिद्ध्यादिमच्छरीरावच्छिन्न

धूमादिपरामर्शे धूमपरामर्शवृत्तिसामानाधिकरण्यसम्बन्धेनानुमित्यापत्तिरन्यात्मशरीरयोस्तदानीं तादृशसिद्ध्यभावादिसत्त्वादित्यपि परास्तम्,

तदात्मतच्छरीरयोस्तादृशसिद्ध्यभावादेरेव धूमपरामर्शादिना फलजनने सहकारित्वाभ्युपगमेन तदानीं सहकार्यभावेनोक्तापत्त्यभावात्,

एवं च पूर्वोक्तापत्तिवारणाय समवायेन तदात्मसमवेतानुमितौ तादात्म्येन तदात्मत्वेनावच्छेदकतया तच्छरीरावच्छिन्नानुमितौ तादात्म्येन तच्छरीरस्य सामानाधिकरण्येन तदात्मसमवेतानुमितौ तादात्म्येन तदात्मसमवेतत्वेन सामानाधिकरण्येन तच्छरीरावच्छिन्नसमवेतानुमितौ तादात्म्येन तच्छरीरावच्छिन्नसमवेतत्वेन हेतुता कल्प्यते सिद्ध्यभावादिघटितसामग्र्यां सर्वेषामेव निवेशान्नोक्तापत्तिरिति केषाञ्चिदुक्तिरज्ञानमूलैवेति प्राहुः।

नवीनास्तु—समानधर्मिताऽवच्छेदकत्वमेवानुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः सामानाधिकरण्यप्रत्यासत्तिकल्पे पर्वतत्वाद्यवच्छिन्नविशेष्यकपरामर्शाद् द्रव्यत्वाद्यवच्छिन्नविशेष्यकानुमितेरनुत्पत्त्या धर्मिताऽवच्छेदकानिवेशापत्त्या एतत्कल्पे तदनिवेशेन लाघवात्, तथा च वह्नित्वावच्छिन्नविधेयतानिरूपितविशेष्यताऽवच्छेदकतासम्बन्धेन वह्निविधेयकानुमितित्वावच्छिन्नं प्रति; अनुमितित्वावच्छिन्नं प्रत्येव वा वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यताऽवच्छेदकतासम्बन्धेन वह्नि-

व्याप्यधूमप्रकारकानिश्चयत्वेन निश्चयत्वेनैव वा हेतुता; पर्वतत्वावच्छिन्नविशेष्यकपरामर्शस्य विशेष्यताऽवच्छेदकतया द्रव्यत्वादावसत्त्वेन न तत्र तेन सम्बन्धेनानुमित्यापत्तिः,

न चैतत्कल्पे विशेष्यव्यक्तीनां विशिष्यनिवेशनमावश्यकम-न्यथा पर्वतत्वेनैकपर्वतविशेष्यकपरामर्शात्पर्वतत्वेनापरपर्वतवि-शेष्यकानुमित्यापत्तेः,

एवं च तादृशविशेष्यताऽवच्छेदकताप्रत्यासत्त्या हेतुत्वमथ वा वह्निविधेयतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतासम्बन्धेन वह्निवि-धेयकानुमितिं प्रति वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छि-न्नविशेष्यतासम्बन्धेन वह्निव्याप्यधूमप्रकारकानिश्चयत्वेन हेतुत्व-मित्यत्र विनिगमनाविरहः, विनिगमनाविरहेणोभयप्रत्यासत्त्याऽपि हेतुत्वाङ्गीकारे च विशेष्यविशेष्यताऽवच्छेदकोभयनिवेशस्याप्या-वश्यकत्वेन सामानाधिकरण्यप्रत्यासत्त्यपेक्षया लाघवानवकाशा-दिति चेन् ?

न–पर्वतत्वेनैकपर्वतविशेष्यकपरामर्शात् पर्वतत्वेनापरपर्वत-विशेष्यकानुमितेरिष्टत्वेन विशेष्यव्यक्तीनां विशिष्य निवेशनस्या-नावश्यकत्वात्,

न च तथाऽप्येतत्कल्प एकपुरुषीयपरामर्शात्पुरुषान्तरीया-नुमितिवारणाय तत्तत्पुरुषीयत्वनिवेशेन गौरवं दुर्वारमिति वाच्यम् ?

एवमपि पुरुषापेक्षया विषयाणां बाहुल्येन विषयाप्रवेशे लाघवानपायाद्; यद्वा–एतत्कल्पेऽपि विशेष्यताऽवच्छेदकमनि-

वेश्य समवायेन वह्निविधेयकानुमितिं प्रति समवायेन वह्निव्याप्यधूमप्रकारकनिश्चयस्य हेतुत्वान्तरं स्वीक्रियते ; अतो नैकपुरुषीयपरामर्शात्पुरुषान्तरीयानुमितिप्रसङ्गः,

अथैवं यदा चैत्रस्य वह्निव्याप्यधूमवद्द्रव्यमिति परामर्शो मैत्रस्य च वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्तदा चैत्रस्य पर्वतो वह्निमानित्यनुमितेर्मैत्रस्य च द्रव्यं वह्निमदित्यनुमितेः प्रसङ्गः ; चैत्रमैत्रयोरपि समवायेन पर्वतत्वद्रव्यत्वयोरुभयोरपि विशेष्यताऽवच्छेदकतया च वह्निव्याप्यधूमप्रकारकनिश्चयस्य सत्त्वादिति चेद् ?

न—यत्रैकधर्मावच्छिन्नं प्रत्येकधर्मावच्छिन्नस्योभयप्रत्यासत्त्या हेतुत्वं तत्र विलक्षणाया एव सामग्रीव्याप्तेः स्वीकरणीयतयाऽऽपत्त्यभावात् ,

तथा हि—तद्धर्मावच्छिन्ननिष्ठयादृशसम्बन्धावच्छिन्नकार्यतानिरूपितत्वावच्छिन्नकारणताघटकप्रत्यासत्त्या[1] यदाधिकरणप्रत्यासन्नस्य कारणताऽवच्छेदकविशिष्टस्य तद्धर्मावच्छिन्ननिष्ठसम्बन्धान्तरावच्छिन्नकार्यतानिरूपितत्वावच्छिन्नकारणताघटकसम्बन्धेन यदधिकरणं तत्तेन सम्बन्धेन तदधिकरणप्रत्यासन्नस्य कार्यताऽवच्छेदकावच्छिन्नस्य तेन सम्बन्धेनाधिकरणमिति सामग्रीव्याप्तिरूप्यते,

उक्तस्थले तु वह्न्यनुमितित्वावच्छिन्ननिष्ठसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितवह्निव्याप्यधूमप्रकारकनिश्चयत्वावच्छिन्नकारणताघटकसमवायेन चैत्रात्मप्रत्यासन्नस्य वह्निव्याप्यवत्ता-

निश्चयस्य वह्न्यनुमितित्वावच्छिन्ननिष्ठविशेष्यताऽवच्छेदकताप्रत्यासत्त्यवच्छिन्नकार्यतानिरूपितत्वावच्छिन्नकारणताघटकविशेष्यताऽवच्छेदकतासम्बन्धेनाधिकरणं द्रव्यत्वमिति तस्यैव चैत्रात्मप्रत्यासन्नवह्न्यनुमितित्वावच्छिन्नस्य विशेष्यताऽवच्छेदकताप्रत्यासत्त्याऽधिकरणत्वं न पर्वतत्वस्य,

एवं समवायेन मैत्रात्मप्रत्यासन्नस्य वह्निव्याप्यवत्तानिश्चयस्य विशेष्यताऽवच्छेदकतयाऽधिकरणं पर्वतत्वमिति तस्यैव मैत्रात्मप्रत्यासन्नस्य वह्न्यनुमितित्वावच्छिन्नस्य विशेष्यताऽवच्छेदकताप्रत्यासत्त्याऽधिकरणत्वं न द्रव्यत्वस्येति न दोषः,

नन्विदमयुक्तं—चैत्रस्य पर्वतो वह्निमानितिसिद्धिसत्त्वेऽपि वह्निव्याप्यधूमवान् पर्वत इति परामर्शात् पर्वतो वह्निमानित्यनुमित्यापत्तिः; चैत्रात्मसमवेतवह्निव्याप्यधूमप्रकारकनिश्चयस्य विशेष्यताऽवच्छेदकतया पर्वतत्वे सत्त्वात्,

न च कारणताऽवच्छेदकसमवायेन कारणाधिकरणे तत्कारणतानिरूपिता या कार्यता तदाश्रययत्किञ्चिद्व्यक्तिनिष्ठतदवच्छेदकसम्बन्धावच्छिन्नकार्यताऽन्तरनिरूपितकारणताऽवच्छेदकीभूतनिखिलधर्मावच्छिन्नविशिष्टत्वस्यापि निवेशनीयतया सिद्ध्यादिकाले नानुमित्यापत्तिः; तदानीं चैत्रात्मनि तादृशयावदन्तर्गतसिद्ध्यभावत्वावच्छिन्नसिद्ध्यभावविशिष्टत्वासत्त्वादिति वाच्यम् ?

तदानीं पर्वतो वह्निमानिति सिद्ध्यभावासत्त्वेऽपि वह्निव्याप्यधूमप्रकारकनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यताऽऽश्रयद्रव्यत्वावच्छिन्नविशेष्यकानुमितिरूपयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानि-

रूपितकारणताऽवच्छेदकावच्छिन्नस्य द्रव्यं वह्निमदिति सिद्ध्यभावस्यासत्त्वेनापत्तेर्दुर्वारत्वादिति चेद् ?

नैवं—तद्धर्मावच्छिन्नयद्व्यक्तिनिष्ठयादृशसम्बन्धावच्छिन्नकार्यतानिरूपितत्वावच्छिन्नकारणताघटकप्रत्यासत्त्या तद्व्यक्तिनिष्ठधर्मान्तरावच्छिन्नतादृशसम्बन्धावच्छिन्नकार्यतानिरूपितकारणताऽवच्छेदकनिखिलधर्मावच्छिन्नविशिष्टस्य यदाधिकरणप्रत्यासन्नस्य कारणताऽवच्छेदकविशिष्टस्य तद्धर्मावच्छिन्नतद्व्यक्तिनिष्ठसम्बन्धान्तरावच्छिन्नकार्यतानिरूपितत्वावच्छिन्नकारणताघटकसम्बन्धेन यदधिकरणं तत् तादृशसम्बन्धेन तदधिकरणप्रत्यासन्नस्य कार्यताऽवच्छेदकावच्छिन्नस्य तेन सम्बन्धेनाधिकरणमित्येतादृशसामग्रीव्याप्तेः प्रकृते स्वीकारान्न कोऽपि दोषः, द्रव्यं वह्निमदिति सिद्ध्यभावस्य कार्यताऽवच्छेदकावच्छिन्नपर्वतोवह्निमानित्यनुमितिव्यक्तिनिष्ठपर्वतविशेष्यकवह्निविधेयकानुमितित्वरूपधर्मान्तरावच्छिन्नकार्यतानिरूपितकारणताऽवच्छेदकावच्छिन्नत्वाभावात् तदवच्छिन्नस्य पर्वतो वह्निमानितिसिद्ध्यभावस्य तु तदानीं चैत्रात्मन्यसत्त्वात्,

यदा यदधिकरणप्रत्यासन्नकारणताऽवच्छेदकविशिष्टयद्धर्मावच्छिन्नविशेष्यकव्यक्तौ सामग्रीव्याप्तिनिर्वचनं तदा तद्व्यक्तिसमानधर्मिताऽवच्छेदकानुमितिव्यक्तिरेव यद्व्यक्तिपदेन सामग्रीव्याप्तिघटकत्वेनोपादेया तेनोक्तस्थले द्रव्यं वह्निमदित्याद्यनुमितिव्यक्तिमादाय नोक्तापत्तितादवस्थ्यमिति संक्षेपः,

नन्वेवमपि पर्वतत्वसामानाधिकरण्येन परामर्शात्पर्वतत्वा-

च्छेदेनानुमित्यनुदयेन पर्वतत्वव्यापकवह्निसंयोगेन वह्निविधेयकानुमितौ पर्वतत्वव्यापकधूमसंयोगेन धूमपरामर्शस्य हेतुत्वावश्यकत्वे धर्मिताऽवच्छेदकानिवेश आवश्यकः,

अथ पर्वतत्वमनिवेश्य यत्किंचिद्व्यक्तित्वस्याभावप्रतियोगिताऽवच्छेदकत्वाभावनिष्ठविषयतानिरूपितवह्नित्वनिष्ठविषयतानिरूपितावच्छिन्नत्वनिष्ठविषयतानिरूपितवह्निनिष्ठविषयतानिरूपितसंयोगनिष्ठविषयतानिरूपिका या वह्नित्वावच्छिन्नविधेयता तन्निरूपितविशेष्यताऽवच्छेदकतासम्बन्धेनानुमितिं प्रति तादृशाभावनिष्ठविषयतानिरूपितधूमत्वविषयतानिरूपितावच्छिन्नत्वविषयतानिरूपितधूमविषयतानिरूपितसंयोगविषयतानिरूपकधूमत्वावच्छिन्नप्रकारतानिरूपितविशेष्यताऽवच्छेदकतासम्बन्धेन परामर्शस्य हेतुत्वात्तत्रान्नोक्तदोषः इति चेद् ?

न-तथा सति महानसत्वादिव्यापकधूमसंयोगसम्बन्धेन धूमप्रकारकपर्वतत्वावच्छिन्नविशेष्यकपरामर्शादपि पर्वतत्वावच्छेदेन वह्न्यनुमित्यापत्तिरिति चेद् ?

मैवं—संसर्गघटकतया पर्वतत्वादेः प्रवेशेऽपि विशेष्यताऽवच्छेदकताप्रत्यासत्त्या हेतुत्वमेव युक्तं तथा सति पर्वतत्वव्यापकधूमसंयोगसंसर्गावच्छिन्नवह्निव्याप्यधूमप्रकारकपर्वतत्वद्रव्यत्वाद्यनन्तधर्मावच्छिन्नविशेष्यताकपरामर्शानां पृथग् हेतुत्वाकल्पनेन लाघवात्,

न च तद्धर्मावच्छिन्नविशेष्यताकबुद्धौ तद्धर्मव्यापकताया एव संसर्गतया भानमुपेयते नापरधर्मव्यापकताया इति सामा-

नाधिकरण्यप्रत्यासत्तिकल्पेऽपि तादृशपरामर्शानां पृथग् हेतुत्वाभावान् न गौरवमिति वाच्यम् ?

तथा सति अथेत्याद्युक्तरीतेरेव निर्दोषत्वसम्भवात्,

वस्तुतस्तु—वह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपितसंयोगनिष्ठविषयतानिरूपितधूमनिष्ठविषयतानिरूपितावच्छिन्नत्वविषयतानिरूपितधूमत्वविषयतानिरूपितावच्छेदकत्वविषयतानिरूपितप्रतियोगित्वविषयतानिरूपिताभावविषयतानिरूपिताधेयत्वविषयतानिरूपितविषयताऽवच्छेदकत्ववह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यताऽवच्छेदकत्वोभयसम्बन्धेन वह्निव्याप्यधूमप्रकारकानिश्चयत्वेन हेतुता वह्निविधेयतानिरूपितसंयोगसंसर्गविषयतानिरूपितवह्निविषयतेत्येवंक्रमेणाधेयत्वविषयताऽन्तं निवेश्य तन्निरूपितविषयताऽवच्छेदकत्ववह्नित्वावच्छिन्नविधेयतानिरूपितविशेष्यताऽवच्छेदकत्वोभयसम्बन्धेन वह्निविधेयकानुमितित्वेन कार्यतेत्येवंरीत्या हेतुहेतुमद्भावाङ्गीकारान्न कोऽपि दोषः, महानसविशेष्यकपर्वतत्वव्यापकधूमसंयोगसम्बन्धावच्छिन्नवह्निव्याप्यधूमप्रकारकज्ञानस्य प्रथमसम्बन्धेन पर्वतत्वे सत्त्वेऽपि द्वितीयसम्बन्धेनासत्त्वाद्,

न च पर्वतवृत्तिघटाभावप्रतियोगिताऽनवच्छेदकत्वावगाहिज्ञानात्पर्वतत्वव्यापकत्वावगाहिन्या अनुमितेरापत्तिरिति वाच्यम् ?

आधेयत्वातिरिक्तविषयत्वानिरूपितत्वस्याभावविषतायां—निवेशात्,

अत्र सम्बन्धद्वयघटकवह्निव्याप्यधूमप्रकारतयोरैक्यं विवक्षणीयं; तेन महानसविशेष्यकपर्वतत्वव्यापकधूमसंयोगसम्बन्धा-

वच्छिन्नधूमप्रकारकपर्वतविशेष्यकशुद्धसंयोगादिसम्बन्धावाच्छिन्नधूमप्रकारताकसमूहालम्बनस्य धूमप्रकारताद्वयमादाय संबन्धद्वयेन पर्वतत्वे सत्त्वेऽपि न ततोऽवच्छेदकावच्छेदेन वह्न्यनुमित्यापत्तिरिति ध्येयम्,

न च यत्र पर्वतत्वव्यापकवाह्निसंयोगेन वह्नेर्व्यापकत्वावगाहिशुद्धसंयोगेन धूमप्रकारकज्ञानात्पर्वतत्वावच्छेदेन वह्न्यनुमितिस्तत्रैतादृशरीत्याऽपि विशेष्यताऽवच्छेदकमानिवेश्य कार्यकारणभावासम्भव इति वाच्यम् ?

तादृशस्थल आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावस्यैवाङ्गीकारात्,

अथ वा—तत्रापि प्रागुक्तसम्बन्धेन वह्निविधेयकानुमितिं प्रति स्वनिरूपितसामानाधिकरण्यविषयतानिरूपितावच्छिन्नत्वविषयतानिरूपितवह्नित्वविषयतानिरूपिताभावविषयतानिरूपितावच्छेदकत्वविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितसंयोगविषयतानिरूपितवह्निविषयतेत्यादिक्रमेणाधेयत्वविषयतापर्यन्तं निवेश्य तन्निरूपितविषयताऽवच्छेदकावच्छिन्नत्वस्वानिरूपितत्वोभयसम्बन्धेन धूमप्रकारताविशिष्टा या विशेष्यता तदवच्छेदकत्वसम्बन्धेन परामर्शस्य हेतुत्वान्तरकल्पनान्नानुपपत्तिरिति सर्वमवदातम्,

न चैतत्कल्पे वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वस्य कारणताऽनवच्छेदकतया वह्निव्याप्यवत्पर्वतनिश्चयत्वावच्छिन्नेत्यादिप्रागुक्तलक्षणानुपपत्तिरिति वाच्यम् ?

एतदस्वरसेनैव दीधितिकारेण यां कां चिदित्यादिना लक्षणान्तरप्रणयनादिति वदन्ति,

तदसत्–निश्चयत्वानिर्वचनानुरोधेनाप्रामाण्यज्ञानोत्तेजकत्वानुरोधेन चैतत्कल्पेऽपि धर्मिताऽवच्छेदकानिवेशस्यावश्यतकतया तदनिवेशप्रयुक्तलाघवासम्भवात्,

किं चाहार्यत्वस्यानुगतस्य दुर्वचतयाऽनाहार्यत्वं तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वरूपमेवाहार्यपरामर्शादनुमिति वारणायानुमितिजनकताऽवच्छेदककोटौ निवेशनीयमिति तावद्भेदकूटस्यैकत्र निवेशेन तेषां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तकारणताऽऽनन्त्यं धर्मिताऽवच्छेदकप्रत्यासत्त्या कारणतामते दुर्वारं सामानाधिकरण्यप्रत्यासत्त्या कारणतामते तद्धर्मावच्छिन्नविशेष्यकपरामर्शकारणतायां तादृशाहार्यपरामर्शभेदानामेव निविष्टतयोक्तरीत्या तदसम्भवादिति दिक्।

अधिकमस्मत्कृतानुमितिपरामर्शयोर्हेतुहेतुमद्भावघटकसम्बन्धविचारेऽनुसन्धेयम्।

नन्वेवमप्युपदर्शितलक्षणमनुपपन्नं धूमो वह्निव्याप्यो धूमवान्पर्वत इत्यादिज्ञानद्वयसाधारणगृह्यमाणव्याप्यताऽवच्छेदकप्रकारकपक्षधर्मतानिश्चयत्वस्यैवानुमितिजनकताऽवच्छेदकत्वात्,

न च कालान्तरीयपुरुषान्तरीयव्याप्तिग्रहमादायातिप्रसङ्गवारणाय तत्कालीनतत्पुरुषीयग्रहनिवेशेनानन्तकारणतापत्त्या व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वस्यैवानुमितिजनकताऽवच्छेदकत्वमिति वाच्यम्?

अतीन्द्रियासान्निकृष्टहेतुके विशिष्टपरामर्शासम्भवेनोक्तगौरवस्य प्रामाणिकत्वात्,

न च तत्र ज्ञानद्वयस्याप्यसम्भव इति वाच्यम् ?

स्मरणादिरूपस्य तस्य तत्र सम्भवात्,

न च विशिष्टपरामर्शस्यापि स्मरणरूपस्य सम्भव इति वाच्यम् ?

यत्र विशिष्टस्मरणसामग्री नास्ति स्मरणद्वयसामग्री चास्ति तत्रागतेः,

न च तत्रानुमानिक एव विशिष्टपरामर्शोऽभ्युपेय इति वाच्यम् ?

तादृशानुमानानवतारे फलापलापप्रसङ्गात्,

न च तत्रापि व्याप्तिस्मरणाद्युपनयसहकृतमनसोपनीतभानात्मको विशिष्टपरामर्शः सम्भवत्येवेति वाच्यम् ?

तथा सति यदसाधारणं सहकार्यसाध्यं मनोबहिर्गोचरां प्रमां जनयति तस्य प्रमाणान्तरत्वमिन्द्रियादिवदिति नियमबलेन व्याप्तिस्मरणाद्युपनयस्य प्रमाणान्तरताऽऽपत्त्योपनयसहकारेण मनसोपनीतभानाजननेन विशिष्टपरामर्शासम्भवाद्, उक्तनियमे यदसाधारणमित्यादि—जनयतीत्यन्तस्य मनसा बहिर्गोचरप्रमाजननेन यदसाधारणसहकारी भवतीत्यर्थः, तेन बहिर्गोचरप्रमाऽसाधारणकारणत्वमापादकमिति फलितं, सुखादिगोचरप्रमाजनके सुखादिनिष्ठसान्निकर्षे व्यभिचारवारणाय बहिर्गोचरेति, बहिर्विशिष्टं च लौकिकमानसाविषयत्वं, स्मृतिजनकसंस्कारादौ व्यभिचार-

वारणायानुभवार्थकं प्रमापदं, शरीरादौ व्यभिचारवारणायासाधारणेति,

एवं च शरीरादेर्बहिर्गोचरप्रमाजनकत्वेऽपि जन्यज्ञानसामान्यं प्रत्येव हेतुतया तादृशप्रमां प्रत्यसाधारणकारणत्वाविरहान्न व्यभिचारः,

अत्र तादृशप्रमाऽसाधारणकारणत्वं यदि स्मरणावृत्तितादृशप्रमावृत्तिकार्यतानिरूपकत्वं तदा स्मृतिजनकसंस्कारादिवारकप्रमात्वनिवेशवैफल्यं, विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नहेतुभूतविशेषणताऽवच्छेदकप्रकारकज्ञानादौ व्यभिचारश्च, अत एव जन्यज्ञानत्वानवच्छिन्नतादृशप्रमावृत्तिकार्यतानिरूपकत्वं तदित्यपि निरस्तम्,

यदि चानुभवत्वव्यापकजातिघटितधर्मावच्छिन्नकार्यत्वानिरूपकत्वे सति तादृशप्रमाजनकत्वं तत् तदाऽनुभवत्वस्याप्यनुभवत्वव्यापकतया तदवच्छिन्नजनके विशेषणताऽवच्छेदकप्रकारकज्ञाने व्यभिचारवारणसम्भवेऽपि जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतौ चक्षुरादावापादकासत्त्वेनेन्द्रियादिवदिति दृष्टान्तासङ्गतिः, रूपावृत्तित्वेन सत्तावत्त्वेन वा तादृशजातिं विशिष्यैतद्दोषोद्धारेऽपि व्याप्तिविशिष्टवैशिष्ट्यानुभवत्वाद्यवच्छिन्नं प्रति विशेषणताऽवच्छेदकप्रकारकज्ञानविषयव्याप्तिस्मरणादेर्हेतुतायाः सर्वमतसिद्धतया तत्रापादकासिद्धिर्दुर्वारैवेति; अनुभवत्वव्याप्यजातिघटितधर्मावच्छिन्ना या तादृक्प्रमावृत्तिकार्यता तन्निरूपकत्वमेव तादृशप्रमासाधारणकारणत्वं वाच्यम्, अनुभवत्वव्याप्यत्वं चानुभववृत्ति-

भेदप्रतियोगिताऽवच्छेदकत्वं तच्च ज्ञानत्वादेरिवानुभवत्वादपि व्यावृत्तमतो न विशेषणताऽवच्छेदकप्रकारकज्ञाने व्यभिचारः,

एवं तादृशधर्मस्य स्मृतित्वेऽव्यक्षततया तदवच्छिन्नहेतुभूतसंस्कारादौ व्यभिचारवारणाय प्रमात्वनिवेशस्यावश्यकता व्याप्तिस्मरणादेर्विशिष्टवैशिष्ट्यानुभवत्वाच्छिन्नजनकत्वेऽपि नैयायिकैः सन्निकर्षविधयाऽलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति तस्य कारणत्वान्तरोपगमान्न तत्रापादकासिद्धिः; तन्निरूपिताया अलौकिकप्रत्यक्षत्वावच्छिन्नकार्यताया एवानुभवत्वव्याप्यजातिघटितधर्मावच्छिन्नत्वात्तामादायैवापादकसत्तायास्तत्रोपपादनीयत्वाद्, अलौकिकप्रत्यक्षत्वस्योपाधितया तदवच्छिन्नजन्यताया जात्यवच्छिन्नत्वविरहादापादकासिद्धिः स्यादतो जातिघटितेत्युक्तं, तादृशजातावच्छेदकतापर्याप्तिनिवेशस्फोरकमेवात्र घटितपदं न त्वविवक्षितार्थकमित्यवधेयम् ,

अत्रालोकादेरप्यनुभवत्वव्याप्यचाक्षुषत्वादिजातिघटितधर्मावच्छिन्नजनकतया निर्वाच्यप्रमाणान्तरत्वरूपापाद्यविरहेण च व्यभिचार इति तद्वारणायापादककोटौ प्रमाणान्तरासहकारित्वं विशेषणान्तरं देयं, मनोभिन्नस्वभिन्नप्रमाणासहकारित्वं च तदर्थः, चक्षुरादेरपि स्वात्मकप्रमाणजन्यताऽवच्छेदकावच्छिन्नजनकत्वरूपतत्सहकारित्वसत्त्वाद् दृष्टान्तासिद्धिः स्यादतः स्वभिन्नेति प्रमाणविशेषणम् ,

न च चक्षुरादेः स्वभिन्नचक्षुरादिव्यक्त्यन्तरजन्यताऽवच्छेदकचाक्षुषत्वावच्छिन्नजनकत्वरूपतत्सहकारित्वसत्त्वात्स्वभिन्नत्व-

विशेषणदानेऽप्यनिस्तार इति वाच्यम् ?

स्वभिन्नत्वरूपप्रमाणविशेषणं परित्यज्य प्रमाणजन्यतायां स्वानिरूपितत्वस्य निवेशनीयतयैतद्दोषानवकाशाद् उपनायकज्ञानस्य मनोरूपप्रमाणसहकारितयाऽऽपादकासिद्धिरतो मनोभिन्नेति,

नन्वत्र सहकारित्वं न तज्जन्यजनकत्वं तथा सति चक्षुरादेरपि त्वगादिजन्यचक्षुस्त्वगाद्युभयवृत्तिद्वित्वादिजनकतया दृष्टान्तासिद्धेः,

नापि—तज्जन्यजनकस्वरूपयोग्यत्वं चक्षुरादेरपीन्द्रियत्वेन त्वगादिजन्यप्रत्यक्षस्वरूपयोग्यतया तद्दोषतादवस्थ्यात् फलोपहितजनकत्वान्ततन्निवेशेनैतद्दोषोद्धारेऽपि शरीरादेरपि निरुक्तप्रमाणान्तरसहकारित्वसत्त्वेन तद्वारकमूलोक्तसाधारणपदवैयर्थ्यमतस्तज्जन्यताऽवच्छेदकजातिघटितधर्मावच्छिन्नजन्यतानिरूपकत्वमेव तत्सहकारित्वं वाच्यं; तथा च मनोभिन्नत्वरूपप्रमाणविशेषणवैयर्थ्यम् उपनायकज्ञानजन्यताया मनोजन्यताऽवच्छेदकमानसत्वघटितधर्मावच्छिन्नत्वाद् नैयायिकैर्बहिरिन्द्रियजन्योपनीतभानसाधारणालौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येवोपनायकहेतुत्वोपगमात् ,

न च प्रत्यक्षत्वजातिरपि मनोजन्यताऽवच्छेदिका प्रत्यक्षत्वावच्छिन्नं प्रतीन्द्रियत्वेन सामान्यकारणतासत्त्वादिति वाच्यम् ?

तादृशसामान्यकार्यकारणभावस्य प्रामाणिकत्वे मनोभिन्नत्वविशेषणोपादानेऽपि तथाविधचक्षुरादिप्रमाणजन्यताऽवच्छेदकप्रत्यक्षत्वमादाय तद्दोष इति निरुक्तसहकारिताघटकजातौ प्रत्य-

क्षनिष्ठभेदप्रतियोगिताऽवच्छेदकत्वाविशेषणस्यावश्यकतया मनो-भिन्नत्वानिवेशेऽप्युक्तदोषाभावात् ,

न च न देयमेव मनोभिन्नत्वरूपं प्रमाणविशेषणम् अन्तरप-दस्य स्वभिन्नपरतयैव सार्थक्यादिति वाच्यम् ?

मनोभिन्नत्वानुपादाने मनःसहकारिसुखादिमनःसन्निकर्षे व्यभिचारप्रसक्तेर्बहिःपदवैयर्थ्यापत्तेः,

न चेष्टापत्तिः, तथा सति मणिकारादीनां बहिःपदघटितता-दृशनियमलिखनासङ्गतेरिति चेद् ?

न—उपनायकज्ञानस्य जन्यताऽवच्छेदकं मानसत्वमेव, बहि-रिन्द्रियजन्यज्ञाने उपनीतस्य विशेषणतया तत्र विशेषणज्ञानविध-यैवोपनायकज्ञानहेतुत्वात् तत्साधारणधर्मस्य तज्जन्यताऽवच्छेदक-त्वेऽपि क्षतिविरहात्, तथा च निरुक्तमनःसहकारित्वमुपनायक-ज्ञानस्याक्षतमेवेति मनोभिन्नत्वरूपप्रमाणविशेषणमावश्यकम् ,

अथ वा—मनोभिन्नत्वेन न प्रमाणं विशेषणीयमपि त्विन्द्रि-यत्वावच्छिन्ननिरूपितजन्यतामादायोक्तदोषवारणाय निरुक्तजा-तिविशेषणं परित्यज्य प्रमाणजन्यतायां मनोनिरूपितत्वमेव नि-वेश्यं तेनैव बहिःपदसार्थक्यादिति,

आलोकादिसहकारितया चक्षुरादावसिद्धिरतः प्रमाणेति, प्रमाणत्वं चात्रानुभववृत्तिजातिपर्याप्तकार्यताऽवच्छेदकताकत्वं, चक्षुरादेश्चक्षुरादिना शुद्धचाक्षुषत्वाद्यवच्छिन्नं प्रत्येव सामान्य-हेतुतासत्त्वात्तत्रेदमक्षतमेवेति, आलोकस्य च भावचाक्षुषत्वं द्रव्य-चाक्षुषत्वादिकं वा जन्यताऽवच्छेदकं चक्षुःसंयोगादिरूपविशेषवि-

षयेन्द्रियसन्निकर्षस्यापि द्रव्यचाक्षुषत्वादिकमेव तथा, न तु शुद्ध-चाक्षुषत्वादिकमिति न तत्सहकारितामादाय चक्षुरादावसिद्धिः,

न चैवमपि चक्षुर्मनोयोगादिजन्यताऽवच्छेदककोटौ विषया-दिनिवेशे प्रयोजनविरहेण शुद्धचाक्षुषत्वादिकमेव तज्जन्यताऽव-च्छेदकमुपेयते, एवं च तेषामपि निरुक्तप्रमाणत्वशालितया तत्सहकारितामादायेन्द्रियेऽसिद्धिरिति वाच्यम् ?

संयोगान्यत्वस्यापि प्रमाणशरीरेऽन्तर्भावात् ,

न चोक्तप्रमाणान्तरासहकारित्वनिवेशोऽप्युद्भूतरूपे व्य-भिचारः; तस्य मूर्त्तप्रत्यक्षत्वावच्छिन्नं प्रत्येव जनकतया चक्षुरा-दिजन्यताऽवच्छेदकावच्छिन्नजन्यताकत्वरूपतत्सहकारित्वाभावा-दिति वाच्यम् ?

मीमांसकैर्वायुप्रत्यक्षाभ्युपगमेन मूर्त्तचाक्षुषत्वस्यैव' तज्ज-न्यताऽवच्छेदकत्वोपगमेन तस्य चक्षुःसहकारितया अक्षतत्वात् ,

एवं महत्त्वस्यापि द्रव्यचाक्षुषत्वमेव जन्यताऽवच्छेदकं न तु द्रव्यप्रत्यक्षत्वमतो न व्यभिचारः,

त्रुटेरस्पार्शत्वोपपत्तये स्पार्शनं प्रति त्रुटिमहत्त्वव्यावृत्तवि-जातीयमहत्त्वेन हेतुत्वान्तरस्यावश्यकतया चाक्षुषत्वस्य महत्त्वज-न्यताऽवच्छेदकत्वेऽपि न परमाणुद्व्यणुकस्पार्शनापत्तिः, विषयस्य च हेतुत्वमप्रामाणिकमेवेति न तत्र व्यभिचारः,

अथ व्याप्तिस्मरणस्यापि योग्यताज्ञानविधया शब्दप्रमाण-सहकारितया तत्रापादकासिद्धिरिति चेद् ?

न-सहकारिताशरीरे चरमजन्यतायाः फलोपधानरूपाया-

एव विवक्षणीयत्वात् शाब्दफलानुपधायकव्याप्तिज्ञानस्यैव पक्षत्वेनापादकासिद्ध्यनवकाशात्,

अत्रेदमवधेयं—निरुक्तस्य प्रमाणान्तरासहकारित्वस्य न स्वातन्त्र्येणापादकोटिनिवेशो गौरवात्; अपि त्वनुभवत्वव्याप्यजात्यवच्छिन्नवहिर्गोचरप्रमानिष्ठकार्यतानिरूपकत्वात्मकताहशप्रमाऽसाधारणकारणताघटकजातावेव प्रमाणान्तरजन्यताऽनवच्छेदकत्वं निवेशनीयं, तच्च स्वानिरूपिता मनोऽनिरूपिता च या जन्यता तदवच्छेदकतापर्याप्त्यनधिकरणत्वं, पर्याप्तिनिवेशाच्चाक्षुषत्वादेरालोकजन्यताऽवच्छेदकघटकत्वेऽपि न दृष्टान्तासिद्धिः, मनोऽनिरूपितेत्यस्य मनस्त्वघटितधर्मावच्छिन्नानिरूपितार्थकतया मनस्त्वघटितचक्षुर्मनोयोगत्वाद्यवच्छिन्नजन्यतामादायोक्तदोषस्यानवकाशः,

एवं च स्वानिरूपिता मनस्त्वघटितधर्मावच्छिन्नानिरूपिता च या जन्यता तदवच्छेदकत्वपर्याप्त्यनधिकरणीभूता याऽनुभवनिष्ठभेदप्रतियोगिताऽवच्छेदिका जातिस्तद्घटितधर्मावच्छिन्ना या वहिर्विषयकानुभवनिष्ठकार्यता तन्निरूपकत्वमापादकदलसमुदायार्थः, प्रमाणान्तरत्वं चापाद्यं, तच्च न क्लृप्तप्रमाणचतुष्टयभिन्नप्रमाणत्वं; ताहशप्रमाणाप्रसिद्धेः, किन्तु प्रत्यक्षादिप्रमाचतुष्टयान्यतमवृत्तिर्याऽनुभवनिष्ठभेदप्रतियोगिताऽवच्छेदकजातिपर्याप्तावच्छेदकतानिरूपितकार्यता तन्निरूपितव्यापारसम्बन्धावच्छिन्नकारणताकत्वमिति चेत् ?

नैवं—व्याप्तिस्मरणाद्युपनयस्य व्यापाराभावेनोक्तनियमव्

त्वान्निरुक्तप्रमाणान्तरत्वापत्तेरसम्भवात् प्रमावैजात्यस्यैव प्रमाणान्तरत्वप्रयोजकतयोपनीतभाने क्लृप्ततत्तत्प्रमावैजात्यस्यासिद्ध्योक्तापत्तेरशक्यत्वाच्च,

न चोपनायकज्ञानजन्यताऽवच्छेदकतयैव तादृशवैजात्यसिद्धिरिति वाच्यम् ?

प्रत्यक्षत्वस्यैव तत्कार्यताऽवच्छेदकत्वसम्भवेऽतिरिक्तवैजात्यस्य तत्कार्यताऽवच्छेदकत्वे मानाभावात्,

एवं चातीन्द्रियासन्निकृष्टहेतुके विशिष्टपरामर्शसम्भवेन व्याप्यवत्पक्षनिश्चयत्वेन हेतुत्वस्य निर्दुष्टतयोक्तानुमितिलक्षणे न कोऽपि दोषः,

अत्र मीमांसकाः—अनुमितिं प्रति व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेन न हेतुता, तस्य वन्हिव्याप्यो धूमो धूमवान् पर्वत इति ज्ञानद्वयाद्यसाधारण्याद्; अपि तु व्याप्यताऽवच्छेदकप्रकारकव्याप्तिज्ञानत्वेन व्याप्यताऽवच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन च हेतुताद्वयम्,

यद्यपि व्याप्यत्वादिकं नैकं तथाऽपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वादिना हेतुता बोध्या,

अथ कार्यकारणभावद्वयकल्पने गौरवादेकहेतुतैवोचिता,

न च मन्मतेऽपि व्याप्तिग्रहप्रकारीभवद्धर्मावच्छिन्नप्रकारकपक्षधर्मताज्ञानत्वेनैकहेतुत्वमेवेति वाच्यम् ?

तथा सति कालान्तरीयपुरुषान्तरीयव्याप्तिग्रहप्रकारीभवद्धर्मावच्छिन्नप्रकारकात्कालान्तरीयपुरुषान्तरीयपक्षधर्मताग्रहाद-

एव विवक्षणीयत्वात् शाब्दफलाजुपधायकव्याप्तिज्ञानस्यैव पक्ष-त्वेनापादकासिद्ध्यनवकाशात् ,

अत्रेदमवधेयं—निरुक्तस्य प्रमाणान्तरासहकारित्वस्य न स्वातन्त्र्येणापादकोटिनिवेशो गौरवात्; अपि त्वनुभवत्वव्याप्य-जात्यवच्छिन्नबहिर्गोचरप्रमानिष्ठकार्यतानिरूपकत्वात्मकतादृशप्र-माऽसाधारणकारणताघटकजातावेव प्रमाणान्तरजन्यताऽनवच्छे-दकत्वं निवेशनीयं, तच्च स्वानिरूपिता मनोऽनिरूपिता च या ज-न्यता तदवच्छेदकतापर्याप्त्यनधिकरणत्वं, पर्याप्तिनिवेशाच्चाक्षुष-त्वादेरालोकजन्यताऽवच्छेदकघटकत्वेऽपि न दृष्टान्तासिद्धिः, म-नोऽनिरूपितेत्यस्य मनस्त्वघटितधर्मावच्छिन्नानिरूपितार्थकतया मनस्त्वघटितचक्षुर्मनोयोगत्वाद्यवच्छिन्नजन्यतामादायोक्तदोषस्या-नवकाशः,

एवं च स्वानिरूपिता मनस्त्वघटितधर्मावच्छिन्नानिरूपिता च या जन्यता तदवच्छेदकत्वपर्याप्त्यनधिकरणीभूता याऽनुभव-निष्ठभेदप्रतियोगिताऽवच्छेदिका जातिस्तद्घटितधर्मावच्छिन्ना या बहिर्विषयकानुभवनिष्ठकार्यता तन्निरूपकत्वमापादकदलसमुदा-यार्थः, प्रमाणान्तरत्वं चापाद्यं, तच्च न क्लृप्तप्रमाणचतुष्टयभिन्न-प्रमाणत्वं; तादृशप्रमाणाप्रसिद्धेः, किन्तु प्रत्यक्षादिप्रमाचतुष्टयान्य-तमवृत्तिर्याऽनुभवनिष्ठभेदप्रतियोगिताऽवच्छेदकजातिपर्याप्तव-च्छेदकतानिरूपितकार्यता तन्निरूपितव्यापारसम्बन्धावच्छिन्नका-रणताकत्वमिति चेद् ?

मैवं—व्याप्तिस्मरणाद्युपनयस्य व्यापाराभावेनोक्तनियमव-

लाभिरुक्तप्रमाणान्तरत्वापत्तेरसम्भवात् प्रमावैजात्यस्यैव प्रमाणान्तरत्वप्रयोजकतयोपनीतभाने क्लृप्ततत्तत्प्रमावैजात्यस्यासिद्ध्योक्तापत्तेरशक्यत्वाच्च,

न चोपनायकज्ञानजन्यताऽवच्छेदकतयैव तादृशवैजात्यसिद्धिरिति वाच्यम् ?

प्रत्यक्षत्वस्यैव तत्कार्यताऽवच्छेदकत्वसम्भवेऽतिरिक्तवैजात्यस्य तत्कार्यताऽवच्छेदकत्वे मानाभावात्,

एवं चातीन्द्रियासन्निकृष्टहेतुके विशिष्टपरामर्शसम्भवेन व्याप्यवत्पक्षनिश्चयत्वेन हेतुत्वस्य निर्दुष्टतयोक्तानुमितिलक्षणे न कोऽपि दोषः,

अत्र मीमांसकाः—अनुमितिं प्रति व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेन न हेतुता, तस्य वन्हिव्याप्यो धूमो धूमवान् पर्वत इति ज्ञानद्वयाद्यसाधारण्यात्; अपि तु व्याप्यताऽवच्छेदकप्रकारकव्याप्तिज्ञानत्वेन व्याप्यताऽवच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन च हेतुताद्वयम्,

यद्यपि व्याप्यत्वादिकं नैकं तथाऽपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वादिना हेतुता बोध्या,

अथ कार्यकारणभावद्वयकल्पने गौरवादेकहेतुतैवोचिता,

न च मन्मतेऽपि व्याप्तिग्रहप्रकारीभवद्धर्मावच्छिन्नप्रकारकपक्षधर्मताज्ञानत्वेनैकहेतुत्वमेवेति वाच्यम् ?

तथा सति कालान्तरीयपुरुषान्तरीयव्याप्तिग्रहप्रकारीभवद्धर्मावच्छिन्नप्रकारकात्कालान्तरीयपुरुषान्तरीयपक्षधर्मताग्रहाद-

ऽप्यनुमित्यापत्तेः,

न च स्वसमानकालीनस्वसमानाधिकरणव्याप्तिग्रहप्रकारीभवद्धर्मेत्यादेर्वाच्यत्वान्नैवमिति वाच्यम् ?

एवमपि तादृशधर्मस्य कारणताऽवच्छेदकत्वे गौरवाल्लघुधर्मस्यैव तत्त्वमुचितमिति चेद् ?

न—नैयायिकमते धूमविषयतानिरूपितेत्यादिक्रमेण निवेशमादाय विनिगमनाविरहे चतुर्दश कार्यकारणभावाः,

एवमस्मन्मते यद्यपि पक्षधर्मताज्ञानस्य विशेष्यविशेषणभावे विनिगमनाविरहेण द्वयं व्याप्तिज्ञानस्य च द्वादशेति चतुर्दश; तथाऽपि नैयायिकमते कारणताऽवच्छेदकगौरवादस्मन्मते लाघवस्य सम्भवादिति वदन्ति,

एतन्मते यद्धर्मं धर्मिताऽवच्छेदकीकृत्य व्याप्तिग्रहः पक्षधर्मताग्रहे तद्धर्मपर्याप्त्यनिवेशाद्वह्निव्याप्यधूमवान्पर्वत इति ज्ञानादप्यनुमितिः; अत एव दीधितिकृताऽपि परामर्शग्रन्थे यद्धर्मं धर्मिताऽवच्छेदकीकृत्य व्याप्तिग्रहस्तद्धर्मप्रकारकेत्येवोक्तमिति केचित्,

अन्ये तु—निश्चयत्वनिर्वचनानुरोधेन धूमत्वे पर्याप्तिनिवेशावश्यकत्वान्नेदं युक्तं; तथा हि—नीलधूमाभाववान् धूमवान्पर्वत इति ज्ञानादनुमित्युपपत्तये शुद्धधूमत्वावच्छिन्नाभावाप्रकारकत्वं निवेश्यम्,

एवं च नीलधूमवान्न वेति संशयादप्यनुमितिवारणाय शुद्धधूमत्वावच्छिन्नप्रकारकत्वस्याप्यवश्यं निवेश्यत्वात् शुद्धत्वस्य वह्निव्याप्यत्वातिरिक्तं सधद् धूमत्वातिरिक्तं तदनवच्छिन्नत्वादिरू-

पस्य निवेशाच्च विशिष्टपरामर्शादप्यनुमित्युपपत्तिरित्याहुः,

अत्र नैयायिकाः—अवच्छेदकतया व्याप्यवृत्तित्वाङ्गीकारादस्मन्मते धूमव्यापकवह्निसमानाधिकरणधूमवत्ताज्ञानघटकपदार्थानां निवेशे विनिगमनाविरहेऽपि न कारणताऽऽधिक्यम्,

अवन्मते तु व्याप्तिज्ञानस्य पक्षधर्मताज्ञानस्य च पृथग् हेतुत्वे हेतुताद्वयकल्पनागौरवं दुर्वारमेव, स्वसमानकालीनस्वसमानाधिकरणेत्यादिनोक्तैकहेतुताकल्पेऽपि कारणताऽवच्छेदकगौरवं दुर्वारमेव,

अत्र व्याप्तिज्ञानत्वपक्षधर्मताज्ञानत्वयोर्विशिष्टपरामर्शत्वव्यापकत्वात् तदवच्छेदेन नियतपूर्ववर्त्तित्वमुभयवादिसिद्धमेवेत्यनन्यथासिद्धत्वमात्रं कल्प्यते; विशिष्टपरामर्शत्वावच्छेदेन तूभयं कल्प्यत इति कल्पनासाम्यात् कार्यकारणभावद्वयेऽपि न गौरवमिति नाशङ्कनीयं; व्याप्तिज्ञानत्वाद्यवच्छेदेनानुमितिसामान्यानियतपूर्ववर्त्तित्वस्य बाधितत्वात् कार्यताऽवच्छेदकीभूततत्तज्ज्ञानविशिष्टानुमितित्वावच्छिन्नानियतपूर्ववर्त्तित्वं सिद्धमिति वाच्यम्,

एवं च परामर्शविशिष्टानुमितित्वावच्छिन्ननियतपूर्ववर्त्तित्वस्य परामर्शेऽप्युभयवादिसिद्धत्वादस्मन्मते कल्पनाद्वयविरहात्,

न च तथाऽपि ज्ञानद्वयविशिष्टपरामर्शयोर्युगपदुपस्थितावेव लाघवगौरवविचारस्तदेव न-परामर्शपूर्वविशेषणताऽवच्छेदकप्रकारकनिर्णयादिमुद्रया ज्ञानद्वयसत्ताया आवश्यकत्वेन तदुत्तरमनुमितिसामग्र्या बलवत्त्वेनानुमितेरेवोत्पत्तिसम्भवेन परामर्शोत्पत्त्यसंभवाद्, अन्यथा परामर्शोत्तरं तत्रापि तदनुव्यवसायादिकमेव स्याद् न त्वनुमितिरिति वाच्यम् ।

स्मृत्यात्मकपरामर्शस्थले युगपदुपस्थितेरपि संभवात् ,

एतेन विशिष्टपरामर्शहेतुतामते व्याप्त्यभाववति व्याप्तिप्रकारकं व्याप्याभाववति व्याप्यप्रकारकमित्याकारकाप्रामाण्यज्ञानाभावानाम् एकत्रैव निवेशात्तेषां विशेष्यविशेषणभावे विनिगमनाविरहेणातीव गौरवम् ,

मन्मते व्याप्तीत्यादेर्व्याप्तिग्रहहेतुतायां व्याप्येत्यादेः पक्षधर्मताग्रहहेतुतायां निवेशान्न विनिगमनाविरहप्रसक्तिः,

एतन्मतेऽपि व्याप्तीत्यादेः पक्षधर्मताज्ञानहेतुतायां व्याप्याभाववतीत्यादेर्व्याप्तिज्ञानहेतुतायां निवेशमादाय विनिगमनाविरहो नाशङ्क्यः, सामानाधिकरण्यविशेष्यतोभयसम्बन्धावच्छिन्नप्रतियोगिताकस्याप्रामाण्यग्रहाभावस्य निविष्टतया व्याप्तिज्ञानधर्मिकव्याप्तीत्याद्यप्रामाण्यग्रहकाले व्याप्तिज्ञानादनुमित्यापत्त्या व्याप्तीत्यादेः पक्षधर्मताज्ञानहेतुतायामेवं पक्षधर्मताज्ञानधर्मिकव्याप्याभाववतीत्याद्यप्रामाण्यग्रहकाले पक्षधर्मताज्ञानादनुमित्यापत्त्या व्याप्याभाववतीत्यादेर्व्याप्तिग्रहे निवेशायोगादिति परास्तम् ,

अवच्छेदकताया व्यासज्यवृत्तित्वेन परामर्शकारणतायां द्विविधाप्रामाण्यग्रहाभावनिवेशेऽपि कारणतायां गौरवाभावात् ,

किञ्च मीमांसकमते व्याप्तिज्ञानहेतुतायां व्याप्त्यंशे पक्षधर्मताज्ञानहेतुतायां पक्षधर्मतांशे निश्चयत्वं निवेशनीयमिति गौरवं विशिष्टपरामर्शहेतुतावादिनां तु विशिष्टवैशिष्ट्यविषयताकज्ञाने विशेषणताऽवच्छेदकप्रकारकनिश्चयहेतुत्वाङ्गीकारेण व्याप्त्यंशे निश्चयत्वानिवेशाद् भवति लाघवम् ,

अत्र मीमांसकानुयायिनः—धूमो वह्निव्याप्य इति व्याप्तिज्ञानस्य धूमलिङ्गकवह्निविधेयकानुमितित्वमेव जन्यताऽवच्छेदकं न पक्षविषयतानिवेशोऽपि,

एवं पक्षधर्मताज्ञानस्यापि धूमलिङ्गकपर्वतपक्षकानुमितित्वं जन्यताऽवच्छेदकं न तु साध्यविषयतानिवेशोऽपि,

एवं च यत्र दशसाध्यकदशपक्षिकाऽनुमितिस्तत्र मीमांसकमते साध्यं हेतुं च निवेश्य व्याप्तिज्ञानस्य दश कार्यकारणभावाः,

एवं पक्षं हेतुं च निवेश्य पक्षधर्मताज्ञानस्य दशेति विंशतिः कार्यकारणभावाः,

न्यायनये तु कार्यताऽवच्छेदके पक्षसाध्यहेतूनां त्रयाणामपि निवेशादेकैकपक्षमादाय दश साध्यानादाय दश कार्यकारणभावा इति दशपक्षानादाय शतं कार्यकारणभावा इति गौरवम्,

अथ मीमांसकमते वह्निव्याप्यधूमाभाववान्पर्वत इति निश्चयदशायामपि धूमो वह्निव्याप्यो धूमवान्पर्वत इति निर्णयात्मकज्ञानद्वयोत्पत्तौ बाधकाभावेन ततोऽप्यनुमित्यापत्तिरिष्टापत्तौ च वह्निव्याप्यधूमवान्न वेति संशयादनुमित्यापत्तिः,

नैयायिकनये च तदा विशिष्टपरामर्शासम्भवादेव नानुमित्यापत्तिः,

किञ्च—इदं ज्ञानं वह्निव्याप्यधूमत्वावच्छिन्नाभाववति वह्निव्याप्यधूमत्वावच्छिन्नप्रकारकमित्यप्रामाण्यग्रहकालीनज्ञानद्वयादिदशायां मीमांसकमतेऽनुमित्युत्पत्तौ बाधकाभावेनैतादृशाप्रामाण्यग्रहाभावस्य परामर्शकारणतायां न निवेशः,

इत्थं च तादृशाप्रामाण्यग्रहकाले विशिष्टपरामर्शादप्यनुमित्यापत्तिः,

न चाप्रामाण्यग्रहाणां तत्तद्व्यक्तित्वेनैवाभावानिवेशाद् ज्ञानद्वयकालीनतादृशाप्रामाण्यग्रहव्यक्त्यभावो न निवेश्यते विशिष्टपरामर्शकालीनश्च तादृशाप्रामाण्यग्रहव्यक्त्यभावो निवेश्यत इति न दोष इति वाच्यम् ?

एवमपि यत्र विशिष्टपरामर्शकालीनमपेक्षाबुद्ध्यात्मकं वह्निव्याप्येत्याद्यप्रामाण्यज्ञानं ततो ज्ञानद्वयं; तत्रानुमित्यनापत्तिरूपदोषतादवस्थ्याद् , अनुगताप्रामाण्यज्ञानानामप्यननुगतरूपेणाभावनिवेशेऽतिगौरवाच्चेति चेद् ?

मैवं—वास्तवधूमनिश्चयत्वस्य वह्निव्याप्यधूमत्वावच्छिन्नाभावाप्रकारकत्वाघटितत्वेऽपि प्रकृतकारणताप्रविष्टनिश्चयत्वस्य वह्निव्याप्यत्वावच्छिन्नाभावाप्रकारकत्वघटितस्य पारिभाषिकस्य निवेशान्न वह्निव्याप्याभावज्ञानकालीनज्ञानद्वयादनुमित्यापत्तिः, तत्र धूमवान् पर्वत इति ज्ञानस्य वह्निव्याप्याभावज्ञानोपनीतवह्निव्याप्यत्वावच्छिन्नाभावप्रकारकत्वाद्,

अस्तु वा तादृशनिश्चयकालीनज्ञानद्वयादनुमिताविष्टापत्तिः,

एवमपि वह्निव्याप्यधूमसंशयादनुमितिवारणाय पर्वतत्वावच्छिन्नविशेष्यतानिरूपितहेतुप्रकारतायां स्वनिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारताऽवच्छेदकीभूतवह्निव्याप्यत्वावच्छिन्नत्वस्वानिरूपकज्ञानानिरूपितत्वोभयसम्बन्धेन पर्वतत्वावच्छिन्नविशेष्यतनिरूपिताभावप्रकारताविशिष्टान्यत्वनिवेशान्नानुपपत्तिः,

किञ्चेत्यादिकमपि मन्दम्-अप्रामाण्यग्रहस्यापि विषयानिष्ठप्र-कारत्वावच्छिन्नप्रतियोगिकस्याभावानिवेशेनादोषात् ,

तथा हि—स्वीयवह्निव्याप्यत्वावच्छिन्नाभाववह्निशेष्यतानिरू-पितप्रकारतानिरूपितविशेष्यताऽवच्छेदकीभूतवह्निव्याप्यत्वाव-च्छिन्नप्रकारताश्वस्वसमानाधिकरणज्ञाननिरूपितत्वोभयसम्बन्धा-वच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावः पर्वतत्वावच्छिन्नविशे-ष्यतानिरूपितहेतुप्रकारतायां निवेश्यते, उपदर्शितस्थले हेतुप्रका-रतायां तादृशव्याप्यत्वावच्छिन्नत्वाभावेन नानुपपत्तिः,

अथैवं सति पक्षधर्मताज्ञानहेतुतायां साध्यताऽवच्छेदकघ-टितानिर्णयत्वादेः प्रवेशावश्यकत्वेन साध्यताऽवच्छेदकभेदेन का-रणताभेदस्यावश्यकत्वाद् गतमुपदर्शितलाघवेनेति चेत् ?

तथाऽपि धूमो वह्निव्याप्य इति निश्चयस्य व्याप्तिविशिष्टवै-शिष्ट्यबोधादौ हेतुत्वस्यावश्यकतया तत्र तादृशनिश्चयाविशि-ष्टत्वस्यैव जन्यताऽवच्छेदकतयाऽनुमितौ स्वातन्त्र्येण न हेतु-ताकल्पनम् ,

एवं पक्षधर्मतानिश्चयस्याप्यनुमितौ स्वातन्त्र्येण न हेतु-ताकल्पनं धूमविशिष्टपर्वतवैशिष्ट्यबोधादौ क्लृप्तहेतुतयैव निर्वा-हसम्भवात् ,

इत्थं च प्रागुक्तगौरवस्याभावाद् ज्ञानद्वयादप्यनुमितिस्वी-कारे बाधकविरहः,

एतेन विशिष्टपरामर्शहेतुतावादिमते हेतुताऽवच्छेदकमनिवेश्य व्याप्यत्वावच्छिन्नप्रकारताकत्वेनैव धूमालोकादिलिङ्गकपरामर्शानां-

हेतुताकल्पनान्न हेतुताऽवच्छेदकभेदेन कारणतावाहुल्यम् ,

ज्ञानद्वयहेतुतावादिनये च धूमो वह्निव्याप्य आलोकवान्पर्वत इति ज्ञानादनुमितिवारणाय हेतुताऽवच्छेदकविषयतानिवेशाव- श्यकत्वेन हेतुताऽवच्छेदकभेदेन कारणतावाहुल्यमिति परास्तम् ,

मीमांसकामतेऽतिरिक्तहेतुताया एवाभावादिति वदन्ति ।

अत्रैतादृशरीत्या माऽस्तु हेतुताऽवच्छेदकभेदेन कारणतावा- हुल्यम् ,

एवमपि धूमो वह्निव्याप्य आलोकवान्पर्वत इति ज्ञानका- ले भिन्नविषयकप्रत्यक्षाद्युपपत्तयेऽनुमितिसामग्रीप्रतिवन्धकतायां धूमत्वावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वधूमत्वावच्छिन्नप्रकारकपक्ष- धर्मताज्ञानत्वादिना निवेशावश्यकत्वाल्ल लिङ्गभेदेन सामग्रीप्र- तिवन्धकताऽऽनन्त्यं दुर्वारमेव,

न्यायनये तु धूमालोकादिलिङ्गकपरामर्शानामनुगतरूपेण निवेशासम्भवान्न तद्भेदेन वाहुल्यम्,

अत्र गुणगतजातिमनङ्गीकुर्वतां मीमांसकानां मते प्रत्यक्ष- त्वानुमितित्वादेरेकत्र समावेशेऽपि क्षत्यभावात्तन्मते प्रत्यक्षानु- मित्योर्युगपदुत्पत्तौ वाधकाभावेन सामग्रीप्रतिवन्धकताया एवा- भावान्न गौरवावकाश इति नाशङ्कनीयम् ,

एकज्ञानोत्तरं साक्षात्करोम्यनुमिनोमीत्यनुव्यवसायस्या- नुभवविरुद्धतया सामग्रीप्रतिवन्धकत्वकल्पनस्य तन्मतेऽप्या- वश्यकत्वात् ,

अथ तथाऽप्यनुमितिसामग्रयां व्याप्तिज्ञानविशिष्टपक्षधर्म-

ताज्ञानत्वादिनैव निवेशान्न ममापि सामग्रीप्रतिबन्धकताऽऽनन्त्यं-वैशिष्ट्यं च स्वीयव्याप्तिप्रकारतानिरूपितविशेष्यताऽवच्छेदकाव-च्छिन्नप्रकारताकत्वस्वसामानाधिकरण्योभयसम्बन्धेन निवेश्यम्, अतो न धूमो वह्निव्याप्य आलोकवान्पर्वत इति ज्ञानदशायां-प्रत्यक्षानुपपत्तिरिति चेद् ?

न-एवमप्युक्तेन वा रूपेण निवेशः स्वीयपर्वतत्वावच्छिन्नवि-शेष्यतानिरूपितप्रकारताऽवच्छेदकावच्छिन्नविशेष्यताकत्वस्वसा-मानाधिकरण्योभयसम्बन्धेन पक्षधर्मताज्ञानविशिष्टव्याप्तिज्ञान-त्वेन वा निवेश इत्यत्र विनिगमनाविरहेण सामग्रीप्रतिबन्धकता-बाहुल्यं दुर्वारमिति केचित्,

अवच्छेदकताया व्यासज्यवृत्तित्वोपगमे नेदं गौरवं सम्भ-वतीति तु भावनीयम्,

अत्र मीमांसकमते वह्निव्याप्याभाववान्पर्वत इत्याकारक-प्रत्यक्षादौ पर्वतो वह्निमानित्यनुमितिसामग्रीप्रतिबन्धकताकल्पने गौरवं, तन्मते ज्ञानद्वयादप्यनुमितेरुत्पत्त्याऽनुमितिपूर्वं विशिष्टप-रामर्शसत्तानैयत्याभावाद्,

न्यायनये त्वनुमितिपूर्वं विशिष्टपरामर्शसत्त्वस्य नियततया बाधविधयैव प्रतिबन्धकत्वान्न सामग्रीप्रतिबन्धकताकल्पनमिति यद् दूषणदानं तदनुपादेयम्,

मीमांसकमते तादृशप्रत्यक्षादावनुमितिसामग्र्या अति-रिक्तप्रतिबन्धकताविरहात् सामान्यत एव विषयतासम्बन्धेन विभिन्नविषयकप्रत्यक्षं प्रति स्वीयप्रत्यक्षनिष्ठविषयतानिरूपितवि-

षयतासम्बन्धावच्छिन्नप्रकारताऽऽश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकानुमितिसामग्रीविशिष्टेच्छाविरहत्वेन प्रतिबन्धकत्वकल्पनादिति ध्येयम् ,

अत्र नवीना मीमांसकमतं परिष्कुर्वन्ति, तथा हि—मीमांसकमते धूमवत्पर्वतपक्षकवह्निमत्पर्वतवृत्तिवह्निव्याप्यधूमविधेयकानुमिति सामग्र्या भिन्नविषयकं प्रत्यक्षादिकं प्रति प्रतिबन्धकत्वाकल्पनेन लाघवं तादृशानुमितिसामग्री काले पर्वतपक्षकवह्निविधेयकानुमितिसामग्रीनैयत्येन तत्प्रतिबन्धकतयैवोपपत्तिसम्भवात् ,

न्यायनये तु तादृशसामग्रीकाले पर्वतपक्षकवह्न्यनुमितिसामग्रीनैयत्याभावेन भिन्नविषयकप्रत्यक्षादिकं प्रत्येतादृशसामग्र्याः प्रतिबन्धकत्वकल्पनमावश्यकम् , अत्र पर्वतो वह्निमानिति प्रत्यक्षशाब्दबोधादौ तादृशसामग्र्याः प्रतिबन्धकताकल्पनस्य भवतोऽप्यावश्यकतया तावतैव घटादिप्रत्यक्षेऽपि निर्वाहान्न गौरवमिति नाशङ्कनीयम् ,

घटप्रत्यक्षं जायतामित्यादीच्छाया उत्तेजकत्वानुरोधेन पृथक् प्रतिबन्धकताया आवश्यकत्वादिति,

तदसद्—एतादृशसामग्र्या अपि पूर्वोक्तक्रमेण तादृशसामग्रीविशिष्टेच्छाविरहत्वेनैकप्रतिबन्धकतयैवोपपत्तावतिरिक्तप्रतिबन्धकताया अभावादिति ध्येयम् ,

अत्रैवमपीच्छाया हेतुत्वाङ्गीकारे न्यायनये गौरवं, तथा हि·

एतादृशसामग्र्याः प्रतिबध्यताऽवच्छेदकं घटप्रत्यक्षादिसाधारणं न्यायनये वह्निमत्पर्वतवृत्तिवह्निव्याप्यधूमप्रकारतानिरूपितधू-

मद्वत्पर्वतत्वावच्छिन्नाविशेष्यताभिन्नमुख्यविशेष्यताशाल्यनुमित्यन्यज्ञानत्वमेव वाच्यम् , अनुमित्यन्यज्ञानत्वमात्रस्य तथात्वोक्तौ समानविषयकप्रत्यक्षशाब्दबोधादौ व्यभिचारप्रसङ्गात् ,

मीमांसकमते त्वनुमित्यन्यपर्वतविशेष्यकवह्निप्रकारकज्ञानत्वमेव तादृशसामग्रीप्रतिबध्यताऽवच्छेदकं घटादिप्रत्यक्षादेः प्रतिबध्यताऽवच्छेदकानाक्रान्तत्वेऽपि क्षतिविरहाद् एतादृशसामग्रीनियतवह्न्यनुमितिसामग्र्या प्रतिबन्धेनैव तदनुत्पादसम्भवादिति न्यायनये प्रतिबध्यताऽवच्छेदकगौरवमिति केचित् ,

तदपि न—समानविषयकप्रत्यक्षोत्पत्तिदशायां भिन्नविषयकप्रत्यक्षोपपत्तये समानविषयकप्रत्यक्षादिसामग्र्या अभावविशिष्टायास्तादृशानुमितिसामग्र्याः प्रतिबन्धकत्वस्य वाच्यत्वेन सामान्यतोऽनुमित्यन्यज्ञानत्वमेव तादृशसामग्रीप्रतिबध्यताऽवच्छेदकं कल्प्यते समानविषयकप्रत्यक्षादौ व्यभिचारस्य तावतैवाभावादिति न्यायनयेऽपि न गौरवम् ,

एवमपि समानविषयकप्रत्यक्षोत्पत्तिदशायां भिन्नविषयकप्रत्यक्षानङ्गीकर्त्तृनये गौरवं दुर्वारमिति चेत् ?

तथाऽप्यनुमित्यन्यपर्वतविशेष्यकवह्निज्ञानत्वस्य प्रतिबध्यताऽवच्छेदकत्व इच्छाऽधीनज्ञाने व्यभिचार इतीच्छाविशिष्टान्यत्वं प्रतिबध्यताऽवच्छेदके देयमिति तदपेक्षया तादृशसामग्रीविशिष्टान्यज्ञानत्वस्य प्रतिबध्यताऽवच्छेदकत्वं युक्तमिति न किञ्चिदेतद्,

अत्र मीमांसकमते वह्निमत्पर्वतवृत्तिवह्निव्याप्यधूमप्रकार-

कधूमवत्पर्वतविशेष्यकानुमितिं प्रति तादृशप्रत्यक्षादिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवं; तन्मते तादृशानुमितिसामग्रीकाले पर्वतपक्षकवह्न्यनुमितिसामग्रीनैयत्येन भिन्नविषयकानुमितिसामग्र्याः सत्त्वेन तादृशानुमितिसामग्रीभिन्नविषयकानुमितिसामग्र्यभावघटिततादृशप्रत्यक्षसामग्र्योः समावेशस्यैवाभावाद्,

न्यायमते तु विशिष्टज्ञानस्यैवानुमितिहेतुत्वे वह्न्यनुमितिसामग्रीनैयत्याभावात् तादृशसामग्र्योः समावेशसम्भवेन प्रतिबन्धकताकल्पनमावश्यकमिति गौरवम् ,

एवन्तत्समशीलानन्तसामग्रीणां प्रतिबन्धकताकल्पनेऽतीव गौरवमिति मीमांसकमतमेव युक्तमिति पुनर्मामकः पन्था इत्यलं प्रसङ्गागतबाहुल्येन,

यत्तु—वह्निव्याप्यो धूमः पर्वत इत्यादिव्याप्यविशेष्यकपरामर्शादपि पर्वतो वह्निमानित्याद्यनुमित्युदयेन तत्साधारणस्य वह्निव्याप्यत्वावच्छिन्नविषयतानिरूपितपर्वतत्वावच्छिन्नविषयताशालिनिर्णयत्वरूपवह्निव्याप्यपर्वतोभयवैशिष्ट्यावगाहिनिश्चयत्वस्यैव तादृशानुमितिजनकताऽवच्छेदकतयाऽसम्भवो दुर्वारः,

ननूक्तरूपेण हेतुत्वे पर्वतविशिष्टधूमत्वादिधर्मिताऽवच्छेदकव्याप्तिप्रकारकज्ञानादनुमित्यनुदयप्रसङ्गः तादृशज्ञानीयहेतुविषयताया वह्निव्याप्यत्वानवच्छिन्नत्वात् ,

न च वह्निव्याप्तिप्रकारतानिरूपितविषयतानिरूपितपर्वतत्वावच्छिन्नविषयताशालिनिर्णयत्वेन हेतुत्वान्नोक्तदोष इति वाच्यम् ?

तथा सति धूमांश एकत्र द्वयमिति रीत्या व्याप्तिपर्वतोभय-विशेषणकज्ञानादप्यनुमित्यापत्तेरिति चेद् ?

न—उक्तज्ञानादनुमित्यनुदये इष्टापत्तेः, तस्मादनुमितेः प्रामाणिकत्वे तु वह्निव्याप्तिविषयतानिरूपितधूमविषयतानिरूपित-पर्वतविषयताशालिनिर्णयत्वेनैव हेतुतोपेयते, धूमांश एकत्र द्वयमिति रीत्या व्याप्तिपर्वतोभयविषयकज्ञानादनुमितिरपीष्यत एव,

न च-पक्षविशेष्यकपरामर्शात्पक्षविशेष्यकानुमितिर्व्याप्यविशेष्यकपरामर्शाच्च साध्यविशेष्यिकेति कार्यवैचित्र्यानुरोधेन पृथक् कारणतया आवश्यकत्व उक्तरीत्या व्याप्यपक्षविशेष्यकज्ञानानुगमो निरर्थक इति वाच्यम् ?

सर्वत्र पक्षविशेष्यकानुमितेरेवोपगमाद् , जनकज्ञान उपसर्जनतया भातस्य जन्यज्ञाने विशेष्यतया न भानमिति नियमे मानाभावाद्, अत एव साध्यविशेष्यकानुमितौ साध्यप्रसिद्धि-मात्रस्यैव विरोधित्वमित्युपपद्यत इति,

तदसद्-उपदर्शितगुरुरूपेण हेतुत्वापेक्षया परामर्शद्वयस्य कारणताद्वयकल्पनस्यैवौचित्याद् , अप्रामाण्यग्रहाभावनिवेशानु-रोधेन निश्चयत्वनिर्वचनानुरोधेन चोक्तरूपेण हेतुताया अशक्य-त्वाच्च,

वस्तुतस्तु—पक्षविशेष्यकपरामर्श एव सर्वत्रानुमितौ हेतुः,

न च विनिगमनाविरहः; व्याप्यविशेष्यकपरामर्शस्य हेतुत्वे वह्निव्याप्यो धूमः पर्वतीयो न वेति पर्वतपर्वताभावोभयकोटिकसंशयात्पर्वते वह्निव्याप्यधूमो न वेति धूमधर्माभावोभयविशेष्यक-

पक्षविशेषणकसन्देहाच्चानुमितिवारणाय तादृशद्विविधसंशयभेदस्यानुमितिजनकताऽवच्छेदककोटौ निवेशने गौरवात्,

पक्षविशेष्यकपरामर्शस्य हेतुत्वे च वह्निव्याप्यधूमाभावप्रकारकसंशयभेदमात्रनिवेशनेन लाघवात्,

न चैकधर्मिकविरुद्धोभयप्रकारकज्ञानस्यैव संशयतया धूमधूमाभावोभयविशेष्यकधर्मिप्रकारकज्ञानस्यातथात्वेन कथं तद्भेदनिवेशप्रयुक्तगौरवं व्याप्यविशेष्यकपरामर्शस्य हेतुतामत इति वाच्यम् ?

एकधर्मिणि विरुद्धोभयकोटिसम्बन्धावगाहिज्ञानमात्रस्यैव नवीनमते संशयत्वात्,

अथ वह्निव्याप्यधूमाभावविशेष्यकपर्वतविशेषणकज्ञानभेदोऽप्यत्र निवेशनीयः, अन्यथा वह्निव्याप्यधूमाभावः पर्वते वह्निव्याप्यधूमवान्पर्वत इत्याकारकसंशयादनुमित्यापत्तेः, तादृशज्ञानस्याप्येकधर्मिणि विरुद्धोभयकोटिसम्बन्धावगाहितया संशयत्वादिति चेद् ?

न–तादृशज्ञानस्य संशयत्वे वह्निव्याप्यधूमः पर्वते वह्निव्याप्यधूमाभाववान्पर्वत इत्याकारकज्ञानस्यापि संशयतया व्याप्यविशेष्यकपरामर्शहेतुतामते तद्भेदस्य निवेशनीयतया तदंश उभयमतसाम्यात्,

यत्तु–जन्यज्ञानजन्यत्वाव्यभिचारिजन्यशब्दधीजन्यत्वव्यभिचारिजातिमदनुभवत्वमनुमितिलक्षणमिति,

तदसद्–ओषधिविशेषज्वरहरणयोः कार्यकारणभावग्रहस्या-

प्युपमानफलत्वेनोपमानपरिच्छेदे वक्तव्यतयोपमितौ शब्दधीज-
न्यत्वानियमेनोपमितित्वस्यापि तादृशजातितयोपमितावतिव्याप्तेः,

किञ्च परोक्षत्वजातिमादाय शाब्दादावतिप्रसङ्गाद् ,

न च तस्यां मानाभावान्न दोष इति वाच्यम् ?

तस्यां मानस्य शब्दपरिच्छेदे वक्ष्यमाणत्वादित्यलं वि-
स्तरेण ।

न चानुमितिलक्षणप्रविष्टा का व्याप्तिः ? न तावत्साध्य-
सामानाधिकरण्यं व्यभिचारिसाधारण्यादिति चेद ?

अत्र मणिकारानुयायिनः—अव्यभिचरितसाध्यसामानाधि-
करण्यमेव व्याप्तिः, तज्ज्ञानमेव चानुमितिहेतुः, व्यभिचारज्ञानस्या-
व्यभिचारज्ञानप्रतिबन्धकतया व्यभिचारज्ञानकाल एतादृशव्याप्ति-
ज्ञानासम्भवादनुमित्यनुदयोपपत्तिः,

अथाव्यभिचरितसाध्यसामानाधिकरण्यरूपव्याप्तिज्ञानस्यानु-
मितिहेतुत्वेऽव्यभिचारांशे निर्णयत्वानिवेशे गौरवापत्त्या तदपेक्षया
लाघवात्साध्यसामानाधिकरण्यज्ञानत्वेनैवानुमितिहेतुत्वमस्तु; व्य-
भिचारज्ञानकालेऽनुमितिवारणाय च व्यभिचारज्ञानस्य प्रति-
बन्धकत्वमस्तु ,

ननु तस्य केन रूपेण प्रतिबन्धकत्वं ? न तावद् व्यभिचार-
ज्ञानत्वेन तस्यैक्याभावात् ,

न वा वह्न्यनुमितिं प्रति वह्न्यभाववद्वृत्तित्वप्रकारकज्ञानत्वेन
वह्न्यभाववद्वृत्तिर्धूम इति ज्ञानकाल आलोकपरामर्शादनुमित्यनु-
दयापत्तेः,

न च धूमलिङ्गकानुमितिं प्रति धूमो वह्निव्यभिचारीतिज्ञानत्वेन प्रतिबन्धकत्वमिति वाच्यम् ।

धूमालोकादिविषयकसमूहालम्बनपरामर्शजन्यायां तादृशव्यभिचारज्ञानकालीनानुमितौ व्यभिचाराद् , नापि तादृशव्यभिचारज्ञानाभावविशिष्टानुमितित्वं तादृशव्यभिचारज्ञानाभावजन्यताऽवच्छेदकं तादृशव्यभिचारज्ञानकालेऽपि केवलधूमपरामर्शात्समूहालम्बनपरामर्शकाले प्रसिद्धायास्तादृशव्यभिचारज्ञानविशिष्टानुमितेरापत्तेर्दुर्वारत्वादिति चेद् ।

न—पक्षधर्मताज्ञानजन्यताऽवच्छेदककोटावपि तादृशव्यभिचारज्ञानाभाववैशिष्ट्यनिवेशेन तादृशव्यभिचारज्ञानविशिष्टानुमितेरापादकाभावेनापत्त्यसम्भवात् ,

भवन्मतेऽप्यन्यलिङ्गकानुमितौ व्यभिचारवारणाय तादृशाव्यभिचरितसाध्यसामानाधिकरण्यविशिष्टधर्मवत्ताज्ञानजन्यताऽवच्छेदककोटौ तादृशज्ञानवैशिष्ट्यनिवेशस्यावश्यकत्वाद् , व्यभिचरितधूमत्वं धर्मिताऽवच्छेदकीकृत्य साध्यसामानाधिकरण्यज्ञानत्वेन साध्यसामानाधिकरण्यविशिष्टधूमत्वं धर्मिताऽवच्छेदकीकृत्याव्यभिचारज्ञानत्वेन वा हेतुत्वे विनिगमनाविरहेण नानाकार्यकारणभावापत्तेश्च,

मैवं—व्यभिचारज्ञानप्रतिबन्धकतायां कार्यकारणभावद्वयकल्पनापत्तेः,

अस्मन्मते चाव्यभिचारस्य वक्ष्यमाणरीत्या साध्यविशेषणतया सामानाधिकरण्यविशेषणतयाऽनिवेशेनोक्तरीत्या विनिग-

मनाविरहासम्भवेन कारणताया ऐक्याद्,

एवमव्यभिचारांशे निर्णयत्वनिवेशप्रयुक्तगौरवमपि नाश-ङ्कनीयम्,

व्यभिचारज्ञानप्रतिबन्धकतायामप्रामाण्यानिर्णयस्योत्तेजक-त्वे गौरवात्,

अव्यभिचारज्ञानहेतुतामते च तदंशेऽप्रामाण्यसन्देहेऽप्यनु-मित्यनुदयेनाप्रामाण्यज्ञानत्वेनैव तस्योत्तेजकत्वाद् अप्रामाण्यनि-र्णयत्वस्याऽव्यभिचारनिर्णयत्वापेक्षया गुरुशरीरत्वाच्च,

न चाप्रामाण्यज्ञानेऽप्रामाण्यनिर्णयस्योत्तेजकतायां विपरी-तमेव गौरवमिति वाच्यम्?

अनवस्थाभयेनाप्रामाण्यज्ञानेऽप्रामाण्यज्ञानान्तरस्योत्तेजक-त्वानभ्युपगमात्,

अस्मन्मते विशिष्टवैशिष्ट्यबोधात्मकपरामर्शस्यानुमितिहेतु-तयैव संशयोत्तरमनुमितिवारणेऽव्यभिचारांशे निर्णयत्वानिवेशा-च्च, अत एव चाव्यभिचारज्ञानहेतुतायामव्यभिचाराभावत्वावच्छि-न्नप्रकारताशून्यत्वव्यभिचारत्वावच्छिन्नप्रकारताशून्यत्वरूपाद्विवि-धनिर्णयत्वानिवेशे गौरवमित्यपि परास्तम्,

परास्तञ्चाव्यभिचारांशे निर्णयत्वस्य पक्षधर्मत्वांशे निर्णय-त्वस्य चैकत्र निवेशे विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यम्,

अव्यभिचारांशे निर्णयत्वस्यैवाप्रवेशात्,

न चैवमप्येतन्मतेऽव्यभिचारांशेऽप्रामाण्यज्ञानाभावानां पक्ष-

धर्मतांशेऽप्रामाण्यज्ञानाभावानां चैकत्र निवेशे विशेष्यविशेषणभावे विनिगमनाविरहात्तद्दोषतादवस्थ्यमिति व्यभिचारज्ञानस्य प्रतिबन्धकत्वमेव सम्यगिति वाच्यम् ?

प्रामाण्यज्ञानानां स्वातन्त्र्येण प्रतिबन्धकतयैवाप्रामाण्यज्ञानकालेऽनुमितिवारणात्तेषामनुत्तेजकत्वात्,

न चाप्रामाण्यग्रहस्य प्रतिबन्धकत्व एकपरामर्शेऽप्रामाण्यग्रहसत्त्वे तदनास्कन्दितपरामर्शान्तरादनुमित्यनुदयप्रसङ्गः, द्वितीयपरामर्शव्यक्तीनामुत्तेजकत्वे चातिगौरवमिति तदपेक्षया विषयतासम्बन्धेनाप्रामाण्यग्रहाणामुत्तेजकत्वमेव सम्यगिति वाच्यम् ?

तत्तदनुमित्यव्यवहितपूर्वविनष्टज्ञानादिव्यक्तीनामेव प्रतिबन्धकत्वाभ्युपगमात्, शब्दैक्यस्यानुपादेयत्वात्,

न च तत्कालीनानन्तपदार्थानां विनिगमनाविरहेण प्रतिबन्धकत्वापत्तिरिति वाच्यम् ?

उत्तेजकत्वेऽपि तादृशविनिगमनाविरहस्य दुर्वारत्वेन तौल्यात्,

न चाव्यभिचारज्ञानहेतुत्वे व्यभिचारवत्यव्यभिचारप्रकारकमव्यभिचाराभाववत्यव्यभिचारप्रकारकमित्याकारकोभयविधाप्रामाण्यज्ञानयोः प्रतिबन्धकत्वे गौरवमिति वाच्यम् ?

व्यभिचारज्ञानप्रतिबन्धकतामतेऽप्रामाण्यज्ञानानामुत्तेजकतया तदभावानां परस्परं व्यभिचारज्ञानेन च समं विशेष्यविशेषणभावे विनिगमनाविरहेण तदानन्त्यात्,

न च तन्मतेऽप्यप्रामाण्यज्ञानानां नोत्तेजकत्वं परन्तु व्य

भिचारज्ञानविशिष्टानुमितौ तेषां हेतुत्वं वाच्यं व्यभिचारज्ञाना-भावजन्यतायां चाव्यवहितोत्तरत्वानिवेशान्न व्यभिचार इति वाच्यम् ?

तथा सत्यप्रामाण्यज्ञानानास्कन्दितव्यभिचारज्ञानानन्तरं-स्वीयाप्रामाण्यविषयकव्यभिचारज्ञानोत्पत्तौ तद्द्वितीयक्षणे पूर्व-ज्ञानसत्त्व एवानुमित्यापत्तेः, अप्रामाण्यज्ञानरूपकारणसत्त्वात् तदप्रामाण्यज्ञानव्यक्तिहेतुत्वस्य च तृतीयक्षणोत्पत्तानुमित्यनुरोधेन क्लृप्तत्वादिति,

केचित्तु—लघ्वर्थविषयकाप्रामाण्यग्रहस्यैव प्रतिबन्धकत्वं-कल्प्यते न तु गुर्वर्थविषयकस्य तादृशाप्रामाण्यज्ञानकाले फलस्वी-कारादित्याहुः,

अथ पक्षभेदभिन्नानन्तपक्षधर्मताज्ञानहेतुतायां विषयतयाऽव्य-भिचारस्यावच्छेदकत्वापेक्षया लाघवाद् धूमलिङ्गकवन्हिविधेयका-नुमितित्वाद्यवच्छेदेन धूमलिङ्गकव्यभिचारज्ञानानामेकैकमेव प्र-तिबन्धकत्वमस्त्विति चेद् ?

न—पक्षधर्मताज्ञानशून्यकाले व्यभिचारज्ञानाभावरूपकारणब-लात् तत्कार्यताऽवच्छेदकाविशिष्टानुमित्यापत्तिवारणाय पक्षधर्मता-ज्ञानवैशिष्ट्यस्य जन्यताऽवच्छेदककोटौ निवेशे सर्वसाधारण्याभा-वाद् धूमादिलिङ्गकव्यभिचारज्ञानाभावविशिष्टानुमितौ धूमादि-मत्ताज्ञानानां विशेषसामग्रीत्वस्य तच्छून्यकालेऽप्यालोकपरामर्शा-दितस्तादृशानुमित्युत्पत्त्या दुर्वचत्वात् ,

न च धूमालिङ्गिकायां तादृशविशिष्टानुमितौ धूमादिमत्ताज्ञा-

नानां विशेषसामग्रीत्वान्न दोष इति वाच्यम् ?

महानसादौ धूमादिमत्ताज्ञानकाले पर्वतादौ तादृशानुमितेरनुत्पत्त्या पर्वतादिपक्षकतादृशानुमितौ पर्वतादौ धूमादिमत्ताज्ञानानां विशेषसामग्रीत्वस्य वक्तव्यतया व्यभिचारज्ञानप्रतिबन्धकताया अपि पक्षभेदभिन्नत्वस्यावश्यकत्वात्,

अन्ये तु–व्यभिचारज्ञानस्य प्रतिबन्धकत्वं समवायेनावच्छेदकतया वा ? नाद्यः-कायव्यूहस्थले व्यभिचाराद्, नान्त्यः–परपुरप्रवेशस्थले व्यभिचारात् , चैत्रस्य पूर्वशरीरे व्यभिचारज्ञानसत्त्वेऽपि खण्डशरीरेऽनुमित्यापत्तेश्च,

किन्तु समवायसम्बन्धेन चैत्रीयानुमितित्वाद्यवच्छिन्नं प्रति चैत्रीयव्यभिचारज्ञानत्वादिना चैत्रादिभेदेन व्यभिचारज्ञानस्य प्रतिबन्धकत्वमास्थेयमिति महागौरवं, तदपेक्षया समवायसम्बन्धघटितपक्षधर्मताज्ञानहेतुतायामेव लाघवादव्यभिचारस्य विषयतयाऽवच्छेदकत्वमुचितमित्याहुः,

अव्यभिचारित्वं च हेतुव्यापकत्वरूपं साध्यविशेषणं तेन न केवलान्वयिसाध्यकेऽव्याप्तिः, तच्च हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिताऽनवच्छेदकसाध्यताऽवच्छेदकावच्छिन्नत्वम् ,

न च प्रमेयधूमवान्वह्नेरित्यादिगुरुधर्मावच्छिन्नसाध्यकेऽतिव्याप्तिः; लाघवेन धूमत्वादेरेवाभावप्रतियोगिताऽवच्छेदकत्वादिति वाच्यम् ?

तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वादिरूपस्य पारिभाषिकावच्छेदकत्वस्यैव निवेशात्,

गौरवप्रतिसन्धानदशायामपि प्रमेयधूमो नास्तीत्यादिप्रतीत्या-गुरुधर्मस्यापि प्रतियोगिताऽवच्छेदकत्वाच्च,

वस्तुतस्तु—हेतुसमानाधिकरणान्योन्याभावप्रतियोगिताऽनव-च्छेदकत्वरूपमन्योन्याभावघटितमेव व्यापकत्वं न तु हेतुसमा-नाधिकरणात्यन्ताभावप्रतियोगिताऽनवच्छेदकसाध्यताऽवच्छेदका-वच्छिन्नत्वरूपमत्यन्ताभावघटितं गुरुशरीरत्वात् ,

वह्निमान्धूमादित्यादिसद्धेतौ साध्यस्य वह्न्यादेर्धूमादिहेतु-व्यापकत्वाल्लक्षणसमन्वयः, धूमवान्वह्नेरित्याद्यसद्धेतौ च धूमा-दिसाध्यस्य वह्न्यादिहेत्वव्यापकत्वान्नातिप्रसङ्गः,

नन्वन्योन्याभावघटितव्यापकत्वं न हेतुसमानाधिकरणान्यो-न्याभावप्रतियोगिताऽनवच्छेदकत्वरूपं चालनीन्यायेन निखिला-नामेव वह्नीनां धूमादिसमानाधिकरणतत्तद्वह्निमद्भेदप्रतियोगि-ताऽवच्छेदकतया वह्न्यादेर्धूमादिव्यापकत्वानुपपत्तेः, किन्तु तादृशप्रतियोगिताऽवच्छेदकताऽनवच्छेदकसाध्यताऽवच्छेदकाव-च्छिन्नत्वं तत्र चैकस्यावच्छेदकत्वांशस्याधिक्यात् तदेव गुरु,

न चात्यन्ताभावघटितव्यापकताशरीरे कपिसंयोग्येतद्वृक्षत्वा-दित्याद्यव्याप्यवृत्तिसाध्यकेऽव्याप्तिवारणायाभावांशे प्रतियोगिवै-यधिकरण्यं निवेशनीयम्; अन्योन्याभावस्याव्याप्यवृत्तित्वानभ्यु-पगमेन तद्घटितव्यापकताशरीरेऽभावांशे प्रतियोगिवैयधिकर-ण्याप्रवेशाल्लाघवमिति वाच्यम् ?

व्यापकताशरीरे प्रतियोगिवैयधिकरण्याप्रवेशेऽपि कारण-ताऽवच्छेदककोटौ प्रतियोगिवैयधिकरण्यविषयतानिवेशस्याव-

ग्रहकतया साम्यात्,

तथा हि—वास्तवतादृशावच्छेदकत्वाभावावगाहिज्ञानत्वेन हेतुता नैव सम्भवति; तादृशाभावत्वेनाभावान्तरावगाहिभ्रमादनुमित्यनुदयापत्तेः केवलेनाभावत्वादिना तदवगाहिनो ज्ञानात्तदापत्तेश्च; अपि तु तदवगाहिज्ञानस्य हेतुसामानाधिकरण्यविषयतानिरूपिता याऽभावविषयता तान्निरूपिता या प्रतियोगित्वविषयतेत्येवं क्रमेण व्याप्तिघटकपदार्थकूटविषयता निवेश्य; हेतुत्वं कल्पनीयम् ,

एवं च हेतुसमानाधिकरणघटवच्छेदप्रातियोगिताऽवच्छेदकताऽनवच्छेदकं वह्नित्वमित्येतादृशज्ञानादप्यनुमित्यापत्तिरिति तद्वारणाय हेतुसामानाधिकरण्यप्रकारताऽन्यप्रकारत्वानिरूपितत्वस्यान्योन्याभावत्वावच्छिन्नविषयतायां निवेशनीयतया साध्यवदन्योन्याभावस्याव्याप्यवृत्तित्वभ्रमदशायामनुमित्यनुदयापत्तिः,

तदानीं तादृशविषयताशालिहेतुसमानाधिकरणान्योन्याभावप्रतियोगिताऽवच्छेदकताऽनवच्छेदकं वह्नित्वमित्येतादृशज्ञानस्य हेतुसमानाधिकरणान्योन्याभावप्रातियोगिताऽवच्छेदकताऽवच्छेदकं वह्नित्वमित्येतादृशज्ञानरूपप्रातिबन्धकसद्भावेनोत्पादासम्भवादिति तदप्रातिबन्ध्यप्रतियोगिव्यधिकरणहेतुसमानाधिकरणान्योन्याभावप्रतियोगिताऽवच्छेदकताऽनवच्छेदकं वह्नित्वमित्येतादृशज्ञानसङ्ग्रहाय तादृशाभावविषयतायां हेतुसामानाधिकरण्यविषयताभिन्ना प्रतियोगिवैयधिकरण्यविषयता भिन्ना या प्रकारता तदनिरूपितत्वमेव निवेशनीयं, तथा च ममापीदृशरीतेरनुसरणीयतया साम्यम्,

वस्तुतस्तु—अन्योन्याभावस्याव्याप्यवृत्तितया नवीनैरुपगमेन व्यापकताशरीरेऽपि प्रतियोगिवैयधिकरण्यानिवेशनमावश्यकमेव,

न चात्यन्ताभावघटितव्यापकतायां सम्बन्धान्तरावच्छिन्नाभावमादायासम्भववारणाय साध्यताऽवच्छेदकसम्बन्धावच्छिन्नत्वं प्रतियोगितायां निवेशनीयम्, अन्योन्याभावप्रतियोगितायां तु न सम्बन्धविशेषावच्छिन्नत्वनिवेश इति लाघवमिति वाच्यम् ?

सम्बन्धान्तरावच्छिन्नप्रतियोगिताऽवच्छेदकताकभेदमादायासम्भववारणायान्योन्याभावप्रतियोगिताऽवच्छेदकतायां साध्यताऽवच्छेदकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयतया लाघवानवकाशात्,

न च विषयितया वह्नित्वावच्छिन्नाद्यभावमादायासम्भववारणायात्यन्ताभावप्रतियोगिताऽवच्छेदकतायां साध्यताऽवच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिवेशस्याधिकयमत्यन्ताभावघटितव्यापकतायामिति वाच्यम् ?

समवायादिना वह्न्यादिसाध्यकस्थले विषयितयाऽपि वह्नित्वाद्यवच्छिन्नज्ञानसमवायिभेदमादायाव्याप्तिवारणायान्योन्याभावप्रतियोगिताऽवच्छेदकतायामपि साध्यताऽवच्छेदकताऽवच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकतया साम्यादिति चेद् ?

अत्रोच्यते—अत्यन्ताभावघटितव्यापकतायां प्रतियोगिताऽवच्छेदकावच्छिन्नानधिकरणीभूतहेत्वधिकरणवृत्तित्वमभावे वि-

शेषणम्, अन्योन्याभावघटितव्यापकतायां तु प्रतियोगिभिन्नहेत्व-धिकरणवृत्तित्वमिति लाघवम् ,

यत्तु—प्रतियोगिवैयधिकरण्यनिवेशापेक्षया लाघवेनाभावे हेत्वधिकरणे निरवच्छिन्नवृत्तित्वस्यैव निवेशनीयतया तस्य चो-भयमत एव समशरीरतया लाघवानवकाशादिति;

तदसत्—तथा सति कालिकसम्बन्धावच्छिन्नप्रतियोगिता-काकाशाभावाभाववानात्मत्वादित्यादावव्याप्तिप्रसङ्गात्,

वस्तुतस्तु—साध्यसाधनभेदेन व्यापकत्वादेरनुमितिकारण-तायाश्च भेदात्संयोगेन वह्न्यादिसाध्यकस्थलेऽन्योन्याभावघटित-व्याप्तिज्ञानस्यैव हेतुत्वमुचितं तत्र तस्या एव लघुत्वात् ,

तथा हि—तत्रान्योन्याभावप्रतियोगिताऽवच्छेदकताऽवच्छे-दकतायां साध्यताऽवच्छेदकताघटकसम्बन्धावच्छिन्नत्वानिवेशे प्रयोजनविरहः, वह्नित्ववत्ज्ञानसमवायिभेदस्य साध्यता-ऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताऽवच्छेदकताकत्वाभावेन तमादायानुपपत्त्यभावाद् , अत्यन्ताभावघटितव्यापकतायां तु प्रतियोगिताऽवच्छेदकतायां साध्यताऽवच्छेदताघटकसम्बन्धाव-च्छिन्नत्वानिवेशनं तत्रावश्यकम् , अन्यथा वह्नित्वादिमज्ज्ञानस्य संयोगरूपव्यधिकरणसम्बन्धावच्छिन्नाभावमादायानुपपत्तिताद-वस्थ्यात् ,

तथा च—तत्रात्यन्ताभावघटितव्याप्तौ प्रतियोगितायां सा-ध्यताऽवच्छेदकसम्बन्धावच्छिन्नत्वस्य तदवच्छेदकतायां साध्य-ताऽवच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य निवेशादन्योन्या-

भावघटितव्याप्तौ च प्रतियोगिताऽवच्छेदकतायां साध्यताऽव-च्छेदकसम्बन्धावच्छिन्नत्वमात्रनिवेशेन लाघवम्,

एवं द्रव्यत्वाद्येकव्यक्तिकसाध्यकस्थलेऽप्यन्योन्याभावघटि-तव्याप्तिरेव लघीयसी, तत्र प्रतियोगिताऽनवच्छेदकत्वनिवेशेनैवो-पपत्तौ प्रतियोगिताऽवच्छेदकताऽनवच्छेदकत्वनिवेशाभावात्,

यत्र त्वत्यन्ताभावघटितव्याप्तिः लघुशरीरा समवायेन वह्न्यादेः साध्यतायां तत्र तज्ज्ञानमेव हेतुरिति वदन्ति,

एतस्या व्याप्तेर्ग्राहकं च व्यभिचारज्ञानसामान्याभावसहकृतं-सहचारदर्शनं, तथा हि–व्यापकसामानाधिकरण्यमात्रस्य रासभा-दिसाधारणतया तादृशसमानाधिकरणवृत्तिहेतुताऽवच्छेदकं व्या-प्तिस्तत्र व्याप्तौ सामानाधिकरण्यरूपसहचारस्य विशेषणतया वि-शेषणज्ञानमुद्रया सहचारज्ञानं हेतुः सामानाधिकरण्यस्य व्या-प्तित्वेऽपि परामर्शे तस्य विशेषणतया तज्ज्ञानहेतुत्वं निराबाधमेव,

व्यापकत्वदलग्रहं प्रति च व्यभिचारज्ञानसामान्याभावस्य हेतुत्वं व्यभिचारशङ्कानिवर्त्तकत्वेन च व्याप्तौ तर्कस्यो-पयोगित्वम्, अधिकमग्रे वक्ष्यामः,

नव्यास्तु–लाघवात्साध्यात्यन्ताभाववदवृत्तित्वरूपमव्यभिच-रितत्वमेव व्याप्तिः, तज्ज्ञानमेवानुमितिहेतुः, केवलान्वयिस्थले च साध्याभावस्याप्रसिद्धावप्यन्यदीयाभावे साध्यीयत्वावगाहि भ्रमात्मकं ज्ञानं हेतुः,

अथ तादृशभ्रमात्मकज्ञानप्रसिद्धावपि तस्य साध्याभाववदवृ-त्तित्वरूपव्याप्तिविषयकज्ञानत्वेन हेतुता न सम्भवति तादृशका-

रणताऽवच्छेदकस्याप्रसिद्धेरिति चेत् ? का क्षतिः,

न हि वास्तवव्याप्तिविषयताशालिज्ञानत्वेन हेतुता, अपि तु साध्यविषयतानिरूपिता याऽभावविषयतेत्येवंरीत्या खण्डशः प्रसिद्धतद्घटकीभूतपदार्थविषयता निवेश्य तादृशविषयताशालिज्ञानत्वेनैव हेतुता कल्प्यते, तादृशकारणताऽवच्छेदकस्य च केवलान्वयिस्थले तादृशभ्रमात्मकज्ञान एव प्रसिद्धिरित्यतो नानुपपत्तिलेशोऽपि,

न चैवं केवलान्वयिसाध्यकस्थले सल्लिङ्गपरामर्शरूपगुणाभावात्कथं प्रमाऽनुमितिरिति वाच्यम् ?

साध्यवद्विशेष्यकपरामर्शस्यैव सल्लिङ्गपरामर्शतया वाच्यत्वाभाववदवृत्तिमेयत्ववदिदमित्येतादृशभ्रमस्यापि तथात्वाक्षतेः,

अथ केवलान्वयित्वग्रहदशायां तादृशव्याप्तिग्रहासम्भवेनानुमित्यनुदयापत्तिः,

यदि च केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वं, तद्ग्रहश्चात्यन्ताभावप्रतियोगित्वप्रकारकग्रह एव विरोधी न तु प्रतियोगितासंसर्गकसाध्याभाववदवृत्तित्वबुद्धौ, तथा च केवलान्वयित्वग्रहदशायामपि तादृशव्याप्तिग्रहः सम्भवत्येवेति मन्यते; तथाऽप्यभाववत्वं धर्मिताऽवच्छेदकीकृत्य प्रतियोगितासंसर्गावच्छिन्नप्रतियोगिताकसाध्याभाववत्ताग्रहदशायां तादृशव्याप्तिग्रहासम्भवेन तत्रानुमित्यनुपपत्तिर्दुर्वारैवेति चेद् ?

नेष्यत एव तदानीमनुमितिः,

अथैतन्मते विशिष्टसत्त्वादिना द्रव्यत्वादिसाध्यकानुमि-

तिर्विशेषदर्शिनां नोपपद्यते विशिष्टसत्तायाः सत्ताऽनतिरेकितया द्रव्यत्वाभाववति गुणादौ वृत्तेः,

तत्र तद्वृत्तित्वाभावस्य विशेषदर्शिभिर्ग्रहीतुमशक्यत्वात्,

न च साध्याभाववन्निष्ठाधिकरणतानिरूपकताऽनवच्छेदकधर्मावच्छिन्नत्वरूपव्याप्तेरेवानुमितिप्रयोजकत्वोपगमान्नानुपपत्तिस्तत्र विशिष्टसत्तात्वस्य गुणादिनिष्ठाधिकरणतानिरूपकताऽवच्छेदकत्वाभावेनेदृशव्याप्तेरक्षतत्वादिति वाच्यम्?

विशिष्टसत्तात्वस्य तादृशाधिकरणतानिरूपकताऽवच्छेदकीभूतसत्तात्वानतिरेकितया तादृशाभावासम्भवात्,

एवं जातिमान्सत्त्वादित्यादावपि साध्याभाववति हेतुताऽवच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या तत्रोपदर्शितव्याप्तेरभावेन विशेषदर्शिनामनुमित्यनुपपत्तिरिति चेद्?

न—केवलान्वयिसाध्यकस्थल इव तत्रापि विशेषदर्शिनामनुमित्यनभ्युपगमात्,

न चोपदर्शितव्याप्तेरवृत्तिसाधारणतया विशेषदर्शिनामवृत्तिहेतुकानुमित्यापत्तिरिति वाच्यम्?

विशेषदर्शिनामवृत्तिहेतौ पक्षधर्मताज्ञानानुत्पादेन तद्धेतुकानुमित्यापत्त्यसम्भवात्,

न च हेताववृत्तित्वग्रहदशायामपि पक्षविशेष्यकतादृशहेतुप्रकारकपरामर्शादनुमित्यापत्तिः, तादृशपरामर्शे ग्राह्याभावानवगाहिनोऽवृत्तित्वग्रहस्य विरोधित्वे मानाभावादिति वाच्यम्?

तस्य ग्राह्याभावानवगाहित्वेऽपि स्वातन्त्र्येणान्वयव्यतिरे-

काभ्यां विरोधित्वोपगमात्तत्रानुमित्यापत्तेरिष्टापत्तिपरिहरणीय-त्वाच्चेति प्राहुः,

ननु तथाऽपि विशेषाभावातिरिक्तसामान्याभावे मानाभावेन तदात्मकसाध्याभावस्याहेतुमत्यपि सत्त्वेनोपदर्शिताव्यभिचरित-सामानाधिकरण्यस्याव्यभिचरितत्वस्य च व्याप्तित्वमनुपपन्नम्,

न चैवं विशेषाभावस्य सामान्यधर्मावच्छिन्नप्रतियोगिताक-त्वेन रूपविशेषाभाववति रूपवति रूपं नास्तीतिबुद्ध्यापत्तिरिति वाच्यम् ?

रूपत्वावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वाङ्गीकारेण यावद्विशेषाभावाधिकरणावच्छेदेन रूपत्वावच्छिन्नप्रतियोगिताक-त्वाङ्गीकारेणोक्तापत्त्यभावादिति चेत् ?

न—रूपत्वावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वक-ल्पनापेक्षया तदाश्रयत्वेनैकातिरिक्तसामान्याभावकल्पनस्यैवौ-चित्यात्,

अन्यथा सर्वेषामेक एवाभावः कल्प्येत तत्तदवच्छेदेन च घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वमुपेयत इति रीत्या तद्भेदोऽपि विलुप्तः स्यात्,

न चातिरिक्तरूपसामान्याभावाङ्गीकारे तस्यानन्तवाय्वाद्य-धिकरणवृत्तित्वकल्पेन गौरवमिति वाच्यम् ?

तस्य फलमुखत्वेनादोषात्,

किंच रूपं नास्तीत्यादिप्रतीतिविषयत्वस्यानेकाभावेषु कल्प-नामपेक्ष्य एकाभावस्यैव तादृशप्रतीतिविषयता कल्प्येत लाघवा-

दित्यतिरिक्तसामान्याभावसिद्धिः,

न च सामान्याभावविषयकलौकिकप्रत्यक्षे सन्निकर्षवशा-त्तत्तद्विशेषाभावविषयताऽप्यस्त्येवेति नोक्तरीत्या कल्पनागौर-वमिति वाच्यम् ?

तावताऽपि रूपं नास्तीत्यनुमितेस्तावद्व्यक्तिनिष्ठविषयता-कल्पनामपेक्ष्यैकाभावविषयकत्वे लाघवस्यानपायात् ,

न च तत्रापि तन्मते रूपत्वावच्छिन्नप्रतियोगिताकत्वेन य-त्किञ्चि दभाव एवानुमितिविषय इति वाच्यम् ?

यत्र व्यापकताज्ञानं रूपत्वावच्छिन्नप्रतियोगिताकत्वेन याव-दभावलौकिप्रत्यक्षात्मकं तत्रानुमितौ विनिगमनाविरहेण ताव-द्विषयताकल्पने गौरवतादवस्थ्यात् ,

के चित्तु—अतिरिक्तसामान्याभावानङ्गीकारे जन्यरूपत्वा-वच्छिन्नं प्रति रूपत्वेन प्रतिबन्धकतया प्रतिबन्धकाभावमुद्रया तत्तदभावकारणतायां रूपत्वावच्छिन्नप्रतियोगिताकत्वेनानेकाभा-वेषु कारणताकल्पनमपेक्ष्य लाघवादेकाभावस्य कारणताकल्पन-मुचितमिति तत्सिद्धिः,

न च तदङ्गीकारे तस्य ध्वंसप्रागभावाभ्यां सह विरोधेन तयोस्तत्तद्व्यक्तित्वेनातिरिक्तकारणत्वस्य कल्पनया न लाघव-मिति वाच्यम् ?

तादृशाविरोधानङ्गीकारेण लाघवसम्भवात् ,

तदङ्गीकारेऽपि चाक्षुषत्वावच्छिन्नं प्रति लौकिकविषयता-सम्बन्धावच्छिन्नप्रतियोगीताकचाक्षुषत्वाच्छिन्नाभावादेः प्रति-

वन्धकतास्थले तावदभावाभावकूटस्य कारणत्वकल्पनमपेक्ष्यैकस्य तत्कल्पने लाघवेन तत्सिद्धेः,

अथानन्ताभावेषु कारणताकल्पने किं गौरवम् ?

न च कारणताभेदप्रयुक्तं तदिति वाच्यम् ?

अवच्छेदकभेदस्यैव कारणताभेदप्रयोजकतया प्रकृते चावच्छेदकभेदाभावेन कारणताभेदाभावाद् ,

अन्यथोक्तरीत्याऽनन्तस्वरूपयोग्यदण्डनिष्ठघटकारणताकल्पनामपेक्ष्य फलोपधायकदण्डादिनिष्ठघटजनकताऽवच्छेदकजातिकल्पने लाघवेन तत्कल्पनापतेरिति चेद् ?

न–अतिरिक्तसामान्याभाववादिमते समवायावच्छिन्नरूपत्वावच्छिन्नप्रतियोगिताकवास्तविकैकसामान्याभावनिष्ठतद्व्यक्तित्वस्यैव कारणताऽवच्छेदकत्वे लाघवेन तदनुपगमे समवायावच्छिन्नप्रतियोगिताकत्वविशिष्टरूपत्वावच्छिन्नप्रतियोगिताकाभावत्वेनानन्ताभावहेतुत्वे विशेष्यविशेषणभावे 'विनिगमनाविरहेण कारणताबाहुल्यात् कारणताऽवच्छेदकगौरवाच्च,

न चाभावनिष्ठतद्व्यक्तित्वस्य विनिगमनाविरहेण तज्ज्ञानादिरूपतया तवापि गौरवमेवेति वाच्यम् ?

तस्य ज्ञानादिरूपत्वे कारताग्रहकाले तदुपस्थितिकल्पने गौरवम् , अभावस्वरूपत्वे तु तस्य कारणतयोपास्थितिसत्त्वेन न तत्कल्पनामिति लाघवेनाभावनिष्ठतद्व्यक्तित्वस्य तद्व्यक्तिस्वरूपतया तस्यैवावच्छेदकत्वात् ,

न च तद्व्यक्तित्वस्याभावरूपत्वेऽपि तस्य स्वरूपतो भा·

नासम्भवः, जात्यतिरिक्तपदार्थस्य स्वरूपतो भानाभावेन तत्प्रकारताशालिबोधे तद्वृत्तिधर्मप्रकारकबोधसामग्र्या नियामकत्वेन तस्य स्वरूपतो भानासम्भवादिति वाच्यम् ?

अन्यत्र तादृशबोधे तादृशसामाग्र्या नियामकत्वेऽपि तद्व्यक्तिरित्याकारकविलक्षणप्रकारताशालिबोधे तद्व्यक्तित्वस्य स्वरूपतो भानस्यानुभवसिद्धतया तत्प्रकारकबोधे तादृशसामग्र्या नियामकत्वानङ्गीकारादित्याहुः,

तदसत्—अभावस्य तद्व्यक्तित्वेन हेतुतायाः सिद्धान्तविरुद्धत्वादिति संक्षेपः ।

अत्र वदन्ति—स्वव्यापकसाध्यसामानाधिकरण्यमनुमितिजनकपक्षधर्मताज्ञाने हेतौ प्रकार एव न तु व्याप्तिपदार्थः किन्तु व्यापकतामात्रं तथा लाघवेन विपूर्वाब्धातोर्व्यापकतामात्रार्थकत्वात्, भावविहितक्तिन्प्रत्ययस्य च निरर्थकत्वात्,

एवं च धूमस्य व्यापको वह्निरित्यादौ तद्धेतुसमानाधिकरणाभावप्रतियोगिताऽनवच्छेदकधर्मरूपव्यापकता हेतुवाचकधूमादिपदसमभिव्याहारेण धातुना प्रत्याय्यते, कर्तृकृता चाश्रयरूपः कर्ताऽन्यलभ्यधूमादिकमनन्तर्भाव्यैव चाब्धातोः शक्तिः धूमादिपदोत्तरकर्मविहितषष्ठ्यादेः प्रतियोगित्वरूपं सामानाधिकरण्यान्वयि कर्मत्वमर्थः, समानाधिकरणाभावप्रतियोगिताऽवच्छेदकत्वत्वावच्छिन्नाभावस्य वह्नित्वादौ बाधितत्वेऽपि तादृशावच्छेदकत्वप्रतियोगिकाभावस्य व्यापकताऽनवच्छेदकसाधारणत्वेऽपि च न क्षतिः,

सामानाधिकरण्यादिपदार्थेषु विशकलितेषु शक्तिस्वीकारेण धूमप्रतियोगित्वादेः निरूपकतया सामानाधिकरण्यादावन्वये चावच्छेदकत्वपर्यन्तानां शक्तिभिर्लब्धस्य धूमादिसमानाधिकरणाभावप्रतियोगिताऽवच्छेदकत्वावच्छिन्नस्य तदवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन शक्यान्तराभावेऽन्वयेन धूमादिसमानाधिकरणाभावप्रतियोगिताऽवच्छेदकत्वस्वावच्छिन्नाभावलाभेन सामञ्जस्यात,

धर्मश्च समभिव्याहृतविशेष्यताऽवच्छेदकवह्नित्वादिरूपो भासत इति नातिप्रसङ्गः, वह्नेर्व्याप्यो धूम इत्यादौ कृतः प्रतियोगिरूपं कर्मार्थः प्रतियोगितायां धात्वर्थकूटप्रविष्टसामानाधिकरण्यस्य निरूपकतया विशेषणत्वेन तत्राभावस्य तत्र प्रतियोगित्वस्य तत्रावच्छेदकत्वस्य तत्राभावान्तरस्य तत्र धर्मस्य तत्र षष्ठ्यर्थाधेयत्वस्य तत्र वह्न्यादेर्विशेषणत्वेनान्वयः, कर्तृप्रत्ययस्थले यादृशविशेष्यविशेषणभावः कर्मप्रत्ययस्थले तद्विपरीतविशेषणविशेष्यभावस्य व्युत्पत्तिसिद्धत्वादिति वह्निवृत्तिधर्मनिष्ठाभावप्रतियोग्यवच्छेदकतानिरूपकप्रतियोगिताकाभाववृत्तिसामानाधिकरण्यप्रतियोगीधूम इत्याकारको बोधः,

न चैवं वह्नित्वादिनिष्ठद्रव्यान्तर्गतधूमादिसमानाधिकरणाभावप्रतियोगिताऽवच्छेदकत्वाभावमादायाव्याप्येऽपि द्रव्यत्वावच्छिन्ने वह्नित्वादिव्याप्यत्वव्यवहारापत्तिरिति वाच्यम् ?

विशेष्ये धूमादौ दर्शितसामानाधिकरण्यप्रतियोगिनोऽभेदान्वये प्रतियोगिविशेषणताऽऽपन्नप्रातियोगिताविशेषणसामानाधि-

करण्याविशेषणताऽऽपन्नाभावविशेषणप्रतियोगित्वाविशेषणताऽऽपन्नवह्नित्वत्वादिनिष्ठाभावीयावच्छेदकत्वनिष्ठप्रतियोगितायां या धूमत्वाद्यवच्छिन्नस्यावच्छेदकता तद्विशिष्टस्याभेदस्य सम्बन्धतोपगमेन वह्नित्वादौ यद्रूपविशिष्टसमानाधिकरणाभावप्रतियोगिताऽवच्छेदकत्वत्वावच्छिन्नाभावस्तद्रूपविशिष्ट एव दर्शितसामानाधिकरण्यप्रतियोगिनो निरुक्तविशिष्टसम्बन्धत्वेनानातिप्रसङ्गात्,

एवमन्योन्याभावघटितव्याप्तिपक्षे साध्याभाववदवृत्तित्वरूपव्याप्तिपक्षे चोह्यमिति,

केचित्तु—साधनसमानाधिकरणयावद्धर्मानाधिकरणमात्रवृत्तिताऽनवच्छेदकं यत्साध्यताऽवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः, यावत्त्वनिवेशाद्धूमवान्वह्नेरित्यादौ नातिव्याप्तिः,

अत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वं तच्च तच्छून्यधर्मावृत्तित्वं धर्मपदनिवेशात्समवायेन द्रव्यसाध्यतायां मेयत्वादिव्यभिचारिहेतौ साधनसमानाधिकरणयावद्धर्मान्तःपातिगुणत्वाद्यनधिकरणमात्रवृत्तित्वाभाववत्यवृत्तिगगनादौ द्रव्यत्वरूपसाध्यताऽवच्छेदकस्य वृत्तित्वेऽपि नातिव्याप्तिः, तथाविधवृत्तित्वाभाववति वृत्तित्वरूपधर्मविशिष्टे द्रव्यत्वस्यावृत्तित्वेन तद्भिन्नत्वविरहात्,

अथात्र धर्मपदं व्यर्थं तदनधिकरणमात्रवृत्तित्वस्य तदनधिकरणेतरावृत्तित्वविशिष्टतदनधिकरणवृत्तित्वरूपतया तत्र च विशेष्यांशस्य निवेशे प्रयोजनाभावेन तदनधिकरणेतरावृत्तित्वशून्यावृत्तित्वस्यैव निवेशाद्गगनस्य तदनाधिकरणेतरावृत्ति-

त्वशून्यत्वाभावाद् द्रव्यत्वस्य गगनवृत्तित्वेऽपि द्रव्यवान्मेयत्वादित्यत्रातिव्याप्त्यनवकाशादिति चेद् ?

न—तदनधिकरणमात्रवृत्तित्वं हि न तदनधिकरणेतरावृत्तित्वं तदनधिकरणेतरवृत्तित्वावच्छिन्नभेदवत्त्वरूपस्य तदधिकरणवृत्तित्वसमनियतस्य तदनधिकरणेतरवृत्तित्वस्य गुरुतया भेदप्रतियोगिताऽनवच्छेदकत्वेनाप्रसिद्धेः,

नापि तदधिकरणावृत्तित्वं समभिव्याहृतपदार्थताऽवच्छेदकावच्छिन्नेतरव्यवच्छेदस्यैव मात्रपदार्थत्वात् , किन्तु स्वव्यापकतदनधिकरणसत्ताकत्वं, तद्वत्त्वं च न गगने गगनव्यापकताया अप्रसिद्धेरिति धर्मपदसार्थक्यात् ,

यत्तु—तदनधिकरणेतरावृत्तित्वशून्येत्यत्र साध्यताऽवच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभावशून्यत्वस्यैव निवेशेन संयोगेन द्रव्यवान्मेयत्वादित्यत्र गुणत्वानधिकरणेतरानिरूपितसाध्यताऽवच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या द्रव्यत्वस्यावच्छेदकत्वानुपपत्तिरिति तदधिकरणेतरनिष्ठान्योन्याभावप्रतियोगिताऽनवच्छेदकत्वमिह तदनधिकरणेतरावृत्तित्वशून्यत्वं वाच्यं तथा च गगनस्यापि तथात्वाद्धर्मपदसार्थक्यम् ,

न चैवमपि गुणनिष्ठान्योन्याभावप्रतियोगितायां साध्यताऽवच्छेदकसम्बन्धेनानवच्छेदकस्य साध्यताऽवच्छेदकसम्बन्धेन वृत्तिमतोऽप्रसिद्ध्या द्रव्यत्वस्यावच्छेदकत्वं न संभवत्येवेति वाच्यम् ?

तादृशानवच्छेदकत्वत्ववृत्तिमत्त्वोभयाभाववद्यावत्त्वाश्रयकत्वस्यावच्छेदकान्तसमुदायार्थत्वादिति,

तदसत्-स्वाश्रयनिरूपितसाध्यताऽवच्छेदकसम्बन्धावच्छिन्नाधेयतावद्वृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकतदनाधिकरणेतरत्वाभाववदन्यत्वस्य समुदितलक्षणार्थत्वेन तादृशदोषानवकाशात्, संयोगेन द्रव्यसाध्यके व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यैव द्रव्यत्वे सुघटत्वाद्, अत्र नञ्द्वयघटनाया अनिवेशेन धर्मपदस्यानिवेशेन च लाघवमित्याहुः,

तदसत्-गौरवेणैतद्व्याप्तिज्ञानस्यानुमित्यहेतुत्वात्,

रत्नकोशकारानुयायिनस्तु-यत्समानाधिकरणाः साध्यताऽवच्छेदकावच्छिन्नव्यापकताऽवच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वं व्याप्तिः, वह्निमान्धूमादित्यादौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकं घटत्वेन वह्न्याद्यभावमादाय लक्षणसमन्वयः, धूमवान्वह्नेरित्यादौ धूमत्वेन धूमाद्यभावस्यापि लक्षणघटकतया तस्य प्रतियोग्यसमानाधिकरणत्वान्नातिप्रसङ्गः, अयमात्मा ज्ञानादित्यादावव्याप्तिवारणाय हेतुसमानाधिकरणा इति वह्निमान्धूमादित्यादौ गोत्वाद्यभावमादायासंभववारणाय साध्यताऽवच्छेदकेत्यादि, अतिप्रसङ्गवारणाय यावन्त इति,

अत्र द्रव्यं सत्त्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावस्य कालिकतया प्रतियोगिसामानाधिकरण्यादतिव्याप्तेर्वारणाय स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यं वाच्यम्, स्वविशिष्टेत्युपादानात्सत्तावान् जातेरित्यत्र कालिकतया हेतुसमानाधिकरणस्य सत्तात्वावच्छिन्नाभावस्य हेत्वधिकरणनि-

त्यद्रव्यगुणयोरवृत्तावपि नाव्याप्तिः,

वस्तुतस्तु–हेतुसामानाधिकरण्यप्रतियोगिसामानाधिकरण्ययोर्दैशिकविशेषणतया वृत्तित्वस्य निवेशेन स्वविशिष्टहेत्वधिकरणावच्छेदेनेति न देयमेव,

अत्र साध्यताऽवच्छेदकावच्छिन्नव्यापकताऽवच्छेदकत्वं साध्यसमानाधिकरणाभावीयस्वावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताऽनवच्छेदकत्वं, स्वपदं व्यापकताऽवच्छेदकत्वेनाभिमतप्रतियोगितापरं तेन व्यधिकरणधर्मावच्छिन्नप्रतियोगितानामपि स्वानवच्छेदकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणाभावीयप्रतियोगिताऽवच्छेदकत्वेऽपि न साध्यताऽवच्छेदकावच्छिन्नव्यापकताऽवच्छेदकत्वानुपपत्तिः,

एवं सति व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावानां लक्षणाघटकतया लाघवमपि, व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य सार्वत्रिकतया तदीयप्रतियोगितानां स्वावच्छेदकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणाभावीयप्रतियोगिताऽवच्छेदकत्वात् ,

यत्तु–साध्यसमानाधिकरणाभावीयसाध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताऽनवच्छेदकत्वमेव तत्त्वम् ,

एवं च संयोगेन साध्यतायां वाच्यत्वद्रव्यत्वादीनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानां लक्षणाघटकतया लाघवमपीति,

तदसत्–संयोगेन साध्यतायां द्रव्यत्वाद्यवच्छिन्नव्यधिकर-

णसम्बन्धावच्छिन्नप्रतियोगिताकाभावानां लक्षणघटकतया गौरवाद्, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानङ्गीकारेऽपि व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय लक्षणसमन्वये तदङ्गीकारवैयर्थ्यापत्तेश्च,

किञ्च संयोगेन वन्ह्यादेः साध्यतायां तादृशप्रतियोगित्वाप्रसिद्धिः संयोगसंबन्धावच्छिन्नप्रतियोगिताकद्रव्येतराभावस्य सार्वत्रिकतया द्रव्येतरनिष्ठप्रतियोगितास्विव द्रव्यस्य संयोगसम्बन्धेनाव्याप्यवृत्तितया प्रतियोगिव्यक्तिभेदेन प्रतियोगितानां भिन्नतया च द्रव्यनिष्ठप्रतियोगितास्वपि वन्ह्यादिमन्निष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगिताऽनवच्छेदकत्वात्,

अपि च नित्यत्वविशिष्टज्ञानत्वसाध्यके प्रत्यक्षत्वेऽतिव्याप्तिः, असमवेतानां समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य सार्वत्रिकतया प्रत्यक्षत्वव्यापकसत्ताऽऽदिजातिनिष्ठप्रतियोगितानामेव नित्यज्ञाननिष्ठाभावीयसमवायसम्बन्धावच्छिन्नप्रतियोगिताऽनवच्छेदकत्वेन तन्निरूपकानामेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसत्तागुणत्वज्ञानत्वाद्यभावानां लक्षणघटकतया तेषां–प्रतियोगिसमानाधिकरणत्वात्, साध्यताऽवच्छेदकावच्छिन्न–साध्याभावस्य लक्षणघटकत्वेऽपि तस्य विशिष्टाभावतया प्रतियोगिसमानाधिकरत्वानपायात्,

एवं कालिकसम्बन्धेन समवायेन वा महाकालान्यत्वविशिष्टसत्ताऽऽदिसाध्यके महाकालत्वादौ समवायसम्बन्धेनैतद्रूपान्यत्वविविशिष्टसत्तासाध्यके रूपत्वादावपि, अत एव कालिक

सम्बन्धेन समवायेन वा घटितं साध्यताऽवच्छेदकावच्छिन्नव्यापकत्वं विवक्षितमित्यपि परास्तम् ,

समवायेन व्यापकताविवक्षणेऽभावादिसाध्यतायां तदप्रसिद्धेश्च,

यदपि—साध्यताऽवच्छेदकसम्बन्धेन साध्यवति योऽभावो विशेषणतासम्बन्धावच्छिन्नतत्प्रतियोगिताऽनवच्छेदकत्वं तत्त्वम् , असद्धेतौ साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वव्यभिचारनिरूपकाधिकरणान्यत्वादिनिष्ठप्रतियोगितानामपि तादृशतयाऽतिप्रसङ्गाभावादिति,

तदपि न समञ्जसम्—एतद्घटपटद्वित्ववानेतद्घटत्वादित्यादावतिव्याप्तेः, एतद्घटान्यत्वनिष्ठप्रतियोगित्वस्य तादृशद्वित्वव्यापकताऽनवच्छेदकतया तादृशद्वित्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगित्वस्यैव तादृशद्वित्वव्यापकताऽवच्छेदकतया व्यधिकरणधर्मावच्छिन्नतत्प्रतियोगिताकाभावस्यैव लक्षणघटकतया तस्यैतद्घटे प्रतियोगिसमानाधिकरणत्वात् ,

अथैवमपि साध्यव्यापकताऽवच्छेदकप्रतियोगित्वाप्रसिद्धिः, वाच्यत्वादिनिष्ठसमवायित्वादिरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितानामपि वह्निमत्पर्वतादिनिष्ठाभावीयविशेषणतासम्बन्धावच्छिन्नज्ञानादिनिष्ठप्रतियोगिताया विषयितासम्बन्धेनावच्छेदकतया तादृशानवच्छेदकत्वविरहादिति चेद् !

न—साध्यवन्निष्ठाभावीयत्वावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायाः स्वावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताऽऽश्र-

यो यत्तदन्यत्वस्यैव तत्त्वात्, स्वं साध्यव्यापकताऽवच्छेदकत्वेना-
भिमतप्रतियोगित्वं, स्वरूपसम्बन्धावच्छिन्नव्यधिकरणधर्मनिष्ठाव-
च्छेदकताकवाच्यत्वादिनिष्ठप्रतियोगितानां तादृशावच्छेदकता-
घटकत्वरूपसम्बन्धेनावच्छेदकं यत्तदन्यत्वेन संग्रहः,

अथैवं समवायसम्बन्धावच्छिन्नप्रतियोगिताऽवच्छेदकताक-
जलत्वाद्यवच्छिन्नप्रतियोगिताकस्याभावस्य जलादिनिष्ठप्रतियो-
गितायां स्वावच्छेदकताघटकसमवायसम्बन्धेनावच्छेदकं यज्ज-
लत्वादिकं तद्भिन्नतया वन्ह्यादिरूपसाध्यव्यापकताऽवच्छेदकत्वेन
तन्निरूपितानुयोगिताकजलत्वावच्छिन्नाभावस्यापि लक्षणघटक-
तया जलादिरूपप्रतियोगिसामानाधिकरण्यविरहेणासंभवापत्ति-
रिति चेद्?

न—साध्यवन्निष्ठाभावीयस्वावच्छेदकसम्बन्धावच्छिन्नप्रति-
योगितायाः स्वावच्छेदकताघटकसम्बन्धेनावच्छेदकं यत्प्रतियो-
गित्वं तदन्यत्वस्यैव तत्त्वात्, समवायसम्बन्धावच्छिन्नप्रतियो-
गिताऽनवच्छेदकताकोक्ताभावस्य स्वावच्छेदकताघटकसमवायेन
तादृशावच्छेदकस्य प्रतियोगित्वस्याप्रसिद्ध्या लक्षणाघटकत्वेनो-
क्तदोषाभावात्,

एवं सति विषयितासंबन्धावच्छिन्नप्रतियोगिताऽवच्छेदक-
ताकवाच्यत्वाद्यभावस्य न लक्षणघटकत्वं स्वावच्छेदकताघटक-
विषयितासंबन्धेन वाच्यत्वादिनिष्ठव्यधिकरणधर्मावच्छिन्नप्रति-
योगिताविशिष्टज्ञानादेः स्वरूपादिसम्बन्धेनाभावस्य वन्ह्यादिम-
त्यपि सत्त्वात्,

न वा संयोगसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताऽव-च्छेदकताकाभावस्यापि लक्षणघटकत्वं ; तत्र साध्यवन्निष्ठाभावप्रतियोगितायाः स्वावच्छेदकताघटकसंयोगसमवायादिसम्बन्धेनाऽवच्छेदकप्रतियोगित्वाप्रसिद्धेः,

किन्तु स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताऽवच्छेदकताकाभावानामेव लक्षणघटकत्वमिति महालाघवमपीति ध्येयम् ,

नन्वेवमपि वाच्यत्वादिनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगितानामपि व्यापकताऽवच्छेदकत्वानुपपत्तिः, तासु व्यधिकरणधर्मावच्छिन्नाभावीयानां घटादिनिष्ठानां घटवाच्यत्वोभयनिष्ठानां वा प्रतियोगित्वानामवच्छेदकत्वादिति चेद् ?

मैवं—साध्यवन्निष्ठाभावीयस्वावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायाः स्वावच्छेदकताघटकसम्बन्धेन स्वानाधिकरणवृत्ति-प्रतियोगिताऽवच्छेदकत्वातिरिक्तस्यावच्छेदकत्वस्याश्रयीभूतं यत्प्रतियोगित्वं तदन्यत्वस्यैव तथात्वाद् , वाच्यत्वादिनिष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगितासु स्वावच्छेदकस्वरूपादिसम्बन्धावच्छिन्नायाः स्वानधिकरणघटादिनिष्ठायाः प्रतियोगितायाः स्वावच्छेदकताघटकसम्बन्धेन यदवच्छेदकत्वं तद्भिन्नस्यावच्छेदकत्वस्य सत्त्वाद् व्यापकताऽवच्छेदकत्वं सूपपादम् ,

वस्तुतस्तु—व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितायाः संसर्गावच्छिन्नत्वे मानाभावेन साध्यवन्निष्ठाभावीयसंसर्गावच्छिन्नप्रतियोगिताऽन्यसाध्यसमानाधिकरणवृत्तित्वमेव तत्त्वम् , लाघवाद्वृत्तित्वान्तानिवेशान्न घटत्वेन गोत्वाद्यभावस्यापि लक्षणघटकतया त-

स्य हेत्वधिकरणे प्रतियोग्यसामानाधिकरण्यादसम्भवः, स्वाश्रय-निष्ठाभावीयसंसर्गावच्छिन्नप्रतियोगिताऽन्यत्वसामानाधिकरण्य-घटितसामानाधिकरण्योभयसम्बन्धेन साध्यवत्त्वमिति तु निष्कर्षः, स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यस्योक्तरीत्याऽनिवेशो च वृत्ति-त्वान्तं नोपादेयम् , तथा च प्रथमसम्बन्धेनैव साध्यवत्त्वं तत्त्वमिति निष्कर्षो बोध्यः, द्रव्यत्वत्वाद्यवच्छिन्नायां द्रव्यत्वादिनिष्ठप्रतियो-गितायां समवायसम्बन्धावच्छिन्नायां वह्न्यादिमन्निष्ठाभावीयत्व-स्य व्यधिकरणधर्मावच्छिन्नायां च संसर्गावच्छिन्नत्वस्य विरहेण वह्न्यादिव्यापकत्वावच्छेदकत्वोपपत्तिः, संयोगादिसम्बन्धाव-च्छिन्नायां तु तस्यां वह्न्यादिमन्निष्ठाभावीयत्वं संसर्गावच्छिन्नत्वं-चास्तीति न वह्न्यादिव्यापकताऽवच्छेदकत्वापत्तिरित्याद्यूह्यम् ।

ननु धूमवान्वह्नेरित्यादावतिव्याप्तिः समनियताभावैक्ये धू-माभावस्य वह्निधूमोभयाभावाद्यात्मकतया वह्न्यादिरूपप्रतियो-गिसामानाधिकरण्यादिति चेद् ?

न—यत्समानाधिकरणानां साध्यताऽवच्छेदकावच्छिन्नव्याप-कताऽवच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रति-योगिताऽवच्छेदकावच्छिन्नासामानाधिकरण्यस्य व्याप्तित्वाङ्गीका-राद्, अत्रेन्धनत्वादिना वह्न्याद्यभावमादाय लक्षणसमन्वयः,

एवं च धूमाद्यभावस्य वह्निधूमोभयत्वादिरूपप्रतियोगिता-ऽवच्छेदकावच्छिन्नासामानाधिकरण्याद् नोक्तातिव्याप्तिः,

अथ तथाऽपि धूमत्वेन धूमाद्यभावस्य वह्निधूमवद्भेदस्य-भावाद्यभिन्नतया वह्नित्वादिरूपप्रतियोगिताऽवच्छेदकावच्छिन्न-

सामाधिकरण्यादतिव्याप्तिरस्त्येवेति चेद् ?

न–स्वन्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्ना या प्रतियोगिता तदवच्छेदकावच्छिन्नसामानाधिकरण्यस्य विवक्षणीयतयोक्तदोषाभावात्,

स्वं प्रतियोगिता, धूमत्वाद्यवच्छिन्नाभावानां धूमवद्वृत्तिनिष्ठप्रतियोगिताऽवच्छेदकीभूतवह्नित्वाद्यवच्छिन्नसमानाधिकरणत्वसत्त्वेऽपि तादृशप्रतियोगितायाः स्वन्यूनवृत्तिवह्नित्वावच्छिन्नत्वात् तादृशधर्मानवच्छिन्नप्रतियोगिताऽवच्छेदकावच्छिन्नसामानाधिकरण्यासम्भवादिति,

अथ हेतुसामानाधिकरण्ये दैशिकविशेषणतया वृत्तित्वानिवेशे वह्निमान्धूमादित्यादौ कालिकादिसम्बन्धेन हेतुसमानाधिकरणानां वह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावानामपि यावदन्तर्गततया तेषां च वह्नित्वेन प्रमेयसामान्याभावाद्यभिन्नत्वेन यावत्प्रमेयवृत्तिप्रतियोगिताकत्वेन स्वन्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तादृशप्रतियोगिताऽवच्छेदकावच्छिन्नसामानाधिकरण्यासम्भवेनासम्भवः,

न च तेषां वह्निमात्रवृत्तिप्रतियोगितैव तथाविधेति नाप्रसिद्धिरिति वाच्यम् ?

वह्निर्नास्तीति प्रतीतावपि वह्नित्वावच्छिन्नवृत्तित्वेन यावत्प्रमेयवृत्तिप्रतियोगिताऽवगाहनस्यैवोपगमाद्वह्निमात्रवृत्तिप्रतियोगितायां मानाभावात्,

यदि च स्वन्यूनवृत्तिसमानाधिकरणधर्मावच्छिन्नप्रतियो-

गिताकत्वेनाभावस्यापि विशेषणीयतया वह्नित्वाद्यवच्छिन्नवह्न्य-भावादिर्न लक्षणघटकः किन्तु व्यधिकरणधर्मावच्छिन्नाभाव एवेति तादृशाभावानां तथाविधप्रतियोगित्वाप्रसिद्धावपि न क्षतिरित्युच्येत तदा धूमत्वावच्छिन्नधूमाभावादीनामपि तुल्ययुक्त्या लक्षणघटकत्वाभावाद्व्यभिचारिण्यतिव्याप्तिरिति चेद् ?

न—अयोगोलकाभिन्नभेदादीनामयोगोलकभेदत्वेन प्रमेयसामान्याभावसमनियततया तदभिन्नत्वेऽपि तदीयतादात्म्यसम्बन्धावच्छिन्नप्रतियोगितया अयोगोलकान्यमात्रवृत्तितया स्वन्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नत्वात्; तादृशाभावा अपि लक्षणघटकाः; तेषां च ह्रदभेदान्यत्वादिना ह्रदभेदायोगोलकभेदान्यतराभावसमनियततया तादृशाभावरूपत्वेऽपि तादृशान्यतरवृत्तिप्रतियोगितया न्यूनवृत्तिह्रदभेदान्यत्वाद्यवच्छिन्नतया तथाविधप्रतियोगिता ह्ययोगोलकभेदाद्यवच्छिन्नैव; तदवच्छेदकावच्छिन्नेन समं च तादात्म्यसम्बन्धेन तेषां सामानाधिकरण्यविरहान्नातिव्याप्तिः,

न च तादृशाभावानां यथा तादात्म्यसम्बन्धः प्रतियोगिताऽवच्छेदकस्तथा विशेषणताविशेषोऽपि तेषां विशेषणताविशेषावच्छिन्नायोगोलकावृत्तित्वाविशिष्टाभावसमनियततया तत्स्वरूपत्वात्;

तेन च सम्बन्धेनायोगोलकभेदावच्छिन्नवाच्यत्वादिभिः समं सामानाधिकरण्यसत्त्वादतिव्याप्तिरस्त्वेवेति वाच्यम् ?

एवं रीत्या तादृशाभावस्य प्रतियोगिताऽवच्छेदकावच्छिन्नसामानाधिकरण्योपपादनेऽपि विशेष्यतया निखिलधूमवन्मात्र-

विशेष्यकज्ञानावच्छिन्नभेदस्य स्वीयतादृशप्रतियोगिताऽवच्छेदकी-भूततथाविधज्ञानावच्छिन्नेन समं प्रतियोगिताऽवच्छेदकसम्बन्धेन सामानाधिकरण्यस्योपपादयितुमशक्यत्वात् ;

तत्प्रातियोगिताऽवच्छेदकसम्बन्धेन तत्प्रतियोगिताऽवच्छेद-कावच्छिन्नसामानाधिकरण्यस्य विवक्षिततयाऽयोगोलकभिन्नभे-दस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताऽवच्छेदकीभूतायोगो-लकभेदावच्छिन्नेन समं तेन सम्बन्धेन सामानाधिकरण्यवि-रहाच्च, शेषं पूर्वोक्तदिशाऽवधेयमिति वदन्ति,

तन्न—व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे माना-भावेन तद्घटितलक्षणस्यासम्भवदुक्तिकत्वात् ,

न च घटत्वेन पटो नास्तीत्यादिप्रतीतिरेव तत्र मानमिति वाच्यम् ?

तस्याः पटादौ घटत्वाद्यभावविषयकत्वेन समानाधिकरण-धर्मावच्छिन्नप्रतियोगिताकाभावविषयकत्वेनैवोपपत्तेः, अन्यथा घटत्वेन भूतले घटो नास्तीत्यादिप्रतीत्या व्यधिकरणधर्माव-च्छिन्नानुयोगिताकाभावस्यापि स्वीकारापत्तेः, तस्या भूतलादौ घटत्वाद्यभावविषयकत्वेनैवोपपत्तौ च प्रकृतेऽप्युक्तरीत्योपपत्ति-स्समाना,

एतेन शशशृङ्गं नास्तीत्यादिप्रतीत्या शशीयत्वेन शृङ्गाद्य-भावरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावसिद्धिरावश्यकी ;

किं च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यानङ्गी-कार आकाशं न पश्यतीत्यादिवाक्यानां प्रामाण्यानुपपत्तिः, न हि

तत्राकाशविषयकदर्शनाभाववानित्याकारकः शाब्दबोधः सम्भवति; प्रतियोग्यप्रसिद्धेः, किन्त्वाकाशविषयकत्वावच्छिन्नदर्शनप्रतियोगिताकाभावादिविषयक आकाशविषयकत्वेन दर्शनाभाववानित्याद्याकारक एव, विषयत्वमलौकिकं, तत्प्रसिद्धिस्त्वलौकिकज्ञानादावेव, लौकिकालौकिकसमूहालम्बनं च नोपेयते; तेनाकाशविषयकत्वस्य व्यधिकरणधर्मत्वोपपत्तिः,

एवं च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावसिद्धौ तद्घटितलक्षणं नानुपपन्नमित्यपि परास्तम् ,

शशशृङ्गं नास्तीत्यादिप्रतीतेः शृङ्गादौ शशीयत्वाद्यभावविषयकत्वेनैवोपपत्तेः, किं चेत्थाद्यपि मन्दम्—आकाशं न पश्यतीत्यादावाकाशविषयकत्वाभाववद्दर्शनवानित्याद्याकारकशाब्दबोधसम्भवात् ,

न चैवमप्याकाशं न पश्यति घट इत्यादावगतिः ; घटादौ दर्शनासत्त्वादिति वाच्यम् ?

तत्रापि नञर्थस्य द्विधा भानोपगमेनाकाशविषयकत्वाभाववद्दर्शनाभाववान्घट इत्याद्यन्वयबोधसम्भवात् ,

न चैवमभावेऽन्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वं संसर्ग इति व्युत्पत्तिभङ्गः, भावान्वय आकाशविषयकत्वाभाववद्दर्शनत्वावच्छिन्नस्यानन्वयेन तादृशदर्शनत्वस्यान्वयिताऽवच्छेदकत्वासम्भवादिति वाच्यम् ?

तादृशव्युत्पत्तेरत्र सङ्कोचाङ्गीकाराद् , व्यधिकरणधर्मावच्छिन्नाभावमुपेत्योक्तरीत्याऽन्वयबोधाभ्युपगन्तृमतेऽपि दर्शनत्व-

स्यैवान्वयिताऽवच्छेदकतयाऽऽकाशविषयकत्वस्यातथात्वेन तादृशव्युत्पत्तिभङ्गापत्त्या तत्सङ्कोचस्यावश्यकत्वात् ।

नव्यास्तु—आकाशं न पश्यतीत्यादौ न तावदाकाशविषयकदर्शनाश्रयत्वाभाववानिति बोधः; आकाशनिरूपितालौकिकविषयताशाल्युपनीतभानसत्त्वेऽपि तथा प्रयोगात्,

नापि द्वितीयाया लौकिकविषयित्वार्थकत्वेनाकाशनिरूपितलौकिकविषयिताऽऽश्रयदर्शनाश्रयत्वाभाववानित्यन्वयबोध इति, आकाशस्यातीन्द्रियत्वेनाकाशनिरूपितलौकिकविषयताया अप्रसिद्धेः,

न च द्वितीयोपस्थापितलौकिकविषयितायां नञर्थः; तत्र च प्रतियोगित्वेनाकाशस्यान्वयो यथा "नामूढस्येतरोत्पत्तेरि"त्यत्र; पञ्चम्यर्थे नञर्थाभावस्य तत्र चोत्पत्तिरूपप्रकृत्यर्थस्य प्रतियोगितयाऽन्वयस्तथा च निरूपितत्वसम्बन्धेनाकाशाभाववल्लौकिकविषयिताऽऽश्रयतावद्दर्शनाश्रयतावानित्यन्वयबोध इति वाच्यम् ?

दृष्टान्ते पञ्चम्यर्थे निरूपितत्वसम्बन्धेनैवान्वयदर्शनेऽपि विशेषणताविशेषसम्बन्धावच्छिन्नाधारतया तस्याव्युत्पन्नत्वात्; किन्तु दृशिधातोर्लौकिकविषयिताऽवच्छिन्नचाक्षुषं चाक्षुषनिरूपितविलक्षणलौकिकविषयितावद्वाऽर्थः, द्वितीयायाश्च निरूपितत्वमर्थः, तस्य च नञर्थे प्रतियोगित्वेनान्वयः; तथा चाकाशनिरूपितत्वाभाववल्लौकिकविषयितावच्चाक्षुषस्य; तादृशनिरूपितत्वाभाववच्चाक्षुषनिरूपितविलक्षणलौकिकविषयित्ववतो वाऽऽश्रयत्ववानित्यन्वयबोधः,

न चैवमाकाशं न पश्यत्यन्ध इत्यादावन्वयानुपपत्तिः ; तादृशदर्शनाश्रयताया अन्धे बाधितत्वादिति वाच्यम् ?

नञर्थस्य द्वितीयाऽर्थनिरूपितत्वेनैवाकाङ्क्षावैचित्र्यात्तादृशाश्रयत्वेनापि सहान्वयबोधाभ्युपगमात्, तथा चाकाशनिरूपितत्वाभाववत्तादृशविषयितावद्दर्शनाश्रयत्वाभाववानन्ध इत्यन्वयबोधाकार इति,

ननु तादृशविषयितात्वसामानाधिकरण्येन तादृशविषयितात्वावच्छेदेन वा तादृशाभावान्वयः ? नाद्यः—तादृशविषयितात्वसामानाधिकरण्येन तादृशशाब्दबोधसत्त्वेऽप्याकाशं पश्यतीतिबोधापत्तेः; सामानाधिकरण्येन तद्वत्ताबुद्धिं प्रति सामानाधिकरण्येन बाधबुद्धेरप्रतिबन्धकत्वात्, नान्त्यः—आकाशविषयकलौकिकचाक्षुषवांश्चैत्र इति भ्राम्यतो मैत्र आकाशं न पश्यतीतिबोधानापत्तिः ; अवच्छेदकावच्छेदेनाभाववत्ताबुद्धौ सामानाधिकरण्येन प्रतियोगिमत्ताबुद्धेः प्रतिबन्धकत्वादिति चेत् ?

न—यदाऽऽकाशनिरूपितलौकिकविषयितावच्चाक्षुषाश्रयताया उपस्थितिस्तदा पीतः शङ्खो नास्तीतिवत्तादृशदर्शनाश्रयत्वाभाववानित्यन्वयबोधः, आकाशनिरूपितलौकिकविषयिताऽऽश्रयदर्शनाश्रयत्वत्वरूपप्रतियोगिताऽवच्छेदकावच्छिन्नाप्रसिद्धावपि तज्ज्ञानसत्त्वेन तदभावबोधस्य सूपपादत्वात्,

यदा तु न तादृशविशिष्टार्थोपस्थितिस्तदा लौकिकविषयितात्वावच्छेदेनाकाशनिरूपितत्वाभावमादायैवान्वयबोधाभ्युपगमात्,

यत्तु—दृशिधातोर्लक्षणया चैत्रादिवृत्तिलौकिकविषयितावचा-

क्षुषमेवार्थः; तथा चाकाशं न पश्यति चैत्र इत्यत्राकाशानिरूपितत्वाभाववच्चैत्रवृत्तिलौकिकचाक्षुषीयविषयितावद्दर्शनाश्रयतावांश्चैत्र इत्यन्वयबोधः,

एवं चाकाशं पश्यति मैत्र इति ज्ञानसत्त्वेऽपि चैत्रमादाय तादृशबोधो निराबाध एवेति, तत्राकाशं पश्यति मैत्र इति ज्ञानसत्त्व आकाशं न पश्यत्यन्ध इति बोधानुपपत्तेः; तत्रान्धस्य तादृशदर्शनाप्रसिद्ध्या पूर्ववल्लक्षणाया असम्भवादिति प्राहुः।

नन्वेवं चैत्रो घटं न पश्यतीत्यादावन्ध आकाशं न पश्यत्यादिवाक्यजन्यशाब्दबोधादविलक्षणबोधस्य सर्वानुभवसिद्धस्यानुपपत्तिः; न हि तत्रापीदृशशाब्दबोधः सम्भवति; तथा सति यदा चैत्रो घटादिकं न पश्यति किन्तु पटादिकमेव तदा घटाद्यविषयकदर्शनाभावस्य घटाद्यनिरूपितलौकिकविषयिताशालिदर्शनाश्रयत्वाभावस्य वा चैत्रे बाधितत्वाच्चैत्रो घटं न पश्यतीति प्रयोगानुपपत्तिः, यदा च भावमात्रं पश्यति तदा भावाविषयकदर्शनाभावस्य भावानिरूपितलौकिकविषयिताशालिदर्शनाश्रयत्वाभावस्य वा चैत्रादौ सत्त्वेन भावं न पश्यति चैत्र इत्यादिप्रयोगापत्तेश्चेति चेद् ?

मैवम्—उक्तस्थलेऽविलक्षणबोधस्यानुभवासिद्धत्वे मानाभावेन प्रथम एकवारं नञर्थभानेन द्वितीये च वारद्वयं नञर्थभानेन विलक्षणबोधाङ्गीकारेणादोषात्,

अत्र वदन्ति—चैत्रो घटं न पश्यति; आकाशं न पश्यति; घटआकाशं न पश्यत्यन्ध आकाशं न पश्यत्यभाव आकाशं न प-

श्यतीत्यादौ चाक्षुषादिनिष्ठसमवायाद्यवच्छिन्नाधेयतात्वाद्यवच्छेदे-
न घटादिविषयित्वावच्छिन्नत्वलौकिकविषयित्वावच्छिन्नत्ववर्त-
मानकालावच्छिन्नत्वचैत्रादिनिरूपितत्वानां यच्चतुष्टयावच्छिन्ना-
भावस्तन्निरूपकश्चैत्रादिरित्याकारको यथायोगमविलक्षण एव
बोध उत्पद्यते, घटादिचाक्षुषदशायां चैत्रो घटं न पश्यतीति प्रयो-
गोपपत्तये प्रथमावच्छिन्नत्वान्तस्य घटाद्युपनीतभानात्मकचा-
क्षुषदशायां तदुपपत्तये; द्वितीयावच्छिन्नत्वान्तस्य चैत्रादेरतीतचा-
क्षुषस्य घटादिविषयकत्वेऽपि समयविशेषे चैत्रो घटं न पश्यती-
तिप्रयोगात्तदुपपत्तये; तृतीयावच्छिन्नत्वान्तस्य मैत्रादेर्घटादिचा-
क्षुषदशायां चैत्रो घटं न पश्यतीत्यादिप्रयोगोपपत्तये च निरूपि-
तत्वान्तस्याभावप्रतियोगितावच्छेदककोटौ निवेशः, घटादिस्पा-
र्शनादिदशायां तदुपपत्तये चाक्षुषादिनिष्ठेत्याधेयताविशेषणं, घ-
टादिविषयकचाक्षुषादेः कालिकादिसम्बन्धेन घटादिवृत्तितया
घटादिनिरूपितकालिकसम्बन्धावच्छिन्नाधेयतायामुक्तचतुष्टयाव-
च्छिन्नाभावासत्त्वेन घटो घटं न पश्यतीत्यादिप्रयोगानुपपत्त्या सम-
वायाद्यवच्छिन्नेत्याधेयताविशेषणं, चैत्रादेर्घटादिचाक्षुषदशायाम-
पि मैत्रादिनिरूपिततादृशाधेयतायामुक्तचतुष्टयावच्छिन्नाभावसत्त्वेन
चैत्रो घटं न पश्यतीत्यादिप्रयोगवारणायाधेयतात्वाद्यवच्छेदेने-
त्युक्तम् , इतरांशे लौकिकघटाद्युपनीतभाननिष्ठं यद्घटादिविषय-
ताऽवच्छिन्नं चैत्रादिनिरूपितमाधेयत्वं तत्र लौकिकविषयिताऽव-
च्छिन्नमवच्छेद्यस्यावच्छेदकभेदेन भेदात् , घटादिनिरूपितलौकि-
कविषयित्वावच्छिन्नाधेयतातो घटादिनिरूपितालौकिकविषयिता-

ऽवच्छिन्नाधेयताभेदादतस्तत्रोक्तचतुष्टयावच्छिन्नाभावोऽक्षत एवेति तदानीं चैत्रो घटं न पश्यतीत्यादिप्रयोगोपपत्तिः, आकाशं पश्यतीति वाक्यजन्यबोधदशायां सामग्रीक्रमेण चाक्षुषादिनिष्ठाधेयतायां चतुष्टेनोक्तचतुष्टयस्य मानसबोधोत्पत्तिसम्भवेन तत एव तदानीमाकाशं न पश्यतीत्यादिवाक्यजन्यबोधप्रतिबन्ध इत्याकाशं न पश्यतीति वाक्यजन्यनिरुक्तवाक्यार्थबोधस्यासमानप्रकारकत्वादाकाशं पश्यतीत्यादिवाक्यजन्यबोधात्तस्याप्रतिबन्धेऽपि न क्षतिः, आकाशादिलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभाववानित्याकारकबोधस्य विशेषादर्शनदशायां तादृशवाक्येन जननात्तादृशवाक्यजन्यबोधवतां भ्रान्तानामाकाशं पश्यतीतिवाक्यान्न शाब्दबोधः,

यदा च लौकिकविषयतांऽश आकाशाद्यन्वयबोधविरोध्ययोग्यताज्ञानादिवशान्न तादृशाभावान्वयबोधस्तत्राकाशं पश्यतीतिवाक्यजन्यशाब्दबोधानुत्पादोऽपि तद्वशादेव, अत्र लक्षणया निरुक्तावच्छिन्नाधेयता धात्वर्थः; विषयित्वावच्छिन्नत्वं द्वितीयायास्तदेकदेशे च तत्प्रकृत्यर्थस्यान्वयः, लौकिकविषयिताऽवच्छिन्नत्वमपि तस्या एव; वर्त्तमानकालावच्छिन्नत्वं निरूपितत्वंचाख्यातार्थः, निरूपितत्वे च प्रथमान्तपदोपस्थाप्यचैत्रादेरन्वयः, तेषां चतुर्णां चतुष्टयावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन नञर्थेऽभावेऽन्वयः, तस्य च निरुक्तधात्वर्थताऽवच्छेदकावच्छिन्नविशेषणतया धात्वर्थे निरूपकतया च प्रथमान्तार्थे चैत्रादावन्वयः,

यद्वा तादृशवाक्याद् भ्रमात्मक एव शाब्दबोधो जायते, अप्रतारकाविशेषदर्शिनश्च मानसादिबोधनिर्वाहेण निरुक्तचतुष्टयावच्छिन्नाभावादितात्पर्येणैवाकाशं न पश्यतीति वाक्यं प्रयुञ्जते, शाब्दबोधविषयविशिष्टपदार्थाप्रसिद्धेः सर्वत्राप्रतारकविशेषदर्शिवाक्यप्रयोगेष्वपेक्षाया अभावात्तदपेक्षणे तेषां शशानुयोगिकविषाणाभावादितात्पर्येण शशविषाणं नास्तीत्यादेः शशाद्यनुयोगिकविषाणादिप्रकारकप्रमाविशेष्यत्वाभावतात्पर्येण च शशविषाणमप्रसिद्धमित्यादेर्वाक्यस्य प्रयोगानुपपत्तेः, न हि तादृशवाक्यैः तादृशप्रसिद्धार्थविषयकशाब्दबोधो जनयितुं शक्यते व्युत्पत्तिविरोधात्, यादृशशाब्दबोधो जन्यते स च विषाणाद्यंशे शशीयत्वादिभ्रमात्मक एवेति तद्विषयविशिष्टस्य न कथं चित्प्रसिद्धिरिति,

तस्माद्यथाऽप्रसिद्धार्थविषयकमानसादिबोधतात्पर्येण प्रयोगः; तथा घट आकाशं न पश्यतीत्यादिप्रयोगा अपीत्यलं शाब्दप्रमानिर्वाहार्थं व्युत्पत्तिभेदाद्यवलम्बनेनेत्यलमतिशयविस्तरेण ।

एतेन वृत्तिमदवृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः, वह्निमान्धूमादित्यादौ समानाधिकरणधर्मावच्छिन्नव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकनिर्वह्निवृत्तित्वाद्यभावमादाय केवलान्वयिनि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकजगदवृत्तित्वाभावमादाय लक्षणसमन्वयः, धूमवान्वह्नेरित्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकनिर्धूमवृत्तित्वाद्यभावमादाय नातिव्याप्तिः, साध्याभावसमुदायाधिकरणवृ-

त्तित्वाभावो ह्यत्र स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्व-त्वव्यापकप्रतियोगिताको बोध्यः, स्वव्यापकत्वोपादानादालोका-वृत्त्यभावमालोकावृत्तिवृत्तित्वाभावं चादाय वह्निमान्धूमादित्यादौ नातिप्रसङ्गः, प्रतियोगितायां साध्याभावसमुदायाधिकरणवृत्ति-त्वत्वव्यापकत्वोपादानात्केवलान्वयिसाध्यके घटादिवृत्तित्वा-भावमादाय नातिप्रसङ्गः,

साध्याभावश्चात्र साध्यताऽवच्छेदकसम्बन्धावच्छिन्नसाध्य-ताऽवच्छेदकसमनियतप्रतियोगिताको निविष्टस्तेन समवायेन व-ह्निसाध्यकधूमादौ संयोगेन वह्न्याद्यभावमादाय नातिप्रसङ्गः, न वा पृथिवी द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादित्यादौ जातिसामा-न्याभावमादायातिप्रसङ्गः, एवमभाववान्मेयत्वादित्यादौ घटत्वघ-टत्वाभावाभावाद्यात्मकसाध्याभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्ति-रूपोऽपि न दोषः।

यत्त्वस्मिल्लक्षणे रूपसमवायाभाववान्वायुत्वात्सत्तावान्द्रव्य-त्वादित्यादौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणा-प्रसिद्ध्या सत्ताऽभावघटितसाध्याभावसमुदायाधिकरणसामान्या-दिसमवेतत्वाप्रसिद्ध्या चाव्याप्तिरूपो दोषो दुर्वारः,

न च साधनसमानाधिकरणत्वेन साध्याभावा विशेषणीया-इति नायं दोष इति वाच्यम्!

तथाऽपि मूर्तत्वमूर्तत्वाद्योरन्यतरत्वेनाभावे साध्ये स्पर्शवद-न्यत्वादावतिव्याप्तिः, तादृशसाध्याभावस्तोमवति पृथिव्यादौ स्प-र्शवदन्यत्वस्यावृत्तेरिति दीधितिकृद्भिरुक्तम्,

तच्चिन्त्यम्—साधनसमानाधिकरणत्वेन साध्याभावे विशेषित आलोकावृत्त्यभावस्यालोकावृत्तिवृत्तित्वाभावस्य च साधनसमानाधिकरणसाध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकत्वविरहेणैव वारणसंभवे स्वव्यापकत्वदलस्य व्यर्थतयाऽनुपादेयत्वेन साधनसमानाधिकरणसाध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकवृत्तिमद्भूत्तयो यावन्तोऽभावास्तद्वत्त्वस्यैव लक्षणस्य वाच्यतया भूतवृत्तित्वत्वेन भूतवृत्तित्वाभावं मूर्तवृत्तित्वत्वेन मूर्तवृत्तित्वाभावं चादाय भूतत्वमूर्तत्वान्यतराभावसाध्यकस्पर्शवदन्यत्वादिहेतावतिव्याप्तिविरहात् ,

अथ तादृशाभावमादायैव भूतत्वमूर्तत्वोभयाभावसाध्यकस्पर्शवदन्यत्वादिसद्धेतावव्याप्तिवारणाय स्वव्यापकत्वदलस्यावश्यकतया भवत्येव प्रागुक्तातिव्याप्तिः, अत एव भूतत्वमूर्तत्वाद्योरुभयत्वेनाभावे साध्ये स्पर्शवदन्यत्वादिसद्धेतौ साध्याभावसमुदायाधिकरणवृत्तित्वे स्वव्यापकत्वविशेषणोपादानेनाव्याप्तिविरहेऽपि भूतत्वमूर्तत्वयोरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिरित्येतत्सूचनायैव दीधितिकृता भूतत्वमूर्तत्वाद्योरन्यतरत्वेनाभावे साध्य इत्युक्तम् , अन्यथा उभयोरुभयाभावत्वेनाभावे साध्ये स्पर्शवदन्यत्वादिहेतोः सद्धेतुतयाऽतिव्याप्त्युक्तेरेवोभयत्वेनाभावसाध्यताव्युदासलाभादन्यतरत्वेनेत्युक्तिवैयर्थ्यापत्तेरिति चेद् ?

न—गुणकर्मान्यत्वविशिष्टसत्ताऽभाववान् गुणत्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्त्वरूपसाध्याभावमादाय सद्वृत्तित्व-

स्वाद्यवच्छिन्नप्रतियोगिताकसद्वृत्तित्वत्वाद्यभावस्यापि तथात्वे-
नाऽव्याप्तिवारणाय साधनसमानाधिकरणसाध्यताऽवच्छेदकसम-
नियतप्रतियोगिताकाभाववत्त्वस्य साधनाधिकरणनिष्ठाधारतानि-
रूपकताऽवच्छेदकसाध्यताऽवच्छेदकसमनियतप्रतियोगिताका-
भाववत्त्वाश्रय इत्यर्थकत्वावश्यकत्वेन भूतत्वमूर्तत्वोभयाभावत्वाव-
च्छिन्ननिरूपिताधारतायां स्पर्शवदन्यत्वाधिकरणवृत्तित्वविरहेण
भूतत्वमूर्तत्वोभयाभावत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वे साधना-
धिकरणनिष्ठाधारतानिरूपकताऽवच्छेदकत्वविरहेण तदुभयाभावा-
भावस्य लक्षणघटकतया स्वव्यापकत्वानुपादानेऽप्युक्ताव्याप्तिविर-
हेण स्वव्यापकत्वोपादानवैयर्थ्येन प्रागुक्तातिव्याप्त्यसम्भवात्,

न च विशिष्टसत्ताभावाभावो द्रव्यत्वमेवेति न विशिष्टसत्ताऽ-
भावसाध्यकगुणत्वादावव्याप्तिरिति वाच्यम् ?

प्रतियोगित्वस्याभावविरहात्मस्वरूपतयाऽभावाभावस्य प्र-
तियोगिरूपत्वनियमेन विशिष्टसत्ताऽभावाभावस्य द्रव्यत्वरूपत्वा-
भावेन विशिष्टसत्त्वरूपताया आवश्यकत्वात्।

वस्तुतस्तु केवलान्वयिसाध्यके साध्याभावस्य व्यधिकरण-
धर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया तस्य चैक्य-
पक्षे यावत्स्वरूपसमुदायत्वाप्रसिद्ध्या यद्यदधिकरणवृत्त्यभावप्रति-
योगितात्वं साधनसमानाधिकरणाभावीयसाध्यताऽवच्छेदक-
समनियतप्रतियोगितात्वव्यापकं तत्तदधिकरणमेव साध्याभावस-
मुदायाधिकरणं विवक्षणीयम्,

एवं च तावदन्यतमाधिकरणवृत्तित्वत्वसमव्यापकप्रतियोगि-

ताकवृत्तिमद्वृत्तित्वावदभाववत्त्वस्य व्याप्तित्वपर्यवसानेन स्वव्यापकत्वोपादानेऽपि भूतत्वमूर्त्तत्वाद्योरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादिहेतौ भूतपञ्चकमनोऽन्यतमवृत्तित्वाद्यभावस्यापि यावदन्तर्गततया लक्षणघटकत्वेन तस्य स्पर्शवदन्यत्वादिहेतावभावान्नातिव्याप्तिसम्भावनाऽपीति,

यदपि महाकालान्यो घटादिरित्यादौ कालिकसम्बन्धेन हेतुतायां महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावो न हेतुताऽवच्छेदकसम्बन्धेन वृत्तिमद्वृत्तिः, किन्तु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव, तस्य च हेतौ सत्त्वादतिव्याप्तिरिति दूषणं दीधितिकृतोद्भावितं तदपि चिन्त्यमेव, सामानाधिकरण्यस्याव्याप्यवृत्तितया समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकमहाकालवृत्तित्वाभावस्यापि खण्डकालावच्छेदेन वृत्तिमद्वृत्तित्वात् ,

न च तस्य हेतावपि सत्त्वादतिव्याप्तितादवस्थ्यमेवेति वाच्यम् ?

हेतुताऽवच्छेदकसम्बन्धेन हेत्वधिकरणं यावत्तदवच्छेदेन हेतौ यावत्तादृशाभाववत्त्वस्य विवक्षितत्वादिति रत्नकोशकारमतानुसारेण यत्कैश्चिदुक्तं;यदप्यन्यैस्तन्मतानुसारेणैवोक्तं साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिः, सद्धेतौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वस्यैव हेतुनिष्ठतया तस्य प्रकृतानुमितिविरोधित्वाभावाल्लक्षणसमन्वयः,

असद्धेतौ च समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वस्यापि हेतुनिष्ठतया तस्य प्रकृतानुमितिविरोधित्वान्नातिव्याप्तिः,

अत्र प्रकृतानुमितिविरोधित्वं प्रकृतानुमितिजनकव्याप्तिज्ञानविरोधित्वं तेन व्यभिचारज्ञानस्य साक्षादनुमित्यविरोधित्वेऽपि नातिप्रसङ्गः,

एवं यन्निष्ठसाध्याभाववद्वृत्तित्वप्रमासामान्ये निरुक्तविरोधित्वाभावस्तत्त्वमिति विवक्षणीयं; तेन हेतुनिष्ठसाध्याभाववद्वृत्तित्वस्य स्वरूपसतो निरुक्तविरोधित्वाभावेऽपि नातिप्रसङ्गः, सद्धेतौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावावगाहिनो हेतुनिष्ठसाध्याभाववद्वृत्तित्वभ्रमस्य निरुक्तविरोधित्वादलक्ष्यवारणाय प्रमात्वनिवेशः,

अत्रानुमितौ प्रकृतत्वं प्रकृतसाध्यावच्छेदकावच्छिन्नसाध्यकत्वे सति प्रकृतहेतुताऽवच्छेदकावच्छिन्नहेतुकत्वं, सत्यन्तोपादानेन सत्तावान् जातेरित्यादौ जात्यादिनिष्ठगुणकर्मान्यत्वविशिष्टसत्ताऽभाववद्वृत्तित्वप्रमायां विशिष्टसत्तासाध्यकानुमितिविरोधित्वेऽपि नाव्याप्तिः, विशेष्योपादानेन द्रव्यं विशिष्टसत्त्वादित्यादौ विशिष्टसत्तानिष्ठद्रव्यत्वाभाववद्वृत्तित्वप्रमायां सत्तालिङ्गकानुमितिविरोधित्वेऽपि नाव्याप्तिः,

न च तदुपादानेऽपि कथं द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिवारणं विशिष्टस्यानतिरिक्तत्वादिति वाच्यम् ?

आधेयताया अव्याप्यवृत्तित्वे विशिष्टसत्तात्वावच्छिन्नलिङ्ग-

कानुमितौ विशिष्टसत्तात्वावच्छेदेन साध्याभाववद्वृत्तित्वज्ञानस्यैव जनकतया तत्प्रतिबन्धकस्य विशिष्टसत्तात्वावच्छेदेन साध्याभाववद्वृत्तित्वज्ञानस्य भ्रमत्वनियमात्, आधेयतया व्याप्यवृत्तित्व-नये तु विशिष्टसत्तात्वावच्छिन्नलिङ्गकानुमितौ विशिष्टसत्तात्वे साध्याभाववन्निरूपिताधारतानिरूपकताऽनवच्छेदकत्वज्ञानस्यैव जनकतया तत्प्रतिबन्धकस्य विशिष्टसत्तात्वे साध्याभाववन्निरूपिताधारतानिरूपकताऽवच्छेदकत्वज्ञानस्य भ्रमत्वनियमात्,

एवमनुमितौ साध्येऽव्याप्यवृत्तित्वज्ञानकालीनत्वं निरुक्त-प्रमायां वाऽव्याप्यवृत्तित्वज्ञानाकालीनत्वं विशेषणं देयम्,

अथ वा प्रकृतानुमितिजनकज्ञानमेव प्रतियोगिवैयधिकरण्य-गर्भव्याप्तिज्ञानरूपं बोध्यं नातोऽव्याप्यवृत्तिसाध्यकाव्याप्तिः,

यत्तु—अत्रानुमित्यविरोधित्वज्ञानस्यैवानुमितिहेतुतया तत्र ग्राह्याभावावगाहितयाऽनुमितिविरोधित्वज्ञानस्यैव प्रतिबन्धकतया साध्याभाववद्वृत्तित्वज्ञानस्यातथात्वेन व्यभिचारिण्यतिप्रसङ्ग इति दीधितिकृता दूषणमुक्तम्;

तच्चिन्त्यं—प्रकृतानुमितिपदस्य प्रकृतिसाध्याभाववद्वृत्तित्वप्रकारकानुमितिपरतयोक्तदूषणानवकाशात्,

एवं च विशिष्टसत्ताहेतौ विशिष्टसत्तात्वावच्छेदेन साध्याभाववद्वृत्तित्वप्रकारिका विशिष्टसत्तात्वे साध्याभाववन्निरूपिताधारतानिरूपकताऽनवच्छेदकत्वप्रकारिका वाऽनुमितिः प्रकृतानुमितिपदेनोपादेयाऽतस्तत्र नाव्याप्तिरिति ध्येयमिति; तदुभयमपि परास्तम्, उपदर्शितरीत्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिता-

काभावानङ्गीकारेण तद्घटितलक्षणकरणासम्भवात् ।

केचित्तु चरममते व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका-भावोपगमेऽप्यनिस्तारः, तथा हि—साध्याभाववद्वृत्तित्वत्वेन हेतु-निष्ठाधेयताभिन्नपदार्थवैशिष्ट्यावगाहिज्ञानस्यापि हेतौ साध्याभा-ववद्वृत्तित्वज्ञानप्रतिबन्धकताऽनुरोधेन प्रतियोगितासम्बन्धाव-च्छिन्नसाध्यताऽवच्छेदकावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छि-न्नप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताधेयत्वत्वावच्छिन्न-प्रकारतानिरूपितहेतुताऽवच्छेदकावच्छिन्नविशेष्यताकत्वेनैव प्र-तिबन्धकत्वं वाच्यं, तथा च यन्निष्ठवृत्तित्वसामान्ये प्रकृतहेतु-विशेष्यकप्रकृतसाध्याभाववद्वृत्तित्वप्रकारकानुमितिनिष्ठप्रतिब-ध्यतानिरूपितप्रमानिष्ठप्रतिबन्धकताया विषयतयाऽवच्छेदकत्वा-भाव इत्युक्तौ व्यभिचारिमात्रेऽतिप्रसङ्गापत्तिरिति प्रागुक्त-प्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्यताकत्वं प्रकृतानुमितिनि-ष्ठप्रतिबध्यतानिरूपितप्रमानिष्ठप्रतिबन्धकताऽनवच्छेदकं तद्धर्म-वत्त्वं व्याप्तिरिति निष्कर्षो वाच्यस्तथा च गुरोरनवच्छेदकत्वे गुरुधर्मावच्छिन्नसाध्यके व्यभिचारिण्यतिप्रसङ्गः; तत्र साध्यताऽ-वच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वावच्छिन्नप्रकारतानिरूपितहेतु-ताऽवच्छेदकावच्छिन्नविशेष्यताकत्वस्य प्रमानिष्ठप्रतिबन्धकताया-अनवच्छेदकत्वात् ,

अथ साध्यताऽवच्छेदकावच्छिन्नव्यापकताऽवच्छेदकरूपाव-च्छिन्नव्यापकताघटकसम्बन्धावच्छिन्नस्वसमानाधिकरणस्वाव-च्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रकारतानिरूपिताभावत्वाव-

च्छिन्नप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताधेयत्वत्वाच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्यताकत्वं प्रकृतहेतुविशेष्यकसाध्यताऽवच्छेदकावच्छिन्नव्यापकताऽवच्छेदकरूपावच्छिन्नव्यापकताघटकसम्बन्धावच्छिन्नसाध्यव्यापकताऽवच्छेदकरूपसमानाधिकरणत्वावच्छिन्नप्रतियोगिताकाभाववदवृत्तित्वप्रकारकानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रमानिष्ठप्रतिबन्धकताऽनवच्छेदकं तद्धर्मवत्त्वं व्याप्तिः, व्यधिकरणधर्मावच्छिन्नसाध्यव्यापकताऽवच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववदवृत्तिर्हेतुरित्याकारकानुमितिमादायासम्भववारणाय तादृशप्रतियोगिताकाभाववद्वृत्तिर्हेतुरित्याकारकज्ञानमादायातिप्रसङ्गवारणाय चान्त्याद्यप्रतियोगितायांसाध्यव्यापकताऽवच्छेदकरूपसमानाधिकरणत्वोपादानम्, अत एव साध्याभाववतीति न व्यर्थं न वा प्रकृतानुपयोगप्रसङ्गः, व्यधिकरणधर्मावच्छिन्नाभावासत्त्वे लक्षणे प्रतियोगितायां साध्यव्यापकताऽवच्छेदकरूपसमानाधिकरणत्वोपादानवैयर्थ्यापत्तेरिति चेद् ?

न–तथाऽपि केवलान्वयिसाध्यके सर्वत्र हेतौ साध्याभावांशे चारोपात्मकसाध्याभाववदवृत्तित्वप्रकारकानुमितौ मानाभावेन यत्र केवलान्वयिसाध्यके साध्याभावांशे भ्रमात्मकानुमितिरप्रसिद्धा तत्राव्याप्तेः, सर्वत्र सद्धेतौ साध्यव्यापकताऽवच्छेदकरूपावच्छिन्नसाध्यव्यापकताऽवच्छेदकरूपसमानाधिकरणप्रतियोगिताकाभाववद्वृत्तित्वारोपे मानाभावेन यत्र न तादृशारोपस्तत्राव्याप्त्यापत्तेश्चेति वदन्तीति दिक्,

अत एव यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया-

ये तत्तदधिकरणवृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः, साजात्यं च समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण बोध्यम्, वह्निमान् धूमादित्यादौ निर्वह्निवृत्तित्वत्वादिना निर्वह्निवृत्तित्वाद्यभावं घटत्वादिना जगद्वृत्तित्वाभावं केवलान्वयिनि च घटत्वादिना जगद्वृत्तित्वाभावमादाय लक्षणसमन्वयः, व्यभिचारिणि निर्धूमवृत्तित्वत्वादिना निर्धूमवृत्तित्वाद्यभावस्य यावदन्तर्गतस्य हेतावसत्त्वान्नातिव्याप्तिः,

न चैवमपि कपिसंयोग्येतद्वृक्षत्वादित्यादावव्याप्तिः, तत्र साध्याभावस्य केवलान्वयितया जगद्वृत्तित्वत्वेन जगद्वृत्तित्वाभावस्यापि यावदन्तर्गतत्वादिति वाच्यम्?

साध्याभावे प्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यसामानाधिकरणस्यापि निवेशेनोक्ताव्याप्तेरसम्भवात्,

तथा हि–स्वप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यनाधिकरणवृत्तित्वमिह तादृशप्रतियोग्यसामानाधिकरण्यं कपिसंयोगाभावस्य गुणादौ तादृशप्रतियोग्यसामानाधिकरण्यसत्त्वेन कपिसंयोग्येतद्वृक्षत्वादित्यादौ तस्य लक्षणघटकत्वेऽपि तदधिकरणपदेन तादृशप्रतियोग्यसामानाधिकरण्यनिरूपकाधिकरणस्य विवक्षणीयत्वेन गुणादेरेव च तथात्वेन तत्र च हेतोरवर्त्तमानतया नाव्याप्तिः,

न चैवमभावे तादृशविशेषणवैयर्थ्यं तदनुपादने कपिसंयोगाभाववान्मेयत्वादित्यादौ कपिसंयोगादेरपि लक्षणघटकयावदभावान्तर्गततयाऽऽपत्त्या तदीयतादृशप्रतियोग्यसामानाधिकरण्यनि-

रूपकाधिकरणाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात् ,

स्वप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यनधिकरणत्वं च स्वप्रतियोगिताऽवच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवत्त्वम् अतो वाच्यत्वत्वादिना घटाभावादीनां प्रतियोगिताऽवच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपि न लक्षणघटकत्वानुपपत्तिः, तदप्रसिद्धावपि वाच्यत्वत्वेन घटत्वान्नेतिप्रतीतिसाक्षिकवाच्यत्वत्वादिरूपव्यधिकरणधर्मावच्छिन्नघटादिवृत्तिप्रतियोगिताऽवच्छेदकताकभेदवद्वृत्तित्वेन तेषां निरुक्तप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वोपपत्तेः,

एतेन सर्वेषामेवाभावानां पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावत्वरूपप्रतियोगिताऽवच्छेदकावच्छिन्नतथाविधस्वाभावरूपप्रतियोग्यधिकरणतायाः केवलान्वयितया तदनधिकरणाप्रसिद्ध्या प्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्त्यभावाप्रसिद्धिरित्यपि निरस्तम् ,

वन्ह्याद्यभावानां तथाविधप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यनधिकरणप्रसिद्धावपि वह्नित्वाद्यवच्छिन्नवह्न्यादिवृत्तिप्रतियोगिताऽवच्छेदकताकभेदवद्ध्रदादिवृत्तित्वेनैव निरुक्तप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यसामानाधिकरण्यनिर्वाहात्, कपिसंयोगाभावादेरपि द्रव्यत्वत्वाद्यवच्छिन्नकपिसंयोगवृत्तिप्रतियोगिताऽवच्छेदकताकभेदवद्वृत्तित्वस्य द्रव्याद्यन्तर्भावसत्त्वात् स्वप्रतियोगिनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवद्वृत्तित्वरूपप्रतियोग्यसामानाधिकरण्यनिरूपकाधिकरणत्वं द्रव्यादेरपीति कपिसंयोग्ये-

तद्वृक्षत्वादित्यादावव्याप्तितादवस्थ्यम् अतः प्रतियोगिताऽवच्छेदकावच्छिन्नत्वमधिकरणविशेषणीभूतनिरुक्तप्रतियोग्यसामानाधिकरण्यानिरूपकत्वघटकभेदप्रतियोगिताऽवच्छेदकत्वाविशेषणम् ,

एवं च सत्यभावविशेषणीभूतनिरुक्तप्रतियोग्यसामानाधिकरण्यघटकभेदप्रतियोगिताऽवच्छेदकतायामपि तद्विशेषणमावश्यकम्, अन्यथा कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानामपि घटत्वादिना कपिसंयोगाभावाद्यवच्छिन्नप्रतियोगिताकभेदवद्वृत्तित्वेन लक्षणघटकयावदभावान्तर्गतताऽपत्त्या तस्य निरुक्तप्रतियोग्यसामानाधिकरण्यानिरूपकाधिकरणाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात् ,

एवमधिकरणविशेषणकोटिनिविष्टप्रतियोगिताऽवच्छेदके साध्यताऽवच्छेदकावच्छिन्नव्यापकताऽवच्छेदकत्वं विशेषणं देयम् अन्यथा कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाद्यभावनिष्ठद्रव्यत्वाद्यभावाभेदस्याभावाधिकरणकाभावप्रतियोगिकाभावत्वेनाधिकरणीभूतकपिसंयोगाद्यभावरूपतया द्रव्यत्वाभावत्वेऽपि कपिसंयोगाभावप्रतियोगिताऽवच्छेदकत्वम् ,

एवं च द्रव्यत्वाद्यभावत्वावच्छिन्नद्रव्यत्वाद्यभावनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवद्वृत्तित्वरूपनिरुक्तप्रतियोग्यसामानाधिकरण्यस्य द्रव्याद्यन्तर्भावेण सत्त्वादव्याप्तिप्रसङ्गात्, तद्विशेषणदाने च द्रव्यत्वाभावत्वादिरूपप्रतियोगिताऽवच्छेदकस्य तदभावान्नानुपपत्तिः,

एवं चाभावविशेषणकोटिनिविष्टप्रतियोगिताऽवच्छेदकमपि

तथात्वेन निवेशनीयम् अन्यथा कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगादेरपि स्वप्रतियोगिताऽवच्छेदकीभूतसमवेतसामान्याभावत्वाद्यवच्छिन्नसमवेतसामान्याभावादिमद्भिन्नवृत्तित्वेन लक्षणघटकयावदभावान्तर्गतताऽऽपत्त्या तस्य च साध्यव्यापकताऽवच्छेदकीभूतस्वप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यसामानाधिकरण्यानिरूपकाभावाधिकरणाप्रसिद्ध्याऽव्याप्त्यापत्तेः कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाद्यभावस्य स्वप्रतियोगिताऽवच्छेदककपिसंयोगत्वावच्छिन्नद्रव्यत्वादिनिष्ठप्रतियोगिताऽवच्छेदकताकभेदसामानाधिकरण्यस्य द्रव्याद्यन्तर्भावेणापि सत्त्वादव्याप्तिरतः स्वप्रतियोगिनिष्ठत्वमधिकरणविशेषणकोटिप्रविष्टप्रतियोगिताऽवच्छेदकताविशेषणम् ,

एवं चाभावविशेषणकोटिप्रविष्टप्रतियोगिताऽवच्छेदकतायामपि तन्निवेश्यम्, अन्यथा कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावस्य स्वप्रतियोगिताऽवच्छेदकीभूतकापिसंयोगाभावत्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगिताऽवच्छेदकताकभेदसामानाधिकरण्यसत्त्वेन लक्षणघटकयावदभावान्तर्गतताऽऽपत्त्या तदीयस्वप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोग्यसामानाधिकरण्यानिरूपकाधिकरणाप्रसिद्ध्याऽव्याप्त्यापत्तेः, अधिकरणविशेषणकोटौ स्वप्रतियोगिताऽवच्छेदकेत्यत्र यादृशप्रतियोगिताव्यक्त्युपादानं स्वप्रतियोगीत्यत्रापि प्रतियोगिपदं तादृशप्रतियोगिताऽऽश्रयपरम् अन्यथोक्तयुक्त्या द्रव्यत्वाद्यभावस्यापि कपिसंयोगाद्यभावप्रतियोगितया कपिसंयोगत्वादिना तद्वद्भेदवद्वृत्तित्वस्य द्रव्याद्यन्त-

र्भावेण कपिसंयोगाद्यभावे सत्त्वात् कपिसंयोग्येतद्वृक्षत्वादिसाध्यकस्थले-
दावव्याप्त्यापत्तेः, तस्य तथात्वे च कपिसंयोगत्वादिकं यादृश-
प्रतियोगिताव्यक्त्यवच्छेदकं द्रव्यत्वाद्यभावस्य तदनाश्रयतया क-
पिसंयोगत्वादिना तदवच्छेदस्य न निरुक्तप्रतियोग्यसामानाधिकर-
ण्यघटकतेति नानुपपत्तिः,

एवमभावविशेषणकोटावपि तादृशरीतिरनुसरणीया, अन्य-
था कपिसंयोगाद्यात्मकाभावस्य कपिसंयोगाभावत्वाद्यवच्छिन्न-
कपिसंयोगाभावादिप्रतियोगिकत्ववत्समवेतसामान्याभावत्वाद्य-
वच्छिन्नसमवेतसामान्याभावादिप्रतियोगिकत्वात् कपिसंयोगा
भावत्वादिना समवेतसामान्याभावादिप्रच्छेदसामानाधिकरण्येन
च तस्यापि लक्षणघटकतया यावदभावान्तर्गततायत्त्या तदीय-
निरुक्तैकप्रतियोगिताघटितप्रतियोग्यसामानाधिकरण्यनिरूपका-
धिकरणाप्रसिद्धेः कपिसंयोगाभावादिसाध्यकस्थलेऽव्याप्त्याप-
त्तेः, अधिकरणविशेषणकोटिनिविष्टभेदप्रतियोगिताऽवच्छेदक-
तायामुक्तस्वीयप्रतियोगिताऽवच्छेदकसम्बन्धावच्छिन्नत्वं निवे-
शनीयम्, अन्यथा कपिसंयोगाद्यभावे विषयिताऽऽदिसम्बन्धे-
न कपिसंयोगादिमतो भेदसामानाधिकरण्यस्य द्रव्यान्तर्भावेण
सत्त्वाद् उक्ताव्याप्तितादवस्थ्यात्,

एवमभावविशेषणकोटिनिविष्टभेदप्रतियोगिताऽवच्छेदकता-
यामपि तन्निवेशनीयम् अन्यथा कपिसंयोगाभावादिसाध्यकस्थले
कपिसंयोगाद्यात्मकाभावस्य विषयितासम्बन्धेन कपिसंयोगा-
भावादिमतो भेदसामानाधिकरण्यसत्त्वेन लक्षणघटकयावदभावा-

न्तर्गतताऽऽश्रयता तदीयस्वप्रतियोगिताऽवच्छेदकपम्बन्धावच्छि-
न्नप्रतियोगिताऽवच्छेदकताकभेदघटितप्रतियोग्यसामानाधिकर-
ण्यनिरूपकाधिकरणाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात्, पदव्यावृत्तिस्तु
स्वयमूह्येति मिश्राणां रत्नकोशकारमतानुसारेण व्यधिकरणधर्माव-
च्छिन्नाभावघटितलक्षणमप्यसमञ्जसमेव, उक्तरीत्या व्यधिकरण-
धर्मावच्छिन्नाभावनिरासेन तद्घटितलक्षणकरणासंभवादित्यलं-
पल्लवनेन ।

ननु परार्थानुमानस्थले न्यायप्रयोगान्तर्गतोदाहरणवाक्यस्य
व्याप्तिप्रदर्शकत्वेन व्यापकसामानाधिकरण्यरूपव्याप्तेरनुमितिका-
रताऽवच्छेदकत्वे यो यो धूमवान्स वन्हिमान् इत्याद्युदाहरणवा-
क्याचादृशव्याप्तिबोधोऽभ्युपेयः, स च न सम्भवति–व्यापकत्व-
स्यापदार्थत्वेन प्रकारतया नामार्थयोर्भेदेनान्वयस्य व्युत्पत्तिविरु-
द्धतया संसर्गतया चान्वयबोधे मानासम्भवादिति चेद् ?

अत्र नवीनतार्किकाः—यो यो धूमवान् स वन्हिमानित्युदा-
हरणवाक्यस्थ स्वघटकीभूतवन्ह्यादिपदस्य धूमव्यापकताविशि-
ष्टवन्ह्यादिलाक्षणिकत्वोपगमेन धूमव्यापकताविशिष्टवन्हिमत्प्र-
तियोगिकत्वविशिष्टाभेदसम्बन्धेन वन्हिमतः प्रकारत्वोपगमेन वा
वन्ह्यादौ धूमादिव्यापकताबोधजनकत्वम्; अत एव दीधितिका-
रोऽप्याह–वीप्सासमभिव्याहारादिवशादुद्देश्यधर्मवद्वृत्तेरत्यन्ता-
भावस्यान्योन्याभावस्य वा प्रतियोगित्वाभावो विधेयधर्मे तद्वति
वा भासत इति, अत्र वीप्सासमभिव्याहारादिवशादित्यस्य वीप्सित-
पदसमभिव्याहारादिवशादित्यर्थः, आदिना प्रमेयमभिधेयमित्या-

दावेवकारसमभिव्याहारपरिग्रहः, तत्राप्येवकारसमभिव्याहारान्नियमतो विधेयताऽवच्छेदकाभिधेयत्वांश उद्देश्यताऽवच्छेदकप्रमेयत्वव्यापकत्वबोधस्य सर्वानुभवसिद्धत्वाद् उद्देश्यधर्मवदवृत्तेरिति वीप्सितपदघटितवाक्यजन्यबोधोद्देश्यधर्मिनिष्ठतया तात्पर्यविषयो यो धर्मस्तद्वदवृत्तिरित्यर्थः, प्रतियोगित्वाभाव इति प्रतियोगिताऽवच्छेदकत्वाभाव इत्यर्थः, विधेयधर्म इति, विधेयकोटिप्रविष्टवन्हित्वादिधर्म इत्यर्थः, तद्वतीति, विधेयकोटिप्रविष्टवन्हित्वादिधर्मविशिष्ट इत्यर्थः, तेन धूमादिसमानाधिकरणात्यन्तान्योन्याभावाप्रतियोगित्वयोर्वन्हितद्वतोरसत्वेऽपि न क्षतिः, भासत इति प्रकारतया संसर्गतया वेत्यादिरिति ।

एवं ग्रामो ग्रामो रमणीय इत्यादेर्ग्रामत्वादिव्यापकताऽवच्छेदकताविशिष्टरमणीयत्वत्वविशिष्टरमणीयत्ववत्प्रतियोगिकाभेदसम्बन्धेनान्योन्याभावघटिततादृशव्यापकताविशिष्टाभेदसम्बन्धेन वा रमणीयादिप्रकारकबोधजनकत्वोपगमेन रमणीयादौ ग्रामत्वादिरूपोद्देश्यताऽवच्छेदकधर्मव्यापकताबोधजनकत्वं, ग्रामं ग्रामं ददातीत्यादेर्ग्रामत्वादिव्यापकताऽवच्छेदकत्वविशिष्टदानकर्मतात्वविशिष्टाधेयतासम्बन्धेन कर्मतांशे ग्रामादिप्रकारकबोधजनकत्वोपगमेन तदंशे ग्रामत्वादिरूपोद्देश्यताऽवच्छेदकधर्मव्यापकताबोधजनकत्वं, गृहे गृहे श्वेत्यादेर्गृहत्वादिनिरूपिता या निरूपकतासम्बन्धावच्छिन्ना व्यापकता तदवच्छेदकत्वविशिष्टं यदाधेयतात्वादिकं तद्विशिष्टनिरूपितत्वसम्बन्धेन गृहादिप्रकारकबोधजनकत्वोपगमाद् गृहत्वादिरूपोद्देश्यताऽवच्छेदकव्यापकत्वस्य त-

दंशे बोधकत्वं सम्पद्यत इति वदन्ति,

तन्न समञ्जसं यो यो वह्निमान्स धूमवानित्यादिवाक्यस्या-प्रामाण्यानुरोधेन वह्निव्यापकताविशिष्टधूमवत्प्रतियोगिकत्वविशिष्टाभेदसम्बन्धेन धूमवत्प्रकारकबोधजनकत्वोपगमस्यावश्यकतया नञ्पदघटिततादृशवाक्यस्याप्रामाण्यापत्तेः वह्निव्यापकताविशिष्ट-धूमाप्रसिद्ध्या तद्घटितनिरुक्तसम्बन्धेन तदभावस्य बोधकत्वा-सम्भवाद्, ग्रामो ग्रामो न रमणीयः; ग्रामं ग्रामं न ददाति, गृहे गृहे न स्थेत्यादीनामपि तादृशविशिष्टसम्बन्धाप्रसिद्ध्या तत्तत्स-म्बन्धेन तत्तदभावबोधकत्वासम्भवेनाप्रामाण्यापत्तेश्च ,

अत्र वदन्ति—यो यो धूमवान् स वह्निमानित्याद्युदाहरण-वाक्येन स्वव्यापकताऽवच्छेदकत्वसम्बन्धेन धूमादिविशिष्टो यो-धर्मो वह्नित्वादिस्तदवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन मतुवर्थ-घटकसम्बन्धे मतुप्प्रकृत्यर्थस्य वह्नित्वविशिष्टादेरन्वयबोधो जन्यते,

एवं च यो यो वह्निमान् स धूमवानित्युदाहरणवाक्यजनि-तबोधे स्वव्यापकताऽवच्छेदकत्वसम्बन्धेन वन्ह्यादिविशिष्टो यो-धर्मो वह्नित्वादिस्तदवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन मतुबर्थघ-टकसम्बन्धे मतुप्प्रकृत्यर्थस्य धूमत्वादिविशिष्टस्य भानेन तादृश-प्रतियोगिताकत्वे धूमत्वादिविशिष्टप्रतियोगिकत्वाभावेन तत्सम्ब-न्धत्वाभावात्तस्य व्यधिकरणसम्बन्धतया तादृशोदाहरणवाक्य-स्याप्रामाण्यं नञ्पदघटिततादृशवाक्यजन्यबोधे च मतुवर्थघटक-सम्बन्धे तादृशव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकधूमत्वा-दिविशिष्टाभावभानात्तादृशवाक्यस्य प्रामाण्यं चोपपद्यते,

अथ वह्निव्यापकताऽवच्छेदकद्रव्यत्वाद्यवच्छिन्नतत्तद्धूमादिनिष्ठप्रतियोगितातो धूमत्वाद्यवच्छिन्नतत्तद्धूमादिनिष्ठप्रतियोगिताया अभिन्नत्वेन स्वव्यापकताऽवच्छेदकत्वसम्बन्धेन वह्न्यादिविशिष्टद्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकत्वे धूमत्वादिविशिष्टप्रतियोगिकत्वस्यावश्यकतया तादृशसम्बन्धावच्छिन्नप्रतियोगिताकतादृशविशिष्टाभावस्य मतुबर्थसम्बन्धे बाधान्नञ्घटिततादृशवाक्यस्य प्रामाण्यं दुरुपपादमेवेति चेद् ?

न—वीप्सितयत्पदघटितवाक्यजन्यबोधे विधेयकोटिप्रविष्टतया भासते यत्स्वव्यापकताऽवच्छेदकत्वसम्बन्धेन तद्धर्मावच्छिन्नविशिष्टधर्मांशे सम्बन्धघटकीभूते तत्पदघटितवाक्यजन्यबोधे विधेयकोटिप्रविष्टतया भासते यत्तद्भिन्नत्वे सति तत्समानाधिकरणं यत्तदन्यत्वस्य विशेषणस्योपादेयतथा द्रव्यत्वादेः स्वव्यापकताऽवच्छेदकत्वसम्बन्धेन तादृशवह्नित्वाद्यवच्छिन्नविशिष्टत्वेऽपि तादृशधूमत्वादिभेदविशिष्टतत्तत्समानाधिकरण्याक्रान्ततथा तदन्यत्वरूपविशेषणानाक्रान्ततया तदाक्रान्तवह्नित्वादिधर्मावच्छिन्नप्रतियोगिताकत्वे धूमत्वादिविशिष्टप्रतियोगिकत्वाभावेन तादृशसम्बन्धावच्छिन्नप्रतियोगिताकतादृशविशिष्टाभावस्य मतुबर्थसम्बन्धे बाधाभावान्नञ्घटिततादृशवाक्ये प्रामाण्यस्य सूपपादत्वात्,

न चैवं यो योऽभिधेयत्ववान् स प्रमेयत्ववानित्याद्युदाहरणवाक्यस्य स्वघटकीभूततत्तत्पदघटितवाक्यजन्यबोधे विधेयकोटिप्रविष्टतया भासमानं यत् प्रकृतसाध्यताऽवच्छेदकं प्रमेयत्वाद्यवच्छिन्नं तद्भिन्नत्वाप्रसिद्ध्या तद्घटितसम्बन्धाप्रसिद्ध्या प्रामाण्यं दुरुप-

पादमिति वाच्यम् ?

तादृशविधेयताऽवच्छेदककोटिप्रविष्टतया भासमानं यादृश-साध्यताऽवच्छेदकपर्याप्त्यधिकरणं तादृशपर्याप्तिविषयतापर्याप्त्य-नधिकरणत्वपर्यवसितस्य तदभिन्नत्वस्य निवेशनीयत्वाद्, गृहे गृहे श्वेत्यादौ निरूपकतासम्बन्धावच्छिन्ना या स्वनिष्ठभेदप्रति-योगिताऽवच्छेदकता तदवच्छेदकताऽनवच्छेदकत्वसम्बन्धाव-च्छिन्नस्वनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवदाधेयतात्वादिस्व-निरूपितत्वोभयसम्बन्धेन तादृशाधेयतात्वादिसम्बन्धेनैव वा गृहादेः प्रकृत्यर्थस्य सप्तम्यर्थाधेयतायामन्वयबोधोपगमेन यावत्सु गृहेषु श्वसत्त्वे प्रामाण्यमुपपद्यते गृहनिष्ठनिरुक्तभेदप्रतियोगिताऽ-वच्छेदकतायाः श्वाधेयत्वे सत्त्वासम्भवेन तादृशसम्बन्धावच्छि-न्नस्वनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवत्त्वस्य तत्रावश्यकतया निरुक्तसम्बन्धेन गृहादेरबाधाद्, नञ्पदघटिततादृशवाक्ये च य-त्किंचिद्गृहादौ श्वाद्यसत्त्वे प्रामाण्यं निराबाधमेव; गृहादिनिष्ठ-तादृशभेदप्रतियोगिताऽवच्छेदकतायाः श्वाधेयत्वादौ सत्त्वेन ता-दृशसम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवदाधे-यतात्वादिसम्बन्धस्य व्यधिकरणतया तेन सम्बन्धेन गृहादेरभाव-स्याधेयतायामाविकलत्वात्,

एवं ग्रामं ग्रामं ददातीत्यादावपि यावत्सु ग्रामादिषु चैत्रीयदा-नकर्मताऽऽदिसत्त्वेन स्वनिष्ठभेदप्रतियोगितानिरूपिताश्रयतासम्ब-न्धावच्छिन्नावच्छेदकताऽवच्छेदतायाश्चैत्रीयदानकर्मतात्वे विरहेण तादृशसम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवच्चै-

त्रीयदानकर्मतात्वाधेयत्वोभयसम्बन्धेन ताहशकर्मतात्वसम्बन्धे-नैव वा कर्मतात्वसामानाधिकरण्येन ग्रामादेः कर्मतायामबाधात् प्रामाण्यं निराबाधमेव, यत्किञ्चिद्ग्रामादौ चैत्रीयदानकर्मताविरहे च नञ्पदघटितताहशवाक्यस्यापि प्रामाण्यं सुघटमेव, ताहशाव-च्छेदकतासम्बन्धेन ग्रामादेश्चैत्रीयदानकर्मतात्वे सत्त्वेन ताहश-सम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताऽवच्छेदकताकभेदवच्चैत्रीय-दानकर्मतात्वसम्बन्धस्य व्यधिकरणतया तद्घटितोभयसम्बन्धेन तेन सम्बन्धेन वा तदभावस्य कर्मतात्वावच्छेदेन सत्त्वाद्, ग्रामो-ग्रामो रमणीय इत्यादौ स्वनिष्ठभेदप्रतियोगिताऽवच्छेदकत्वसम्ब-न्धावच्छिन्नस्वनिष्ठप्रतियोगिताऽवच्छेदकताकभेदाधेयतोभयस-म्बन्धेन ताहशभेदसम्बन्धेनैव वा मुख्यविशेष्यवद्रमणीयत्वव-त्त्वाभेदोभयसम्बन्धेन ताहशरमणीयत्ववद्भेदसम्बन्धेन वा मु-ख्यविशेष्यतया भासमानस्यापि ग्रामादेः रमणीयादौ विशेषण-तयाऽन्वय उपपद्यते, धूमो धूमो वह्निव्याप्य इत्यादौ मुख्यविशे-ष्यतया भासमानस्य धूमादेरुत्पत्तिव्याप्त्यादिपदार्थाधिकरणा-द्यंशे विशेषणतयाऽन्वय इत्यभ्युपेयते व्युत्पत्तिवैचित्र्यात् तथा च नञ्पदसमभिव्याहृते तस्मिन् यत्किंचिद् ग्रामादौ रमणीयत्वा-सत्त्वे ताहशभेदवद्रमणीयत्ववत्त्वसम्बन्धस्य व्यधिकरणतया तद्घटितोभयसम्बन्धेन रमणीयादौ ग्रामादेरभावस्याबाधिततया प्रामाण्यमविकलमेव,

अथ ग्रामो ग्रामो रमणीय इत्यादौ ग्रामादिव्यापकताविशि-ष्टाभेदसम्बन्धेन ग्रामादौ रमणीयादेरन्वयस्य नञ्समभिव्याहृते

तस्मिन् तादृशविशिष्टाभेदसम्बन्धेन ग्रामादौ रमणीयादेरभावा-न्वयस्य चोपगमेनैवोपपत्तिः सम्भवति किमुक्तकुसृष्ट्यादरेणेति चेद् ?

न-ग्रामादिव्यापकत्वस्य ग्रामादिनिष्ठभेदप्रतियोगित्वस्या-प्रसिद्ध्या तद्विशिष्टाभेदसम्बन्धाप्रसिद्धिरिति तन्निष्ठभेदप्रतियो-गिताऽनवच्छेदकरमणीयत्वत्वरूपतद्व्यापकताविशेषिताभेदस्य स-म्बन्धतोपगमस्यावश्यकतया नञ्समभिव्याहारस्थले तादृशव्या-पकतायाः अप्रसिद्ध्या प्रामाण्यानुपपत्तिरित्युक्तप्रकारेणान्वयबो-धस्यावश्यकत्वात् ,

एतेन यावत्साधनाश्रयाश्रितसाध्यसम्बन्ध एव व्याप्तिस्त-स्या एतोदाहरणवाक्येन स्वरसतः प्रतिपादनान्न तु व्याप-कसामानाधिकरण्यं, व्यापकत्वस्योदाहरणवाक्येनाप्रतिपादनात् ,

तथा हि ग्रामो ग्रामो रमणीय इत्यादिवीप्सास्थल उद्देश्य-ताऽवच्छेदकग्रामत्वाश्रयसकलव्यक्तिषु रमणीयादिरूपविधेयस्य तादात्म्यसम्बन्धः प्रतीयते न तु व्याप्यव्यापकभावः तद्बोध-काभावाद्,

न चैको ग्रामादिशब्दो ग्रामाद्यर्थकोऽपरश्च व्यापकताऽ-र्थक इति सम्भवतीति वाच्यम् ?

नित्यवीप्सयोरित्यादिनैकस्यैव ग्रामादिपदस्थाने ग्रामो ग्राम-इत्यादिपदस्यादेशरूपस्य विधानेन पदद्वयस्यैवाभावाद् आदेश-पदस्यादेशिपदार्थातिरिक्ताबोधकत्वाद् , न हि जगामेत्यादौ द्वि-रुक्तधातुनाऽर्थद्वयं प्रत्याय्यते, अत एव नृभिर्नृभिरित्यादौ नका-

ररेफयोः समानपदस्थतया प्रसक्तं णत्वं क्षुभ्नादिगणान्तर्गतत्वमुपगम्य वारयन्ति शाब्दिकाः,

अस्तु वा व्यापकत्वं द्वितीयग्रामादिशब्दार्थः तथाऽपि तत्र निरूपितत्वादिसम्बन्धेन ग्रामादेरन्वयो न सम्भवति नानार्थयोर्भेदान्वयस्याव्युत्पन्नत्वाद्, यदि च ग्रामो ग्राम इत्यादौ व्यापकतानिरूपक एव द्वितीयग्रामपदार्थः; तस्य चाभेदसम्बन्धेन विशेषणतया ग्रामादावन्वयः; अत एव तत्र ग्रामादेर्विशेष्यतयाऽन्वयानुभवोऽप्युपपद्यत इत्युच्यते, तदा तादृशव्यापकतायां रमणीयादेराधेयतासम्बन्धेनान्वयो वाच्यः; तथा च तस्यैवोक्तव्युत्पत्तिविरोधादसम्भवात्, तस्माद्यात्रत्स्वार्थे विधेयप्रतिपादनेच्छैव वीप्साऽर्थो न तु विधेयार्थस्य व्यापकत्वप्रतीतीच्छा; अत एव क्रियागुणद्रव्यैर्युगपद् व्याप्तुमिच्छा वीप्सेति शाब्दिकानां वीप्साऽर्थवर्णनेऽयं ग्रामो रमणीय इत्यस्य नाना ग्रामे विधेयप्रतिपादनेच्छास्थलस्य व्यावर्त्तनाय यौगपद्योपादानमपि सङ्गच्छते, यदि च व्यापकत्वप्रतिपादनेच्छा व्याप्तुमिच्छेत्यर्थस्तदा तदुपादानव्यावृत्तिरसङ्गतैवेति,

न च सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति नियमादेकग्रामादिपदात्कथं सकलग्रामादिप्रतीतिः तादृशनियमासत्त्वे च न द्विर्वचनवैयर्थ्यं तदन्तरेणापि सकलप्रतीतिसम्भवादिति वाच्यम्?

तादृशनियमासत्त्वेऽपि युगपदनेकार्थप्रतीतीच्छया साकल्यबोधकपदासमभिव्याहृतद्विरुक्तपदस्य साधुत्वविरहाद् द्विरुक्तेरावश्यकत्वात्; तस्माद्यो यो धूमवानित्युदाहरणवाक्यस्य

यावत्सु धूमवदादिषु वह्निसम्बन्धप्रतिपादकत्वेन यावत्साधनाश्रयेत्यादिव्याप्तेरेवानुमितिकारणताऽवच्छेदकत्वं युक्तमिति केषांचिदुक्तिर्निरस्ता,

उपदर्शितरीत्योदाहरणवाक्यस्य व्यापकताबोधकत्वसम्भवाद्, उदाहरणवाक्यस्य व्यापकत्वाबोधकत्वे तस्य सर्वानुभवसिद्धव्यापकतासंशयनिरासकत्वानुपपत्तेश्चेत्यलमधिकेन, अधिकमग्रे वक्ष्यामः ।

ननु तथाऽपि व्यापकसामानाधिकरण्यं न व्याप्तिः यदा गोत्वं तदा गौरित्यत्रातिव्याप्तेः, ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वेन गोत्वाधिकरणे प्रलये गोध्वंसवत्त्वेन गवात्यन्ताभावासत्त्वात्,

अथोक्तलक्षणेऽव्याप्यवृत्तिसाध्यकेऽव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यं निवेशनीयं ; व्याप्यवृत्तिसाध्यके च तन्न निवेशनीयं साध्यभेदेन व्याप्तिभेदात् ,

एवं चेयमतिव्याप्तिः प्रतियोगिवैयधिकरण्यघटितलक्षणे तदघटितलक्षणे वा ?

नाद्यः प्रतियोगिवैयधिकरण्याघटितलक्षणे कालिकसम्बन्धेन हेतुसमानाधिकरणसाध्याभावमादायाव्याप्तिवारणाय हेत्वधिकरणवृत्तित्वे सम्बन्धविशेषनिवेशेऽपि तदघटितलक्षणे तस्य प्रतियोगिवैयधिकरण्याभावादेव वारणे तत्र सम्बन्धविशेषानिवेशेन ध्वंसप्रागभावयोरत्यन्ताभावस्याभावीयविशेषणतयैव विरोधेन हेत्वधिकरणे प्रलये कालिकसम्बन्धेन गवात्यन्ताभावसत्त्वे बाधकाभावाद् ,

नान्त्यः—तत्रेहेदानीं गोष्ठे गौर्न तु वाजिशालायामित्यादिप्रतीत्या गोत्वाधिकरणे सृष्टिकाल एव गवात्यन्ताभावसत्त्वेनातिव्याप्तेरसम्भवा दिति चेद् ?

न—प्रलये कालिकसम्बन्धेन गवात्यन्ताभावसत्त्वेऽपि प्राचां तस्य प्रतियोगितद्ध्वंसप्रागभावत्रितयप्रतियोगिकत्वेन तस्य ध्वंसलक्षणप्रतियोगिसामानाधिकरण्येन प्रतियोगिव्यधिकरणत्वाभावेन तद्घटितलक्षणेऽतिव्याप्त्यसम्भवात् ,

न च गवात्यान्ताभावस्य गोध्वंसात्यन्ताभावरूपत्वे गवाधिकरणे गोध्वंसो नास्तीत्यादिप्रत्ययो न स्यादिति वाच्यम् ?

तादृशप्रतीतेर्गोध्वंसप्रागभावविषयकत्वात् ,

एवं प्रतियोगिवैयधिकरण्याघटितलक्षणकरणेऽप्यतिव्याप्तिरसम्भवत्येव सृष्टिकाले गवात्यन्ताभावासत्त्वात् ,

न चेहेदानीमित्याद्युक्तप्रतीत्यनुरोधेन तत्सत्त्वमावश्यकमिति वाच्यम् ?

यथा प्राचां प्रलये गौर्नास्तीति प्रतीतेर्ध्वंसविषयकत्वोपगमेन प्रलये न तत्सत्त्वं ; तथेहेदानीमित्युक्तप्रतीतेरेतत्कालनिरूपितगोनिष्ठाधेयताऽवच्छेदकत्वं गोष्ठे तदभावश्च वाजिशालायामित्येवंरीत्योपपादनेन सृष्टिकाले तत्सत्त्वानावश्यकत्वात् ,

न चैवमग्रे वृक्षः कपिसंयोगी न तु मूल इति प्रतीतेरप्युक्तरीत्योपपादने कपिसंयोगाभावस्याप्यव्याप्यवृत्तित्वं न स्यादिति वाच्यम् ?

तत्र बाधकाभावेन प्रतीतेर्नान्यथोपपादनमत्र तु सृष्टिकाले न

गवात्यन्ताभावः सृष्टिकाले न गवात्यन्ताभाववानिति बाधकप्रतीतिसत्त्वेनान्यथोपपादनस्यावश्यकत्वात्,

नैवं–ध्वंसप्रागभावयोरत्यन्ताभावविरोधे मानाभावेन प्रलये प्रतियोगिव्यधिकरणगवात्यन्ताभावसत्त्वेनातिव्याप्तेरसम्भवात्,

एवं प्रतियोगिमतोऽपि कालस्य तदत्यन्ताभाववत्त्वे विरोधे मानाभावेन गवात्यन्ताभावाभावगवात्यन्ताभावत्वद्वयोरव्याप्यवृत्तित्वेनोक्तप्रतीतेर्बाधकत्वाभावेनेदानीमिति यथाश्रुतप्रतीत्यनुरोधेन सृष्टिकाले गवात्यन्ताभावसत्त्वेन प्रतियोगिवैयधिकरण्याघटितलक्षणेऽव्यतिव्याप्तेरभावात्,

युज्यते चैतद्–ध्वंसप्रागभावयोरत्यन्ताभावविरोधेऽन्तरा श्यामे घटे रक्तं रूपं नास्तीतिप्रत्ययानुपपत्तेः,

न चैष रक्तरूपध्वंसाद्यवगाही पूर्वापररूपध्वंसप्रागभाववति रक्तेऽपि तथा प्रत्ययप्रसङ्गात्,

अत्र वदन्ति–रक्तत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभावयोरव्याप्यवृत्ति, अन्तरा श्यामे रक्तध्वंसादेस्तदुपेयते सर्वरक्ते नोपेयत इति नोक्तानुपपत्तिरुक्तविरोधे बाधिका,

यत्तु–ध्वंसप्रागभावयो रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्य तदव्याप्यवृत्तित्वस्य च कल्पनापेक्षया रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्यैवान्तरा श्यामादौ सम्बन्धः कल्प्यते लाघवादिति;

तदसद्–विरोधमतेऽप्येकस्यैवात्यन्ताभावस्य त्रितयप्रतियोगिकत्वेनानेकात्रितयाभावाकल्पनप्रयुक्तलाघवसम्भवात्,

वस्तुतस्तु––तद्धर्मावच्छिन्नप्रतियोगिताकध्वंसप्रागभावतत्प-

तियोग्यत्यन्ताभावानां तद्धर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावेन सहाभेदः प्राचीनैरुपेयते; कथमन्यथा गन्धत्वावच्छिन्नप्रतियोगिताकगन्धाभावकारणत्वप्रतिपादकप्राचीनग्रन्थसङ्गतिः ? कथं वा तद्रूपध्वंसप्रागभाववति तद्रूपस्य द्वित्वाद्यवच्छिन्नात्यन्ताभावसत्त्वेऽपि न विरोधः ?

एवं च पूर्वरक्तध्वंसवत्युत्तररक्तप्रागभाववत्यन्तरा श्यामे रक्तं रूपं नास्तीतिप्रतीते रक्तत्वावच्छिन्नात्यन्ताभावस्य तद्रक्तत्वावच्छिन्नध्वंसाद्यविरोधोपपादकत्वोक्तिरसङ्गतैव; तथा विरोधस्य प्राचीनैरनङ्गीकारात्,

न च तद्घटादिकं प्रति तद्व्यक्तित्वेन तद्घटादेः प्रतिबन्धकत्वेन तदवच्छिन्नात्यन्ताभावस्य तत्प्रागभावाधिकरणे सिद्धिरिति वाच्यम् ?

तद्व्यक्तित्वेन प्रतिबन्धकत्वस्वीकारेऽपि तदवच्छिन्नप्रतियोगिताकस्य प्रागभावस्यैव तत्र सत्त्वेनाक्षतेः, तस्मादविरोधोपगमेन यदा गोत्वं तदा गौरित्यत्रोक्तरीत्याऽतिव्याप्तिवारणं न युक्तं; किन्तु सर्वेषामेवाभावानां पूर्वक्षणवृत्तित्वविशिष्टस्वाभावलक्षणप्रतियोगिसामानाधिकरण्येन भावसाध्यकेऽव्याप्तिवारणाय यादृशयादृशप्रतियोगिताऽवच्छेदकावच्छिन्नानधिकरणत्वं हेत्वधिकरणस्य तादृशप्रतियोगिताऽनवच्छेदकत्वं साध्यतावच्छेदक इति निष्कर्षस्यावश्यकतया गोत्वावच्छिन्नप्रतियोगिताऽवच्छेदकावच्छिन्नानधिकरणत्वस्य प्रलये सत्त्वेन तादृशप्रतियोगिताऽनवच्छेदकत्वस्य गोत्वेऽसत्त्वेनातिव्याप्तिवारणं युक्तम्,

न चैवमपि प्रतियोगिवैयधिकरण्याघटितलक्षण उक्तरीत्याऽतिव्याप्तिरस्त्येवेति वाच्यम् ?

व्याप्तिलक्षणातिव्याप्तिर्ह्यनुमितिकारणप्रमारूपव्याप्तिज्ञानसत्त्वेन प्रमाऽनुमित्यापत्तिस्सा च न सम्भवति; अव्याप्यवृत्तिसाध्यकानुमितौ प्रतियोग्यवैयधिकरण्यघटितव्याप्तिज्ञानस्यैव हेतुतया यदा गोत्वं तदा गौरित्यस्य चाव्याप्यवृत्तिसाध्यकतया तत्रत्यानुमितौ तत्तद्घटितव्याप्तिज्ञानस्यैव हेतुता वक्तव्या; तस्य च प्रमाऽऽत्मकस्य तत्रोक्तरीत्याऽसम्भवादिति दिक् ।

सेयं व्याप्तिः क्वचित्प्रत्यक्षेण निर्णीयते क्वचिच्चोपाध्यभावादिनाऽनुमीयते क्वचिच्चाप्तवाक्यादिना निर्णीयते; तत्र व्याप्तिग्रहं प्रति पूर्वोक्तरीत्या व्यभिचारज्ञानाभावः सहचारज्ञानं च हेतुः, व्यभिचारज्ञानाभावसंपत्तिश्च क्वचिद्व्यभिचारशङ्काकारणविरहात् क्वचित्तर्कात्, तथाविधतर्कश्च धूमो यदि वह्निव्यभिचारी स्यात्तु वह्निजन्यो न स्यादित्याकारकः, स च तदैव संभवति यदि धूमे वह्निजन्यत्वानिर्णयः; आपाद्यं प्रत्यापाद्यव्यतिरेकनिर्णयस्य हेतुत्वादिति तत्संपत्त्यर्थं धूमो यदि वन्ह्यसमवहिताजन्यत्वे सति वन्हिसमवहितजन्यो न स्यादिति तर्कावतारः, अत्र च जन्यत्वाभाव आपाद्यः; वन्ह्यसमवहिताजन्यत्वविशिष्टो यो वन्हिसमहितजन्यत्वाभावः स आपादकः, उक्ततर्कबलादापाद्याभावेनापादकाभावसिद्धिर्वन्हिजन्यत्वनिर्णयप्रतिबन्धकवन्हिजन्यत्वशङ्कानिवर्तिकेति स्वप्रतिबन्धकशङ्कानिवर्तकनिर्णयसंपादकत्वेन तर्कस्य वह्निजन्यत्वनिर्णयसम्पादकत्वं बोध्यम् ,

नन्वेतत्कथं जन्यत्वाभावरूपापाद्याभावेन धूमे वन्ह्यसमवहिताजन्यत्वविशिष्टवन्हिसमवहितजन्यत्वाभावरूपापादकाभावसिद्धावपि वन्हिसमवहितजन्यत्वसिद्ध्यभावाद् वन्ह्यसमवहिताजन्यत्वाभावरूपविशेषणाभावमादायापि तथाविधविशिष्टाभावविषयपर्यवसानसंभवादिति चेद् ?

एवं सति वन्ह्यसमवहिताजन्यत्वेन धूमरूपपक्षोऽपि विशेषणीयः; तथा च विशेषणवत्त्वेन निर्णीते पक्षे विशिष्टाभावसिद्धिर्विशेष्याभावमात्रपर्यवसायिनी, अनुमितावितरबाधबलेनापरविशेषभानसंभवादिति तथाविधापादकाभावसिद्ध्यैव वन्हिसमवहितजन्यत्वासिद्धेर्दुष्परिहरत्वात् ,

ननु भवतूपदर्शितरीत्या धूमे वन्हिसमवहितजन्यत्वनिर्णयः; स चोपदर्शितशङ्कायामप्रतिबन्धकत्वेन प्रकृतानुपयुक्तः; वन्ह्यजन्यस्यापि नान्तरीयकधूमरूपादेर्वन्हिसमवहिजन्यत्वसंभवेन वन्हिसमवहितजन्यत्वस्य वन्हिजन्यत्वाव्याप्यतया तद्दर्शनस्य विशेषदर्शनाविधया वन्हिजन्यत्वशङ्काप्रतिबन्धकत्वाभावादिति चेद् ?

एवं सत्युपदर्शितापादककोटिप्रविष्टवन्हिसमवहितजन्यत्वपदं वह्निजन्यत्वपरं तथा चोपदर्शितरीत्या वन्हिजन्यत्वाभावरूपापादकाभावसिद्धौ तथाविधशङ्काप्रतिबन्धकवन्हिजन्यत्वानिर्णयसंभवेनोपदर्शिततर्कस्य वन्हिजन्यत्वानिर्णयानुपयुक्तत्वाविरहात् ,

वस्तुतस्तु–वन्हिजन्यत्वाभाव एवापादकः विशिष्टाभावस्यापादकत्वे विशेष्याभावमात्रसिद्ध्यर्थं पक्षेऽपि सत्यन्तोपा-

द्धाने गौरवात्,

न चोपदर्शिततर्के वह्निजन्यत्वाभावमात्रस्यापादकत्वे घटपटादौ व्यभिचार इति वाच्यम् ?

वह्न्यसमवहिताजन्यत्वस्यापाद्यकोटिप्रतियोगिविशेषणत्वात्; तथा च धूमो यदि वह्निजन्यो न स्यात् वह्न्यसमवहिताजन्यत्व-विशिष्टजन्यत्वाभाववान् स्यादिति तर्कावतारो बोध्यः,

वह्न्यसमवहिताजन्यत्वं च स्वसमानाधिकरणवह्निमदन्य-स्वाव्यवहितपूर्वक्षणकं यद्यत्तदन्यत्वं, स्वपदं भेदकूटप्रतियोगिपरं-सर्वेषामेव क्षणानां यत्किञ्चिद्देशावच्छेदेन वह्निमत्तयाऽप्रसिद्धिवा-रणाय स्वसमानाधिकरणेति वह्निविशेषणम्,

अथैवमपि वह्निनान्तरीयकधूमरूपे व्यभिचारः; वह्निसमवहि-तधूमादिजन्यत्वेन तथाविधापाद्याभाववति तत्र वह्निजन्यत्वा-भावरूपापादकसत्त्वादिति चेत् ?

न—वह्नितत्समवधानेतरस्वीययावत्कारणवृत्तिवह्न्यसमवधा-नकालीनताकत्वाद्भावस्यापाद्यकोटिनिविष्टजन्यत्वाभावशब्दा-र्थत्वात् वह्निनान्तरीयकधूमरूपयावत्कारणान्तःपातिनो धूमा-देर्वह्निसमवधानकालीनतया तत्र तथाविधविशिष्टाभावरूपापाद्यस-त्त्वेन व्यभिचाराभावात्, अत्र धूमकारणीभूतयावदन्तःपातिनो-वह्नेस्तत्समवधानस्य च वह्निसमवधानकालीनतया धूम आपा-द्यकोटिप्रतियोग्यप्रसिद्धिरिति तद्वारणार्थम् आपाद्यकोटौ कार-णांशे वह्नितत्समवधानेतरत्वविशेषणं वह्नितत्संयोगेतरार्थकं, ना-न्तरीयकधूमरूपे वह्न्यसमवधानकालीनधूमरूपप्रागभावजन्यत्वमा-

दाय व्यभिचारवारणाय यावदिति,धूम इष्टाप त्तिवारणाय वृत्ती-त्यादि–वन्ह्यसमवधानकालीनेत्यन्तं, तत्त्वं च स्वसमाना-धिकरणवह्निमदन्यक्षणवृत्तित्वम् उक्तरीत्याऽप्रसिद्धिवारणाय स्व-समानाधिकरणेति वह्निविशेषणम्, अत एव वह्निव्यधिकरणघटा-दावपि न व्यभिचारः,

अथैवमप्याप्यप्रतियोग्यप्रसिद्धिः, तथाहि–वन्हितत्समव-धानेतरधूमयावत्कारणान्तःपातिधूमावयवतत्संयोगादीनां वन्ह्य-समवधानकालीनत्वाभावेन धूमे तदप्रसिद्ध्यसम्भवः;

न च यत्र धूमावयवतत्संयोगादिकाले वह्निसमवधानं नासी-त्तत्रैव धूमे तदीयतथाविधयावत्कारणस्य वह्न्यसमवधानकाली-नतया प्रतियोगिप्रसिद्धिरक्षतैवेति वाच्यम् ?

धूमत्वावच्छिन्नं प्रति वह्नित्वेन हेतुतया धूमोत्पत्तिपूर्वं वह्नि-समवधानस्यावश्यकतया तादृशस्थलस्यैवासिद्धेः,

न च धूमनिष्ठवैजात्यविशेषस्यैव वह्निजन्यताऽवच्छेदकतया तदनाक्रान्तधूमस्योपदर्शितरीत्या वह्निं विनाऽपि सम्भवेन नोप-दर्शितस्थलाप्रसिद्धिरिति वाच्यम् ?

एवमपि तादृशधूमस्य घटादिसमशीलत्वेन तत्र वन्ह्यसमव-हिताजन्यत्वाभावेन तद्विशेषणविशिष्टप्रतियोगिप्रसिद्धेरसम्भवा-दिति चेद् ?

अत्र के चिद् यत्र धूमावयवानुत्पादयित्वा वह्निर्नष्टः ; तद-नन्तरं धूमावयवद्वय संयोगः; तदनन्तरं वन्ह्यन्तरोत्पत्तिः; तदनन्तरं तत्संयोगोत्पत्तिः; तदनन्तरं वह्निजन्यधूमोत्पत्तिस्तत्र तथाविधधूमे

तदीयवह्नितत्समवधानेतरयावत्कारणस्य वन्ह्यसमवधानकालीन-तयोपदर्शितविशिष्टप्रतियोगिप्रसिद्धिः सुलभैव,

न चैवं सत्यपि वन्हिसमवधानकालीनधूमावयवतत्संयो-जन्यधूम इष्टापत्तिर्दुर्वारैवेति वाच्यम् ?

पक्षताऽवच्छेदकसामानाधिकरण्येनापाद्यसिद्धेरुद्देश्यतयांऽ-शत इष्टापत्तेरदोषत्वात्, पक्षताऽवच्छेदकसामानाधिकरण्येन तद्वत्ता-बुद्धिं प्रति तत्सामानाधिकरण्येन तदभाववत्ताज्ञानस्याप्रतिबन्ध-कत्वेन तत्सामानाधिकरण्येनापाद्यज्ञानरूपेष्टापत्तिसंभवेऽपि तत्सा-मानाधिकरण्येनापाद्यव्यतिरेकज्ञानसंभवेनापाद्यव्यतिरेकानिर्णय-विघटकत्वरूपदूषकताबीजस्य तत्राभावात् तथाविधधूमव्यक्तिवि-शेषस्यैव वा पक्षत्वादित्याहुः।

अपरे तु—वन्हितत्समवधानेत्यत्र तत्समवधानपदं धूमसमव-धानपरं; धूमसमवधानं च धूमोपधायकीभूतः संयोगः, एवं च वन्हिवन्हिसंयोगधूमसंयोगेतरस्वीययावत्कारणवृत्तिवन्ह्य-नधिकरणक्षणवृत्तित्वरूपवन्ह्यसमवधानकालीनत्वकत्वाभास्यापा-द्यनिष्कर्षाद्, वन्हिजन्यधूमद्व्यणुकादौ तथाविधापाद्यप्रतियोगि-प्रासिद्धिः, वन्हिवन्हिसंयोगधूमसंयोगेतरतदीययावत्कारणस्य तदारम्भकपरमाणोर्वह्न्यनधिकरणक्षणवृत्तित्वात् पक्षताऽवच्छेद-कसामानाधिरण्येनापाद्यसिद्धेरुद्देश्यतयांऽशत इष्टापत्तेरदोषत्व-स्यावेदितत्वान्न यादृशधूमावयवो वह्निनियतः तादृशधूमेंऽ-शत इष्टापत्तेर्दोषत्वसम्भवः, अत्र च वन्ह्यनाधिकरणक्षण-वृत्तियादृशधूमावयवानन्तरोत्पन्नापूर्ववह्निसंयोगकालीनो धूमाव-

यवसंयोगः तादृशधूमस्यैव पक्षत्वादिति, अत्र वह्निपदं तत्तद्वह्निपरं, तेनानादौ संसारे सर्वदा क्व चिद्वह्निसत्त्वेऽपि नोपदर्शितधूमावयवादिकारणस्य वह्न्यनधिकरणक्षणवृत्तित्वक्षतिः,

एवं च सत्यन्तेऽपि वह्निपदन्तत्तद्वह्निपरं तेन न घटादौ व्यभिचार इत्याहुः ।

ननु कथमेतादृशतर्कावतारः तत्प्रतिबन्धकीभूतधूमोऽवह्नेरेव भविष्यतीत्यादिशङ्कात्रयसत्त्वात् , तत्र धूमोऽवह्नेरेव भविष्यतीत्यादिशङ्का धूमत्वावच्छेदेन वह्न्यसमवहितजन्यत्वशङ्कास्वरूपा तस्याश्च वह्न्यसमवहिताजन्यत्वरूपापाद्यप्रतियोगिविशेषणसन्देहरूपतथा तथाविधविशिष्टप्रतियोगिसन्देहजनकत्वात् तेन च प्रतियोगितासम्बन्धेन तद्विशिष्टस्याभावरूपापाद्यस्य सन्देहः; विशिष्टसन्देहं प्रति विशेषणसन्देहस्य हेतुत्वात् ,

एवं च तथाविधापाद्यसंशयजनकसामग्रीसत्त्वेनापाद्यव्यतिरेकनिर्णयरूपापत्तिकारणासम्भवः, निर्णयं प्रति संशयसामग्र्याः प्रतिबन्धकत्वात् तथा चानया रीत्या तर्ककारणीभूतापाद्यव्यतिरेकनिर्णयविघटकत्वेनोपदर्शितायाः शङ्कायाः तर्करूपफलानुत्पत्तिनैयत्यरूपं प्रतिबन्धकत्वं बोध्यम् ,

एवं धूमः क्व चिदवह्नेरेव भविष्यतीतिशङ्का धूमत्वसामानाधिकरण्येन वह्न्यसमवहितजन्यत्वशङ्कास्वरूपा, इयमप्युपदर्शितप्रणाल्या तर्ककारणीभूतापाद्यव्यतिरेकनिर्णयविघटकत्वेन तर्करूपफलानुत्पत्तिनैयत्यरूपप्रतिबन्धकत्ववती ,

न च धर्मिताऽवच्छेदकसामानाधिकरण्येन निर्णयं प्रति धर्मि-

ताऽवच्छेदकसामानाधिकरण्येन संशयसामग्र्या अप्रतिबन्धकतया कथं धूमत्वसामानाधिकरण्येन तथाविधसंशयसामग्र्यास्तत्सामानाधिकरण्येनापाद्याभावनिर्णयानिवर्तकत्वम् ? इष्टापत्तिदोषभिया तर्के धूमत्वसामानाधिकरण्येनैव पक्षतायाः उक्तत्वादिति वाच्यम् ?

तद्धर्मसामानाधिकरण्येनैतद्व्यक्तिविशेष्यकतन्निर्णयं प्रति तद्धर्मसामानाधिकरण्येनैतद्व्यक्तिविशेष्यकतत्संशयसामाग्र्या अपि प्रतिबन्धकत्वमनुभवबलादास्थीयते; तथा च तथाविधसंशयकालेऽप्यापाद्यव्यतिरेकनिर्णयानुत्पादस्याक्षततयोपदर्शितप्रनाड्या तस्या अपि तर्कप्रतिबन्धकत्वाद्, अहेतुक एवोत्पत्स्यत इति शङ्कायास्त्वापादकांशेऽनाहार्यसन्देहसम्पादकतया व्यभिचारसन्देहसम्पादकत्वेन तर्कमूलीभूतव्याप्तिज्ञानविघटकतया मूलशैथिल्यसम्पादकत्वेनोपदर्शिततर्कप्रतिबन्धकत्वं, तथाहि—अहेतुकत्वस्य वह्निजन्यत्वाभावव्याप्यतयाः अहेतुकत्वसन्देहस्य तद्व्याप्यसन्देहरूपतया वह्निजन्यत्वाभावरूपव्यापकसन्देहसम्पादकता व्याप्यसन्देहस्य व्यापकसन्देहहेतुत्वात् , एवं चापाद्याभाववत्त्वेन ज्ञानस्यापाद्यव्यभिचारसंशयरूपतया मूलीभूतव्याप्तिज्ञानप्रतिबन्धकत्वं व्यभिचारज्ञानस्य व्याप्तिनिर्णयप्रतिबन्धकत्वेन शास्त्रेऽतिप्रसिद्धत्वात् , तथा चोपदर्शितरीत्याऽहेतुकत्वसन्देहस्य तर्कमूलीभूतव्याप्तिज्ञानप्रतिबन्धकतया तर्करूपफलानुत्पत्तिनैयत्यस्वरूपप्रतिबन्धकत्वमावश्यकमेवेति ,

न चाहेतुकत्वसंदेहस्यापादकसंदेहजनकत्ववदापाद्यसंदेहस्यापि जनकत्वे तथाविधापाद्यस्याप्यहेतुकत्वव्यापकत्वात् , तथा

चापादक आपाद्यव्यभिचारसंदेहस्यापाद्याभावांशे संशयात्मकतया व्याप्तिग्रहाप्रतिबन्धकत्वं साध्याभावांशे निर्णयात्मकव्यभिचारज्ञानस्यैव तत्प्रतिबन्धकत्वादिति वाच्यम् ?

तावताऽप्यहेतुकत्वसंदेहस्यापाद्यसंदेहजनकसामग्रीत्वेन तर्ककारणीभूतापाद्यव्यतिरेकानिर्णयविघटकया तर्करूपफलानुत्पत्तिनैयत्याकप्रतिबन्धकत्वसत्त्वाद्, अत एव दीधितौ तृतीया पुनरापादकाद्यप्रसिद्धिपर्यवसायिनीत्यत्रापाद्यार्थकप्रादिपदोपादानमिति चेद् ? नैवं-तद्धूमत्वावच्छिन्ने वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानस्यैव तथाविधशङ्कात्रयप्रतिबन्धकतयोपदर्शिततर्काविरात्पूर्वं तादृशशङ्काया अनुदयेनानुपपत्तिविरहात्, तादृशान्वयव्यतिरेकानुविधायित्वज्ञानस्य च प्रथमशङ्कानिवर्तकत्वं बाधनिर्णयविधया वह्निसत्त्व उत्पद्यमानत्वे सति वह्निं विनाऽनुत्पद्यमानत्वरूपस्य तथाविधान्वयव्यतिरेकानुविधायित्वस्य स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकं यद्यत्तद्भिन्नत्वरूपवह्न्यसमवहिताजन्यत्वघटितत्वाद् वह्निं विनाऽनुत्पद्यमानत्वस्य निरुक्तवह्न्यसमवहिताजन्यत्वरूपत्वाद्, द्वितीयतृतीयशङ्काप्रशङ्काप्रतिबन्धकत्वं च तादृशान्वयव्यतिरेकानुविधायित्वज्ञानस्य वह्न्यसमवहिताजन्यत्वसहेतुकत्वयोरवच्छेदकधर्मदर्शनाविधया तदुभयोः तदवच्छेदेन सत्त्वात्,

न च बाधनिश्चयविधयैव तस्य द्वितीयशङ्काप्रतिबन्धकत्वे संभवति किमर्थं तत्रापि तावद्दूरपर्यन्तानुधावनेनेति वाच्यम् ?

धर्मिताऽवच्छेदकसामानाधिकरण्येन विशिष्टबुद्धिं प्रति धर्मिताऽवच्छेदकसामानाधिकरण्येन बाधबुद्धेरप्रतिबन्धकतया धूमत्व-

सामानाधिकरण्येनान्वयव्यतिरेकानुविधायित्वज्ञानस्य धूमत्वसामानाधिकरण्येन वन्ह्यसमवहिताजन्यत्वसंशयस्य प्रतिबन्धकत्वासंभवेन तथाऽनुधावनस्यावश्यकत्वात् ,

न च सामानाधिकरण्येनावच्छेदकधर्मदर्शनस्यापि सामानाधिकरण्येन विशिष्टबुद्धिविरोधित्वासम्भवेन नोपदर्शितप्रकारः समीचीनः, सर्वत्र धूमे वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानविरहेण यत्र तज्ज्ञानं तत्र वन्ह्यसमवहितजन्यत्वसंशयासम्भवेऽपि धूमान्तरे तत्संशये बाधकाभावादिति वाच्यम् ?

बाधबुद्धिस्थले तथानियमसत्त्वेऽपि व्यावर्त्तकधर्मदर्शनस्थले तथा नियमे मानाभावेन समानधर्मिताऽवच्छेदकव्यावर्त्तकधर्मदर्शनस्यैव प्रतिबन्धकतया धूमत्वरूपेण यत्किञ्चिद्धूमे वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानसत्त्वे धूमान्तरेऽपि तेन रूपेण वन्ह्यसमवहितजन्यत्वसंशयसम्भवात् ,

वस्तुतस्तु—गृहीतवन्ह्यन्वयव्यतिरेकधूमव्यक्तिविशेषस्यैव तर्के पक्षतयोपदर्शितानुपपत्त्यभावः; धूमान्तरे तत्संशयेऽपि क्षतिविरहात् ,

न च तद्धूमत्वरूपेण तर्के पक्षत्वे तदवच्छेदेन वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य धूमत्वावच्छेदेन वन्ह्यसमवहितजन्यत्वसंशयनिवर्त्तकत्वं न सम्भवति भिन्नधर्मिताऽवच्छेदकत्वात् ; तथा च कथं प्रथमशङ्कां प्रति तस्य बाधनिर्णयविधया प्रतिबन्धकत्वोत्कीर्त्तनमिति वाच्यम् ?

तत्र धूमत्वरूपेण तद्धूमस्य पक्षत्वोपगमेन क्षतेरभावात् ,

यदि च धर्मिताऽवच्छेदकसामानाधिकरण्यन तद्विशेष्यक-बाधबुद्धेर्धर्मिताऽवच्छेदकसामानाधिकरण्येन तद्विशेष्यकबुद्धिं प्रत्यपि विरोधित्वं तदा द्वितीयशङ्कां प्रत्यप्युपदर्शितान्वयव्यतिरेकानुविधायित्वज्ञानस्य बाधनिर्णयविधया प्रतिबन्धकत्वमवसेयम् ,

तृतीयशङ्कां प्रति तु तस्यावच्छेदकधर्मदर्शनविधयैव प्रतिबन्धकत्वमित्यवधेयम् ,

ननूपदर्शिततर्के धूमत्वसामानाधिकरण्येन पक्षत्वे तथाविधतर्काद् धूमत्वसामानाधिकरण्येनैव वह्निजन्यत्वासिद्धौ कथं तदनन्तरं धूमत्वावच्छेदेन वह्निव्यभिचारित्वापादकेनवह्निजन्यत्वाभावापाद्यकतर्कावतारः ? तत्र धूमत्वावच्छेदेन वह्निजन्यत्वाभावरूपापाद्यव्यतिरेकनिर्णयस्यैवापेक्षितत्वात् ,

न च धूमत्वसामानाधिकरण्येनैव वह्निव्यभिचारित्वापादकतर्कावतारोऽस्त्विवति वाच्यम् ?

तथाविधतर्कस्य धूमत्वसामानाधिकरण्येन व्यभिचारशङ्कानिवर्तकत्वासम्भवेन तत्र धूमत्वसामानाधिकरण्येन व्यभिचारशङ्काया अक्षततया तदुत्तरं धूमत्वावच्छेदेन वह्निनिरूपितव्याप्तिग्रहस्य दुर्लभत्वापत्तेरिति चेद् ?

अत्र केचित्-तथाविधतर्कस्यावच्छेदकावच्छेदेन वन्हिव्यभिचारित्वशङ्कानिवर्तकतया धूमत्वसामानाधिकरण्येनैव तादृशव्याप्तिग्रहोपयोगित्वमभ्युपेयते, न त्ववच्छेदकावच्छेदेन तथाविधव्याप्तिग्रहोपयोगित्वमप्यतो नानुपपत्तिरित्याहुः,

तदसत्—एवं सति सामानाधिकरण्येन व्यभिचारस्य हेत्वाभासताऽनुपपत्तेस्तादृशव्यभिचारज्ञानकाले सर्वत्र धूमत्वसामानाधिकरण्येन व्याप्तिग्रहसंभवेनानुमितितत्कारणान्यतरप्रतिबन्धकीभूतज्ञानविषयत्वस्य हेत्वाभासलक्षणस्य तत्रासंभवात् , तथा च धूमत्वावच्छेदेनैव तथाविधव्याप्तिज्ञानमनुमितिहेतुः, तस्य च तादृशतर्कावतारानन्तरमसंभवेन तथाविधतर्कस्यानुमितिजनकीभूतव्याप्तिज्ञानानुपयोगित्वेन नैरर्थक्यापत्तिः सुदृढैवेति ,

दीधितिकृदनुयायिनस्तु—उपदर्शितान्वयव्यतिरेकानुविधायित्वरूपप्रतिबन्धकादुपदर्शितवन्हिजन्यत्वाभावापादकतर्कप्रतिबन्धकशङ्कात्रयनिवृत्तौ तथाविधतर्कावतरात् तत्तद्धूमं प्रति तत्तद्वन्हेः कारणत्वग्रहप्रतिबन्धकीभूततथाविधकारणत्वशङ्कानिवृत्तौ जायमानो धूमविशेषं प्रति वन्हिविशेषस्य कारणताग्रहो धूमत्वावच्छेदेनापि वह्निजन्यत्वं विषयीकरोति धूमत्वावच्छेदेन वह्निव्यभिचारनिश्चयाभावस्य धूमत्वावच्छिन्ने वह्निजन्यत्वे लाघवमिति; लाघवज्ञानस्य च सत्वे तथाविधविशेषकार्यकारणभावग्राहकस्य तथाविधसामान्यकार्यकारणभावग्रहहेतुत्वात् ; तथा च शिरोमणिः तथाऽपि विशेषाणां कार्यकारणभावग्रहः तर्केण तद्विरोधिशङ्कायामपनीतायां जायमानः सामान्यव्यभिचारानिश्चयोऽनुगतागुरुविशेषरूपान्तरानुपस्थितिलाघवप्रतिसन्धानादिवशात् सामान्यत एव तं परिच्छिनत्तीति,

न च तथाऽपि धूमत्वावच्छेदेन व्यभिचारसंशयरूपप्रतिबन्धकसत्वात् कथं तदा तदवच्छेदेन वन्हिजन्यत्वग्रह इति वाच्यम् ?

फलबलेनोपदर्शितविशेषकार्यकारणभावग्राहकसामग्रीविशिष्टलाघवज्ञानशून्याया एव व्यभिचारशङ्कायास्तत्र प्रतिबन्धकत्वात्, प्रकृते च तादृशविशिष्टाभावसत्त्वेनानुपपत्त्यभावाद्; अत एव शिरोमणिः "फलबलेन च लाघवज्ञानादिशून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्प्यत" इति,

एवं चोपदर्शितरीत्या धूमत्वावच्छेदेन वह्निजन्यत्वग्रहे तदुत्तरं वह्निव्यभिचारित्वापादकोपदर्शितापत्तिसम्भवेन तत्र धूमत्वावच्छेदेन वन्हिव्यभिचारित्वशङ्कानिवृत्तौ तदवच्छेदेन व्याप्तिग्रहस्याक्षततया तादृशव्याप्तिग्रहोपयोगित्वेन नोपदर्शिततर्कस्य नैष्फल्याशङ्केति वदन्ति,

नन्पदर्शिततर्कस्य किं फलं? न तावद्वह्निजन्यत्वाभावशङ्काप्रतिबन्धः; तस्य तादृशशङ्काप्रतिबन्धकत्वे मानाभावात् तादृशतर्कात्पूर्वम् आपादकनिष्ठापाद्यनिरूपितव्याप्तिज्ञानरूपकारणविधया वह्निजन्यत्वाभावो वन्ह्यसमवहिताजन्यत्वविशिष्टनिरुक्तजन्यत्वाभावव्याप्य इति ज्ञानस्यावश्यकतया तत्कारणीभूतापाद्यव्यतिरेकनिर्णयविधया वन्ह्यसमवहिताजन्यत्वविशिष्टानिरुक्तजन्यत्वज्ञानस्याप्यावश्यकतया च तदानीं तदभावव्याप्यवत्ताज्ञानरूपप्रातिबन्धकविधया वान्हिजन्यत्वव्याप्यवत्ताज्ञानरूपवन्हिजन्यत्वाभावशङ्काप्रतिबन्धकस्य दुष्परिहरतया तेनैव वह्निजन्यत्वाभावशङ्कानिवारणसम्भवाच्च तथाविधोभयकारणसम्पत्तिकाले कथमुपदर्शिततदभावव्याप्यवत्ताज्ञानरूपप्रतिबन्धकसत्त्वमिति तु नाशङ्कनीयम्,

उपदर्शितव्याप्तिज्ञानकाले तथाविधव्याप्तिघटकत्वेनोपदर्शितापाद्ये वह्निजन्यत्वाभावव्यापकताज्ञानस्यावश्यकतयोपदर्शितापाद्यप्रतियोगिनि तथाविधविशिष्टजन्यत्वेऽपि वह्निजन्यत्वाभावव्यापकीभूताभावप्रतियोगित्वज्ञानमावश्यकं; तदेव च वह्निजन्यत्वस्य व्यतिरेकव्याप्तिज्ञानस्वरूपम् ; आपाद्यव्यतिरेकप्रकारकनिर्णयश्च हेतुज्ञानात्मक इति तदानीं वह्निजन्यत्वाभावशङ्काप्रतिबन्धकीभूतवह्निजन्यत्वव्यतिरेकव्याप्तिज्ञानविशिष्टहेतुमत्ताज्ञानरूपप्रतिबन्धकसत्त्वस्यावश्यकत्वात् तद्वत्ताबुद्धिं प्रति तदभावव्याप्तिज्ञानविशिष्टहेतुमत्ताज्ञानत्वेनैव प्रतिबन्धकत्वाभ्युपगमेन तादृशज्ञानस्यापि तत्र प्रतिबन्धकत्वात् , तेन रूपेण प्रतिबन्धकत्वे मानाभाव इति तु नाशङ्कनीयम् , ज्ञानद्वयसाधारण्यानुरोधेन तादृशप्रणाड्या आवश्यकत्वादिति चेद् ?

मैवं-शङ्का हि द्विविधा—आहार्यरूपाऽनाहार्यरूपा च, तत्रानाहार्यतथाविधशङ्कया तर्कमूलीभूतव्याप्तिज्ञानान्निवारणेऽप्याहार्यवह्निजन्यत्वाभावशङ्कानिवर्तकत्वेनैव तर्कस्य सार्थकत्वम् ,

न च तर्कस्याहार्यज्ञानरूपतया कुत्राप्यप्रतिबन्धकत्वेन कथं तस्य तथात्वमिति वाच्यम् ?

यतो न वयं तर्कस्य तथाविधसंशयप्रतिबन्धकत्वमिति ब्रूमः; अपि त्वापादकज्ञानोत्तरमनिष्टप्रसञ्जन आपादकज्ञाने मानसानिष्टसाधनताज्ञानादिच्छाविच्छेदेनाहार्यापादकशङ्काऽनुत्पादात्परंपरयाऽऽपत्तौ तथाविधशङ्कानिवर्तकत्वमिति; तथा चोपदर्शितप्रणाड्याऽऽहार्यापादकशङ्कानिवृत्तिरेव तर्कस्य फलमिति सारम् ,

केचित्तु धूमत्वावच्छेदेन वह्निजन्यत्वादिनिर्णयं प्रत्युपदर्शितकर्तात्मकवह्निजन्यत्वाभावापादककापत्तिरूपज्ञानाद्यभावविशिष्टाया धूमत्वावच्छेदेन वह्निजन्यत्वाभावशङ्कायाः प्रतिबन्धकत्वं; तथा च तथाविधोत्तेजकसम्पत्त्यर्थमेव तर्कावतार इत्याहुः,

नव्यास्तु तर्कः स्वातन्त्र्येणापादकविशिष्टबुद्धिप्रतिबन्धक इति तर्कस्य तत्प्रतिबन्धः फलं, प्रतिबन्ध्यप्रतिबन्धकभावश्च तद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्नापादकतर्कत्वेन दोषविशेषाजन्यानाहार्यतद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्नाविशिष्टबुद्धित्वेन बोध्यः,

अथ तर्कं प्रत्यापाद्यव्यतिरेकनिर्णयस्यापाद्यव्याप्यापादकवत्ताज्ञानस्य च हेतुतया तस्यैवोक्तरीत्याऽऽपादकसंशयनिवर्तकत्वं सम्भवतीति किं तर्कस्य स्वातन्त्र्येणापादकवत्ताज्ञानप्रतिबन्धकत्वकल्पनेनेति चेत् ?

न—तर्कजनकापाद्यव्यतिरेकनिर्णयनाशेऽपि तर्कसत्त्वे विपरीतशङ्काऽनुत्पत्तेरानुभविकत्वात् तर्कस्यापि स्वातन्त्र्येण तच्छङ्काविरोधित्वकल्पनेस्यावश्यकत्वादिति प्राहुः,

तर्कत्वं च मानसत्वव्याप्यो जातिविशेष आहार्यमानसज्ञानवृत्तिः, तदवच्छिन्नं प्रति चापाद्यापादकयोर्व्याप्तिज्ञानं तद्विशिष्टापादके पक्षधर्मताज्ञानम् आपाद्यव्यतिरेकज्ञानं च हेतुः,

न चापाद्यव्यतिरेकनिर्णयस्य तत्र हेतुत्वे मानाभाव इति वाच्यम् ?

पक्षविशेष्यकापाद्यशङ्कारूपेष्टापत्तिशङ्कानिवर्तकत्वेन तस्य

तत्र हेतुत्वाभ्युपगमस्यावश्यकत्वात् ,

अथ केन रूपेण तर्कापाद्यव्यतिरेकनिर्णययोः कार्यकारणभावः ? न तावदुपदर्शितजन्यत्वाभावापाद्यकापत्तिं प्रत्युपदर्शितजन्यत्वप्रकारकनिर्णयत्वेन हेतुत्वं; प्रमेयत्वेन तथाविधज्ञानादपि तादृशतर्कापत्तेः, नापि तथाविधजन्यतात्वावच्छिन्नप्रकारताशालिनिर्णयत्वेन तथाविधजन्यत्वाभावत्वप्रकारकज्ञानादपि तादृशतर्कोत्पत्त्या व्यभिचारादिति चेद् ?

न—अव्यवहितोत्तरत्वसम्बन्धेन तादृशजन्यतात्वावच्छिन्नप्रकारताशालिनिर्णयादिविशिष्टतादृशजन्यत्वाभावापाद्यकापत्तिं प्रति तादृशजन्यतात्वावच्छिन्नप्रकारताशालिनिर्णयत्वादिना हेतुत्वकल्पनेन दोषाभावात् ,

एवं तादृशजन्यत्वाभावापाद्यकापत्तिं प्रति तथाविधजन्यत्वाभावव्याप्यवह्निजन्यत्वाभाववान् धूम इत्याकारकज्ञानत्वेन हेतुत्वम् , अत्र व्यभिचारवारणं त्वनुमितिपरामर्शकार्यकारणभावरीत्या बोध्यम् ,

अत्र च जनकताऽवच्छेदककोटावापादकांशे निर्णयत्वं न निवेशनीयं तथा सत्युपदर्शिततर्कस्य दर्शितप्रयोजनानुपपत्तेः,

केचित्तु तर्क आपाद्यत्वाख्यविषयताविशेषोऽवश्यमभ्युपेयः; अनुमितौ विधेयत्वाख्यातिरिक्तविशेष इव, एवं च विषयताविशेषशालिज्ञानत्वमेव तर्कत्वं न तु जातिः मानाभावाद्, आपादयामीतिप्रतीतेस्तादृशविषयताविशेषावगाहित्वेनैवोपपत्तेः ,

न च लाघवात्तादृशजातेरेव तादृशप्रतीतिनियामकत्वमुचि-

तमिति वाच्यम् ?

पक्षाद्युपरागेणापादयामीति प्रतीतिवारणाय विषयता-विशेषस्वीकारस्यावश्यकत्वात्,

न चैवं पक्षोपरागेणानुमिनोमीतिप्रतीतिवारणाय साध्य-विषयताया विलक्षणाया आवश्यकत्वेऽनुमितित्वजातिर्व्युच्छि-द्येतेति वाच्यम् ?

विधेयतारूपसाध्यविषयतायाः शाब्दादिसाधारण्येनानुमिति-त्वजातेरावश्यकत्वादित्याहुः,

वस्तुतस्तु तर्कानुमित्योर्न विषयताभेदः; एकविषयतयैवोप-पत्तेः, तर्कत्वानुमितित्वजातिभ्यामेव विलक्षणप्रतीतिनिर्वाहाद्, अन्यथा शाब्दानुमित्योरपि विषयताभेदापत्त्याऽनुमितित्वादिजा-त्युच्छेदप्रसङ्गादिति तर्कत्वजातिः प्रामाणिकयेवेति सारम्, अधिकमग्रे वक्ष्यामः,

अथ किमुपाधित्वम्? यदवच्छिन्नाभावो व्याप्त्यनुमापकः; न तावत्साध्यव्यापकत्वे सति साधनाऽव्यापकत्वं; काकः श्यामो-मित्रातनयत्वादित्यत्र साधनावच्छिन्नसाध्यव्यापके शाकपाक-जत्वादौ; वायुः प्रत्यक्षो मूर्तत्वादित्यत्र पक्षधर्मावच्छिन्नसाध्य-व्यापक उद्भूतरूपादौ चाऽव्याप्तेः, तयोः काकादिसाधारणश्या-मत्वात्मादिसाधारणप्रत्यक्षत्वयोरव्यापकत्वाद् एवं पक्षेतरत्वे ज्ञा-नातिव्याप्तेश्च,

यत्तु ययोर्व्यतिरेकव्याप्तिस्तयोरेव व्याप्यवृत्तिव्यतिरेकिणो-रन्वयव्याप्तिरिति नियमः; एवं च प्रकृते पक्षरूपविशेषणवैय-

र्थेन व्यतिरेकव्याप्त्यभावादन्वयेऽपि न व्याप्तिरिति साध्या-
व्यापकत्वान्नायमुपाधिरिति ?

तन्न—तथा सति तुल्ययुक्त्या वन्हिरनुष्णः कृतकत्वादित्यादौ वन्हीतरत्वस्याप्युपाधित्वानुपपत्तेः,

न चेष्टापत्तिरिति वाच्यम् ?

हेतुमति बाधितपक्षे पक्षेतरत्वस्योपाधित्वनियमात् ,

न च गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान् पृथिवी-त्वादित्यादावसङ्कीर्णबाधस्थले व्यभिचारान्नोक्तनियम इति वाच्यम् ?

तन्नियमघटकबाधे निरवच्छिन्नविशेषणतासम्बन्धेन सा-ध्याभाववत्त्वस्य निवेशात् ,

दीधितिकृतस्तु—असङ्कीर्णबाधस्थले प्रतियोगिव्यधिकरण-साध्याभाववत्त्वरूपबाधाभावात्तदनभ्युपगमाद्वा नोक्तनियमे व्यभिचार इति वदन्ति ,

यत्तु—अत्र तदनभ्युगमाद्वेत्यस्यासङ्कीर्णबाधानभ्युपगमाद्वेत्ये-वार्थः, उपाध्यायमते सर्वत्र पक्षताऽवच्छेदकसामानाधिकरण्येनै-वानुमित्युपगमात् ,

एवं च तदनभ्युपगमकल्पेऽपि प्रतियोगिव्यधिकरणसाध्या-भाववत्त्वस्य बाधत्वस्वीकार आवश्यकः; अन्यथा कपिसंयोगी एतत्वादित्यत्र तादृशनियमे व्यभिचारप्रसङ्गादिति तदनभ्युपग-माद्वेतिकल्पे पूर्वकल्पापेक्षया विशेषाभावात् कल्पभेदोऽनुपपन्न इति दूषणोद्भावनं; तन्न चारु; तदनभ्युपगमाद्वेत्यस्य साध्याभाव-

वत्त्वरूपबाधस्य निवेशानभ्युपगमादित्यर्थः, तथा च प्रकृतनियमे साध्याभाववत्त्वरूपबाधस्य न निवेशः किन्तु सध्यवद्भिन्नत्व-रूपबाधस्यैव निवेशः, अन्योन्याभावस्याऽव्याप्यवृत्तित्वानङ्गीकाराच्च न दोष इत्याशयेन कल्पभेदोपपत्तेरिति चेद् ?

अत्र मणिकृतः-पर्यवसितसाध्यव्यापकत्वे सति साधना-व्यापकत्वमित्युपाधिलक्षणं यद्धर्मवत्त्वि साध्यं प्रसिद्धं तद्धर्माव-च्छिन्नसाध्यमेव पर्यवसितसाध्यं धूमवान्वन्हेरित्यादौ च तादृशो-धर्मो द्रव्यत्वादिकमेव; तदवच्छिन्नसाध्यव्यापकत्वादार्द्रेन्धनादौ लक्षणसमन्वयः, काकः श्यामो मित्रातनयत्वाद्वायुः प्रत्यक्षो मू-र्त्तत्वादित्यत्र, तादृशो धर्मः साधनं मित्रातनयत्वं पक्षधर्मो वहि-र्द्रव्यत्वं च तदवच्छिन्नसाध्यव्यापकत्वात् शाकपाकजत्वोद्-भूतरूपयोर्लक्षणसमन्वयः,

अथैवं वह्निमान् धूमादित्यादौ तादृशधर्ममहानसत्वाद्यव-च्छिन्नसाध्यव्यापके व्यञ्जनवत्त्वादावतिव्याप्तिरिति चेद् ?

न—यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधना-व्यापकत्वस्य विवक्षणेनादोषादिति वदन्ति,

दीधितिकृतस्तु -साध्यव्याभिचारिसाधनवन्निष्ठप्रतियोगिताऽ-वच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगिताऽ-वच्छेदको यः साध्यसमानाधिकरणवृत्तिधर्मस्तद्वत्त्वमुपाधिलक्षणम् ; अत्र सद्धेतौ व्यञ्जनवत्त्वादावतिप्रसङ्गवारणाय साध्यव्यभिचा-रित्वं साधनविशेषणम् , असद्धेतौ वह्निसंयोगादौ तद्वारणाय व्यधिकरणान्तमत्यन्ताभावविशेषणं, घटो द्रव्यत्वादित्यादौ

घटवृत्तित्वविशिष्टसंयोगादेः संग्रहाय प्रतियोगिताऽवच्छेदकावे-च्छिन्नेति धूमादिसाध्यकासद्धेतौ ह्रदत्वादिवारणाय साध्य-समानाधिकरणेत्यादीत्याहुः,

तच्चिन्त्यं-तथा सति परार्थानुमानस्थल उपाधित्वघटकसा-ध्यव्यभिचारित्वोद्भावनेनैव कृतकृत्यतायामुपाध्युद्भावनवैयर्थ्या-पत्तेर्गौरवाच्च,

वस्तुतस्तु-स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छि न्नसाध्यव्यापकत्वमेवोपाधिलक्षणम् ,

स्वपदं लक्ष्यपरम् , यत्त्वतत्त्वानिवेशेन साधनाव्यापकत्वा-निवेशेन च लाघवात् ,

धूमवान् वन्हेरित्यादौ महानसायोगोलकान्यतरत्वादिरूप-तादृशधर्मावच्छिन्नसाध्यव्यापकत्वादार्द्रेन्धनादौ लक्षणसमन्वयः, सद्धेतौ च व्यञ्जनवत्वादौ तादृशधर्मद्रव्यत्वाद्यवच्छिन्नसाध्यव्या-पकत्वाभावान्नातिप्रसङ्गः,

न चात्र स्वत्वाननुगमेन लक्षणाननुगम इति वाच्यम् ?

स्वावच्छिन्नसाध्यव्यापकत्वस्वाधिकरणसाधनाधिकरणनि-ष्ठाभावप्रतियोग्यधिकरणतानिरूपकत्वोभयसम्बन्धेन किञ्चिद्ध-र्मविशिष्टत्वमुपाधित्वं; स्वपदं धर्मपरमिति निष्कर्षादिति प्रतिभाति,

उपाधेर्लक्ष्यताऽवच्छेदकं च यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमुन्नीयते तत्त्वमिति मणिकृतः,

अत्रोन्नायकत्वं नानुमितिजनकज्ञानविषयत्वरूपम् ; तादृ-शानुमितिजनकवन्ह्यादिव्यभिचारित्वव्याप्तिभ्रममादाय घटादि-

व्यभिचारित्वादेरपि साध्यव्यभिचारोन्नायकतया वह्निमान्धूमादित्यादौ घटादावतिव्याप्तेः; किन्तु तादृशानुमितिस्वरूपयोग्यत्वं, तदवच्छेदकं च व्याप्तिविशिष्टपक्षधर्मत्वम् , एवं च यद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वसामान्यंसाध्यव्यभिचारव्याप्यं साधनवृत्ति च तद्धर्मवत्त्वं तत्त्वमिति लक्ष्यताऽवच्छेदकनिष्कर्षः, द्रव्यं जातिमत्त्वप्रकारकप्रमाविषयत्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्त्वादेः संग्रहाय यदभावेति विहाय यद्धर्मावच्छिन्नाभावेत्युक्तम्, स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादिसंग्रहाय यत्किंचिद्व्यक्तिवृत्तीति, रूपवान्द्रव्यत्वादित्यादौ द्रव्यत्वनिष्ठस्य पृथिवीत्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तित्वस्य रूपव्यभिचारव्याप्यतया पृथिवीत्वाभावादावतिप्रसङ्गवारणाय सामान्यपदोपादानम् ,

दीधितिकृतस्तु—नोक्तं लक्ष्यताऽवच्छेदकं गौरवात्; किन्तु साधनवति यदभावेन यद्वदन्यत्वेन वा साध्याभाव उन्नीयते तत्त्वं बाधवाद्, अत एव स्नेहवान्द्रव्यत्वादित्यादौ जलत्वतेजस्त्वयोर्न तदुभयत्वेनोपाधित्वम् , अत्र साध्यसमानाधिकरणत्वेन यत्पदार्थो विशेषणीयः; अन्यथेदं तेजो द्रव्यत्वादित्यादौ स्पर्शाभावजात्यभावादावतिव्याप्तेः, तत्र स्पर्शाभावाभावशीतस्पर्शे जात्यभावाभावजलत्वादौ तेजस्त्वाभावोन्नायकत्वादित्याहुः,

अत्रेदं विचार्यते—अत एवेत्यस्य कोऽर्थः ? किं यद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तित्वं साध्यव्यभिचारोन्नायकं तद्धर्मवत्त्वमुपाधित्वमिति लक्ष्यताऽवच्छेदकं त्यक्त्वा यद-

भावेन साध्याभाव उन्नीयते स उपाधिरित्यादिलक्ष्यताऽवच्छेदककरणादेवेत्यर्थः, उत यदभावेन साध्याभाव उन्नीयते स उपाधिरिति त्यक्त्वा यद्वदन्यत्वेन साध्याभाव उन्नीयते स उपाधिरित्यनेन लक्ष्यताऽवच्छेदकान्तरकरणादिति वाऽर्थः? तत्र नाद्यः-यद्धर्मावच्छिन्नाभावाधिकरणीभूतेत्यादिलक्ष्यताऽवच्छेदकेऽपि धूमवान्वन्हेरित्यादौ ह्रदत्वेऽतिव्याप्तिवारणाय यद्धर्मावच्छिन्ने साध्यसामानाधिकरण्यं विशेषणमावश्यकं तथा च स्नेहवान्द्रव्यत्वादित्यादौ जलत्वतेजस्त्वोभयत्वावच्छिन्ने साध्यसामानाधिकरण्यविरहेण तादृशलक्ष्यताऽवच्छेदकेऽप्यतिव्याप्त्यसम्भवादत एवेत्यादिग्रन्थोऽसंगतः,

न द्वितीयः-यदभावेनेत्यादिलक्ष्यताऽवच्छेदकेऽपि यदभावमात्रवृत्तिधर्मः साध्याभावव्याप्यताऽवच्छेदकः स उपाधिरयमेव निष्कर्षः; अन्यथाऽयोगोलकवृत्तित्वविशिष्टह्रदत्वाभावेन धूमाभावस्योन्नयनसंभवाद्धूमवान्वन्हेरित्यादौ ह्रदत्वेऽतिव्याप्तिः स्यात् तथाविवक्षणे च निरुक्तधर्मस्यायोगोलकवृत्तित्वविशिष्टाभावत्वापेक्षया गुरुतया धूमाभावव्याप्यतानऽवच्छेदकत्वान्नातिव्याप्तिः, तथा च स्नेहवान्द्रव्यत्वादित्यादौ जलत्वतेजस्त्वोभयाभावत्वस्य स्नेहाभावव्याप्यताऽनवच्छेदकतया तेजोवृत्तित्वविशिष्टतादृशोभयाभावत्वस्य तेजोवृत्तित्वविशिष्टाभावत्वापेक्षया गुरुतया स्नेहाभावव्याप्यताऽनवच्छेदकतया च यदभावेनेत्यादिकल्पेऽपि तादृशोभयत्वावच्छिन्नेऽतिव्याप्त्यसंभवादत एवेत्यादिग्रन्थो न संदर्भशुद्ध इति चेद् ?

अत्रोच्यते—आद्यकल्प एव समीचीनः,

न च पूर्वोक्तदोष इति वाच्यम् ?

यद्धर्मनिष्ठप्रतियोगिताऽवच्छेदकताकाभावाधिकरणयत्किंचिद्व्यक्तिवृत्तित्वसामान्यं साध्यव्यभिचारव्याप्यं साधनवृत्ति च तद्वत्त्वमुपाधित्वमित्येवंरीत्यैव यद्धर्मावच्छिन्नाभावेत्यादिलक्ष्यताऽवच्छेदकनिष्कर्षो वाच्यः; अन्यथा धूमवान् वन्हेरित्यादौ द्रव्यत्वावच्छिन्नधूमस्य धूमत्वावच्छिन्नाभावमादाय द्रव्यत्वावच्छिन्नेऽतिव्याप्तेः, तथा च ह्रदत्ववत्त्वाविशिष्टातिव्याप्तिवारणार्थं प्रविष्टसाध्यसामानाधिकरण्यस्य साध्याधिकरणवृत्तित्वार्थकस्याभावादावन्वये चातिव्याप्तिवारणासम्भवः, उपाधेरनिवेशेन तत्र तन्निवेशासम्भवात् साध्यसमानाधिकरणवृत्तित्वस्य यद्धर्मे निवेशे च ह्रदत्ववत्त्वादिविशिष्टह्रदत्वादिवारणेऽपि ह्रदवृत्तित्वविशिष्टद्रव्यत्वत्वविशिष्टादेरवारणादिति स्वविशिष्टानधिकरणसाध्याधिकरणकं यद्यत्त्वं तत्ताद्भिन्नत्वार्थकसाध्यसमानाधिकरणवृत्तित्वं यद्धर्मे निवेशनीयम् ,

महानसवृत्तित्वविशिष्टद्रव्यत्वादेरुपाधितावारणाय नञ्द्वयोपादानम् ,

एवं च तादृशोभयत्वविशिष्टाधिकरणाप्रसिद्ध्या तादृशोभयत्वं स्वविशिष्टानधिकरणसाध्याधिकरणकाभिन्नमेवेति तद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वस्य साध्यव्यभिचारव्याप्यत्वात्तद्विशिष्टेऽतिव्याप्तिर्भवेदित्येवेत्यतोऽत एवेत्यादिग्रन्थो नासङ्गतः,

केचित्तु–अत एवेत्यस्यातोऽपि साधनवति यदभावेनेत्यादि-लक्ष्यताऽवच्छेदककरणादपीत्यर्थः, अपिना साध्यसामानाधिकरण्यविशेषणदानप्रयुक्तस्य पूर्वलक्ष्यताऽवच्छेदकेऽतिव्याप्त्यभावस्य समुच्चय इति न कोऽपि दोष इत्याहुरिति दिक्।

अथोपाधिलक्षणे पूर्वोपदर्शिता पक्षेतरत्वेऽतिव्याप्तिर्दुर्वारैवेति चेद्?

न–साध्यव्यापकताग्राहकानुकूलतर्कासत्त्वेन पर्वतेतरत्वादेरनुपाधित्वाद् वन्हीतरत्वादेस्तु तत्सत्त्वेनोपाधित्वमेव,

नव्यास्तु—पर्वतेतरत्वादेरप्युपाधित्वमिष्टमेव निरुपाधिसहचाररूपानुकूलतर्कस्य व्यापकताग्राहकस्य सत्त्वात्,

न च स्वव्याघातकत्वेन न तस्योपाधित्वमिति वाच्यम्?

स्वव्याघातकत्वस्य दुर्वचत्वात्, कथायां तस्योपाधित्वेनानुद्भावनं तु कथकसम्प्रदायानुरोधादित्याहुः,

अत्र धूमवान्वन्हेरित्यत्रार्द्रेन्धनमुपाधिः, धूमत्वेनार्द्रेन्धनत्वेन कार्यकारणभावस्य साध्यव्यापकताग्राहकानुकूलतर्कस्य सत्त्वादिति केचिद्,

धूमत्वेनार्द्रेन्धनप्रभववह्नित्वेनैव कार्यकारणभावादार्द्रेन्धनप्रभववह्निरेवोपाधिरिति मणिकृतः,

अत्र केचिद्–गुरुणाऽऽर्द्रेन्धनप्रभववह्नित्वेन धूमं प्रति हेतुत्वापेक्षया लघुनाऽऽर्द्रेन्धनत्वेन वह्नित्वेन च धूमं प्रति हेतुतोचिता, एवं च प्रथममतमेव सम्यक्,

न चैतन्मते कार्यकारणाभावद्वयकल्पने गौरवमिति वाच्यम्?

मणिकृन्मतेऽप्यार्द्रेन्धनप्रभवत्ववह्नित्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वयसाम्येन कारणताऽवच्छेदकगौरवस्याधिक्यात्,

किं चार्द्रेन्धनप्रभवत्वमार्द्रेन्धजन्यत्वमेव तथा च जन्यत्वस्यानन्यथासिद्धनियतोत्तरवर्त्तित्वरूपतया धूमकारणताऽवच्छेदकस्य जन्यतागर्भगुरुशरीरतया मणिकृन्मते गौरवम्,

न चार्द्रेन्धनप्रभववह्नित्वं धूमजनकताऽवच्छेदको जातिविशेष इति वाच्यम् ?

तृणादिजन्यताऽवच्छेदकजात्या वह्निनिष्ठसांकर्य्येण तस्य जातित्वासम्भवात्,

न च धूमजनकताऽवच्छेदकजातेस्तृणादिजन्यताऽवच्छेदकजातिव्याप्यविरुद्धभेदेन नानात्वाद् न सांकर्य्यमिति वाच्यम् ?

तादृशजन्यताऽवच्छेदकजातेस्तादृशजनकताऽवच्छेदकजातिव्याप्यविरुद्धभेदेन नानात्वमादाय विनिगमनाविरहात्,

न च तादृशजन्यताऽवच्छेदकजातेर्नानात्वे तादृशजातिद्वयावच्छिन्नस्यैकदोत्पत्तिवारणाय प्रतिबन्ध्यप्रतिबन्धकभावकल्पने गौरवमेव विनिगमकमिति वाच्यम् ?

धूमजनकताऽवच्छेदकताऽवच्छेदकजातेर्नानात्वेऽपि तन्नियामककल्पने गौरेवण साम्यादित्याहुः,

तदसद्-जनकताऽवच्छेदकजातेर्नानात्वे जनकतायां व्यभिचारवारणाय कार्यताऽवच्छेदकोटाव्यवहितोत्तरत्वादिनिवेशे गौरवापत्त्या जन्यतावऽच्छेदकजातेरेव नानात्वस्यौचित्यात्,

किं च धूमं प्रत्यार्द्रेन्धनत्वेन वह्नित्वेन पृथग् हेतुत्वे तदुभयसत्त्व आर्द्रेन्धनजवह्निप्रतिबन्धकसत्त्वेनार्द्रेन्धनजवह्न्यभावे धूमानुत्पत्त्याऽऽर्द्रेन्धनजधूमं प्रति मणित्वादिना प्रतिबन्धकताकल्पनायामेतन्मते गौरवेण तदपेक्षया तदार्द्रेन्धनजधूमं प्रति-तदार्द्रेन्धनजवह्नित्वेन हेतुत्वकल्पने मणिकृन्मते लाघवम्,

तन्मत आर्द्रेन्धनजवह्निं प्रति मण्यादेः प्रतिबन्धकत्वस्यो-भयवादिसिद्धतया तदभावादेवोक्तस्थले धूमोत्पत्त्यसम्भवात्,

एवं तदार्द्रेन्धने मण्यादिसत्त्वे तदैवार्द्रेन्धनान्तरजन्यधूमोत्पत्तिसम्भवेन तदार्द्रेन्धनजधूमं प्रति मण्यादेरार्द्रेन्धनव्यक्तिभेदेन प्रतिबन्धकत्वे गौरवमेतन्मते,

मणिकृन्मते तदार्द्रेन्धनजवह्नित्वेन तदार्द्रेन्धनजधूमं प्रति हेतुत्वेनैवादोषात्,

न च यत्र तदार्द्रेन्धनजन्यधूमोऽप्रसिद्धस्तत्र तादृशकारणता-कल्पनाऽसम्भवेन सामान्यसामग्रीबलात्प्रतिबन्धककालेऽपि फलापत्तिरिति वाच्यम्?

तत्तदार्द्रेन्धनजधूमं प्रति तत्तदार्द्रेन्धनजवह्नित्वेन हेतुत्वस्याव-श्यकत्वे तादृशविशेषसामग्रीविरहादेवोक्तस्थले फलापत्त्य-भावात्,

यत्तु-आर्द्रेन्धनत्वेन वह्नित्वेन पृथग् हेतुत्वेऽपि जन्यजनक-भावसम्बन्धेनार्द्रेन्धनविशिष्टवह्नेः फलोधायकत्वाङ्गीकारेण पूर्वोप-दर्शितस्थले प्रतिबन्धकसत्त्वे धूमोत्पत्त्यसंभवेन प्रथममतेऽपि धूमं-प्रति मणित्वादिना प्रतिबन्धकत्वं न कल्प्यत इति क्वोपदर्शितगौ-

एवं प्रथममत इति ?

तन्नुच्छं—सर्वत्र कारणताघटकप्रत्यासत्तिघटितसामानाधिकरण्यसम्बन्धेनैककारणाविशिष्टापरकारणस्यैव फलोपधायकत्वेनोक्तरीतेरसम्भवादिति,

वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र पक्षधर्मवहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वमुपाधिस्तत्र वहिर्द्रव्यप्रत्यक्षत्वेनोद्भूतरूपत्वेन कार्यकारणभाव एव वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकताग्राहकानुकूलतर्कः,

ननूद्भूतरूपत्वेन तत्र हेतुत्वं न सम्भवति ? उद्भूतत्वस्य दुर्वचत्वात् ,

न चोद्भूतत्वं जातिः ? नीलत्वादिना संकरात् ,

न च नीलत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् ?

तथा सति कारणताऽवच्छेदकनानात्वेन व्यभिचारादिति चेद् ?

न—नीलत्वादिव्याप्यनानाऽनुभूतत्वाभावकूटरूपोद्भूतत्वस्य रूपनिष्ठकारणताऽवच्छेदकत्वादिति सम्प्रदायः,

नव्यास्तु–तथा सति तादृशोद्भूतत्वरूपत्वयोस्तादृशानुद्भूतत्वाभावानां च परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण कारणतावाहुल्यमवच्छेदकगौरवं चेत्येतदपेक्षया तादृशानुद्भूतत्वानां स्वाश्रयसमवायितया वहिर्द्रव्यप्रत्यक्षे प्रतिबन्धकत्वमुपेत्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकतादृशाभावकूटस्य रूपस्य च पृथगेव हेतुत्वं युक्तम् ,

न चानुद्भूतत्वाभावकूटस्य कारणत्वेऽपि कूटत्वस्यैकविशिष्टापरत्वपर्यवसानेन परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यमवच्छेदकगौरवं चास्त्येवेति वाच्यम् ?

तादृशाभावानां प्रत्येकमेव हेतुत्वस्य दण्डचक्रादिन्यायेन परस्परसहकारेण फलोपधायकत्वस्य चाभ्युपगमात् ,

अथैवमेकरूपेण हेतुत्वाभावे तेन रूपेणोपाधित्वमनुपपन्नं तेन रूपेण कार्यकारणभावरूपानुकूलतर्कस्य साध्यव्यापकताग्राहकत्वासम्भवादिति चेद् ?

न-पृथग्हेतुत्वेऽपि सामानाधिकरण्यसम्बन्धेन तादृशानुद्भूतत्वाभावकूटरूपोद्भूतत्वविशिष्टरूपत्वेन फलोपधायकत्वस्यावश्यकतया तदात्मकानुकूलतर्कस्य साध्यव्यापकत्वग्राहकत्वसम्भवादित्याहुः ,

काकः श्यामो मित्रातनयत्वादित्यत्र साधनमित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वमुपाधिः, श्यामरूपं प्रति शाकपाकस्य हेतुताया आयुर्वेदसिद्धतया तस्या एव साध्यव्यापकताग्राहकानुकूलतर्कत्वं बोध्यं, ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वरूपसाधनावच्छिन्नविनाशित्वव्यापकं भावत्वमुपाधिः, तत्र नाशत्वेन जन्यभावत्वेन कार्यकारणभाव एव तादृशव्यापकताग्राहकोऽनुकूलतर्कः,

न च तादृशकार्यकारणभावे मानाभावः; आपादकाभावादेव नित्यद्रव्यगुणयोर्नाशापत्त्यसम्भवादिति वाच्यम् ?

प्रतियोगितासम्बन्धेनैतद्घटनाशकालीनैतद्घटसमवेतनाश-

त्वावच्छिन्नं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्घटनाशत्वा-दिनाऽऽश्रयनाशजन्यरूपादिनाशानुरोधेन कार्यकारणभावस्य क्लृप्ततया तादृशकारणबलाद् घटत्वादेर्नाशापत्त्या तद्वारणाय तत्कल्पनस्यावश्यकत्वात्, पाकजरूपादिनाशे व्यभिचारवारणाय कालीनान्तम्,

न च घटत्वादेर्यावद्घटादिसमवेततया तस्य यावद्घटनाश-कार्यताऽवच्छेदककोटिप्रविष्टतया यावद्घटादिनाशस्यैकदाऽसम्भ-वेन नोक्तापत्तिरिति वाच्यम् ?

महाप्रलयाव्यवहितपूर्वकाले यावद्घटादिनाशसत्त्वादेवोक्ता-पत्तिसम्भवात्,

न चैतद्घटादिनाशस्य स्वप्रतियोगिजन्यत्वसम्बन्धेन हेतु-त्वस्य वक्तव्यतया नोक्तापत्तिरिति वाच्यम् ?

जन्यत्वघटितसम्बन्धेन हेतुत्वापेक्षया लाघवेन तस्य स्व-प्रतियोगिसमवेतत्वसम्बन्धेनैव हेतुत्वस्यौचित्यात्,

न चोक्तातिरिक्तकार्यकारणभावकल्पनापेक्षया सम्बन्ध-मध्ये जन्यत्वनिवेशनमेव सम्यगिति वाच्यम् ?

अनन्तकारणतायां कारणताऽवच्छेदके प्रत्यासत्तिघटकतया जन्यत्वनिवेशापेक्षया नाशत्वावच्छिन्नं प्रति जन्यभावत्वेनाति-रिक्तैककार्यकारणभावकल्पनस्यैव सम्यक्त्वात्,

अथ स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशवतो नाशत्वाव-च्छिन्नं प्रति स्वप्रतियोगिजन्यत्वसम्बन्धेन नाशत्वेनाश्रयनाश-स्यैककारणत्वमेव कल्पयितुमुचितम्; उक्तरीत्याऽनन्तकारणता-

कल्पनमपेक्ष्य लाघवात् ,

एवं च तादृशैककारणतायां तद्घटकसम्बन्धे जन्यत्वप्रवेशेनैव घटत्वादावाश्रयनाशजन्यनाशापत्तिवारणसम्भवे किं नाशत्वावच्छिन्नं प्रति जन्यभावत्वेन पृथक्कारणत्वकल्पनयेति चेद् ?

नैवं—स्वप्रतियोगिजन्यत्वमित्यत्र जन्यत्वं द्रव्यत्वावच्छिन्नजनकतानिरूपितं निवेश्यते; तत्तद्द्रव्यक्तित्वावच्छिन्नजनकतानिरूपितं वा ?

नाद्यः—घटसमवेतरूपादेरपि द्रव्यत्वेन घटजन्यतया घटनाशात् पटरूपनाशापत्तेः,

नान्त्यः—समवायिनस्तत्तद्द्रव्यक्तित्वेन हेतुत्वे मानाभावाद् अन्यत्रान्यदीयगुणापत्तिवारणस्य प्रागभावहेतुतयैव सम्भवात् ,

इत्थं च स्वप्रतियोगिसमवेतत्वसम्बन्धेनाश्रयनाशस्यैकहेतुत्वकल्पने घटत्वादौ तन्नाशजन्यनाशापत्तिवारणाय जन्यभावत्वेन हेतुत्वमावश्यकम् ,

न च प्रतियोगितासम्बन्धेनोक्तनाशं प्रति कालिकसम्बन्धेनाश्रयनाशस्य नाशत्वेनैकहेतुताकल्पने न घटत्वादौ तेन सम्बन्धेन कारणाभावादेवापत्त्यभाव इति वाच्यम् ?

तथा सति जन्यमात्रे कालिकसम्बन्धेन कारणसत्त्वेन प्रतियोगितासम्बन्धेन नाशापत्तेः,

न च प्रतियोगितासम्बन्धेन तादृशनाशं प्रति स्वप्रतियोगिसमवेतत्वकालिकविशेषणतोभयसम्बन्धेन नाशस्य हेतुत्वान्न घटत्वादेर्नाशापत्तिरिति वाच्यम् ?

उभयत्वस्यैकविशिष्टापरस्वरूपतया विशेष्यविशेषणभावे विनिगमनाविरहात् ,

न च स्वप्रतियोगिसमवेतत्वकालिकविशेषणतोभयविषयकापेक्षाबुद्धिव्यक्तिं तद्व्यक्तित्वेन निवेश्य तज्ज्ञानविषयत्वरूपेण प्रवेशान्न विनिगमनाविरह इति वाच्यम् ?

एवमपि तत्समानविषयकानन्तव्यक्तिमादाय विनिगमनाविरहात् ,

एतेन तद्घटनाशकालीनत्वादेः कार्यताऽवच्छेदकत्वे तत्तत्क्रियाकालीनत्वादिकमादाय विनिगमनाविरहेणानन्तकारणत्वापत्तिरिति तदपेक्ष्य तत्तद्रूपादिनाशत्वमेव जन्यताऽवच्छेदकं वाच्यं; तथा चापादकाभावादेव न घटत्वादौ नाशापत्तिरिति निरस्तम् ,

उक्तरीत्यैककारणताकल्पनेनापादकसत्त्वात् ,

न च प्रतियोगितानियमनिर्वाहाय रूपादिप्रतियोगिनां विशिष्य स्वनाशे हेतुत्वस्यावश्यकतया तादृशविशेषसामग्र्यभावादेव नोक्तापत्तिरिति वाच्यम् ?

विशेषसामग्र्यभावकूटस्य जात्यादौ प्रतियोगितया नाशाभावप्रयोजकत्वकल्पनमपेक्ष्य जन्यभावभेदस्य प्रयोजकत्वेन लाघवेन जन्यभावत्वेन हेतुताया आवश्यकत्वाद् , अथ जन्यत्वेनैव नाशहेतुत्वमस्तु तावतैवोक्तापत्तिवारणात् ,

न च ध्वंसे तदापत्तिरापादकाभावादिति चेत् ?

न—जन्यत्वावच्छिन्नरूपसामान्यकारणस्यैवापादकत्वात् ,

न च घटादिवन्नाशस्यापि नाशस्वीकारे बाधकाभावो विनिगमकाभावादिति वाच्यम् ?

अनन्ताप्रामाणिकध्वंसतत्कारणधाराया अकल्पनस्यैव विनिगमकत्वात्,

यत्तु—ध्वंसस्यापि ध्वंसस्वीकारे ध्वंसप्रागभावानाधिकरणकालस्य प्रतियोग्यधिकरणत्वनियमेन घटादुन्मज्जनापत्तिरेव विनिगमिकेति,

तदसत्—घटध्वंसध्वंसस्यापि तदानीं घटो ध्वस्त इति प्रतीतिविषयत्वकल्पनया घटध्वंसत्वोपगमेन तत्कालस्य ध्वंसप्रागभावानधिकरणत्वस्यैवासम्भवेन घटोन्मज्जनापत्त्यसम्भवात्,

अथोक्तकार्यकारणभावे कार्यस्य प्रतियोगिता; कारणस्य तादात्म्यं प्रत्यासत्तिः, एवं च प्रागभावनाशे व्यभिचारः; तत्र तादात्म्येन जन्यभावस्यासत्त्वादिति चेत् ?

न—भावनाशत्वस्य कार्यताऽवच्छेदकत्वेन भावत्वविशिष्टप्रतियोगितायाः कार्यताऽवच्छेदकसम्बन्धत्वेन वाऽदोषात्,

न चैवमपि घटत्वादौ प्रागभावनाशसाधारणसामग्रीतो नाशापत्तिर्दुर्वारा; जन्यभावं विनाऽपि प्रागभावनाशोत्पत्त्या जन्यभावस्य तत्र सहकारित्वासम्भवादिति वाच्यम् ?

भावभिन्ननाशं प्रति भावभिन्नप्रतियोगितया वा नाशं प्रति तादात्म्येन प्रागभावस्यैव हेतुतया तत्साधनसामग्र्यन्तराभावेनादोषात्,

यत्तु—सत्त्वमेव नाशजनकताऽवच्छेदकं न तु जन्यभावत्वं-

घटत्वादौ ध्वंसे च सत्त्वाभावादेव नाशापत्त्यभावात् ,

न चैवं नित्यद्रव्यगुणयोस्सत्त्वाक्रान्ततया तदापत्तिरिति वाच्यम् ?

तत्रापादकाभावादेवापत्त्यभावात् .

युज्यते चैतद् अन्यथा जन्यत्वं प्रागभावप्रतियोगित्वं कालिकसम्बन्धेन घटत्वादिमत्त्वं वेत्यत्र विनिगमनाविरहेणानन्तकारणताऽऽपत्तेरिति,

तदसत्–सत्त्वावच्छिन्नस्यैवापादकत्वेन नित्यद्रव्यगुणयोर्नाशापत्तेर्दुर्वारत्वात् ,

युज्यते चैतदित्याद्यपि मन्दं–कालिकविशेषणतया घटत्वादिमत्त्वस्य महाकालसाधारण्यस्यैव विनिगमकत्वादिति सम्प्रदायः ,

अत्र वदन्ति–घटादेः प्रतियोगिनोऽनुत्पाददशायां समवाय्यसमवायिकारणनाशादेरभावादेव नाशापत्त्यसम्भवेऽपि घटादिनाशोत्तरमपि तत्कारणसत्त्वेन घटादिनाशो दुर्वार इति तत्र प्रतियोग्यभावादेव न तन्नाश इति प्रतियोगिनो नाशहेतुत्वमावश्यकं तत्र प्रतियोगित्वस्यैकस्याभावात्प्रतियोगित्वमननुगतमिति जन्यभावत्वेन नाशत्वावच्छिन्नं प्रति हेतुत्वं प्रतियोगिनां विशिष्य हेतुत्वेऽपि विशेषसामग्र्यभावकूटस्य कार्यसामान्यानुत्पादप्रयोजकत्वे गौरवाद्, नित्यवारणाय जन्यत्वस्य; ध्वंसवारणाय च भावत्वस्योपादानम् ,

एतेन द्रव्यनाशं प्रति क्व चित्समवायिकारणनाशः क्व चिद्वा-

समवायिकारणनाशो न हेतुर्व्यभिचारात् ,

न च निमित्तेतरकारणनाशत्वेनैकहेतुत्वान्न दोष इति वाच्यम् ?

कपालतत्संयोगादेरपि किञ्चित्कार्यं प्रति निमित्तत्वात्तत्तद्द्रव्यनिमित्तेतरकारणनाशत्वेन तथात्वेऽननुगमाद् द्रव्यनिमित्तकारणसकलसाधारणस्यैकस्य निमित्तकारणत्वस्याभावाच्च, किन्तु सर्वत्रासमवायिकारणनाश एव हेतुः,

न च तयोः पृथगेव तत्र हेतुत्वं कार्यताऽवच्छेदककोटौ चाव्यवहितोत्तरत्वनिवेशान्न व्यभिचार इति वाच्यम् ?

द्व्यणुकनाशानुरोधेनासमवायिकारणनाशस्यावश्यं हेतुत्वे समवायिकारणनाशस्य हेतुत्वे मानाभावाद् , असमवायिकारणत्वं जन्यद्रव्यजनकताऽवच्छेदकः संयोगनिष्ठो जातिविशेषः तदाश्रयनाशत्वेन द्रव्यनाशत्वेन च कार्यकारणभावः,

यच्चसमवायिकारणत्वं समवायिभिन्नासमवेतत्वे सति समवेतकारणत्वमिति तन्न–घटहेतोः सलिलमृत्संयोगादेरपि तथात्वात् तत्तद्द्रव्यसमवायिभिन्नसमवेतत्वोक्तावननुगमात् ,

ननु घटादिजनकताऽवच्छेदकाः कपलादिसंयोगनिष्ठा जातिविशेषा अवश्यं स्वीकरणीयाः; तत एव चोपपत्तौ सामान्यतोजन्यद्रव्यजनकताऽवच्छेदकजातौ मानाभावः, अन्यथा यत्र कपालयोः संयोगविशेषाद् द्रव्यान्तरं भवति तत्र घटोत्पत्त्यापत्तेः कपालादेः सत्त्वात् तस्मात्तत्र घटजनकताऽवच्छेदकजातिर्नास्तीति स्वीकरणीयम् ,

न च तत्र कपालत्वमेव नास्तीति सम्भवति ताभ्यामेवोत्त-

रकालसंयोगविशेषेण घटारम्भदर्शनादिति चेद् ?

अत्र केचित्–तत्र कपालत्वमेव नास्तिः; उत्तरकालं द्व्यणुकादिलक्षणकिञ्चिदवयवापगमात् खण्डकपालान्तरमुत्पद्यते तत्रैव घटजनकताऽवच्छेदककपालत्वजातिरित्याहुः,

वस्तुतस्तु–घटादिजनकताऽवच्छेदकजातिविशेषास्सन्तु तथाऽपि जलतेजःपवनजनकताऽऽवच्छेदकजातिविशेषे मानाभावः किन्तु सामान्यतो जन्यद्रव्यजनकताऽवच्छेदिकैकैव जातिः कल्प्यते लाघवात् तादृशजात्याश्रयजलादिसंयोगे सति जलाद्युत्पत्तौ विलम्बाभावात्,

ननु तथाऽपि संयोगकर्मजन्यताऽवच्छेदकजातिभ्यामभिघातत्वनोदनत्वाभ्यां च परापरभावानुपपत्त्या जन्यद्रव्यजनकताऽवच्छेदिका जातिर्न सम्भवतीति चेद् ?

न–तासामेतज्जातिव्याप्यविरुद्धभेदेन नानात्वाङ्गीकारात्,

न च विनिगमनाविरहेणैतज्जातेरेव नोदनत्वादिव्याप्यविरुद्धनानात्वमेवास्तामिति वाच्यम् ?

द्रव्यजनकताऽवच्छेदकजातेर्नोदनत्वादिव्याप्यविरुद्धभेदेननानात्वे तदाश्रयजन्यद्रव्येष्वपि जातिविशेषा वाच्यास्तेऽपि विशेषा घटत्वपटत्वादिना परापरभावानुपपत्त्या घटत्वादिव्याप्यविरुद्धभेदेन नानाविधाः स्वीकरणीया इत्यनन्तकार्यकारणभावापत्तिः,

एवं तत्तदसमवायिकारणनाशादीनां तत्तद्द्रव्यनाशे नानाहेतुताऽऽपत्तौ महागौरवाच्च, अभिघातत्वादीनां च नानात्वे

च कर्मादिनिष्ठं तत्तज्जन्यताऽवच्छेदकं जातिचतुष्टयमेवाधिकं कल्पनीयमिति लाघवम्,

केचित्तु—कर्मजत्वव्याप्यैव द्रव्यजनकताऽवच्छेदिका जातिर्द्व्यणुकारम्भकसंयोगे कर्मजत्वस्यावश्यकत्वाद्, अभिघातत्वं चारम्भकसंयोगावृत्त्येव तत्र तत्र शब्दाद्युत्पत्तिस्त्ववयवानवयवयोरेवाभिघातात्,

अथैवमपि नोदनत्वेनापि संकरापत्तिः,

न च नोदनत्वमप्यारम्भकसंयोगावृत्त्येवेति वाच्यम् ?

तथा सति तत्र कपालादौ कर्मानुत्पत्त्यापत्तेरिति चेद् ?

न—तत्राप्यवयवनोदनाधीनावयवावयवकर्मजवेगाधीनकपालादिवेगात् कपालादौ कर्मोत्पत्तेरित्याहुः,

नन्वस्तु सा जातिस्तथाऽपि तदाश्रयनाशत्वेन द्रव्यनाशहेतुत्वे द्व्यणुकादीनां क्षणिकत्वापत्तिः परमाणुषु पूर्वपूर्वासमवायिकारणनाशस्य सत्त्वाद् द्वितीयक्षणे द्व्यणुकनाशोत्पत्तौ बाधकाभावादिति चेद् ?

न—तत्तद्द्व्यणुकनाशे तत्तत्संयोगनाशस्यापि विशेषसामग्रीत्वात्,

न चैवं सर्वत्र विशेषकारणत्वस्यावश्यकत्वे सामान्यतः कारणत्वे मानाभाव इति वाच्यम् ?

याभ्यां कपालाभ्यां तन्तुभ्यां वैक एव घटादिरारब्धः तत्र सामान्यसामग्र्यैवोपपत्तौ विशेषसामग्र्यकल्पनात्,

नव्यास्तु—पूर्वोक्तस्य द्व्यणुकादेः क्षणिकत्वस्य वारणाय

यत्र प्रतियोगितासम्बन्धेन द्रव्यनाशस्तत्र स्वप्रतियोगिजन्यत्व-सम्बन्धेनासमवायिकारणनाशो हेतुः, तत्र द्व्यणुकादेः पूर्वसंयोगाजन्यत्वेनादोषात् ,

एतेन दशतन्तुकपटनाशस्यैकतन्तुसंयोगनाशजन्यस्य विशेषणतया दशतन्तुषु वृत्तेरसमवायिकारणनाशस्य दशत्ववृत्तेर्व्यभिचारात्कथं हेतुतेति निरस्तम् ,

अथैवं विजातीयसंयोगनाशस्य द्रव्यनाशहेतुत्वे मानाभावः, संयोगनाशत्वेनैव तथात्वसम्भवाद् उदासीनसंयोगनाशस्य स्वप्रतियोगिजन्यत्वसम्बन्धेनावृत्तेरदोषादिति चेद् ?

न—तुरीतन्तुसंयोगनाशादपि पटनाशापत्तेः, पटस्य तत्संयोगजन्यत्वात् संयोगनाशत्वेन तथात्वेऽपीष्टसिद्धेरिति वदन्ति,

ननु रूपादिनाशानुरोधेन समवेतनाशे समवायिनाशस्य हेतुतायाः क्लृप्तत्वेन तद्बलात्समवायिकारणनाशादपि द्रव्यनाशे बाधकाभावः; व्यभिचारस्याव्यवहितोत्तरत्वानिवेशेनापि वारणसम्भवात् तथा च समवायिकारणनाशजन्यद्रव्यनाशस्यापि सत्त्वान्न सर्वत्र द्रव्यनाशेऽसमवायिकारणनाशो हेतुरिति चेद् ?

न—न हि समवायिनाशत्वेन समवेतनाशत्वेन कार्यकारणभावः, एकसमवायिनाशेऽपरसमवेतनाशप्रसङ्गात् किन्तु तन्नाशे तत्समवायिनाशो हेतुर्वाच्यः, तथा च द्रव्यनाशे तथा हेतुत्वस्याकल्पनान्न दोषः,

न चैवं तत्तत्समवेतरूपादिव्यक्तिभेदेन नाशकताकल्पने गौरवेण लाघवादेतत्कपालनाशकालीनस्य कालिकसम्बन्धेनैत-

त्कपालनाशवतो वैतत्कपालसमवेतस्य नाशं प्रत्येतत्कपालनाशहेतुताकल्पनाद्घटनाशोऽप्येतत्कपालनाशादपि स्यादेवेति वाच्यम् ?

अव्यवहितोत्तरत्वनिवेशे गौरवेण लाघवात् सर्वत्र द्रव्यनाशे सामान्यतोऽसमवायिकारणनाशस्य हेतुत्वे क्लृप्ते तत्र कपालनाशोत्तरमसमवायिकारणनाशे सत्येव घटनाश इति कल्पनाद्, निरधिकरणस्य घटादेः क्षणमात्रमिव क्षणद्वयमप्यवस्थितावविरोधादित्यसमवायिकारणनाश एव द्रव्यनाशहेतुरिति स्थितम् ,

एवं चावयवनाशादसमवायिकारणसंयोगनाशोत्पत्तिक्षण एव द्रव्यनाशस्यापत्तिवारणाय गुणकर्मणोर्द्रव्यान्यत्वेन कारणतां कल्पयित्वा तदवच्छिन्नस्याश्रयनाशसहकारिता वाच्या; तथा सति च कारणताऽवच्छेदकगौरवाल्लाघवेन गुणकर्मणोर्द्रव्यव्यावृत्तजातिविशेषमङ्गीकृत्य तेन रूपेण तयोराश्रनाशसहकारित्वमुचितं तादृशसहकारिविरहादेव न घटत्वादिनाशापत्तिः,

एवं तृतीयक्षण एव योग्यविभुविशेषगुणानां नाशानुरोधेन नाशत्वावच्छिन्नं प्रति कालिकविशेषणतया स्वप्रतियोगिमत्त्वसम्बन्धेन नाशस्य हेतुत्वं कल्प्यते; तथा च तादृशप्रत्यासत्त्या सामान्यकारणस्य नाशस्य घटत्वादावभावान्न तन्नाशापत्तिरिति जन्यभावत्वेन नाशत्वेन हेतुहेतुमद्भावे मानाभावः,

न च ज्ञानादीनामिव घटादीनामपि तृतीयक्षणे सामान्यकारणनाशबलान्नाशापत्तिरिति वाच्यम् ?

घटनाशादौ कपालसंयोगनाशादीनामेव विशेषसामग्रीत्वात्,

न च कपालसंयोगनाशादिकं विनाऽपि सामान्यसामग्र्या

ज्ञानादिनाशोत्पत्त्या तेषां विशेषसामग्रीत्वं न संभवतीति वाच्यम् ?

विभुविशेषगुणनाशेऽपि ज्ञानादीनामेव विशेषसामग्रीत्वो-पगमात्,

न च सामान्यसामग्रीबलाद् नाशे नाशापत्तिरिति जन्यभा-वत्वेन हेतुत्वमावश्यकमिति वाच्यम् ?

महाप्रलयातिरिक्तध्वंसस्य कालोपाधित्वानभ्युपगमात्,

अथैवमपि महाप्रलयात्मकनाशे नाशापत्तिः; उक्तसामान्यसाम-ग्रीसत्त्वात्,

एवं महाप्रलयात्मकसंयोगनाशानुरोधेनादृष्टनाशस्य कालि-कसम्बन्धेन हेतुत्वात्तद्बलात्तन्नाशे तन्नाशापत्तिरिति जन्यभाव-त्वेन नाशहेतुत्वमावश्यकमिति चेद् ?

न–तदानीं तत्रैकसंयोगनाशस्यान्यत्र संयोग उत्पत्तिवार-णाय तत्तन्नाशं प्रति तत्तद्व्यक्तीनां हेतुतया ध्वंसनाशस्यापादका-भावादिति केषांचिदुक्तिर्निरस्ता,

घटादिनाशोत्तरं घटादिनाशप्रसङ्गेन तदावश्यकत्वाद् महा-प्रलयप्रतियोग्यनन्तसंयोगात्मकविशेषसामग्र्यभावकूटस्य तद्ध्वं-सानुत्पादप्रयोजकत्वकल्पनमपेक्ष्य जन्यभावत्वावच्छिन्नभेदस्य प्रयोजकत्वे लाघवेन तदावश्यकत्वाच्च,

न चैवं सत्त्वेनैव नाशहेतुत्वमास्तां तावतैवोक्तापत्तिवारण-सम्भवादिति वाच्यम् ?

इष्टत्वात्,

वस्तुतस्तु नाशहेत्वनेकनित्येषु नाशहेतुतासम्बन्धाकल्पन-

प्रयुक्तलाघवेन जन्यभावत्वेनैव हेतुतोचिता,

न चैवमपि जन्यसत्त्वेनैव हेतुत्वमास्तां न तु जन्यभावत्वेनेति वाच्यम् ?

भावत्वस्यैकार्थसमवायसाधारणसमवायेन सत्तावत्त्वरूपतया जन्यसत्त्वस्य जन्यभावत्व एव पर्यवसानादित्यलं विस्तरेण ।

उपाधेर्दूषकता च क्वचित्पक्षे साध्याभावोन्नायकीभूताभावप्रतियोगित्वरूपसत्प्रतिपक्षोन्नायकतया यथा वह्निरनुष्णः कृतकत्वादित्यादौ शैत्यस्य; क्वचिद्व्यभिचारोन्नायकत्वेन यथाऽऽर्द्रेन्धनवान्पर्वतो धूमवान् वह्नेरित्यादावार्द्रेन्धनस्य; तत्रार्द्रेन्धनाभावस्य पक्षावृत्तितया तेन पक्षे साध्याभावानुमानासम्भवेन व्यभिचारोन्नायकत्वेनैव दूषकत्वादित्याद्यूह्यम् ।

अथ केयमनुमितिलक्षणघटिका पक्षधर्मता ?

न च पक्षत्वविशिष्टानुयोगिकहेतुताऽवच्छेदकसम्बन्ध एव सेति वाच्यम् ?

तथाऽपि किं पक्षत्वमिति पर्यनुयोगतादवस्थ्यमिति चेद् ?

अत्र प्राञ्चः- सन्दिग्धसाध्यधर्मवत्त्वं पक्षत्वम्, अत्र यथाश्रुतार्थेऽवृत्तिसाध्यकस्थले पक्षताऽनुपपत्तिः साध्ये धर्मत्वविरहात्,

एवं साध्यतदभावोभयकोटिकसंशयनिवेशे साध्यविशेष्यकस्य पक्षवृत्तित्वतदभावोभयकोटिकसंशयस्यासङ्ग्रहः,

न च सर्वत्र साध्यतदभावोभयकोटिकसंशयादेवानुमित्युपगमात्तादृशसंशयासङ्ग्रहो न दोषायेति वाच्यम् ?

साध्यस्य केवलान्वयित्वग्रहदशायामभावे प्रतियोगितास-

म्बन्धेन साध्यीयत्वभानासम्भवात् साध्यतदभावोभयकोटिक-संशयासम्भवेन तदानीमनुमित्युपपत्तये साध्यविशेष्यकसंशय-सङ्ग्रहस्यावश्यकत्वात् पक्षवृत्तित्वकोटिकसंशयनिवेशो च साध्य-कोटिकसंशयासङ्ग्रह इत्याशयेन दीधितिकारो धर्मत्वमनन्तर्भा-व्योक्तसंशयद्वयानुगमाय यत्र साध्यस्य यादृशसम्बन्धावगाहि-निर्णयनिवर्त्यो यस्संशयस्स तत्र साध्यस्य तादृशसम्बन्धेनानु-मितौ पक्षतेत्यर्थं चकार, अत्र यत्रेति यत्पदं पक्षताऽवच्छे-दकावच्छिन्नपरं, सप्तम्यर्थश्च विशेष्यत्वम्—अन्वयश्चास्य नि-र्णयांशे, साध्यस्येति साध्यपदं साध्यताऽवच्छेदकावच्छि-न्नपरं, षष्ठ्यर्थः प्रकारत्वम्—अन्वयश्चास्यापि निर्णयांश-एव, तथा च पक्षताऽवच्छेदकावच्छिन्नविशेष्यताकप्रकृतसा-ध्यताऽवच्छेदकावच्छिन्नप्रकारताकतत्सम्बन्धसंसर्गकानिर्णयस्य निर्णयान्तभागाल्लाभः, तादृशनिर्णयनिवर्त्यत्वं च तादृशनिर्णय-ताऽवच्छिन्नप्रतिबन्धकताकत्वं,तथा च तादृशनिर्णयताऽवच्छिन्नप्र-तिबन्धकताकसंशयः प्रकृतपक्षताऽवच्छेदकावच्छिन्नोद्देश्यकप्रकृत-साध्यताऽवच्छेदकावच्छिन्नविधेयकतत्संसर्गकानुमितिहेतुभूतपक्ष-तेत्यर्थः, पर्वतो वह्निमानित्यादिनिर्णयस्य तथाविधनिर्णयत्वेन पर्वतो वह्निमान्न वेत्याद्याकारकवन्ह्यभावविशिष्टबुद्ध्यात्मकसंशय-प्रतिबन्धकत्वं सर्ववादिसंमतमेव,

एवं वन्ह्याद्यंशे पर्वतवृत्तित्वाद्यभावविशिष्टबुद्ध्यात्मकं वह्निः पर्वतवृत्तिर्न वेत्याद्याकारकसंशयं प्रति पर्वते वह्निरित्याद्याकार-कनिश्चयत्वावच्छिन्नस्यैव पर्वतो वह्निमानित्यादिनिश्चयत्वाव-

च्छिन्नस्यापि प्रतिबन्धकत्वं प्राचीनमतसिद्धं; तन्मते समानविशेष्यकत्वादेः प्रतिबन्धकतायामतन्त्रत्वात्, धर्म्यंशे धर्मिवृत्तित्वावगाहिनो धर्मांशे धर्मिवृत्तित्वावगाहिनो ज्ञानस्य तुल्यकार्यकारित्वादित्युभयविधसंशयस्यैव तथाविधनिर्णयत्वावच्छिन्नप्रतिबन्धकताकत्वमक्षतम्, अत्र च तादृशानिर्णयप्रतिबन्ध्यत्वरूपयथाश्रुतार्थनिवेशे पर्वतो वह्निमान् घटत्वांश्चेत्याद्याकारकसमूहालम्बनात्मकसाध्यवत्तानिर्णयप्रतिबन्ध्यस्य पर्वतो घटवान्न वेत्यादिसंशयस्य पर्वतो वह्निमानित्याद्यनुमितौ पक्षतात्वापत्तिरतस्तथाविधनिर्णयत्वावच्छिन्नप्रतिबन्धकताकत्वनिवेशनं, पर्वतो घटवान्न वेतिसंशयप्रतिबन्धकता च घटवत्तानिर्णयत्वेनैवावच्छिद्यते न तु वह्निमत्तानिर्णयत्वेनेति नातिप्रसङ्गः, तथाविधनिर्णयत्वावच्छिन्नप्रतिबन्धकताकत्वं च तथाविधनिर्णयत्वपर्याप्तप्रतिबन्धकताऽवच्छेदकताकत्वरूपं—ग्राह्यम्, अन्यथा वह्निमत्पर्वतवान्न वा देश इत्यादिसंशयनिरूपितवह्निमत्पर्वतवान्देशइत्यादिनिर्णयनिष्ठप्रतिबन्धकताऽवच्छेदककोटौ पर्वतत्वाद्यवच्छिन्नविशेष्यताकवह्नित्वाद्यवच्छिन्नप्रकारताकानिर्णयत्वस्य निवेशेन तादृशसंशयस्य पर्वतो वह्निमानित्याद्यनुमितौ पक्षतात्वापत्तेः, अवच्छेदकतापर्याप्तिनिवेशे च तत्र देशादिविषयताया अप्यधिकायाः प्रतिबन्धकताऽवच्छेदककोटौ निवेशेन नोपदर्शितनिर्णयत्वेऽवच्छेदकतापर्याप्तिरिति नातिप्रसङ्गः,

एवं च पक्षताऽवच्छेदकावच्छिन्नविशेष्यताकत्वस्य साध्यताऽवच्छेदकावच्छिन्नप्रकारताकत्वस्य संबन्धविशेषावगाहित्वस्य सं-

शयान्यत्वस्य वाऽनिवेशेऽसंभवः, तत्तद्विशेषणानां केन चिदप्य-घटितधर्मे कस्य चिदपि संशयस्य प्रतिबन्धकताऽवच्छेदकताया-अपर्याप्तेः, उपदर्शितसकलविशेषणानामेव तदवच्छेदककोटिप्रविष्ट-त्वात् सामान्यतः किञ्चिद्धर्मावच्छिन्नाविशेष्यताकत्वस्य किञ्चिद्ध-र्मावच्छिन्नप्रकारताकत्वस्य किञ्चित्संसर्गकत्वस्य च निवेशे द्रव्य-त्वाद्यवच्छिन्नविशेष्यताकवन्ह्यादिनिर्णयप्रतिबन्ध्यस्य द्रव्यं वन्हि-मन्न वेत्यादिसंशयस्य द्रव्यत्वाद्यवच्छिन्नप्रकारकनिर्णयप्रतिबन्ध्यस्य पर्वतो द्रव्यवान्न वेत्यादिसंशयस्य कालिकादिसंबन्धावगाहिनिर्णय-प्रतिबन्ध्यस्य पर्वतः कालिकसंबन्धेन वन्हिमान्न वेत्यादिसंशयस्य च पर्वतत्वावच्छिन्नोद्देश्यताकवन्हित्वाद्यवच्छिन्नविधेयताकसंयोगा-दिसंसर्गकानुमितौ पक्षतात्वापत्तिरतः पक्षताऽवच्छेदकादीनां विशिष्य निवेशः,

न चैवमपि सर्वत्र प्रतिबन्धकताऽवच्छेदककोटावनाहार्यत्व-स्याप्रामाण्यज्ञानानास्कन्दितत्वस्याधिकस्य निवेशादुपदर्शितनिर्ण-यत्वेऽपि प्रतिबन्धकताऽवच्छेदकत्वपर्याप्तिविरहेणासंभवो दुर्वार-एवेति वाच्यम् ?

अनाहार्याप्रामाण्यज्ञानानास्कन्दिततथाविधनिर्णयत्वपर्या-प्तप्रतिबन्धकताऽवच्छेदकताकत्वस्यैव निवेशनीयत्वात् पर्वतो-वन्ह्यभाववानित्यादिनिर्णयदशायां वन्ह्यादौ साध्ये पर्वतादेः पक्ष-व्यवहारवारणाय संशयपदम्,

स्यादेतद्—अत्र संशयपदं यदि किञ्चिद्भावाभावोभयप्रकार-कज्ञानपरं तदा पर्वतो वन्हिमानित्याद्यनुमितौ पर्वतो वन्ह्यभाव-

वान्घटवान्न वेत्याद्याकारकघटादिसंशयस्य पक्षतात्वापत्तिः सा-ध्यतदभावाद्युभयप्रकारकज्ञानपरत्वे च पूर्वोक्तानुगमः,

यत्तु—संशयपदं प्रकृतपक्षताऽवच्छेदकप्रकृतसाध्यताऽव-च्छेदकावच्छिन्नोभयसम्बन्धावगाहिज्ञानपरं; तत्त्वं च पक्षवि-शेष्यके साध्यविशेष्यके च संशयेऽक्षतमेवेति नाननुगमः, सम्बन्धश्च प्रकृतानुमितिविधेयताऽवच्छेदकीभूतो ग्राह्यः, अतः पर्वतः संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवन्ह्यभाववान् सम-वायेन च वह्निमानित्यादिसमूहालम्बनस्य संयोगादिना वन्ह्या-द्यनुमितौ न पक्षतात्वापत्तिरिति?

तदसद्—वस्तुगत्या पक्षताऽवच्छेदकाद्यवच्छिन्ननिरूपितो य-स्तादृशसम्बन्धस्तदवगाहित्वनिवेशे पर्वतः संयोगसम्बन्धावच्छि-न्नप्रतियोगिताकवन्ह्यभाववान् संयोगश्चेत्यादिसमूहालम्बनवा-रणासम्भवः, तमःप्रभृतिषु समवायेनाकाशादिसाधने तादृशोभय-निरूपितसमवायाप्रसिद्ध्या पक्षताऽनुपपत्तिश्चेति पक्षताऽवच्छेद-कावच्छिन्नविषयतया साध्यताऽवच्छेदकावच्छिन्नविषयतया च निरूपिता या तत्सम्बन्धीयविषयता तच्छालित्वं निवेश्यं; तथा च वह्निः संयोगेन पर्वतवृत्तिर्न वेत्याद्याकारकसंशयासंग्रहः, तस्य विधेयतावऽच्छेदकीभूतसंयोगादिसम्बन्धावच्छिन्नवृत्तित्वविषय-ताया एव साध्यपक्षाविषयतानिरूपितत्वेन संयोगादिविषयताया-अतथात्वाद्, यथा कथं चित्तत्संग्रहे पर्वताद्यंशे संयोगादिसंस-र्गावच्छिन्नवन्ह्यादिवृत्तित्वावगाहिनो वन्ह्यभावादिनिश्चयस्य वारयितुमशक्यत्वाद्,

नवीनास्तु-संशयपदस्य निरुक्तसम्बन्धावगाहिपरत्वे निरुक्तसम्बन्धानवगाहिनः साध्यं पक्षानिष्ठाभावप्रतियोगि न वेतिसंशयस्यासंग्रहः,

न च केवलान्वयिस्थले साध्यं पक्षवृत्ति न वेत्यादितादृशसंशयादेवानुमित्युपपत्त्या तथाविधसंशयासंग्रहो न दोषायेति वाच्यम् ?

तथा सति प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेतिशंशयश्च केवलान्वयिग्रन्थे प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेतिसंशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येवेति ग्रन्थेन मणिकृतैव संगृहीततया तद्विरोधात् ,

एवं तादात्म्यसम्बन्धेन प्रमेयपक्षकवाच्यसाध्यकस्थले तादृशसंशयाप्रसिद्धिः; तादात्म्यसम्बन्धेन पक्षसम्बन्धत्वाभावव्यापकोऽप्रसिद्धेः,

एवमप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थले निरुक्तसंवन्धावगाहिसंशयानुपपत्तेस्तत्र साध्यात्मकाभावप्रतियोगिनि पक्षवृत्तित्वादिसंशयस्यैव पक्षतात्वस्योपगन्तव्यतया संशयपदेन निरुक्तसंवन्धावगाहित्वनिवेशनासंभव इति दूषणान्युद्भावयन्ति,

तदसद्-दीधितिकृतैव तादृशमणिकृद्ग्रन्थः प्रमेयत्वआधेयत्वावच्छिन्नस्वरूपप्रतियोगितासंवन्धाभ्यां घटतन्निष्ठाभावप्रकारकप्रमेयत्वं घटे घटनिष्ठाभावीयं न वेत्याकारकसंशयपर इति स्वाभिप्रायस्य विशेषणविशेष्यभावभेदेऽपि विरोधिविषयतामात्रेण विरोधित्वमनुभवबलादास्थीयत इत्यादिना प्रकटनात्,

तथा हि—विशेषणविशेष्यभावभेदस्य विशिष्याभिधानेनार्थभेदव्यवच्छेदो लब्धः,

इत्थं च प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति मणिकृदुक्तसंशयस्य तादृशप्रतियोगित्वतदभावकोटिकसंशयत्वेऽर्थभेद एवास्तीति तदभिधानमसंगतं स्यादित्युक्तसंशयपरत्वमावश्यकम्,

न चैवं प्रतियोगितासंबन्धेन भ्रमस्वीकारे मणिकृता पक्षविशेष्यक एव संशयः कुतो नोक्त इति वाच्यम्?

अभावप्रमेयत्वयोः प्रसिद्ध्यैवोक्तसंशयस्संभवति; पक्षविशेष्यकसंशयस्तु प्रमेयत्वाभावभ्रमेण न संभवतीत्याशयेन तदनुक्तेः, एवं चोक्तसंशयस्य निरुक्तसंबन्धावगाहित्वमप्यस्तीति न तदसंग्रहापत्तिरूपो दोषः,

एवं वन्हित्वादिना नानावन्ह्यादिषु पर्वतत्वाद्यवच्छिन्नत्वप्रसिद्धेरिव भेदत्वेन नानाभेदेष्वेव प्रमेयत्वावच्छिन्नत्वप्रसिद्ध्या तादात्म्यसंबन्धेन प्रमेयपक्षकवाच्यसाध्यकस्थले तादृशभेदकोटिकसंशयस्यैव प्रसिद्धिरिति न तत्र तादृशसंशयाप्रसिद्धिरूपो दोषः,

एवं प्रसिद्धसाध्यकस्थलीयपक्षताया एव साध्यसन्देहरूपतयाऽप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थले विशिष्टसिद्ध्यभावपक्षतावादिन इवैतन्मतेऽपि साध्यज्ञानाभावस्यैव पक्षतात्वेन न चरमदूषणावकाशोऽपीति,

मैवं—प्रकृतपक्षताऽवच्छेदकावच्छिन्नविशेष्यताकप्रकृतानुमितिविधेयताऽवच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकप्रकृतसाध्यताऽवच्छेदकावच्छिन्नाभावप्रकारकानिश्चयत्वावच्छिन्नप्रतिबन्धकता-

कत्वमेव संशयत्वं; तच्च बाधनिश्चयव्यावृत्तमेवेति न बाधनिश्चयदशायां पक्षव्यवहारप्रसङ्गः, पर्वतो वन्हिमान्न वा वन्हिः पर्वतीयो न वेत्याद्युभयविधसंशयं प्रत्येव वन्ह्यादिनिश्चयवद् वन्ह्याद्यभावनिश्चयो विरोधी, अतो नोक्तानुगमः,

अथ बाधनिश्चयकाले पक्षव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्तशरीर उक्तसंशयपदार्थनिवेशसार्थक्येऽप्यनुमितिकारणताऽवच्छेदककोटौ तन्निवेशनमफलं बाधनिश्चयदशायां विशिष्टवुद्धिसामान्यं प्रत्यवश्यकल्पनीयतत्प्रतिबन्धकतयैवानुमित्यापत्तिवारणसंभवादिति चेद् ?

न—निवेश्यत एव तत्रोक्तसंशयपदार्थः प्रवृत्तिनिमित्तशरीरे तन्निवेशाभिप्रायेणैव दीधितौ संशयपदोपादानोपपत्तेः,

केचितु—अनुमितिकारणताऽवच्छेदककोटौ संशयपदार्थानिवेशो वन्हिव्याप्यसाध्यकानुमितौ वन्हिमान्न वेतिसंशयस्य हेतुत्वापत्तिरिति तन्निवेशनमावश्यकं, तन्निवेशने तादृशसंशयस्य वन्हिव्याप्याभाववत्तानिर्णयनिवर्त्तनीयत्वाभावेन तद्वारणसंभवात्,

न च तथाऽपि वन्हिव्याप्यवान्पर्वतः, पर्वतो वन्हिमान्न वेति समूहालम्बनवारणमशक्यं तादृशज्ञानस्य वन्हिव्याप्याभाववत्तानिश्चयप्रतिबन्ध्यत्वादिति वाच्यम् ?

संशयं प्रति विशेषदर्शनरूपप्रतिबन्धकाभावस्य कार्यसहभावेन हेतुतयैकतरकोटिव्याप्यवत्ताविषयकसमूहालम्बनात्मकसंशयस्यैवासंभवादित्याहुः,

तदसद्-उक्तसंशयपदार्थस्य कारणताऽवच्छेदककोटौ निवे-

शेऽपि वह्निव्याप्याभाववत्पर्वतः; पर्वतो वह्निमान्न वेतिसमूहालम्बनसंशयस्य वह्निव्याप्याभाववत्तानिश्चयनिवर्तनीयस्य वारणासंभवाद् व्याप्यत्वावच्छिन्नप्रकारकज्ञानस्यैव संशयविरोधितया व्याप्याभावाभावत्वावच्छिन्नप्रकारकज्ञानस्यातथात्वेन तथाविधसंशये बाधकाभावात्,

एवं भाविवह्निव्याप्यवत्ताज्ञानमप्रमेत्यप्रामाण्यग्रहाद्द्वितीयक्षणे वह्निव्याप्यवान्पर्वतः पर्वतो वह्निमान्न वेत्याकारकसमूहालम्बनसंशयस्यापि संभवः, विशेषदर्शनस्याप्रामाण्यज्ञानानास्कन्दितस्यैव संशयनिवर्त्तकतया कार्यकाले तथाविधविशेषदर्शनाभावात्; तस्मात्तद्वारणाय साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबन्ध्यतायां साध्यवत्ताज्ञानत्वावच्छिन्नप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽवच्छेदकघटकप्रकारताघटितधर्मावच्छिन्नत्वमवश्यं निवेशनीयम्, वह्निव्याप्यसाध्यकस्थले च साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपिता या वह्निमान्न वेति संशयनिष्ठा वह्न्यभावप्रकारकज्ञानत्वावच्छिन्नप्रतिबन्ध्यता सा न साध्यवत्ताज्ञानत्वावच्छिन्नप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽवच्छेदकघटकप्रकारताघटिततद्धर्मावच्छिन्ना वह्निव्याप्यवत्ताज्ञानं प्रति वह्न्यभावप्रकारकानिश्चयत्वेनाप्रतिबन्धकतया वह्न्यभावप्रकारतायावह्निव्याप्यवत्ताज्ञानत्वावच्छिन्नप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽवच्छेदकाघटकत्वात्,

न च प्रतिबन्ध्यतायां तादृशप्रकारताघटितधर्मावच्छिन्नत्वनिवेशे साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितत्वरूपत-

द्विशेषणवैयर्थ्यमिति वाच्यम् ?

तदनुपादाने वन्हिसाध्यकस्थले पर्वतो वन्हिमान् वन्ह्यभाव-व्याप्यवान्न वा पर्वत इति संशयस्य पक्षतात्वापत्तेः; तादृशसंशय-निष्ठवन्ह्यभावव्याप्याभावानिश्चयनिरूपितप्रतिबन्ध्यताया वन्हिम-त्ताज्ञानप्रतिबन्धकताऽवच्छेदकघटकवन्ह्यभावव्याप्यप्रकारताघटि-तधर्मावच्छिन्नत्वात् ,

एवं च तादृशविलक्षण्यैवोपपत्तौ कारणताऽवच्छेदककोटौ सं-शयपदार्थनिवेशनमनर्थकमेव,

वस्तुतस्तु—संशयनिश्चयसाधारणाप्रामाण्यज्ञानकाले बाधबु-द्धिसत्त्वे विशिष्टबुद्ध्युत्पत्त्या विशिष्टबुद्धिसामान्यं प्रति संशयनि-श्चयसाधारणाप्रामाण्यज्ञानत्वावच्छिन्नप्रतियोगिताकाभावविशिष्ट-बाधनिर्णयत्वेनैव प्रतिबन्धकता वाच्या,

एवं चाप्रामाण्यसंशयकालीनबाधनिर्णयदशायां सिद्ध्या-त्मकपरामर्शसत्त्वेऽनुमितिवारणाय कारणताऽवच्छेदककोटावपि संशयपदार्थनिवेशनमावश्यकमेव,

अथ साध्यसंदेहसत्त्वेऽप्रामाण्यनिर्णयसत्त्वेऽनुमित्यापत्ति-वारणाय कारणताऽवच्छेदककोटावप्यप्रामाण्यज्ञानाभावो निवेश-नीयस्तथा चोक्तस्थले नानुमित्यापत्तिस्तदाऽप्रामाण्यज्ञानाभाववि-शिष्टतथाविधनिर्णयनिवर्त्याभावादिति चेद् ?

न—अप्रामाण्यसंशयकालीनसाध्यसंदेहसत्त्वेऽनुमितेरुत्पादे-नाप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैव कारणताऽवच्छेदककोटौ निवेशेनोक्तस्थलेऽनुमित्यापत्तेर्दुर्वारत्वात् ,

अत्र नव्याः-उक्तरूपेण न संशयस्यानुमितिहेतुत्वं तथासति महानसीयवन्हित्वाच्छिन्नसाध्यकस्थले महानसीयवन्ह्यभाववान् पर्वतः पर्वतो वन्हिमान्न वेतिसंशयस्यापि हेतुताऽऽपत्तेः; किन्तु प्रकारान्तरेण, तथा हि संशयत्वं स्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिवन्धकतानिरूपितप्रतिवन्ध्यताशालित्वं स्वनिष्ठविषयितायां बाधप्रतिवन्ध्यताऽवच्छेदकत्वं, प्रतिबन्ध्यतायां च साध्यवत्तानिश्चयप्रतिवन्ध्यताऽवच्छेदकावच्छिन्नत्वं निवेशनीयं; तेन वन्हिव्याप्यसाध्यके वन्हिमान्न वा पक्ष इति संशयस्य वन्ह्यादिसाध्यके पर्वतो महानसीयवान्हिमान्न वेतिसंशयस्य साध्यवत्तानिश्चयप्रतिवन्ध्यस्य व्युदासः,

एवं च बाधप्रतिवन्ध्यताऽवच्छेदकस्वनिष्ठविषयताघटितधर्मावच्छिन्नप्रतिवन्धकतानिरूपिता या साध्यवत्तानिर्णयत्वावच्छिन्नप्रतिवन्धकतानिरूपितप्रतिवन्ध्यताऽवच्छेदकावच्छिन्नप्रतिवन्ध्यता तच्छालित्वेन संशयस्यानुमितिहेतुत्वं; महानसीयवान्हिसाध्यक उक्तसंशयस्यातथात्वान्नोक्तापत्तिरिति वदन्ति,

तदसद्-विशेषानुमितौ सामान्यसंशयस्य पक्षतात्व इष्टापत्तेः, अत एवेच्छा द्रव्याश्रिता न वेतिविप्रतिपत्त्यावितरबाधबलादष्टद्रव्यातिरिक्तद्रव्याश्रितत्वानुमित्युपयोगित्वस्य सकलप्रामाणिकसंमतत्वमुपपद्यते,

किंच-सिद्धिकालेऽनुमितिवारणाय साध्यसंदेहरूपपक्षताया अनुमितिहेतुत्वमुपेयते; तच्च सिद्धिप्रतिवन्ध्यसंशयस्य हेतुत्व एवोपपद्यत इति महानसीयवन्हिसाध्यके पर्वतो वन्हिमान्न वेति-

संशयस्यापि तथात्वेन हेतुत्वमुचितमेव,

एतेन साध्याभावनिर्णयनिवर्त्यत्वरूपसंशयत्वनिवेश उभयसाध्यके प्रत्येकसंशयस्यापि सङ्ग्रहप्रसङ्ग इति मान्योक्तमपि परास्तम्,

इष्टापत्तेः,

अथ समुच्चयस्यापि साध्यतदभावनिर्णयप्रतिबन्ध्यताऽवच्छेदकतत्तद्विशिष्टबुद्धित्वाक्रान्ततया तत्प्रतिबन्ध्यत्वेन पक्षतात्वापत्तिरिति चेद् ?

न—बाधाभावहेतुतायां समुच्चये व्यभिचारवारणायाऽव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वे गौरवेणाऽव्याप्यवृत्तित्वज्ञानवदन्यत्वस्यैव तत्प्रतिबन्ध्यताऽवच्छेदके निवेश्यतया समुच्चयस्यातथात्वेनादोषात्,

केचित्तु-उक्तव्यभिचारवारणाय विरोधविषयता प्रतिबन्ध्यताऽवच्छेदके निवेश्यते समुच्चयातिरिक्तनिर्णयेऽपि सर्वत्र विरोधः संसर्गतया भासत इति नोक्तदोष इत्याहुः,

न च तथाऽपि सामानाधिकरण्येनानुमितौ सामानाधिकरण्येन वन्ह्यभावावगाहिसंशयस्य पक्षतात्वापत्तिः; यत्सम्बन्धेन यत्पक्षविशेष्यकयत्साध्यनिर्णयनिवर्त्यो यस्संशयः स तत्संसर्गकतत्पक्षकतत्साध्यकानुमितौ पक्षतेति नियमेन तत्र तस्य पक्षतात्व इष्टापत्तिर्न सम्भवतीति वाच्यम् ?

सामानाधिकरण्येनानुमितौ सामानाधिकरण्येन साध्यनिर्णयनिवर्त्यो यस्संशयस्स एव तत्र पक्षता; अवच्छेदकावच्छेदेनानुमितौ तदवच्छेदकावच्छेदेन साध्यनिर्णयनिवर्त्यो यस्संशयस्स-

एव पक्षतेत्युक्तावदोषात् ,

न च सामानाधिकरण्येन साध्यनिर्णयनिवर्त्यसंशयस्य कार्यताऽवच्छेदकं यदि संयोगादिना वह्निविधेयकानुमितित्वं तदाऽवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन वन्ह्यभावावगाहिसंशयस्य पक्षतात्वेन तत्र व्यभिचार इति वाच्यम् ?

संयोगादिपर्याप्तसांसर्गिकविषयताया एव तत्कार्यताऽवच्छेदकत्वेनावच्छेदकावच्छेदेनानुमितावववच्छिन्नसंयोगे सांसर्गिकविषयतापर्याप्त्या व्यभिचाराभावादिति,

नव्यास्तु–नानाविधसंशयानां दीधितिकृदुक्तोक्तानुगतरूपेण हेतुत्वे तन्निष्ठाप्रामाण्यग्रहाणामेकत्रोत्तेजकत्वापत्त्या पर्वतो वन्हिमान्न वेतिसंशये वन्हिः पर्वतवृत्तिर्न वेतिसंशयीयाप्रामाण्यनिर्णयसत्त्वेऽनुमित्यनुपपत्तिः,

एवं वन्हिः पर्वतवृत्तिर्न वेतिसंशये पर्वतो वन्हिमान्न वेतिसंशयीयाप्रामाण्यनिर्णयसत्त्वेऽनुमित्यनुपपत्तिरिति तेषां पृथगेवानुमितिहेतुत्वम् , अव्यवहितोत्तरत्वस्य कार्यताऽवच्छेदककोटौ निवेशाच्च न परस्परजन्यानुमितौ व्यभिचार इति प्राहुः,

अत्र केचित् साध्यनिर्णयनिवर्त्यसंशयः पक्षतेत्यत्र बाधनिर्णयवारकसंशयत्वं न साध्याभावनिर्णयनिवर्त्यत्वं समुच्चयसाधारण्यात्; किन्तु साध्यवत्ताज्ञानप्रतिबन्धकतावत्त्वमेव; प्रतिबन्धकतावत्त्वं च स्वावच्छेदकीभूतविषयतावत्त्वस्वावच्छेदकीभूतभेदप्रतियोगितोभयसम्बन्धेन; बाधनिर्णयस्य पर्वतो वह्निमान्वन्ह्यभाववांश्चेत्यादिसमुच्चयस्य च स्वावच्छेदकीभूतविषयतावत्त्वसम्ब-

न्धेन साध्यवत्ताज्ञानप्रतिबन्धकतावत्त्वेऽपि स्वावच्छेदकीभूतभेदप्रतियोगित्वसम्बन्धेन न तादृशप्रतिबन्धकतावत्त्वं बाधनिर्णयसमुच्चयभेदस्य तादृशप्रतिबन्धकताऽवच्छेदकोटावप्रवेशादिति न तत्रातिप्रसङ्गः, संशयस्य तूक्तोभयसम्बन्धेन तादृशप्रतिबन्धकतावत्त्वमेव, संशयभेदस्य तादृशप्रतिबन्धकताऽवच्छेदकीभूतधर्मावच्छिन्नप्रकारतात्वसम्बन्धावच्छिन्नप्रतियोगिताकोऽप्रामाण्यनिर्णयाभावो निवेश्यते पर्वतो वह्निमान्न वेत्यादिसंशये वह्निमति वन्ह्यभावप्रकारकमित्याद्याकारकाप्रामाण्यनिर्णये वन्ह्यभावादिप्रकारतायां नोपदर्शितसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यनिर्णयाभावो वर्तते तादृशप्रकारतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकीभूतवन्ह्यभावत्वाद्यवच्छिन्नप्रकारतात्वस्य वन्ह्यभावादिप्रकारतायां सत्त्वात्तेन सम्बन्धेन तदानीं तत्र तादृशनिर्णयाभावासत्त्वाद् अन्यसंशयीयाप्रामाण्यनिर्णयदशायां चापरसंशयीयप्रकारतायामुक्तसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यनिर्णयाभावसत्त्वान्न तदानीमनुमित्यनुपपत्तिरिति दीधितिकारोक्तानुगमे न किञ्चिद् बाधकम्,

न च वह्निः पर्वतवृत्तिर्न वेत्यादिसंशयकाले पर्वताभाववति पर्वतप्रकारकमित्याद्यप्रामाण्यज्ञानकालेऽनुमित्यापत्तिः पर्वतवृत्तित्वाभावादिविषयतायामुक्तसम्बन्धेनाप्रामाण्यज्ञानाभावसत्त्वादिति वाच्यम् ?

प्रतिबन्धकताऽवच्छेदकविषयतात्वावच्छेदेन तादृशाभावनिवेशेन तदानीं पर्वतादिविषयतायामुक्ताभावासत्त्वेनोक्तानुमित्या-

पत्तेरसम्भवात् ,

यदि चैवं सति पर्वतो वह्निमान्न वेत्यादिसंशयदशायां जातिमद्वति जातिमदभावप्रकारकमिदमित्यादिज्ञानकालेऽनुमित्यनुपपत्तिः; तदा संशयीयवन्ह्यभावादिप्रकारतायामुक्तसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्यासम्भवात् ,

न च निरवच्छिन्नस्वनिष्ठावच्छेदकताकप्रकारतानिरूपिताधिकरणप्रकारतानिरूपितविशेष्यत्वप्रकारतानिरूपितनिरूपितत्वप्रकारतानिरूपितत्वनिरवच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगितासंसर्गावाच्छिन्नप्रकारतानिरूपितानिरूपितत्वसम्बन्धावाच्छिन्नप्रकारतानिरूपितत्वोभयसम्बन्धेन किञ्चिद्धर्मविशिष्टप्रकारताया अप्रामाण्यप्रकारतापदार्थत्वेन निवेशान्नोक्तदोष इति वाच्यम् ?

तथा सति पर्वतवृत्तित्ववति पर्वतवृत्तित्वाभावप्रकारकमिदमित्याद्याकारकाप्रामाण्यनिर्णयसत्त्वेऽपि वन्हिः पर्वतवृत्तिर्न वेत्यादिसंशयादनुमित्यनुपपत्तेः, तत्रयंशे प्रकारीभूतपर्वतादेर्निरवच्छिन्नप्रकारताविरहात् ,

एवं सुन्दरवन्हिमति तदभावप्रकारकमित्याद्याकारकाप्रामाण्यनिर्णयसत्त्वेऽपि पर्वतो वह्निमान्न वेत्यादिसंशयादनुमित्यनुपपत्तेश्चेति नोक्तप्रकारः साधीयानिति विभाव्यते; तथाऽपि न क्षतिः, साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकसम्बन्धमध्य उक्तोभयसम्बन्धवत्त्वावच्छेदकीभूताभावीयज्ञाननिष्ठप्रतियोगिताऽवच्छेदकविषयिताऽवच्छिन्नप्रतियोगिताकज्ञानाभावत्वरूपसम्बन्धस्यापि निवेशनीयत्वात्, पर्वतो वह्निमान्न वेत्यादिसंशये वह्निमति वन्ह्यभावप्रका-

रकमित्याद्याकारकाप्रामाण्यज्ञानकाले नानुमित्यापत्तिः तादृश-संशये साध्यवत्ताज्ञानप्रतिबन्धकताऽवच्छेदकीभूतवन्ह्यभावविष-यितायास्सत्त्वेऽपि तादृशप्रतिबन्धकताऽवच्छेदकीभूताप्रामाण्यज्ञा-नाभावप्रतियोगिताऽवच्छेदकीभूताप्रामाण्यविषयिताऽवच्छिन्नप्र-तियोगिताकाभावासत्त्वात्,

न चैवमेकविधसंशयीयाप्रामाण्यज्ञानकालेऽन्यविधसंशया-दनुमित्यनुपपत्तिः, तत्र तादृशाप्रामाण्यविषयित्वावच्छिन्नप्रतियो-गिताकाभावासत्त्वेन तद्घटितसम्बन्धेन साध्यवत्ताज्ञानप्रतिब-न्धकताऽवच्छेदकत्वाभावादिति वाच्यम् ?

प्रतिबन्धकतायाः प्रतिबन्धकताऽवच्छेदकभेदेन भिन्नतया तादृशसंशये यादृशप्रतिबन्धकतायाः स्वावच्छेदकीभूतविषयिता-वत्त्वं तादृशप्रतिबन्धकतायाः स्वावच्छेदकीभूताप्रामाण्यज्ञानाभा-वप्रतियोगिताऽवच्छेदकीभूताप्रामाण्यविषयित्वावच्छिन्नप्रतियोगि-ताकाभावसत्त्वेनादोषादिति दीधितिकारोक्तसंशयानुगमं परि-ष्कुर्वन्ति,

अन्ये तु—अप्रामाण्यज्ञानकालेऽपि साध्यसन्देहादनुमितिर्भ-वत्येवेति तस्योत्तेजकत्वाभावात्संशयानुगमः साधुरित्याहुः,

मणिकृतस्तु—साध्यसन्देहो न पक्षता व्याप्तिज्ञानादिना तन्ना-शेन तस्यानुमितिहेतुत्वासम्भवात्,

एवं वह्निव्याप्यवत्पक्षकवह्निसाध्यकस्थलेऽनाहार्यतादृशसं-शयाप्रसिद्धिः,

एवं समानविषयकश्रवणानन्तरं मननात्मकानुमितिबोध-

कवेदानुपपत्तिः,

एवं घनगर्जितेन मेघानुमानानुपपत्तिः,

एतेन व्याप्तिज्ञानादिनाश्यसंशयस्थलेऽप्यनुमित्यव्यवहितपूर्वं साध्यसंशयोत्पत्त्यैवानुमितिः फलबलात्कल्प्यत इत्यपि निरस्तम्,

तस्मात्सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव पक्षता सैव चानुमितिहेतुः, सिषाधयिषाकाले सिद्धिसत्त्वेऽप्यनुमितेरुदयेन सिषाधयिषाविरहवैशिष्ट्यं सिद्धौ विशेषणमिति वदन्ति,

अत्रेदं बोध्यं—यत्र यादृशयादृशानुमित्सासत्त्वे सिद्धिसत्त्वेऽनुमितिस्तत्र तादृशतादृशानुमित्साविरहविशिष्टसिद्ध्यभावो हेतुः, तत्र यासामनुमित्सानामनुगतरूपेणोत्तेजकत्वसम्भवस्तासामनुगतरूपेणैवोत्तेजकत्वं यथा पर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याद्याकारकेच्छानां; तासां पर्वतोद्देश्यकवह्निविधेयकानुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणोत्तेजकत्वसम्भवात्,

यासां तु नानुगतरूपेणोत्तेजकत्वं सम्भवति तासामननुगततत्तद्व्यक्तित्वेनैवोत्तेजकत्वं यथाऽनुमितिर्जायतामित्याद्याकारकेच्छानां, तासामनुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणैवोत्तेजकत्वे पर्वतो वह्निमानितिसिद्धिसत्त्वे पर्वते भूतले च वन्ह्यनुमितिसामग्रीसत्त्वेऽनुमितिर्जायतामितीच्छासत्त्वे पर्वते वन्ह्यनुमित्यापत्तेः,

न चेष्टापत्तिः; तदानीं तादृशसिद्ध्यप्रतिबन्ध्यीभूताया भूतलेवन्ह्यनुमितेरुत्पत्त्याऽपीच्छाविषयसिद्धिसम्भवेन पर्वते वन्ह्यनुमि-

त्युत्पत्तौ मानाभावात्, तदुक्तं दीधितिकृता–यादृशयादृशेच्छासत्त्वे सिद्धिसत्त्वेऽनुमितिस्तावदिच्छाऽभावसमुदायस्य विशेषणत्वान्न दोष इति सर्वसिद्धः पन्थाः,

नव्यास्तु–अनुमितिर्जायतामित्याद्याकारकाननुगतेच्छानामप्यनुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणैवोत्तेजकत्वं न तु तत्तद्व्यक्तित्वेन; तथा सति तावदिच्छाऽभावानां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेणानन्तहेतुताऽऽपत्तेः,

न चैवं तादृशेच्छासत्त्वे पर्वतो वह्निमानितिसिद्धिसत्त्वे भूतले वन्ह्यनुमितिसामग्रीसत्त्वेऽपि पर्वतो वह्निमानित्यनुमित्यापत्तिर्दुर्वारेति वाच्यम्?

तासां तत्तद्व्यक्तित्वेन पर्वते वन्ह्यनुमितौ प्रतिबन्धकत्वोपगमादेवादोषात्,

अथानुमित्साकाल एकदाऽनुमित्यन्तरं पुनरनुमित्यन्तरोत्पादवारणायानुमित्सायां स्वविषयसिद्ध्यनुपहितत्वविशेषणमावश्यकं; तच्च स्वत्वघटिततया तत्तद्व्यक्तिविश्रान्तं; तथा च पर्वते वन्ह्यनुमितिर्जायतामित्याद्यनुगतेच्छानामपि तत्तद्व्यक्तित्वेनोत्तेजकत्वमावश्यकं; कैव कथाऽनुमितिर्जायतामित्याद्यननुगतेच्छानामिति चेद्?

न–उक्तापत्तिवारणायानुमित्सायां कालिकसम्बन्धावच्छिन्नस्वाधिकरणत्वस्वविषयिताशालित्वोभयसम्बन्धेनानुमितिविशिष्टान्यत्वस्यैव विशेषणत्वात्, तत्र च स्वत्वस्य परिचायकतया सम्बन्धघटकतयाऽनिवेशान्न तत्तद्व्यक्तिविश्रान्तता,

न चैवं यत्र पर्वते चत्वरे च वन्ह्यनुमितिर्जायतामिति समूहालम्बनेच्छा तत्र पर्वते वन्ह्यनुमित्यनन्तरं चत्वरे वन्ह्यनुमितिसामग्र्या चत्वरे वन्ह्यनुमितिर्न स्याद् उक्तानुमित्साया उक्तोभयसम्बन्धेनानुमितिविशिष्टत्वादिति वाच्यम् ?

तदुद्देश्यकतद्विधेयकानुमितिजनकतावच्छेदककोटौ तादृशानुमितिविशिष्टान्यत्वस्यानुमित्सायां निवेशनीयत्वात्,

अथैवमनुमितिद्वयं जायतामितीच्छाकाल एकानुमित्यनन्तरमपरानुमित्यनुदयापत्तिस्तस्या उक्तोभयसंबन्धेनानुमितिविशिष्टत्वादिति स्वविषयसिद्ध्यनुपहितत्वमेवेच्छाविशेषणं वाच्यमित्यननुगमतादवस्थ्यम्,

न च तन्निवेशेऽपि कथमुक्तेच्छासंग्रहस्तस्याः स्वविषयसिद्ध्युपहितत्वादिति वाच्यम् ?

तस्य स्वविषयताऽवच्छेदकावच्छिन्नासिद्ध्यनुपहितत्वार्थकतया तस्याः स्वविषयताऽवच्छेदकानुमितिद्वयत्वावच्छिन्नानुपहिततया संग्रहसंभवात्,

न च सिद्धिपरामर्शानुमितिद्वयं जायतामितीच्छापरमार्शजन्यानुमितीनां मिलनासंभवात् कथं तादृशेच्छाबलाद् द्वितीयानुमितिरिति वाच्यम् ?

यत्र तादृशेच्छाऽनन्तरं पर्वतो वन्हिमान् वन्हिव्याप्यधूमवानिति समूहालम्बनानुमितिस्तत्र द्वितीयानुमितिसंभवादिति चेद्?

न—तादृशेच्छाया अगत्या तद्व्यक्तित्वेनैवोत्तेजकत्वात् तदतिरिक्तानुमित्सानामेवोक्तानुगतरूपेणोत्तेजत्वादिति प्राहुः,

अथ यत्र सिद्ध्यात्मकधूमपरामर्शसत्त्व आलोकादिलिङ्ग-कानुमित्साऽस्ति तत्रापि धूमलिङ्गकवन्ह्यनुमित्यापत्तिः वन्ह्यनु-मित्साविरहविशिष्टसिद्ध्यभावसत्त्वात्,

न चेष्टापत्तिः,

तादृशानुमित्युत्पत्त्याऽपीच्छाविषयसिद्धेरसंभवादिति चेत् ?

न—यद्येकलिङ्गकानुमित्साकालेऽसत्यामपि सिद्धौ विनाऽ-न्यलिङ्गकानुमित्सां नान्यलिङ्गकानुमितिस्तदा तल्लिङ्गकानुमितिं प्रति तल्लिङ्गकानुमित्साविरहाविशिष्टा तदन्यलिङ्गकानुमित्सा का-मिनीजिज्ञासाऽऽदिवत् पृथक् प्रतिबन्धिकेत्यभ्युपगमेनोक्तदोषा-भावात्,

इत्थं च विषयविशेषनियन्त्रितेच्छानामुत्तेजकत्वानुरोधेन बाधादिस्थलेऽपि विशिष्य प्रतिबन्ध्यप्रतिबन्धकभावो न कल्प्यते तुल्ययुक्त्या तत्रापि तद्विषयकज्ञाने तद्भदन्यविषयकज्ञानेच्छा-याः प्रतिबन्धकत्वकल्पनेनैव निर्वाहादिति महालाघवात् ,

यदि चैकलिङ्गकानुमित्साकालेऽसत्यां सिद्धौ विनाऽप्यन्य-लिङ्गकानुमित्सामन्यलिङ्गकानुमितिस्तदा धूमलिङ्गकपरामर्शकाले सिद्धिसत्त्व आलोकादिलिङ्गकेच्छाकाले धूमलिङ्गकानुमितिवार-णाय धूमलिङ्गकानुमितिं प्रति तद्धूमलिङ्गकेच्छाविरहविशिष्टसि-द्ध्यभावत्वादिना लिङ्गविशेषनियन्त्रितपक्षताया हेतुत्वं बोध्यम् ,

अथैवं सिद्ध्यात्मकधूमपरामर्शसत्त्वे धूमलिङ्गकेच्छाया अस-त्त्वेऽपि पर्वते वन्ह्यनुमितिर्जायतामित्यादिलिङ्गोदासीनेच्छासत्त्वे धूमलिङ्गकानुमितिर्न स्यादुत्तेजिकाया धूमलिङ्गकेच्छाया अभा-

वादिति चेद् ?

न–धूमलिङ्गकानुमितिजनकतायां धूमलिङ्गकेच्छाया इवो-क्तलिङ्गोदासीनेच्छानामप्युत्तेजकत्वोपगमेनादोषात् ,

यत्तु–दीधितिकाराणां लिङ्गोदासीनेच्छासाधारणेन तदन्य-मात्रलिङ्गकानुमितीच्छाऽतिरिक्तानुमितीच्छात्वेन तल्लिङ्गकेच्छा-या उत्तेजकत्वोपगमेनोक्तदोषवारणम् ,

तच्चिन्त्यं–तथा सति तावतामन्यलिङ्गकानुमितीच्छाभेदाना-मेकत्र निवेशे विशेष्यविशेषणभावे विनिगमनाविरहेण नाना-विधकार्यकारणभावापत्तेः,

वस्तुतस्तु–सामान्यतः पर्वतोद्देश्यकवह्निविधेयकानुमितौ तल्लिङ्गकेच्छातदन्यलिङ्गकेच्छालिङ्गोदासीनेच्छासाधारण्येनानुमि-त्सामुत्तेजकीकृत्य पक्षताया एकमेव हेतुत्वं कल्प्यते सिद्ध्यात्म-कधूमपरामर्शकाल आलोकानुमितिच्छाविरहविशिष्टसिद्धिवि-शिष्टालोकलिङ्गकानुमितीच्छात्वादिना पृथक्प्रतिबन्धकत्वं वा-च्यमिति न कोऽपि दोषः,

अथ पूर्वकल्पे लिङ्गभेदेन पक्षताया एव हेतुत्व एतत्कल्पे चान्यलिङ्गकेच्छारूपप्रतिबन्धकाभावस्य लिङ्गभेदेन पक्षताहेतुत्वं-चाधिकमिति पूर्वकल्प एव समीचीनो लाघवादिति चेद् ?

न–लिङ्गभेदेन पक्षताहेतुतामते सिद्ध्यात्मकधूमालोकोभयलिङ्गक-परामर्शजन्यत्वरूपधूमलिङ्गकत्वाक्रान्तत्वेन तत्र व्यभिचार-वारणायालोकपरामर्शविशिष्टालोकलिङ्गकेच्छाया अप्युत्तेजकत्वं-वाच्यम् ,

एवं तुल्ययुक्त्या भस्मादिलिङ्गकपरामर्शविशिष्टभस्मादिलिङ्गकेच्छानामपीति, षरामर्शेच्छयोरिच्छानां चैकत्र निवेशेन विशेष्यविशेषणभावे विनिगमनाविरहेण बहुतरकारणताऽऽपत्तिरिति पक्षताया एकहेतुत्वमुपेक्ष्यान्यलिङ्गकेच्छाकालेऽनुमितिवारणाय तत्तल्लिङ्गकानुमितिं प्रति तत्तल्लिङ्गकेच्छाविरहविशिष्टसिद्धिकालीनालोकलिङ्गकेच्छाऽभावत्वादिनाऽन्यलिङ्गकेच्छारूपप्रतिबन्धकाभावहेतुताकल्पनस्यैवोचितत्वाद् अत एव दीधितिकारेणाप्ययं पक्षश्चरममादृतः,

न चैवमप्यन्यलिङ्गकेच्छाकालीनसिद्ध्यात्मकधूमालोकोभयपरामर्शादिजन्यानुमितावप्युक्तरीत्या धूमलिङ्गकत्वसत्त्वेन तत्रान्यलिङ्गकेच्छाऽभावहेतुतायां व्यभिचारो दुर्वार इति वाच्यम् ?

तत्तदन्यलिङ्गकेच्छाप्रतिबन्धकतायां तत्तदन्यलिङ्गकपरामर्शस्योत्तेजकत्वमुपेत्य धूमलिङ्गकानुमितित्वाद्यवच्छिन्नं प्रति धूमालिङ्गकानुमितीच्छाविरहविशिष्टसिद्धिकालीनालोकपरामर्शाभावविशिष्टालोकालिङ्गकेच्छात्वादिनाऽन्यलिङ्गकेच्छायाः प्रतिबन्धकत्वोपगमेनादोषाद्; अत एवात्र तादृशसिद्धिकालीनेच्छात्वादिनैव सर्वासामन्यलिङ्गकेच्छानामेकमेव प्रतिबन्धकत्वमुचितं लाघवात्, न तु तादृशसिद्धिकालीनालोकलिङ्गकेच्छात्वादिना पृथक् प्रतिबन्धकत्वं गौरवाद्,

न चैवं सिद्धिकालीनघटादीच्छानामपि धूमलिङ्गकानुमितौ प्रतिबन्धकत्वापत्तिरिति वाच्यम् ?

धूमालिङ्गकेच्छायामसत्यामिष्टापत्तेः; तस्यां सत्यां च तस्या

उत्तेजकत्वेन धूमालिङ्गकानुमितौ घटादीच्छानामप्रतिबन्धकत्वो-पपत्तेः,

अथैवं पर्वते वह्न्यनुमितिर्जायतामित्यादिलिङ्गोदासीनेच्छाया अपि धूमलिङ्गकानुमितौ प्रतिन्धकत्वापत्तिरित्यालोकलिङ्गकेच्छात्वादिना प्रतिबन्धकत्वमावश्यकमिति चेद् ?

न-धूमलिङ्गकेच्छावल् लिङ्गोदासीनेच्छाया अपीच्छाप्रतिबन्धकतायामुत्तेजकत्वोपगमात्,

न चैतदेव गौरवमिति वाच्यम् ?

एवमप्यालोकलिङ्गकेच्छात्वादिना लिङ्गभेदेनान्यलिङ्गकेच्छायाः पृथक् पृथक् प्रतिबन्धकत्वापेक्षया लाघवानपायात्,

किञ्चालोकलिङ्गकेच्छात्वादिना प्रतिबन्धकत्वेऽप्युक्तलिङ्गोदासीनेच्छाया उत्तेजकत्वकल्पनमावश्यकम्; अन्यथा लिङ्गोदासीनेच्छाकालीनालोकादिलिङ्गकेच्छाकाले धूमलिङ्गकानुमितिप्रतिबन्धापत्त्या धूमालिङ्गकानुमित्यनुदयप्रसङ्गात्,

न चेष्टापत्तिः; तथा सति पूर्वोक्तलिङ्गविशेषनियन्त्रितपक्षताकल्पेन सहात्र कल्पे फलवैषम्यापत्तेः, तत्कल्प उक्तस्थले धूमालिङ्गकानुमितेरुदयात्,

न चात्र मानाभाव इति वाच्यम् ?

तथा सत्येवोक्तस्थले धूमालिङ्गकानुमित्युदयानुरोधेनोक्तालिङ्गोदासीनेच्छासङ्ग्रहाय दीधितिकारस्य तल्लिङ्गकानुमितिं प्रति तल्लिङ्गकानुमितीच्छोत्तेजिकेत्यभिहितपक्षं परित्यज्य; तदन्यमात्रलिङ्गकानुमितीच्छाऽतिरिक्तानुमितीच्छा वाच्येत्यनेन लिङ्गो-

द्यासीनेच्छासाधारणरूपेणोत्तेजकतापक्षावलम्बनस्य सङ्गतेरन्यथा तदसङ्गतेरिति परास्तम्,

उक्तरीत्योभयलिङ्गकपरामर्शजन्यधूमलिङ्गकानुमितौ व्यभिचारवारणाय तत्तदन्यलिङ्गकेच्छाप्रतिबन्धकतायामालोकपरामर्शादेरुत्तेजकत्वस्यावश्यकतया तादृशसिद्धिकालीनेच्छात्वेन प्रतिबन्धकत्वे सर्वेषामालोकादिपरामर्शानामेकत्रोत्तेजकत्वापत्त्या नानाप्रतिबन्धकत्वापत्त्या तादृशसिद्धिकालीनालोकपरामर्शाभावविशिष्टालोकलिङ्गकेच्छात्वादिनैवान्यलिङ्गकेच्छायाः प्रतिबन्धकत्वस्योचितत्वात्,

किञ्च धूमलिङ्गकेच्छाविरहविशिष्टालोकादिपरामर्शाभावविशिष्टसिद्धिकालीनेच्छात्वेन प्रतिबन्धकत्वे सिद्ध्यात्मकधूमालोकोभयलिङ्गकपरामर्शकाले भस्मलिङ्गकानुमितित्सासत्त्वे भस्मलिङ्गकपरामर्शसत्त्वे धूमलिङ्गकानुमित्यापत्तिः तदाऽऽलोकपरामर्शस्यैवोत्तेजकस्य सत्त्वेनालोकादिपरामर्शाभावविशिष्टेच्छारूपप्रतिबन्धकाभावस्य सत्त्वादित्यालोकादिलिङ्गकपरामर्शस्यालोकादिलिङ्गकानुमित्साप्रतिबन्धकतायामुत्तेजकत्वमुपगम्य धूमलिङ्गकानुमितिं प्रति धूमलिङ्गकानुमितीच्छाविरहविशिष्टसिद्धिकालीनालोकपरामर्शाभावविशिष्टालोकालिङ्गकानुमितीच्छात्वादिनाऽन्यलिङ्गकेच्छानां पृथक् पृथक् प्रतिबन्धकत्वकल्पनमेवोचितमिति,

अत्रेदमवधेयम् लिङ्गविशेषनियन्त्रितपक्षताहेतुतामत उक्तरीत्या समूहालम्बनपरामर्शजन्यानुमितौ व्यभिचारवारणाय यथा

तत्तल्लिङ्गकेच्छातत्तदन्यलिङ्गकपरामर्शविशिष्टतत्तदन्यलिङ्गकेच्छाकूटानामेकत्रोत्तेजकत्वं तथा तादृशसिद्धिकालीनान्यलिङ्गकानुमितीच्छाप्रतिबन्धकतायामपि तदन्योभयलिङ्गकेच्छाकालीनसिद्ध्यात्मकसमूहालम्बनपरामर्शजन्यतल्लिङ्गकानुमितौ परामर्शाविषयतदन्यलिङ्गकेच्छारूपप्रतिबन्धकाभावहेतोर्व्यभिचारवारणाय तदावश्यकमित्येतत्कल्पे लाघवानवकाशः, व्यक्तीभविष्यति चैतदनुपदमेव,

किञ्चान्यलिङ्गकेच्छाकालीनसिद्ध्यात्मकधूमालोकोभयपरामर्शादिजन्यानुमितावुक्तरीत्याऽऽलोकलिङ्गकेच्छाऽऽद्यभावकारणताया व्यभिचारवारणायालोकपरामर्शाद्यभाववैशिष्ट्यस्यालोकलिङ्गकेच्छाऽऽदौ निवेशापेक्षया वरं धूमलिङ्गकानुमितिं प्रति धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिकालीनालोकपरामर्शाभावत्वादिनैव प्रतिबन्धकत्वमाद्रियतां लाघवात्; न तु धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिकालीनालोकलिङ्गकपरामर्शाभावविशिष्टालोकलिङ्गकेच्छात्वादिना गौरवात्,

अथैवं यत्र सिद्ध्यात्मको धूमभस्मगोचरसमूहालम्बनपरामर्शोऽस्ति भस्मलिङ्गकानुमित्साऽप्यस्ति; आलोकपरामर्शश्च नास्ति तत्र जायमानाया भस्मलिङ्गकानुमितेर्धूमपरामर्शजन्यत्वरूपधूमालिङ्गकत्वाक्रान्ततया तादृशालोकपरामर्शाभावरूपप्रतिबन्धकसत्त्वेन तादृशालोकपरामर्शाभावरूपप्रतिबन्धकाभावहेतुतायां व्यभिचारो दुर्वारः, अन्यलिङ्गकेच्छायाः प्रतिबन्धकत्वे तु तत्रालोकपरामर्शाभावविशिष्टालोकलिङ्गकेच्छारूपप्रतिबन्धकाभावसत्त्वान्न व्य-

भिचार इति चेद् ?

न—तत्रालोकपरामर्शाभावप्रतिबन्धकतायां भस्मलिङ्गकपरामर्शविशिष्टभस्मलिङ्गकेच्छाऽऽदीनामुत्तेजकत्वोपगमेन व्यभिचाराभावात्,

न चैवं तादृशपरामर्शविशिष्टतादृशेच्छानामुत्तेजकत्वे गौरवमिति वाच्यम् ?

अन्यलिङ्गकेच्छात्वादिना प्रतिबन्धकतामतेऽपि तत्र तादृशपरामर्शविशिष्टतादृशेच्छानामुत्तेजकत्वस्यावश्यकत्वाद् अन्यथा यत्र धूमभस्मगोचरसमूहालम्बनपरामर्शोऽस्ति; अस्ति च सिद्धिकालीनालोकलिङ्गकानुमितीच्छा; आलोकपरामर्शश्च नास्ति भस्मलिङ्गकानुमितीच्छाऽप्यस्ति तत्र जायमानाया भस्मलिङ्गकानुमितेरपि धूमलिङ्गकत्वेन धूमलिङ्गकानुमितीच्छाविरहविशिष्टसिद्धिकालीनालोकलिङ्गकपरामर्शाभावविशिष्टालोकलिङ्गकानुमितीच्छारूपप्रतिबन्धकसत्त्वेन तदभावरूपकारणासत्त्वेन व्यभिचारस्य दुर्वारत्वात्; तस्मादन्यलिङ्गकेच्छाप्रतिबन्धकतामते तदुत्तेजकत्वस्यावश्यकतया तदुपेक्ष्यान्यलिङ्गकपरामर्शाभावप्रतिबन्धकतापक्ष एव श्रेयान्,

वस्तुतस्तु—उपदर्शितरीत्या धूमादिलिङ्गकेच्छानां तदन्यतत्तल्लिङ्गकपरामर्शविशिष्टतत्तल्लिङ्गकेच्छां चोत्तेजकीकृत्य लिङ्गभेदेन पक्षताहेतुत्वं पक्षतैकहेतुतासहितमन्यलिङ्गकेच्छाऽभावहेतुत्वं चानादृत्य सामान्यतः पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति धूमादितत्तल्लिङ्गकपरामर्शविशिष्टतत्तल्लिङ्गकेच्छाविरहकूटविशिष्ट-

सिद्ध्यभावरूपपक्षताया एकहेतुत्वमेव युक्तमिति सारम् ,

अथ सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य केन सम्बन्धेन हेतुता न तावद्विशेषणतासम्बन्धेन तथा विशिष्टाभावस्यानतिरिक्ततामते सिषाधयिषाप्रयुक्तताद्दशाभावस्य सिषाधयिषारूपस्य तेन सम्बन्धेन हेतुत्वासम्भवाद्; नापि समवायेन सिद्ध्यभावप्रयुक्तताद्दशाभावस्य समवायेन हेतुत्वासम्भवाद् नाप्यन्यतर सम्बन्धेन; अन्यतरत्वेन सम्बन्धत्वे मानाभावादिति चेद् ?

न—विशेषणताविशेषसम्बन्धेनैव ताद्दशविशिष्टाभावस्य हेतुत्वात् ,

न च यत्र सिषाधयिषा साध्यनिश्चयश्च तिष्ठति तत्रानुमित्यनुत्पादप्रसङ्गः; तत्र सिषाधयिषारूपविशिष्टाभावस्य विशेषणतया हेतुत्वासम्भवादिति वाच्यम् ?

साध्यनिश्चयस्याव्याप्यवृत्तितया तत्र साध्यनिश्चयसत्त्वेऽपि साध्यनिश्चयाभावस्य सुलभतया तस्य च विशेषणताविशेषसम्बन्धेन हेतुत्वसम्भवात् ,

न चैवं यत्र सिषाधयिषा नास्ति साध्यनिश्चयश्चास्ति तत्राप्यनुमित्यापत्तिः साध्यनिश्चयस्याव्याप्यवृत्तितया ताद्दशताद्दशसाध्यनिश्चयसत्त्वेऽपि साध्यनिश्चयाभावस्य सुलभत्वादिति वाच्यम् ?

सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताको यः सिषाधयिषाविरहविशिष्टताद्दशसाध्यनिश्चयाभावस्तद्विशिष्टो यस्ताद्दशसाध्यनिश्चयाभावस्तस्यैव तत्त्वेन हेतुत्वोपगमाद्; उक्तस्थली-

यतादृशसाध्यनिश्चयाभावस्योक्तविशेषणविशिष्टत्वाभावेन तादृशविशेषणविशिष्टतादृशसाध्यनिश्चयाभावस्यासत्त्वेनानुमित्यापत्तेरभावात्,

न च तादृशसाध्यनिश्चयाभावे तादृशविशेषणवैशिष्ट्यनिवेशे गौरवमिति वाच्यम्?

ज्ञानमात्रस्याव्याप्यवृत्तितयाऽगत्या तद्विशेषणनिवेशस्यावश्यकत्वेन प्रामाणिकतया तादृशगौरवस्यादोषत्वाद्,

वस्तुतस्तु तादृशविशेषणनिवेशनमावश्यकम्; अन्यथा ध्वंसप्रागभावाधिकरणे सामान्याभावस्यासत्त्वेन तादृशसाध्यनिश्चयत्वावच्छिन्नाभावनिवेशासम्भवेन साध्यनिश्चयप्रतियोगिकाभावमात्रस्यैव निवेशनीयतयोभयाभावादिकमादायातिप्रसङ्गापत्तेः; तादृशविशेषणवैशिष्ट्यनिवेशे तूभयाभावादेस्तदनाक्रान्तत्वेन दोषाभावात्,

वस्तुतश्चिन्तामणिकारमते विशिष्टाभावस्यातिरिक्ततयोक्तलक्षणस्य च तदीयत्वेन न कोऽप्युक्तदोष इति नोक्तविशेषणवैशिष्ट्यं निवेशनीयं प्रयोजनाभावाद्, ध्वंसप्रागभावयोस्सामान्याभावविरोधेऽपि विशिष्टाभावेनाविरोधात्,

अथ तथाऽपि तादृशसाध्यनिश्चयसत्त्वे तस्याव्याप्यवृत्तितया तदभावसत्त्वादनुमित्यापत्तिर्दुर्वारेति चेद्?

न—स्वसमानाधिकरणैकत्वसम्बन्धावच्छिन्नप्रतियोगिताकतादृशसाध्यनिश्चयाभावस्य हेतुत्वेन ज्ञानादेस्समवायेनाव्याप्यवृत्तित्वेऽप्युक्तसम्बन्धेन व्याप्यवृत्तितयोक्तदोषाभावात्,

यद्वा तादृशसाध्यनिश्चयविशिष्टात्मत्वस्यैव प्रतिबन्धकतया तदभावहेतुतया न दोषः,

न च तथाऽपि कायव्यूहस्थल एकशरीरावच्छेदेन साध्यनिश्चयसत्त्वे शरीरान्तरावच्छेदेनानुमित्यनुपपत्तिरिति वाच्यम् ?

अगत्या समवायेन तत्तच्छरीरावच्छिन्नतादृशसाध्यनिश्चयाद्यभावस्य विशेषणताविशेषसम्बन्धेन हेतुत्वात्,

यत्तु–अवच्छेदकतासम्बन्धेनानुमितावच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताकतादृशसाध्यानिश्चयाभावस्य हेतुत्वाद् न कोऽपि दोष इति,

तदसत्–तथा सति परपुरप्रवेशस्थलेऽभिभाव्याभिभावकयोरन्यतरस्य तादृशसाध्यनिश्चयेऽन्यतरस्यावच्छेदकैक्येनानुमितिस्यनुपपत्तेरिति संक्षेपः,

अधिकं पक्षताविचारेऽस्माभिर्विस्तरेणोक्तमिति नेह प्रस्तूयते,

उपाध्यायास्तु सिषाधयिषाविरहविशिष्टसिद्ध्यनुमानातिरिक्तसाधकमानयोरन्यतराभावरूपा पक्षताऽनुमितिहेतुस्तेन सिद्धिसत्त्वे प्रत्यक्षसामग्रीसत्त्वे चानुमित्यनुत्पादनिर्वाह इत्याहुः,

अत्र दीधितिकृतः–यदि साधकमानं सिद्धिस्वरूपयोग्यं तदा चक्षुरादिसत्त्वेऽनुमित्यनुपपत्तिः, यदि च सिद्ध्युपहितं तदा सिद्धेः पूर्वं तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तिः; अनुमानातिरिक्तेत्यस्य वैयर्थ्यं च,

वस्तुतः स्वतन्त्रान्वयव्यतिरेकाभ्यां तादृशसिद्ध्यभावस्य तादृशसाधकमानाभावस्य च प्रत्येकमेव हेतुत्वम् अन्यथा बाधा-

देरप्यत्रैवान्तर्भावप्रसङ्गादिति वदन्ति,

अत्रानुमानातिरिक्तेत्यादेः साधकमानत्वं सिद्ध्युपहितत्वम् उपधायकतासम्बन्धेन सिद्धिमत्त्वमिति यावत्, तथा चानुमित्यव्यवहितपूर्वक्षणे साधकमानासत्त्वेनानुमानमादाय न दोषः किमर्थमनुमानातिरिक्तत्वविशेषणमित्यर्थः,

नन्वत्रानुमानातिरिक्तेत्यस्य वैयर्थ्यमुद्भावितम्; उपधायकतासम्बन्धेन सिद्धिमत्त्वरूपसाधकमानत्वविशिष्टार्थकसाधकमानेत्यस्यापि वैयर्थ्यं कथं नोद्भावितं साधकमानत्वस्योपधायकतासम्बन्धेन सिद्धिमत्त्वार्थकत्वे सिद्धिविशिष्टचक्षुरादेरेव प्रतिबन्धकत्वेन यदा सिद्धिविशिष्टा प्रत्यक्षादिसामग्री तदा सिद्धिप्रतिबन्धकतयैवोपपत्तेस्तस्यापि वैयर्थ्योद्भावनसम्भवात्,

न च सिद्ध्युपहितत्वं स्वजन्यसिद्ध्युत्तरकालीनत्वं तथा च तददाने यत्र सिद्धिर्नास्ति; अथ च चक्षुरुत्तरकालीनसिद्धिकालीनचक्षुषि सत्येव प्रत्यक्षसामग्री वर्त्तते तदाऽनुमित्यापत्तिवारणाय तस्यावश्यकत्वमिति न वैयर्थ्यमिति वाच्यम्?

सिद्ध्युपहितत्वस्य तदर्थकत्वे चक्षुरुत्तरसिद्धिकालीनचक्षुषि सत्येव प्रत्यक्षसामग्र्यसत्त्वेऽनुमित्यनुत्पादापत्तेरिति चेद्?

न—सिद्धेः प्रतिबन्धकतायामनुमितिविषयकेच्छात्वेनैवेच्छाया उत्तेजकतया सिद्धिसत्त्वे पर्वतविशेष्यकवह्निप्रकारकज्ञानं जायतामितीच्छासत्त्वे सिद्धिविशिष्टचक्षुरादिघटितप्रत्यक्षसामग्रीसत्त्वेऽनुमित्यापत्तिवारणायानुमितित्वप्रकारकेच्छाविरहविशिष्टसाधकमाननिवेशस्यावश्यकत्वादिति न तद्वैयर्थ्योद्भावनं कृतं दीधिति-

कृतेति समासः,

ननु तथाऽपि बाधादेरित्यादिदीधितिग्रन्थस्य बाधादिक-मप्यत्र निवेश्यानुमितौ बाधादिसिद्धिसाधकमानान्यतमत्वेनैकप्र-तिबन्धकत्वसम्भवे स्वातन्त्र्येण प्रतिबन्धकत्वानुपपत्तिरित्येवार्थः, स चासंगतः, पर्वतोद्देश्यकवह्निविधेयकत्वस्य तादृशान्यतमप्रतिब-न्ध्यताऽवच्छेदकत्वे वह्निमान्पर्वतो घटवानित्यनुमितेर्बाधाप्रतिब-न्ध्यत्वापत्तिः; अप्रामाण्यज्ञानानास्कन्दितपरामर्शकालीनपर्वतो-वह्न्यभाववानिति वह्निप्रकारकत्वस्य तत्त्वे तादृशानुमितेः प-र्वतो वह्निमानितिसिद्धिप्रतिबन्ध्यत्वापत्तिरिति बाधादेः स्वतन्त्रप्र-तिबन्धकत्वस्यावश्यकत्वादिति चेद् ?

अत्र केचिद् बाधादेरित्यादिना वह्न्यभाववन्निष्ठाविशेष्यता-निरूपितसंयोगसम्बन्धावच्छिन्नवह्निप्रकारताशालीदमित्यप्रामा-ण्यज्ञानास्कन्दितपरामर्शकालीनपर्वतो वह्न्यभाववानितिबाधादि-कमन्तर्भाव्यान्यतमत्वेनैकप्रतिबन्धकत्वापत्तिरुक्ता; तत्र च न दोषः, पर्वतोद्देश्यकवह्निविधेयकत्वस्यैव तत्प्रतिबन्ध्यताऽवच्छे-दकत्वात् ,

न चैवमुक्तानुमितेर्बाधाप्रतिबन्ध्यत्वापत्तिरिति वाच्यम् ?

इष्टापत्तेः, तादृशबाधकाल उक्तानुमितिजनकपरामर्शे धर्मिता-ऽवच्छेदकांशेऽप्रामाण्यज्ञानस्यावश्यकतया तादृशज्ञानानास्कन्दित-परामर्शरूपकारणाभावेनोक्तानुमित्यापत्त्यसम्भवात् ,

न च पर्वतो वह्निमानित्यनुमितेरुक्तबाधाप्रतिबन्ध्यत्वान्नो-क्तं साध्विति वाच्यम् ?

पर्वतो वन्हिमानित्यनुमितेर्नीलपर्वतो वन्ह्यभाववानिति बाधस्येवोक्तबाधस्यापि प्रतिबन्ध्यत्वसम्भवात्,

न चान्यतमत्वस्याननुगततया तेन रूपेणैकप्रतिबन्धकत्वापत्तिरूपदूषणं नोपाध्यायमते सम्भवतीति वाच्यम्?

अन्यतरत्वस्यापि तथात्वेन तेषां तेन रूपेणैकप्रतिबन्धकत्वोपगमस्याप्यसंगतेः, अखण्डाभावनिवेशक्रमेणोपपत्तेश्च प्रकृतेऽपि तुल्यत्वादिति वदन्ति,

अपरे तु-अनुमितिं प्रति तादृशान्यतराभावस्य तद्व्यक्तित्वेन हेतुत्वकल्पनमित्येवोपाध्यायमतानिगर्वः, अन्यथाऽन्यतरत्वघटकीभूतपदार्थानां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यप्रसङ्गात्,

न चाभावस्य तद्व्यक्तित्वेन हेतुत्वं सिद्धान्तविरुद्धमिति वाच्यम्?

निर्युक्तिकसिद्धान्तस्याश्रद्धेयत्वात्,

इत्थं चानुमितिं प्रति बाधादिघटिततादृशान्यतमाभावस्यापि तद्व्यक्तित्वेन हेतुत्वकल्पने निर्वाहादनुमितिं प्रति बाधस्यापि स्वतन्त्रप्रतिबन्धकत्वविलोपप्रसङ्गादित्यभिप्रायेणाह—बाधादेरिति।

न च तादृशान्यतमाभावस्य तद्व्यक्तित्वेन हेतुत्वे कार्यताऽवच्छेदकैक्यासंभवान्नेदं साधिविति वाच्यम्?

उपाध्यायमते पर्वतो वह्निमानित्यनुमितिं प्रति पर्वतो वह्निमानित्यादिसिद्ध्यादिघटितान्यतराभावस्य वह्निमान्पर्वतो घटवानित्यनुमितिं प्रति वह्निमान्पर्वतो घटवानितिसिद्ध्यादिघटिता-

न्यतराभावस्य तद्व्यक्तित्वेन हेतुत्वकल्पनस्यावश्यकतयोभयत्रैव बाधादिकं निवेश्य तद्घटितान्यतमाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वकल्पनेन काप्यदोषादित्याहुः,

नव्यास्तु-बाधादेरप्यत्रैवान्तर्भावप्रसङ्गादिति दीधितावेवशब्द इवार्थपरः,

एवं च यद्युपाध्यायमते तादृशान्यतराभावत्वेनानुमितौ हेतुत्वं कल्प्यते तदा तद्वदेव बाधादेरप्यन्यत्रान्तर्भावापत्तिः; बाधतदभावव्याप्यवत्ताज्ञानावच्छेदकधर्मदर्शनघटितान्यतमाभावत्वेनैव हेतुत्वोपपत्तौ तेषां स्वतन्त्रप्रतिबन्धकत्वविलोपप्रसङ्गइत्याशयान्न कोऽप्युक्तदोष इति प्राहुरिति दिक्,

प्राभाकरास्तु—पक्षता नानुमितिहेतुः मानाभावात्,

न चैवं सिद्धिकालेऽनुमित्यापत्तिरिति वाच्यम्?

इष्टत्वादिति वदन्ति,

तदसत्—उत्पन्नानुमितिव्यक्तेः पुनरुत्पादवारणाय पक्षताहेतुत्वस्यावश्यकत्वादित्यधिकमस्मत्कृतपक्षतावादे द्रष्टव्यं, तस्मान्निर्व्यूढव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानमिति,

अथ किमनुमितेः करणम्?

अत्राचार्यानुयायिनः—ज्ञायमानं लिङ्गमनुमितिकरणम्,

न च तत्र मानाभावः; लिङ्गमात्रकरणत्वे तदज्ञानदशायामप्यनुमितिप्रसङ्ग इति तज्ज्ञानस्य करणत्वं वाच्यं; तथा च विशिष्टकारणताग्राहकं मानमसति बाधके विशेषणस्यापि कारणत्वं-

ग्राहयतीति न्यायेन लिङ्गस्यापि तद्धेतुत्वसिद्धेः,

किञ्च धूमवान् पर्वतो वह्निमानितिधूमसमानकालीनवह्निविषया धूमविशेषणिकाऽनुमितिर्ज्ञायमानविशेषणजन्या विशेषणसमकालविशेष्यविषयाशाब्दविशिष्टज्ञानत्वाद् दण्डी पुरुषो गच्छतीत्यादिप्रत्यक्षवदित्यनुमानेन पक्षधर्मताबलाद्धूमादिलिङ्गजन्यत्वसिद्धिः,

अत्र पक्षे प्रथमविशेषणमाचार्यमतेऽनुमित्याकारप्रदर्शनाय द्वितीयं स्वरूपासिद्धिवारणाय, तृतीयं पक्षधर्मताबलसंपत्तये,

अथात्र हेतौ विशेषणशब्देन दण्डादेरुपादाने स्वरूपासिद्धिर्धूमादेरुपादाने दृष्टान्तासिद्धिरिति चेद् ?

अत्र दीधितिकृतः—विशेषणं धर्मिताऽवच्छेदकं विशेष्यं च विधेयं; तथा च विधेयताऽवच्छेदकावच्छिन्नं यद्धर्मविशिष्टं यत्समानकालीनत्वेनावगाहते याऽशाब्दी बुद्धिः सा ज्ञायमानतद्धर्मजन्येति पर्यवसितोऽर्थः, धूमकालीनवह्निमानित्यादौ च विधेयताऽवच्छेदकधूमकालीनवह्नित्वावच्छिन्नं न धूमकालीनत्वेन भासते परं तु वह्नित्वावच्छिन्नधूमवानयं धूमकालीनवह्निमान्पर्वतो वह्निमानालोकादित्यादौ च न धूमवत्त्वविशिष्टे धूमकालीनवह्निमत्त्वं भासते किंतु तादृशविशिष्टपक्षताऽवच्छेदकवति वह्निमत्त्वमिति वदन्ति,

अत्र विशेषणविशेष्यपदयोर्धर्मिताऽवच्छेदकविधेयपरत्वे धर्मिताऽवच्छेदकीभूतयद्धर्मसमानकालीनतया विधेयावगाहिनी याऽशाब्दबुद्धिरिति हेतुदलयथाश्रुतार्थः, तत्र पर्वतो धूमकालीनवह्निमानित्याकारकधूमान्यलिङ्गकानुमितौ धूमस्य धर्मिताऽवच्छेद-

कत्वाभावेन व्यभिचारवारणासंभवेऽपि धूमवान्पर्वतो धूमकालीनवह्निमानित्याकारिकायां तादृशानुमितौ व्यभिचारो दुर्वार इति तथा चेत्यादिना निष्कृष्टार्थकथनं, तत्र विधेयताऽवच्छेदकावच्छिन्नमित्यस्य यद्धर्मविशिष्ट इत्यस्य च विषयिताऽर्थकेनावगाहत-इत्यनेनाभिसंबन्धः; तथा च यद्धर्मावच्छिन्नविशेष्यतानिरूपिता तद्धर्मसमानकालीनत्वविषयतानिरूपिता च या विधेयताऽवच्छेदकावच्छिन्नविषयता तत्प्रतियोग्यशाब्दज्ञानत्वं पर्यवसितो हेतुः, तत्र विधेयताऽवच्छेदकावच्छिन्नत्वनिवेशप्रयोजनमाह-धूमकालीनेत्यादि, विधेयविषयतामात्रोक्तौ धूमवान्पर्वतो धूमकालीनवह्निमानित्याकारकान्यलिङ्गकानुमितौ विधेयीभूतवह्निविधेयताया-धूमावच्छिन्नविशेष्यतानिरूपितत्वाद्, धूमसमानकालीनत्वविषयतानिरूपितत्वाच्च व्यभिचारः स्याद् विधेयताऽवच्छेदकावच्छिन्नत्वोक्तौ च विधेयताऽवच्छेदकीभूतधूमकालीनत्वविशिष्टवह्नित्वावच्छिन्नविषयता न धूमकालीनत्वविषयतानिरूपिता शुद्धवह्नित्वावच्छिन्नांश एव धूमकालीनत्वभानादिति न व्यभिचार इत्याशयः,

अथ धूमकालीनवह्नित्वावच्छिन्ना या विषयता सैव धूमसमानकालीनत्वविषयतानिरूपिताऽपि; उक्तानुमितौ वन्ह्यादिविषयताया द्वैविध्यविरहादिति व्यभिचारो दुरुद्धर इति चेद् ?

न-विधेयताऽवच्छेदकावच्छिन्नविशेष्यतात्वेन समानकालीनत्वविषयतया समं निरूप्यनिरूपकभावस्य विवक्षितत्वात्,

प्रकृते च शुद्धवह्नित्वावच्छिन्नविशेष्यतात्वेन धूमकालीनत्वविषयतया समं वह्निविषयताया निरूप्यनिरूपकभावः;

न तु धूमकालीनवह्नित्वावच्छिन्नविशेष्यतात्वेन; कालीनत्वस्य द्विधाऽभानात्,

ननु शुद्धवह्नित्वस्याप्यनुमित्यन्तरविधेयताऽवच्छेदकतया तद्दोषतादवस्थं ; तज्ज्ञानीयविधेयतानिवेशेऽपि धूमवान्पर्वतो-वह्निमान्धूमवान्पर्वतो धूमकालीनवह्निमानित्याकारकान्यलिङ्गक-समूहालम्बनानुमितौ व्यभिचारो दुर्वारः,

अथ स्वावच्छेदकावच्छिन्नविशेष्यतात्वेन तद्धर्मसमानका-लीनत्वविषयतानिरूपिता या विधेयता तच्छालित्वनिवेशान्न व्यभिचारः, यतस्तादृशज्ञानीयधूमकालीनवह्नित्वावच्छिन्नविधेय-तायाः स्वावच्छेदकतादृशधर्मावच्छिन्नविशेष्यतात्वेन धूमकालीन-त्वविषयतानिरूपितत्वविरहात्, शुद्धवह्नित्वावच्छिन्नविधेयतायाश्च केनापि रूपेण धूमसमानकालीनत्वविषयतानिरूपितत्वविरहात् स्वपदेन तादृशज्ञानीयविधेयतयोरुपादातुमशक्यत्वादिति चेद् ?

न-तथा सति यद्धर्मावच्छिन्नविशेष्यतानिरूपितेत्यस्य वैय-र्थ्यात् तद्व्यावर्तनीयधूमवान्धूमकालीनवह्निमान्पर्वतो वह्निमानित्ये-तादृशानुमितौ पक्षताऽवच्छेदकघटकत्वेन या वह्निविषयता तस्या एव धूमकालीनत्वविषयतानिरूपितत्वेन विधेयताया अतथात्वा-दिति चेद् ?

मैवं-स्वनिरूपितविधेयताऽवच्छेदकीभूतधर्मावच्छिन्नविशेष्य-तात्वेन या विषयता धूमसमानकालीनत्वविषयतानिरूपिता तन्नि-रूपिततद्धर्मावच्छिन्नस्वात्मकविशेष्यताकाशाब्दज्ञानत्वस्य हेतुद-लसमुदायार्थत्वात्; स्वपदं विशेष्यतापरम्, उपदर्शितसमूहालम्ब-

नानुमितौ च शुद्धवह्नित्वावच्छिन्नविधेयतानिरूपिता या विशेष्यता तन्निरूपितविधेयता धूमसमानकालीनवह्नित्वावच्छिन्नविधेयताऽऽत्मकविषयतैव तन्निरूपिता च न तादृशविशेष्यता धूमकालीनवह्नित्वावच्छिन्नविधेयतानिरूपिता च या विशेष्यता तन्निरूपितविधेयताऽवच्छेदकं च न शुद्धवह्नित्वमपि तु धूमकालीनवह्नित्वमेव तदवच्छिन्नविशेष्यतात्वेन च न धूमकालीनत्वविषयतानिरूपितत्वं धूमकालीनत्वस्य ह्विधाऽभानाद् ; अतः स्वपदेन न का चिदपि विशेष्यतोपादातुं शक्यत इति न व्यभिचार इति,

अत्र धूमविशिष्टधूमकालीनवह्निमत्पर्वतत्वधर्मिताऽवच्छेदकवह्निविधेयकानुमितावालोकालिङ्गिकायां व्यभिचारवारणाय विशेष्यतायां तद्धर्मावच्छिन्नत्वनिवेश इत्याशयेनाह दीधितौ धूमवानयमित्यादि; तथा च तज्ज्ञानीयाविधेयताऽवच्छेदकीभूतवह्नित्वावच्छिन्नविशेष्यतात्वेन धूमसमानकालीनत्वविषयतानिरूपितत्वविशिष्टा या विषयता वह्निनिष्ठविशेष्यताऽवच्छेदकत्वाख्यविषयतैव तन्निरूपितस्वात्मकविशेष्यतायास्तदवच्छेदकताऽवच्छेदकीभूतधूमावच्छिन्नत्वाभावेन तथाविधविशेष्यताशालयशाब्दबुद्धित्वरूपहेत्वभावान्न तत्र व्यभिचार इत्याशयः,

अत्र वदन्ति–एवमपि विशिष्टे वैशिष्ट्यमितिरीत्या धूमविशिष्टे पर्वते धूमसमानकालीनवह्निवैशिष्ट्यावगाहिधूमधूमसमानकालीनवह्न्यादिधर्मिताऽवच्छेदककालोकलिङ्गकानुमितावुक्तहेतोः सत्त्वेन साध्याभावेन व्यभिचार इति तद्वारणाय तद्धर्मसमानकालीनत्वाविषयतानिरूपितस्वनिरूपिताविधेयताऽवच्छेदकावच्छिन्न-

विधेयताया हेतुताऽवच्छेदककोटौ निवेशस्यावश्यकतया तेनैवो-पपत्तौ विशेष्यतायां तद्धर्मावच्छिन्नत्वनिवेशो व्यर्थ एवेति,

अत्राहुः—साक्षात्परम्परया वा स्वानिरूपकाविशेष्यतानिरूपि-तावच्छेदकतात्वसंबन्धेन यद्धर्मनिष्ठावच्छेदकताविशिष्टं यत्ताद्भि-न्नत्वस्य विधेयताऽवच्छेदकावाच्छिन्नविषयतायां विशेषणत्वलाभाय यद्धर्मविशिष्टत्यस्योपादानं न तु तस्यां तद्धर्मावच्छिन्नविशेष्यतानि-रूपितत्वस्य विशेषणत्वलाभायेति विशेष्यतायां तद्धर्मावच्छिन्न-त्वनिवेशान्न तद्वैयर्थ्यम्, उक्तालोकलिङ्गकानुमितौ यद्धर्मविशिष्टो-पादानलभ्यार्थघटितहेत्वसत्त्वादेवाव्यभिचारेण निरुक्तविधेयताऽ-पि न हेतुकोटौ निवेशनीयेति; यद्वोक्तहेतौ विशिष्टत्वं व्यावृत्तत्वं; तच्च तत्समानकालीनत्वग्रहाजन्यत्वं, विशेषणविशेष्यपदे च ध-र्मद्वयमात्रोपदर्शके, एवं चैकस्मिन्धर्मे यद्धर्मसमानकालीनत्वग्रहा-जन्या याऽशाब्दी तद्धर्मसमानकालीनत्वावगाहिनी बुद्धिः सा-ज्ञायमाना तर्द्धमजन्येति सामान्यमुखी व्याप्तिरतो न कोऽपि दोषइत्याहुः,

अत्र मणिकृतः—अतीतानागतलिङ्गपरामर्शजन्यानुमितौ व्य-भिचारेणोपदर्शितव्याप्तेरासिद्धयोक्तानुमानान्नानुमितौ लिङ्गजन्य-त्वासिद्धिः; अत एव लिङ्गविशिष्टज्ञानकारणताग्राहकप्रमाणेन लिङ्गजन्यत्वसिद्धिरिति पूर्वोक्तमपि निरस्तम् ; अतीतादिलिङ्ग-कानुमित्यनुरोधेन लिङ्गोपलक्षितज्ञानस्यैव कारणताग्रहात्तस्मा-ल्लिङ्गज्ञानमेवानुमितिकरणमिति वदन्ति,

दीधितिकृतस्तु—मनस्त्वेनैवानुमितिकरणता लाघवादिति

वदन्ति,

अधिकमन्यत्रानुसन्धेयम्,

तच्चानुमानं त्रिविधं—केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदाद्, असद्विपक्षकत्वे केवलान्वयित्वं, तथा च केवलान्वयिसाध्यकानुमितिकरणत्वं केवलान्वय्यनुमानत्वं, केवलान्वयित्वं चान्योन्याभावप्रतियोगिताऽनवच्छेदकत्वमेव वाच्यत्वादिसाध्यकहेतुरेवात्र लक्ष्य इति प्राञ्चः,

आचार्यानुयायिनस्तु व्याप्तिग्राहकसहचारभेदादेवानुमानभेदः; अन्वयसहचारमात्रगृहीतव्याप्तिकहेतुरेव केवलान्वयित्वेन लक्ष्यः, अन्वयव्याप्तिज्ञानमेवानुमितिजनकं व्यतिरेकसहचराद्प्यन्वयव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्तिः; तत्कालीनतत्पुरुषीय एव च स्वानिष्ठमेकमेवानुमानं कदा चित्केवलान्वयि कदा चिच्च केवलव्यतिरेकीति बोध्यम्,

व्याप्तिज्ञानजनकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तत्कालीनतत्पुरुषीयकेवलान्वय्यनुमानत्वमिति पर्यवसितम्,

अन्वयसहचारत्वं च तत्साध्यताऽवच्छेदकावच्छिन्नतत्साधनताऽवच्छेदकावच्छिन्नोभयनिरूपितसहचारत्वं, जन्यज्ञानविषयत्ववान् जन्यज्ञानविषयत्वाभावात् कपिसंयोगाभाववान्कपिसंयोगादित्यत्र च यत्र जन्यज्ञानविषयत्वाभावस्तत्र जन्यज्ञानविषयत्वाभावाभावः; यत्र कपिसंयोगाभावाभावस्तत्र कपिसंयोगाभाव इत्येतादृशव्यतिरेकसहचारग्रहाधीनव्याप्तिग्रहदशायां केवलान्वयित्वापत्तिः; अतः साध्यताऽवच्छेदकावच्छिन्ननिरूपितत्वसाध-

नताऽवच्छेदकावच्छिन्नत्वयोरुपादानम्,

अथोक्तस्थले जन्यज्ञानविषयत्वाभावाभाववत्त्वरूपेण जन्यज्ञानविषयत्वनिरूपितो यः सहचारः स एव जन्यज्ञानविषयत्वत्वावच्छिन्ननिरूपितोऽपि,

एवं कपिसंयोगाभावाभाववत्त्वेन कपिसंयोगनिरूपितो यः सहचारः स एव कपिसंयोगत्वावच्छिन्ननिरूपितोऽपि; निरूपकताऽवच्छेदकभेदेन सहचारभेदस्याप्रामाणिकत्वात्, तत्त्वतदभावाभावत्वादिविभिन्ननिरूपकताऽवच्छेदकावगाहित्वेनैवान्वयसहचारज्ञानव्यतिरेकसहचारज्ञानयोर्वैलक्षण्योपपत्तेरिति साध्यताऽवच्छेदकावच्छिन्नहेतुताऽवच्छेदकावच्छिन्ननिरूपितत्वनिवेशेऽपि नातिप्रसङ्गवारणसंभव इति चेद् ?

न-स्वनिष्ठव्याप्तिज्ञानजनकताऽवच्छेदकसहचारविषयतात्वव्यापकप्रकृतसाध्यताऽवच्छेदकावच्छिन्नविषयत्वप्रकृतहेतुताऽवच्छेदकावच्छिन्नविषयत्वनिरूपितविषयतात्वकत्वं केवलान्वय्यनुमानत्वमित्युक्तावदोषाद्, उक्तस्थलीयव्यतिरेकसहचारज्ञानीयसहचारज्ञानविषयत्वयोः साध्यताऽवच्छेदकीभूतजन्यज्ञानविषयत्वत्वावच्छिन्नविषयत्वहेतुताऽवच्छेदकीभूतकपिसंयोगत्वावच्छिन्नविषयत्वाभ्यामनिरूपितत्वाद्, यदि चात्रापि व्याप्तिघटकीभूताभावनिष्ठहेतुसहचारविषयतायां तादृशसहचारविषयतात्वसत्त्वेन निरुक्तविषयत्वाभावेन च न तादृशसहचारविषयतात्वव्यापकता निरुक्तविषतात्व इत्यसंभव इति विभाव्येत; तदा स्वनिष्ठव्याप्तिज्ञानजनकज्ञानविषयसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वक-

त्वं तत्त्वम्,

न चैवमसंभवः—व्याप्तिघटकीभूताभावनिष्ठहेतुसहचारेऽपि प्रकृतव्याप्तिघटकसहचारत्वसत्त्वाद्, अत्र सर्वत्वव्यभिधेयत्ववद्वह्निमान् धूमादित्यत्र यत्र तादृशवन्ह्यभावस्तत्र धूमाभाव इत्येतादृशव्यतिरेकसहचारज्ञानाधीनव्याप्तिग्रहदशायामतिप्रसङ्गः, तादृशव्यतिरेकसहचारस्यापि सर्वत्वेन साध्यताऽवच्छेदककोटिप्रविष्टतया व्याप्तिघटकत्वादिति व्याप्तिग्राहकताऽवच्छेदकीभूतसहचारविषयताऽवच्छेदकत्वव्यापकप्रकृतव्याप्तिघटकताऽवच्छेदकताकत्वमर्थोवाच्यः, एतल्लाभायैव च द्वितीयसहचारपदम्, उक्तस्थले च साध्याभावहेत्वभावोभयसहचारत्वं व्याप्तिग्राहकताऽवच्छेदकसहचारविषयताऽवच्छेदकं, तच्च न व्याप्तिघटकताऽवच्छेदकमपि तु सर्वत्वमेव तथेति न दोषः,

ननु धूमाभावसमानाधिकरणवन्ह्यभावप्रतियोगिवह्निमान् धूमादित्यत्र व्यतिरेकसहचारग्रहदशायामतिप्रसङ्गो दुर्वारः; तत्र व्याप्तिग्राहकताऽवच्छेदकविषयताऽवच्छेदकधूमाभावादिसहचारत्वस्य प्रकृतव्याप्तिघटकताऽवच्छेदकताऽवच्छेदकत्वात्,

अथ प्रकृतहेतुताऽवच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकृतसाध्यताऽवच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ननिरूपितसहचारत्वावच्छिन्नविषयकस्यैव व्यतिरेकसहचारज्ञानस्य व्याप्तिग्राहकतया तथाविधसहचारत्वमेव व्याप्तिग्राहकताऽवच्छेदकसहचारविषयताऽवच्छेदकं; तच्च न प्रकृतव्याप्तिघटकसाध्यताऽवच्छेदकघटकं तत्साध्यताऽवच्छेदकशरीरे तत्साध्य-

ताऽवच्छेदकावच्छिन्नाभावत्वावच्छिन्ननिवेशस्यासम्भवदुक्तिकत्वादिति चेद् ?

न–यतः साध्यताऽवच्छेदकावच्छिन्नाभावविशेष्यकहेतुताऽवच्छेदकावच्छिन्नाभावसामानाधिकरण्यग्रहे हेतुताऽवच्छेदकावच्छिन्नाभावसहचारत्वस्यैव सहचारांशे प्रकारतया तस्यैव तद्विषयताऽवच्छेदकतया साध्यताऽवच्छेदकावच्छिन्नाभावीयत्वस्य तदंशेऽप्रकारतया तस्यैतन्निष्ठविषयताऽवच्छेदकाघटकत्वाद्, यदि च तादृशसहचारविषयतानिरूपितविषयताऽवच्छेदकत्वव्यापकप्रकृतव्याप्तिघटकताऽवच्छेदकताकत्वं विवक्ष्यते; तदोक्तस्थले साध्यताऽवच्छेदकावच्छिन्नसाध्याभावत्वस्य व्याप्तिघटकताऽनवच्छेदकस्यापि सहचारविषयतानिरूपितविशेष्यताऽऽत्मकविषयताऽवच्छेदकत्वेनातिप्रसङ्गवारणेऽपि सर्वज्ञस्याभिधेयत्ववद्वह्निमान धूमादित्यत्रोक्तातिप्रसङ्गो दुर्वारः, तत्र सर्वत्वेन सर्वस्यैव व्याप्तिघटकताऽवच्छेदकत्वाद्, यत्र धूमस्तत्र वह्निरित्याकारकधूमत्वाद्यंशे निष्प्रकारकज्ञानीयसहचारविषयतानिरूपितविषयताऽवच्छेदकताया निरवच्छिन्नत्वेन तदानीं धूमादेः केवलान्वयित्वानुपपत्तिभिया तादृशावच्छेदकत्वव्याप्तिघटकताऽवच्छेदकत्वयोरेकधर्मावच्छिन्नत्वविवक्षणासंभवात्,

न च व्याप्तिग्राहकताऽवच्छेदकताऽवच्छेदकसहचारविषयतानिरूपितविषयताऽवच्छेदकत्वव्यापकप्रकृतविषयताऽन्तःपातिसहचारविषयतानिरूपितविषयताऽवच्छेदकत्वनिवेशान्नायं दोषः; सर्वपदार्थस्य व्याप्तिघटकताऽवच्छेदकत्वेऽपि व्याप्तिविषयता-

ऽन्तःपातिसहचारविषयतानिरूपितविषयतानऽवच्छेदकत्वादिति वाच्यम् ?

एवमपि प्रमेयवत्समानाधिकरणवाच्यत्ववद्वह्निमान्धूमादिस्थादौ व्यतिरेकसहचारग्रहदशायामतिप्रसङ्गो दुर्वार एव; तत्र प्रमेयत्वेन साध्याभावत्वादीनामपि व्याप्तिविषयताऽन्तःपातिसामानाधिकरण्यविषयतानिरूपितविषयताऽवच्छेदकत्वात्,

न च व्याप्तिग्राहकताऽवच्छेदकविषयतात्वव्यापकप्रकृतव्याप्तिविषयताऽन्तःपातित्वकत्वाविवक्षणान्न काऽप्यनुपपत्तिः; साध्यताऽवच्छेदकावच्छिन्नाभावत्वाद्यवच्छिन्नविषयतानिरूपिताया व्याप्तिग्राहकताऽवच्छेदकसहचारविषयताया व्याप्तिविषयताऽन्तःपातित्वस्य ब्रह्मणोऽपि दुःसंपादत्वादिति वाच्यम् ?

एवं सति धूमो वह्निसमानाधिकरण इत्येतादृशसहचारज्ञानीयशुद्धवह्नित्वाद्यवच्छिन्नविषयतानिरूपितसहचारविषयताया अपि विषयताऽन्तःपातिव्यापकत्वविशिष्टवह्नित्वाद्यवच्छिन्नविषयतानिरूपितसहचारविषयतातोऽन्यतया तादृशसहचारज्ञानकालेऽपि धूमादेः केवलान्वयित्वानुपपत्तेरिति चेद् ?

मैवं—प्रकृतव्याप्तिग्राहकसहचारज्ञानप्रतिबन्ध्यताव्यापकप्रकृतव्याप्तिग्रहप्रतिबन्ध्यताकत्वस्य विवक्षितत्वेनादोषादित्याहुः,

मणिकारानुयायिनस्तु—गृहीतव्याप्तिभेदादनुमानभेदः; यदाऽन्वयव्याप्तिमात्रग्रहजन्यानुमितिस्तदा हेतुः केवलान्वयी, एवं च प्रकृतहेतुकप्रकृतसाध्यकानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यव्याप्तित्वकत्वं तत्त्वं, पूर्ववदत्रापि कालपुरुषयोरन्तर्भावो-

बोध्यः, जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुताऽवच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी तद्विशिष्टपक्षधर्मताज्ञानेऽपि व्याप्त्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुदयादिति नाव्याप्तिः, वन्ह्यभाववान् वह्निव्यापकाभावप्रतियोगिमत्त्वादित्यादावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नाप्रसङ्ग इत्याहुः,

नन्वत्र जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुताऽवच्छेदकव्याप्तेः प्रकृतहेतुकानुमित्यौपयिकत्वाभावादेव नाव्याप्तिरिति; तत्र प्रकृतसाध्येत्यस्य व्यावृत्तिप्रदर्शनं दीधितिकृतां विरुद्धम्,

न च तस्या अपि तादृशौपयिकत्वमेव तस्या एकत्वादिति वाच्यम्?

प्रकृतहेतुताऽवच्छेदकरूपेण पृथिवीत्वव्यापकता हि प्रकृतहेतुकानुमित्यौपयिकी स्नेहाभावत्वादीनां पृथिवीत्वव्यापकता च हेतुताऽवच्छेदिकेति तयोर्भेदात्,

किंचैवं वह्निव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुताऽवच्छेदकव्याप्तेरपि प्रकृतहेतुकानुमित्यौपयिकत्वे कथमव्याप्तिनिरास इति चेद्?

अत्र केचिद्—अत्र प्रकृतहेतुकत्वं सामानाधिकरण्याव्यवहितोत्तरत्वोभयसंबन्धेन पक्षधर्मताज्ञानविशिष्टत्वं; प्रकृतसाध्यकत्वं च प्रकृतसाध्यविधेयकत्वं; तथा च प्रकृतहेतुकप्रकृतसाध्यकेत्यादेः प्रकृतहेतुताऽवच्छेदकावच्छिन्नहेतुविषयतानिरूपितपक्षविषयता-

शालिङ्गानसमानाधिकरणाऽव्यवहितोत्तरक्षणोत्पन्नप्रकृतसाध्य-कानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकताऽवच्छेद-कीभूता या पक्षविशेष्यतानिरूपितहेतुताऽवच्छेदकावच्छिन्नहेतु-विषयतानिरूपितात्रिषयता तान्निरुपकीभूतव्याप्तित्वव्यापकान्वय-व्याप्तित्वकत्वमित्यर्थः,

अत्र प्रकृतसाध्यकेत्यस्य व्यावृत्तिं दर्शयति-जलं निर्गन्ध-मित्यादिना, न प्रकृतसाध्यकानुमित्यौपयिकी=न तादृशविषय-ताशालिङ्गानसमानाधिकरणाऽव्यवहितोत्तरक्षणोत्पन्नप्रकृतसाध्य-कानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकताऽवच्छेद-कीभूततादृशविषयतानिरूपिकेत्यर्थः, तथा च प्रकृतसाध्यकपद-दानात्तत्र नाऽव्याप्तिरिति भावः,

ननु तथाऽपि वन्ह्यभाववान् वन्हिव्यापकीभूताभावप्रतियो-गी नेत्यत्राऽव्याप्तिः, तत्र तादृशविषयताशालिङ्गानासमानाधि-करणाऽव्यवहितोत्तरक्षणोत्पन्नप्रकृतसाध्यकानुमितित्वघटितधर्मा-वच्छिन्नजन्यतानिरूपितजनकताऽवच्छेदिका या तादृशविषयता; तान्निरूपकीभूतव्याप्तित्वाव्यापकत्वादन्वयव्याप्तित्वस्येत्यतस्तत्रा-लक्ष्यत्वेनाऽव्याप्तिं वारयति-वन्ह्यभाववानित्यादिना, व्यतिरेकव्या-प्तिरित्यनन्तरं प्रकृतसाध्यकानुमित्यौपयिकीति पूरणीयम् , तस्यार्थः पूर्वोक्त एव न तु सैवेति, एवकारोऽप्यर्थे, न त्वत्रान्वयव्याप्तिरपि प्रकृतसाध्यकानुमित्यौपयिकीत्यर्थः; तथा चात्र तादृशविषयताशा-लिङ्गानसमानाधिकरणाऽव्यवहितोत्तरक्षणोत्पन्नप्रकृतसाध्यकानु-मितित्वघटितधर्मावच्छिन्नं प्रति तादृशव्यतिरेकव्याप्तिविशिष्टप्र-

कारकपक्षविषयताशालिज्ञानत्वेनैव हेतुता कल्प्यते न त्वन्वयव्याप्तिविशिष्टतादृशहेतुविषयताशालिज्ञानत्वेन; तथा च तन्न लक्ष्यमतो नाऽव्याप्तिरिति भाव इति वदन्ति,

नवीनास्तु—प्रकृतहेतुकत्वं व्याप्तिविशेषणं प्रकृतसाध्यकत्वमनुमितिविशेषणम्; अत एव प्रकृतहेतुसाध्यकेत्युपेक्ष्य प्रकृतहेतुकप्रकृतसाध्यकेष्युक्तं, यादृशरूपावच्छिन्नप्रकृतहेतुताऽवच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वं प्रकृतानुमितिजनकताऽवच्छेदकं तत्त्वमेव प्रकृतहेतुकत्वं, प्रकृतसाध्यकत्वं च प्रकृतसाध्यताऽवच्छेदकावच्छिन्नविधेयकत्वं; तथा च तत्कालीनतत्पुरुषीयानुमितिनिष्ठप्रकृतसाध्यताऽवच्छेदकावच्छिन्नविधेयताकत्वघटितधर्मावच्छिन्नस्वनिष्ठकार्यतानिरूपितकारणतायामवच्छेदकं यादृशरूपविशिष्टप्रकृतहेतुताऽवच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वं तादृशरूपनिष्ठविषयतात्वव्यापकप्रकृतसाध्यीयान्वयव्याप्तिविषयतात्वकानुमितिकारणत्वं तद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुककेवलान्वय्यनुमानत्वमित्यर्थः, स्वपदं फलीभूतानुमितिपरं, प्रकृतसाध्यीयव्यतिरेकव्याप्तिविशिष्टहेतुमत्तापरामर्शासमवहितेन प्रकृतसाध्यीयान्वयव्याप्तिविशिष्टप्रकृतहेतुमत्तापरामर्शेन जनितानुमितिमादाय सर्वत्र केवलान्वय्यनुमाने लक्षणसमन्वयः,

अत्र विभिन्नकालीनपुरुषान्तरीयव्यतिरेकव्याप्त्यवगाहिज्ञानजन्यानुमितिमादायासंभववारणाय तत्कालीनत्वतत्पुरुषीयत्वनिवेशः,

एवं स्वरूपसम्बन्धरूपावच्छेदकत्वानिवेशाभिप्रायेण जलं निर्गन्धमित्याद्याशङ्का ; तत्र पृथिवीत्वव्यापकीभूताभावप्रतियोगित्वरूपहेतुताऽवच्छेदकपुरस्कारेण गृहीतान्वयव्याप्तिके तद्रूपावच्छिन्नहेतुके केवलान्वय्यनुमानेऽव्याप्तिः; हेतुताऽवच्छेदकरूपव्यतिरेकव्याप्तान्वयव्याप्तित्वविरहात् तादृशहेतुताऽवच्छेदकावच्छिन्नहेतुमत्तानिश्चयत्वस्यापि तदानींतनानुमितिजनकत्वात् तादृशहेतुताऽवच्छेदके प्रकृतसाध्यकानुमित्यौपयिकत्वसत्त्वाच्चेति शङ्कितुराशयः,

अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वाभिप्रायेण समाधानं, व्याप्तित्वेन घटाद्यवगाहिनिश्चयस्यानुमितिजनकस्यासंग्रहेण व्याप्तिविशिष्टवत्तानिश्चयत्वस्य स्वरूपसंबन्धरूपावच्छेदकत्वासंभवेनानतिरिक्तवृत्तित्वमेव तद्वाच्यम् ,

एवं च निर्गन्धत्वाव्याप्त्यनवगाहिज्ञानसाधारणस्य दर्शितहेतुताऽवच्छेदकविशिष्टवत्तानिश्चयत्वस्यानुमितिजनकताऽवच्छेदकतया नाव्याप्तिरिति समाधातुराशय इति वदन्ति,

तच्चिन्त्यम्–अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य लक्षणघटकत्वे धूमत्वावच्छिन्नविशेषणताऽऽपन्नधूमव्यापकवह्निसमानाधिकरणधूमवत्पर्वतकालीनत्वावच्छिन्नप्रकारताशालिनिश्चयत्वस्यापि निरुक्तजनकताऽनतिरिक्तवृत्तितया यादृशरूपपदेन तादृशकालीनत्वमादायाव्याप्तेरशक्यसमाधानत्वात् ,

न चान्वयव्याप्तिविषयतात्वं व्यतिरेकव्याप्तिविषयतात्वाभावएवेति तस्य निरुक्तकालीनत्वविषयतासाधारण्यान्नोक्ताव्याप्ति-

रिति वाच्यम् ?

तादृशकालीनत्वविशिष्टव्यतिरेकव्याप्त्यवच्छिन्नप्रकारताशालिनिश्चयत्वस्यापि निरुक्तकारणताऽनतिरिक्तवृत्तित्वेन यादृशरूपपदेन तादृशकालीनत्वविशिष्टव्यतिरेकव्याप्त्युपादानसम्भवेनोक्ताव्याप्तेर्दुर्वारत्वात् ,

एवं यादृशकेवलान्वयिसाध्यके व्यतिरेकव्याप्तिघटकतावत्पदार्थावगाहिभ्रमात्मकज्ञानमप्रसिद्धं तादृशकेवलान्वयिसाध्यकस्थलेऽव्याप्तिः,

एवं यादृशरूपावच्छिन्नसाध्यहेतुकस्थले विशिष्टव्याप्तिरप्रसिद्धा तादृशरूपावच्छिन्नसाध्यहेतुकस्थले यादृशरूपपदेनान्वयव्याप्तेरुपादानासम्भवादव्याप्तिश्चाशक्यसमाधाना,

वस्तुतस्तु प्रकृतहेतुताऽवच्छेदकांशे प्रकृतव्याप्तिधर्मिताऽवच्छेदकत्वानिरूपकस्यैकत्र द्वयमिति रीत्या प्रकृतहेतुताऽवच्छेदकप्रकृतव्याप्त्युभयमवगाहमानस्य ज्ञानस्य प्रकृतानुमितिकारणताशून्यत्वेन तत्साधारणतया यादृशरूपविशिष्टप्रकृतहेतुताऽवच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वे प्रकृतानुमितिकारणताऽनतिरिक्तवृत्तित्वस्यासम्भवादनतिरिक्तवृत्तित्वरूपावच्छेदकताघटितलक्षणमसम्भवदुक्तिकमेवेति दिक्,

अत्र वदन्ति प्रकृतहेतुव्यापकेत्यादेः सामानाधिकरण्याव्यवहितोत्तरत्वोभयसम्बन्धेन प्रकृतहेतुताऽवच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वावच्छिन्नप्रकृतसाध्यताऽवच्छेदकावच्छिन्नविधेयताकत्वघटितधर्मावच्छिन्नस्वनिष्ठकार्यतानिरूपितकारणताऽव-

च्छेदकाविषयताव्यापकप्रकृतसाध्यताऽवच्छेदकावच्छिन्नविषयतानिरूपिताधिकरणत्वावच्छिन्नविषयतानिरूपिताधेयत्वावच्छिन्नविषयताकानुमितिकारणत्वं केवलान्वय्यनुमानत्वमिति पर्यवसितार्थः,

स्वपदं फलीभूतानुमितिपरं ; तेन प्रकृतहेतौ प्रकृतसाध्यीयव्यतिरेकव्याप्त्यवगाहिज्ञानासमवहितेन तत्र साध्यीयान्वयव्याप्त्यवगाहिज्ञानेन केवलान्वय्यनुमानेन जनितामनुमितिं स्वपदेनोपादाय तन्निष्ठनिरुक्तकार्यतानिरूपितकारणताऽवच्छेदकविषयताव्यापकत्वस्य निरुक्तान्वयव्याप्तिविषयतायां सत्त्वात्तत्र केवलान्वय्यनुमानलक्षणसङ्गतिः, प्रकृतहेतौ धर्मान्तरावच्छिन्ननिरूपितव्याप्त्यवगाहिज्ञानसमवहितेन तत्र प्रकृतसाध्यीयान्वयव्याप्त्यवगाहिज्ञानेन केवलान्वय्यनुमानेन जनितानुमितिधर्मनिष्ठधर्मान्तरावच्छिन्नकार्यतानिरूपितकारणताऽवच्छेदकविषयतायां धर्मान्तरावच्छिन्ननिरूपितव्याप्त्यवगाहिप्रकृतसाध्यीयान्वयव्याप्त्यनवगाहिज्ञानसाधारणतया तां प्रति निरुक्तप्रकृतसाध्यीयान्वयव्याप्तिविषयताया व्यापकत्वासम्भवात्तत्राव्याप्तिरतः प्रकृतसाध्यताऽवच्छेदकावच्छिन्नविधेयताकत्वस्य कार्यताऽवच्छेदकतथा निवेशः, धर्मान्तरावच्छिन्ने प्रकृतसाध्यस्यान्वयव्यतिरेकव्याप्त्योरेकतरग्रहदशायामपि केवलान्वय्यनुमाने प्रकृतहेतौ प्रकृतसाध्यस्य व्यतिरेकव्याप्तिज्ञानासमवहितान्वयव्याप्तिज्ञानेऽव्याप्तिवारणाय निरुक्तोभयसम्बन्धेन प्रकृतहेतुताऽवच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वस्य कार्यताऽवच्छेदक-

तया निवेशः, साध्यान्तरीयव्याप्त्यवगाहिसमूहालम्बनरूपे केवलान्वय्यनुमानेऽव्याप्तिवारणाय तादृशजनकताऽऽश्रयज्ञानविषयव्याप्तित्वे व्याप्यतामनिवेश्य तादृशज्ञानजनकताऽवच्छेदकव्याप्तिविषयतायां व्याप्यत्वं निवेशितं, प्रकृतसाध्यव्यभिचारिप्रकृतहेतुविषयकव्याप्तिज्ञानात्मककेवलान्वय्यनुमानेऽव्याप्तिवारणाय तादृशजनकताऽवच्छेदकीभूतविषयतात्वेनैव व्याप्तिविषयताया व्याप्यतया निवेशः कृतः, न तु तादृशव्याप्तिविषयतात्वेन; तथा सति तत्र तादृशव्याप्त्यप्रसिद्ध्याऽव्याप्त्यापत्तेः, व्याप्तिपदोपादानं तु तादृशजनकताऽवच्छेदकविषयतात्वमात्रेण व्याप्यतालाभायेति ध्येयम्,

व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्य हेतुताया मणिकारानुमततया व्याप्यत्वविषयताया व्यापकताकोटिनिवेशे प्रयोजनविरहेण साध्यसामानाधिकरण्यविषताया एव निरुक्तरूपेण व्यापकत्वं निवेशितं, तदुभयं तु निरूपकतासम्बन्धेन,

ननु निर्गन्धत्वीयान्वयव्याप्त्यवच्छिन्नहेतुताऽवच्छेदकीभूतपृथिवीत्वाभावीयव्यतिरेकव्याप्त्यवच्छिन्नविषयताशालिनिश्चयपरामर्शजन्या या तत्र प्रकृतसाध्यानुमितिर्जलं निर्गन्धं–पृथिवीत्वाभाववच्चेत्याकारिकाऽपि तन्निष्ठायाः पृथिवीत्वाभावत्वावच्छिन्नविधेयताकत्वावच्छिन्नकार्यतानिरूपितकारणताऽवच्छेदकपृथिवीत्वाभावीयव्यतिरेकव्याप्तिविषयताया निरूपकतासम्बन्धेन गन्धाभावीयान्वयव्याप्त्यनवगाहिज्ञानसाधारणतया तादृशान्वयव्याप्तिविषयतायास्तेन सम्बन्धेन व्यापक-

त्वाभावेन तादृशकेवलान्वय्यनुमानाऽव्याप्तिरित्याशङ्कां प्रकृतसाध्यकत्वस्य कार्यताऽवच्छेदकतया लक्षणघटकत्वोपगमेनापनयति जलमित्यादिना,

यद्यपि वह्निमान्धूमादित्यादावपि प्रकृतसाध्यताऽवच्छेदकावच्छिन्ननिरूपितान्वयव्याप्त्यवगाहिना परामर्शेन रूपान्तरावच्छिन्ननिरूपितव्यतिरेकव्याप्त्यवगाहिना परामर्शेन जनितामनुमितिमादायाऽव्याप्तिः सम्भवतीति तदुपेक्षणं निर्युक्तिकम्;

तथाऽपि तत्रत्यायास्तादृशानुमितेर्व्याप्त्यन्तरावगाहिज्ञानसापेक्षतया प्रयासबाहुल्यमिति तदुपेक्षितम् ,

ननु वन्ह्यभाववान् वन्हिव्यापकीभूताभावप्रतियोगिमत्त्वादित्यादौ वन्ह्यभावीयान्वयव्याप्त्यवच्छिन्नवन्ह्यभावीयव्यतिरेकव्याप्तिविशिष्टहेतुताऽवच्छेदकावच्छिन्नप्रकारताशालिपरामर्शजन्यानुमितिनिष्ठतादृशव्यतिरेकव्याप्तिविशिष्टहेतुमत्त्वापरामर्शजन्यतामादाय तादृशव्यतिरेकव्याप्तिरूपहेतुताऽवच्छेदकावच्छिन्नाविशेष्यकवन्ह्यभावीयान्वयव्याप्तिप्रकारककेवलान्वय्यनुमानेऽव्याप्तिरिति शङ्कामपनेतुमाह-वन्ह्यभाववानित्यादि, अन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिरिति प्रकृतसाध्यानुमित्यौपयिकीतिशेषः, अन्वयव्याप्तेरवच्छेदिका या व्यतिरेकव्याप्तिस्तस्या अन्वयव्याप्तिधर्मिताऽवच्छेदकतया या विषयता सा प्रकृतानुमितिजनकताऽवच्छेदिकेति पर्यवसितार्थः, न तु सैवेति न तु व्यतिरेकव्याप्तिसामान्यमित्यर्थः, न तु व्यतिरेकव्याप्तिविषयतासामान्यमिति पर्यवसितार्थः,

अयमाशयः-यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वेन हेत्वभावे साध्याभावस्य व्यापकता व्यतिरेकव्याप्तिशरीरप्रविष्टा तद्रूपावच्छिन्नविशेषणतया व्यतिरेकव्याप्तिविषयतैव व्यतिरेकव्याप्तिविशिष्टहेतुमत्तानिश्चयीयस्वतन्त्रक्लृप्तकारणताऽवच्छेदिका न तु तद्रूपावच्छिन्नविशेषणतया; तथा सति द्रव्यंविशिष्टसत्त्वादित्यादौ द्रव्यत्वाभावव्यापकाभावप्रतियोगिसत्तावान्गुण इत्याकारकप्रमापरामर्शाद्गुणो द्रव्यमित्याकारकप्रमाऽनुमित्यापत्तेः, तथा च जलत्वत्वावच्छिन्नविशेषणताऽनापन्नशुद्धतादृशव्यापकाभावप्रतियोगित्वस्यैव प्रकृतहेतुताऽवच्छेदकतया तद्रूपावच्छिन्नप्रकारतया व्यतिरेकव्याप्तिविशिष्टहेतुमत्तानिश्चयीयस्वतन्त्रक्लृप्तकारणताऽवच्छेदकतया तादृशप्रकारताशालिपरामर्शोत्तरजायमानानुमितेस्तादृशकारणतानिरूपितकार्यताऽनाक्रान्ततया तादृशानुमितिनिष्ठकार्यता प्रकृतसाध्यीयान्वयव्याप्तिताविशिष्टप्रकृतहेतुताऽवच्छेदकावच्छिन्नप्रकारताशालिपरामर्शोत्तरजायमानानुमितिनिष्ठकार्यतैव तादृशकार्यतानिरूपितकारणताऽवच्छेदकं प्रकृतसाध्यीयान्वयव्याप्तिधर्मिताऽवच्छेदकताऽऽपन्नव्यतिरेकव्याप्तिविषयत्वोभयत्वमेव न तु व्यतिरेकव्याप्तिविषयतासामान्यमिति नोक्ताव्याप्तिः, यत्र च जलत्वत्वावच्छिन्नविशेषणताऽऽपन्नवह्निव्यापकाभावप्रतियोगित्वादिकमेव हेतुताऽवच्छेदकं तत्र तद्रूपावच्छिन्नविशेष्यकवन्ह्यभावादेरन्वयव्याप्तिप्रकारकज्ञानमलक्ष्यमेवेति न तत्रातिव्याप्तिरिति,

एवं सति जलमित्यादिग्रन्थव्याख्याने जलत्वत्वावच्छिन्न-

विशेषगताऽऽपन्नपृथिवीत्वव्यापकाभावप्रतियोगित्वादिरूपेव हेतुताऽवच्छेदकमनुसरणीयम्, अन्यथा निर्गन्धत्वीयान्वयव्याप्तिविशिष्टशुद्धताद्दशप्रतियोगित्वरूपहेतुताऽवच्छेदकविशिष्टप्रकारकपरामर्शजन्यानुमितेः पृथिवीत्वाभावीयव्यतिरेकव्याप्तिविशिष्टप्रकारकपरामर्शीयस्वतन्त्रक्लृप्तकारणतानिरूपितकार्यताऽनाक्रान्ततया ताद्दशकार्यतामादायोक्तापत्तेरनुपपत्त्योक्तस्थले कार्यताऽवच्छेदकतया प्रकृतसाध्यकत्वप्रवेशाव्यावृत्तेरसंगतेरिति ध्येयमिति,

अत्र दीधितिकृतः केवलान्वय्यनुमाने मानाभावः; साध्याभाववदवृत्तित्वस्यैव सामानाधिकरण्याप्रवेशेन साधनभेदेनाभिन्नतया च लघुतयाऽनुमितिप्रयोजकस्य तत्रासत्त्वात्,

न चैवमाकाशादावुक्तव्याप्तिसत्त्वेन तल्लिङ्गकानुमित्यापत्तिरिति वाच्यम् ?

यत्सम्बन्धावच्छिन्नसाध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं पक्षे तेन सम्बन्धेन हेतुमत्तानिश्चयादेव तत्सम्बन्धेन साध्यसिद्ध्या पक्षे तत्सम्बन्धेन तद्वत्तानिश्चयविरहेण तत्रानुमित्यापत्तेरसम्भवात्,

अथ साध्याभाववदवृत्तित्वं तद्वृत्तिभेदतद्वृत्तित्वात्यन्ताभावरूपं व्यभिचारज्ञानाविरोधिज्ञानाविषयत्वेनानुगमनीयं, तच्चानुगमकरूपं व्यापकसामाधिकरण्यासाधारणमिति चेद् ?

न—व्यापकताज्ञानस्य व्यभिचारज्ञानाविरोधित्वाद् वन्ह्यभाववदवृत्तिर्धूम इत्यादिव्यभिचारज्ञाने हि वह्नित्वादिकं स्वरूपतः प्रतियोगित्वं तदवच्छेदकत्वं च संसर्गमर्यादया भासते, व्याप-

कताज्ञाने च वह्नित्वादिकं वह्नित्वत्वादिना प्रतियोगित्वं तदव-च्छेदकत्वं च प्रकारतयेति विषयविरोधाभावात्, मणिमन्त्रादि-न्यायेन विरोधित्वे च मानाभावात् ,

अथ वह्निमान्धूमात् तन्तुत्ववान् पटादित्यादौ साध्याभाववति धूमस्य समवायेन पटादेः संयोगादिना वृत्तेर्हेतुताऽवच्छेदकसम्ब-न्धेन वृत्तिर्वाच्या; तथा च जातिमान् सत्त्वादित्यादावव्याप्तिः जा-त्यभाववति सामान्यादौ हेतुताऽवच्छेदकसमवायेन वृत्तेरप्रसिद्धेः,

एवं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः विशिष्टस्यानतिरिक्तत्तया साध्याभाववति गुणादौ विशिष्टसत्त्व-स्य वृत्तेः ,

न च तत्र केवलान्वयिवदनुमितिरसिद्धेति वाच्यम् ?

तत्रानुमिनोमीतिप्रतीत्याऽनुमितिसिद्धेः ; अन्यथा गतमनु-मानप्रामाण्येन प्रत्यक्षेणैव तदर्थसिद्धेरिति चेद् ?

न—स्वाधिकरणावृत्तिसाध्याभावकत्वस्यैव साध्याभाववद-वृत्तित्वमित्यनेन विवक्षितत्वादित्याहुः,

अथ वदन्ति सामानाधिकरण्याप्रवेशेनेत्यशुद्धं पर्याप्तिसम्ब-न्धेन द्वित्वसाध्यकत्रित्वहेतौ द्वित्वाभाववति प्रत्येकस्मिन् त्रित्व-स्यापर्याप्तिसम्बन्धेनावृत्तित्वेनातिव्याप्तिवारणाय साध्यवदवृत्ति-साध्याभाववदवृत्तिधूमवान् पर्वत इत्यादिज्ञानादप्यनुमित्यापत्ति-वारणाय च तत्प्रवेशस्यावश्यकत्वात् , साधनभेदेनाभिन्नतयेत्यपि मन्दं—निर्णयत्वनिर्वचनानुरोधेन साधनभेदेन तद्भेदस्यावश्य-कत्वात् ,

अथ वन्ह्यभाववद्वृत्तित्वावच्छिन्नप्रकारतानिरूपिताभावप्रकारत्वाविशिष्टा या तादृशी स्वावच्छिन्नप्रकारता तन्निरूपितविशेष्यताकत्वसम्बन्धेन किञ्चिद्धर्मवज्ज्ञानत्वरूपनिर्णयत्वनिर्वचनसम्भवान्न तदनुरोधेन साधनभेदेन तद्भेदः, वैशिष्ट्यं च स्वनिरूपकविशेष्यताऽवच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसम्बन्धेन बोध्यमिति चेद् ?

न—तथाऽप्यालोकपरामर्शीयाप्रामाण्यग्रहदशायां धूमपरामर्शादनुमित्युदयेनाप्रामाण्यग्रहाणां पृथगुत्तजकत्वस्यावश्यकतया साधनभेदेन तद्भेदस्यावश्यकत्वात्, स्वावच्छिन्नप्रकारतानिरूपितव्यापकत्वप्रकारतानिरूपितसाध्यनिष्ठप्रकारतानिरूपितसामानाधिकरण्यप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपिताभावप्रकारत्वाविशिष्टा या तादृशी स्वावच्छिन्नप्रकारता तन्निरूपिताविशेष्यताकत्वसम्बन्धेन किञ्चिद्धर्मज्ञानत्वरूपनिर्णयत्वेन व्यापकसामानाधिकरण्यविषयकपरामर्शस्यापि हेतुत्वसम्भवाच्च,

विषयविरोधाभावादित्यपि न सद्, हेतुसमानाधिकरणाभावीयप्रतियोगितायाः साध्यताऽवच्छेदकसम्बन्धावच्छिन्नसाध्यताऽवच्छेदकावच्छिन्नप्रतियोगितानिरूपितस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको योऽभावस्तद्वृत्साध्यसामानाधिकरण्यज्ञानत्वेन व्यापकसामानाधिकरण्यज्ञानस्य कारणतया व्यापकताज्ञानेऽपि वह्नित्वस्य स्वरूपतः प्रतियोगित्वतदवच्छेदकत्वयोश्च संसर्गमर्यादया भानेन विषयविरोधात्,

स्वाधिकरणेत्यादिकमपि विचारासहं; तथा हि—अत्र

वृत्तित्वं न सम्बन्धसामान्येन; वह्न्याद्यभावस्य कालिकादिना धूमाद्यधिकरणे वृत्तित्वेनाव्याप्तेः, नाप्यभावीयविशेषणतया घटत्वाभाववान्प्रमेयत्वादित्यादावतिव्याप्तेः; साध्याभावस्य घटत्वादेस्समवायेनैव वृत्तेः, नापि साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादावव्याप्तेः; तादृशेन कालिकसम्बन्धेनात्मवृत्तित्वस्याप्रसिद्धेः सत्ताभाववाञ्जात्यभावादित्यत्राव्याप्तेः तादृशेन समवायेन जात्यादिवृत्तित्वाप्रसिद्धेः द्रव्याभाववान् जात्यभाववानात्मत्वादित्यत्रातिव्याप्तेश्च गगनघटत्वाद्यात्मकसाध्याभावस्य हेत्वधिकरणावृत्तित्वात्,

अथाभावीयविशेषणतयैव तद्; अभावत्वप्रतीतेः प्रमात्वानुरोधेनाभावाभावस्यातिरिक्ततया नोक्तदोषः, साध्याभावत्वेन साध्याभावस्य हेत्वधिकरणवृत्तित्वं विवक्षणीयं तेन कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यत्र साध्याभावस्याकाशाभावस्याकाशाभावत्वेनात्मवृत्तित्वेऽपि साध्याभावत्वेन काल एव वृत्तितया नाव्याप्तिरिति चेद् ?

न—कपिसंयोग्येतद्वृक्षत्वादित्यादावव्याप्तेः; गुणकर्मान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वाभावादित्यादावव्याप्तेर्हेत्वधिकरणे साध्याभावस्य विशिष्टसत्त्वस्य वृत्तेः,

अथ स्वाधिकरणावृत्तिसाध्याभावाधिकरणताकत्वं विवक्षितम् ?

न चैवं ह्रदादिवृत्तिधूमाभावाधिकरणतया वह्न्यधिकरण-

वृत्तितया धूमवान्वन्हेरित्यत्रातिप्रसङ्ग इति वाच्यम् ?

तत्र साध्याभावस्यैक्येन तदधिकरणताया अप्यैक्यादिति चेद् ?

न—तथाऽपि भूतत्वाभावमूर्त्तत्वाभावयोरन्यतरत्वेनाभावे साध्ये मूर्त्तत्वे हेतावतिव्याप्तेः; अभावाभावस्यातिरिक्तत्वेऽनवस्थापत्त्या प्रतियोगिरूपतया तत्र साध्याभावस्यान्यतररूपतयाऽननुगतत्वेन तदधिकरणताया अप्यननुगमेन मूर्त्तत्वाभावाधिकरणताऽऽत्मकसाध्याभावाधिकरणताया हेत्वधिकरणावृत्तित्वात्,

न च साध्याभावाधिकरणतासामान्ये स्वाधिकरणावृत्तित्वं विवक्षणीयमिति वाच्यम् ?

तस्याः साध्याभावाधिकरणतात्वव्यापकस्वाधिकरणावृत्तित्वपर्यवसन्नतया व्यापकसामानाधिकरण्यापेक्षया गौरवाद्,

नवीनास्तु यत्र साध्याभाववति हेतुताऽवच्छेदकसम्बन्धेन वृत्तित्वं प्रसिद्धं तत्र साध्याभाववदवृत्तित्वं; यत्र चाप्रसिद्धं तत्र स्वाधिकरणावृत्तिसाध्याभावकत्वं व्याप्तिः, प्रथमे साध्याभाववत्त्वं द्वितीये च वृत्तित्वं साध्यरूपाभावप्रतियोगिताऽवच्छेदकसम्बन्धेन वोध्यं; तेन न तत्र सम्बन्धविकल्पप्रयुक्तदोषः,

न च संयोगसम्बन्धावच्छिन्नघटाभावे साध्ये विषयितया हेतावुभयलक्षणस्याव्याप्तिः; घटाभावाभाववति घटसंयुक्ते विषयितया वृत्तेरप्रसिद्धेः, हेतुमति ज्ञानादौ साध्यरूपाभावप्रतियोगिताऽवच्छेदकसंयोगेन वृत्तेरप्रसिद्धेश्चेति वाच्यम् ?

वृत्त्यनियामकसम्बन्धेन व्याप्तेः प्राचीनैरनभ्युपगमादिति-

वदन्ति,

तच्चिन्त्यम्–संयोगसम्बन्धावच्छिन्नघटाभावे साध्ये ध्वंसत्वादिहेतावुभयलक्षणस्यैवाव्याप्तेः साध्याभाववति घटसंयुक्ते ध्वंसत्वीयस्वरूपसम्बन्धेन वृत्तेरप्रसिद्धेः; ध्वंसत्वरूपहेतुमति च साध्यरूपाभावप्रतियोगिताऽवच्छेदकसंयोगेन वृत्तेरप्रसिद्धेश्च,

एवं कालिकेन ध्वंसवृत्तित्वविशिष्टघटत्वस्य तेन सम्बन्धेनाभावे विशेषणतया साध्य आत्मत्वादिहेतावव्याप्तिरपि बोध्या,

यत्तु—स्वाधिकरणावृत्तिसाध्यप्रतियोगिकत्वविशिष्टसाध्यताऽवच्छेदकसम्बन्धानुयोगित्वसामान्याभावकत्वं स्वाधिकरणेत्यादेरर्थ इति कैश्चिन्नवीनतरैरुक्तं तदुदक्षरत्वादिग्रस्तम् ,

एतेन स्वाधिकरणावृत्तिसाध्यासमानाधिकरणकत्वे स्वाधिकरणेत्यादेस्तात्पर्यं तत्र चाभावीयस्वरूपसम्बन्धेन स्वाधिकरणवृत्तित्वं साध्यसामानाधिकारण्यं च विवक्षणीयमित्यपि परास्तम् ,

व्यभिचारिसाधारण्यवारणाय व्यापकत्वपर्यवसन्नपावत्वस्य साध्यासमानाधिकरणविशेषणतयाऽवश्यं निवेशे व्यापकसामानाधिकरण्यापेक्षया गौरवाच्चेति दिक् ,

असत्सपक्षः केवलव्यतिरेकी; तथा च स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिनिर्णयविषयताऽनवच्छेदकव्यतिरेकिताऽवच्छेदकधर्मावच्छिन्नविधेयताकानुमितिकरणत्वं केवलव्यतिरेक्यनुमानत्वमिति फलितं, स्वपदमनुमितिपरं, लक्ष्यं चास्याप्रसिद्धसाध्यकमितरभेदानुमानम् ,

आचार्यमते च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्या-

पक्षव्यतिरेकसहचारत्वकत्वं केवलव्यतिरेकित्वम्,

मणिकृन्मते च प्रकृतहेतुसाध्यकानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतहेत्वभावव्याप्तित्वकत्वं तत्त्वमिति बोध्यम्,

अथ केवलव्यतिरेकि नानुमानं व्याप्तिविशिष्टे पक्षधर्मताज्ञानमेवानुमितिहेतुः; प्रकृते च व्यतिरेकसहचारेण साध्याभावे हेत्वभावव्याप्तिर्गृह्यते हेतौ च पक्षधर्मताग्रह इत्यनुमितिकारणाभावेनानुमितेरसम्भवादिति चेद् ?

न—अनुभवबलेन साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्याप्यनुमितिहेतुत्वेनादोषात्, साध्याभावव्यापकसाधनाभावाभावेन साधनेन साध्याभावाभावस्य सिद्धेरप्रत्यूहत्वाद् व्यापकाभाववत्तानिश्चये व्याप्याभावनिश्चयावश्यंभावात्,

अथात्रेच्छावानात्मत्वादित्यत्राव्याप्तिः; इच्छाऽऽदीनामव्याप्यवृत्तितयेच्छाऽऽद्यभावस्य जीवात्मन्यपि सत्त्वेन तत्र व्याप्यवृत्त्यात्मत्वाभावस्यासत्त्वेनात्मत्वाभावस्येच्छाऽभावाव्यापकत्वात्,

एवमात्मा संयोगादित्यत्रातिव्याप्तिः संयोगाभावस्य केवलान्वयित्वेनात्मत्वाभावव्यापकत्वादिति चेद् ?

अत्र दीधितिकृतः—साध्यताऽवच्छेदकावच्छिन्नसाध्यासामानाधिकरण्यपर्यवसन्नं प्रतियोगिवैयधिकरण्यं साध्याभावे निवेशनीयम्,

एवं साधनताऽवच्छेदकावच्छिन्नसाधनासामानाधिकरण्यपर्यवसन्नं प्रतियोगिवैयधिकरण्यं हेत्वभावे निवेशनीयमिति नोक्ता-

व्याप्त्यतिव्याप्ती इत्याहुः,

ननु हेत्वभावे प्रतियोगिवैयधिकरण्यनिवेशनमनर्थकम् आत्मत्वाभाववति घटादौ संयोगरूपहेत्वभावाभावस्य सत्त्वेन तस्यात्मत्वाभावाव्यापकत्वेनातिव्याप्त्यसम्भवाद् व्यापकतायां प्रतियोगिवैयधिकरण्यं निवेश्य संयोगादिरूपहेत्वभावस्य साध्याभावव्यापकत्वमुपपाद्य पुनर्हेत्वभावे प्रतियोगिवैयधिकरण्यनिवेशनेन तद्वारणं च प्रक्षालनाद्धीतिन्यायेन सन्दर्भविरुद्धम्,

न च व्यापकतायां प्रतियोगिवैयधिकरण्यानिवेशे द्रव्यभिन्नं संयोगिभिन्नत्वादित्यादावव्याप्तिः; हेत्वभावस्य संयोगादेर्द्रव्येऽभावसत्त्वेन साध्याभावाव्यापकत्वादिति वाच्यम् ?

संयोगिभेदाभावस्य संयोगरूपत्वेऽपि संयोगिभेदाभावत्वेन तस्य व्याप्यवृत्तित्वोपगमेन तस्य साध्याभावव्यापकत्वसम्भवात्,

यत्तु–साध्याभाववद्यत्किञ्चिद्वृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकवृत्तित्वविशिष्टसामान्यकं यद्यत्तदन्यप्रकृतहेत्वभावत्वमेव साध्याभावव्यापकत्वं प्रकृते विवक्षणीयम् अभावाद्यघटितत्वेन लघुत्वात्,

एवं च संयोगाभावत्वादेः साध्याभाववद्यात्किञ्चिद्वृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकवृत्तित्वविशिष्टसामान्यकत्वाभावात्तेन रूपेण व्यापकत्वमक्षुण्णमेवेत्युक्तातिव्याप्तिसम्भवेन हेत्वभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यकमिति नवीनैरुक्तम्,

तच्चिन्त्यं–सत्ताऽभाववान् गुणान्यसत्त्वाभावादित्यादौ साध्याभाववति सकले हेत्वभावस्य सत्ताऽनतिरिक्तविशिष्टसत्त्वादेर्वृत्तेरुक्तव्यापकत्वानपायेनातिव्याप्तेर्यत्किञ्चित्त्वस्य दुर्वचत्वा-

च्चोक्तव्यापकत्वनिवेशस्यैवासम्भवेन तमादाय दीधितिकारो-क्तातिव्याप्तिसङ्गमनासङ्गतेः,

केचित्तु—संयोगादिर्यत्र व्यधिकरणसम्बन्धेन हेतुर्न तु समवायेन तत्रात्मत्वसाध्यकेऽतिव्याप्तिसम्भवेन हेत्वभावे प्रति-योगिवैयधिकरण्यनिवेशनमावश्यकम्;

अथ तथाऽपि यद्यत्सम्बन्धेन साध्याभावव्यापकीभूताभाव-प्रतियोगित्वं तत्सम्बन्धेन वृत्तिमत्त्वमात्रविवक्षणादेव संयोगादे-र्व्यधिकरणसम्बन्धेनाप्रवृत्तित्वात्तद्वारणेन तदनुरोधेनापि हेत्वभावे प्रतियोगिवैयधिकरण्यपर्यन्तनिवेशसार्थक्यमिति चेद्?

न—तथा सति वृत्त्यनियामकसम्बन्धस्यात्यन्ताभावप्रतियो-गिताऽनवच्छेदकतानये तत्सम्बन्धेन हेतावव्याप्तिप्रसङ्गात्, प्रति-योगिवैयधिकरण्यप्रवेशे च सम्बन्धान्तरेण हेतोरभावमादायैव लक्षणसमन्वयादित्याहुः,

तदसत्-अत्र प्रतियोगित्वपदेनाभावाभावत्वाविवक्षणेनावृ-त्तौ च स्वाभावाभावत्वस्य दीधितिकृतैवानुपगमेन व्यधिकरण-सम्बन्धेन संयोगस्य हेतुतायामप्यतिव्याप्तिविरहादिति चेद्?

न—व्यापकतायामभावे तद्वन्निष्ठत्वस्य सम्बन्धविशेषानिय-न्त्रितत्वेन वन्हिमान्धूमादित्यादौ वन्ह्यभावादिमत्यपि कालिका-दिसम्बन्धेन धूमाभावाभावस्य वृत्तित्वेन धूमाद्यभावस्य वन्ह्य-भावादिव्यापकत्वासम्भवेनाव्याप्तिवारणाय व्यापकतायां प्रति-योगिवैयधिकरण्यनिवेशस्यावश्यकत्वेन हेत्वभावे प्रतियोगिवैय-धिकरण्यानिवेशस्यावश्यकत्वात्,

केचित्तु—अत्रान्योन्याभावघटितव्यापकतायाः संयोगाद्य-भावेऽक्षतत्वेन हेत्वभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यक-मित्याहुरिति दिक्,

अत्र दीधितिकृतः—साध्याभावव्यापकाभावप्रतियोगित्वं-नानुमित्यौपयिकं गौरवाद्; व्यभिचारज्ञानाविरोधित्वाच्च, वन्ह्य-भावसमानाधिकरणाभावाप्रतियोगी धूमाभाव इति हि ज्ञानं-धूमाभावाभावत्वेन धूमे वन्ह्यभावसामानाधिकरण्यबुद्धिं तुल्य-वितिवेद्यतया धूमाभावे वन्ह्यभावसमानाधिकरणाभावप्रतियो-गित्वविषयिणीं कदा चिद्विरुन्ध्याद् न तु धूमत्वेनोक्तसामानाधि-करण्यबुद्धिं; भिन्नप्रकारकत्वाद्, व्यतिरेकव्याप्तिग्रहाधीना च धीर्नानुमितिस्तत्त्वेनाननुभवात् क्लृप्तकारणाभावान् सामग्रीभे-दकल्पनायाश्चानुभवैकाधीनत्वात् किंत्वर्थापत्तिरेव,

अथ निर्णीते विना सिद्धीच्छामर्थापत्तेरनुत्पत्त्या पक्षताज-न्यत्वात् साऽप्यनुमितिर्लाघवाद्; अनुमितित्वे पक्षताजन्यत्वस्यैव प्रयोजकत्वादिति चेद् ?

न—अनुमितावेव पक्षताजन्यत्वस्यानभ्युपगमादिति वदन्ति,

तच्चिन्त्यम्—अप्रसिद्धसाध्यकानुमित्यनुरोधेन व्यतिरेक-व्याप्तिज्ञानस्यानुमितिहेतुत्वावश्यकत्वात् ;

किञ्च व्यतिरेकव्याप्तिज्ञानजन्यबुद्धेरर्थापत्तित्वेऽर्थापत्त्यनु-मितिसामग्र्योः सम्वलनदशायामर्थापत्त्यनुमित्योर्युगपदनुत्पाद-निर्वाहाय परस्परं प्रतिबन्धकत्वकल्पने गौरवम्,

एवं प्रमित्योर्वैजात्यमपि सर्वसिद्धम् अपि चानुमितौ पक्षता-

हेतुत्वस्य पक्षताविचारेऽस्माभिर्व्यवस्थापितत्वेनार्थापत्तेरपि पक्षताजन्यतयाऽनुमितित्वमेव,

व्यभिचारज्ञानाविरोधित्वादित्यपि मन्दम्—अनुभवानुरोधेन मणिमन्त्रादिन्यायेन विरोधित्वसम्भवात्,

साध्यसामानाधिकरण्यावच्छेदकहेतुताऽवच्छेदकरूपवत्त्वं व्याप्तिरिति मते तद्या हेतुताऽवच्छेदके साध्यसामानाधिकरण्यानवच्छेदकत्वरूपव्यभिचारज्ञानाविरोधित्ववद् व्यतिरेकव्याप्तेः साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यभिचारज्ञानविरोधित्वस्य वक्तुं शक्यत्वाच्च, युज्यते च व्यतिरेकव्याप्तेरप्यनुमित्यौपयिकत्वं; तथा सत्यप्रामाण्यविशिष्टवह्निमत्पर्वतज्ञानकालीनवन्ह्यभावव्यापकीभूताभावप्रतियोगिधूमवान्पर्वतो वह्निमत्पर्वतकालीनघटवानित्याद्यनन्तानुमितिसामग्र्या अनन्तभिन्नविषयकप्रत्यक्षादिकम्प्रति स्वातन्त्र्येण प्रतिबन्धकत्वाकल्पनेन लाघवसम्भवादिति दिक्,

सत्सपक्षविपक्षोऽन्वयव्यतिरेकी, तथा च स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिनिर्णयविषयताऽवच्छेदकव्यतिरेकिताऽवच्छेदकधर्मावच्छिन्नविधेयताकानुमितिकरणत्वमन्वयव्यतिरेक्यनुमानत्वमिति फलितं, स्वपदमनुमितिपरं, लक्ष्यं चास्य प्रसिद्धानुमानम्,

आचार्यमते प्रकृतव्याप्तिग्राहकज्ञानविषयत्वव्याप्योभयसहचारत्वकत्वं तत्त्वम्,

मणिकृन्मते च प्रकृतहेतुसाध्यकानुमितिहेतुज्ञानविषयव्याप्तित्वव्याप्यप्रकृतसाध्यव्याप्तिप्रकृतहेत्वभावव्याप्त्युभयत्वकत्वं त-

त्वमिति बोध्यम् ,

तदेवं निरूपितं त्रिविधमनुमानम् ,

अत्र चार्वाकमतानुयायिनः—सर्वमिदं सम्भवत्यनुमानप्रामाण्येन; तत्रैव च मानाभावः,

न चैवं पर्वतादिदर्शनोत्तरं वन्ह्यादेरनिश्चयेन तत्र धूमाद्यर्थिनो वन्ह्यादौ प्रवृत्त्यनुपपत्तिरिति वाच्यम् ?

सम्भावनाया एव निश्चयकार्यप्रवृत्त्यादिनिर्वाहकत्वेन सम्भावनयैव तदुपपत्तेः,

न च सम्भावनाकारणतया लिङ्गज्ञानस्य प्रमाणान्तरत्वमावश्यकमिति वाच्यम् ?

सम्भावनाविषयस्य वह्नित्वादिविशिष्टस्यालीकतया तस्या अप्रमात्वात् ,

न चैवं वह्नित्वादिविशिष्टविषयकप्रत्यक्षस्यापि प्रमात्वं न स्यादिति वाच्यम् ?

निर्विकल्पकमात्रस्यैव सद्विषयकतया प्रामाण्योपगमेन विशिष्टप्रत्यक्षेऽप्रामाण्यस्येष्टत्वादिति वदन्ति,

अत्र नैयायिकधुरन्धराः—वह्निमनुमिनोमि न साक्षात्करोमीतिप्रत्ययेनातिरिक्तानुमितित्वजातिसिद्धौ तदवच्छिन्नकरणतया लिङ्गज्ञानस्य प्रमाणान्तरत्वमावश्यकम् ,

नन्वस्तु तादृशप्रत्ययेनानुमितित्वाख्योऽतिरिक्तो जातिविशेषः; परं तु स प्रत्यक्षत्वव्याप्य एव स्वीक्रियत इति न लिङ्गज्ञानस्य प्रमाणान्तरत्वम् ,

न चैवं चाक्षुषत्वादिना सङ्करप्रसङ्ग इति वाच्यम् ?

मानसप्रत्यक्ष एव तादृशजातिस्वीकारात्,

न च मानसे चाक्षुषादिसामग्र्याः प्रतिबन्धकतया पर्वतादिचक्षुःसंनिकर्षदशायां मानसज्ञानासम्भवः; अनुमित्यन्यमानसत्वस्य तत्प्रतिबन्ध्यताऽवच्छेदकत्वे च गौरवापात इति वाच्यम् ?

तत्र फलानुरोधेन चक्षुर्मनोयोगादिविरहकल्पनेन चाक्षुषादिसामग्रीविरहसम्भवाद्,

अथानुमित्यन्यमानस आत्मलौकिकविषयितानियमेन लौकिकविषयितासम्बन्धेनात्मत्वमेव मानसत्वं; तदेव च मनःसंनिकर्षादिजन्यताऽवच्छेदकं तथा चानुमितौ मानसत्वं न सम्भवतीति चेद् ?

न–तत्र मानसत्वजातेरसत्त्वेऽपि प्रत्यक्षत्वस्य तत्र सत्त्वेन तथाऽप्यनुमानस्य प्रमाणान्तरत्वाभावात्,

न च प्रत्यक्षत्वस्य तत्र सत्त्वे मानाभाव इति वाच्यम् ?

तत्र प्रत्यक्षत्वस्यासत्त्वे विशिष्टवैशिष्ट्यबोधात्मकानुमितौ विशेषणताऽवच्छेदकप्रकारकनिश्चयस्य कारणत्वान्तरकल्पनाऽऽपत्त्या गौरवप्रसङ्गेन तत्र प्रत्यक्षत्वसिद्धेः,

न च प्रत्यक्षानुमितिसाधारणविशिष्टवैशिष्ट्यावगाहिबुद्धित्वस्यैव तत्कार्यताऽवच्छेदकत्वाद् न कारणत्वान्तरकल्पनाऽऽपत्तिरिति वाच्यम् ?

स्मृतौ व्यभिचारेण तथा वक्तुमशक्यत्वात्,

न च तादृशानुभवत्वमेव कार्यताऽवच्छेदकमिति वाच्यम् ?

प्रत्यक्षत्वातिरिक्तानुभवत्वजातौ मानाभावात्,

न च तादृशानुमितौ विशेषणताऽवच्छेदकप्रकारकनिश्चयस्याहेतुत्वेऽपि न क्षतिः; परामर्शस्यानुमितिविशेषणताऽवच्छेदकप्रकारकत्वानियमेन विशेषणताऽवच्छेदकप्रकारकज्ञानाभावदशायां तादृशानुमितेरापत्त्ययोगादिति वाच्यम्?

वह्नेर्महानसीयत्वे लाघवमिति लाघवज्ञानदशायां महानसीयो वह्निरिति स्वतन्त्रज्ञानसत्त्व इव तदसत्त्वेऽपि वह्निव्याप्यवान् पर्वत इति परामर्शाद् महानसीयत्वविशिष्टवह्निवैशिष्ट्यावगाह्यनुमितिवारणायेतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीतिपरामर्शात् स्वतन्त्रेतरभेदत्वप्रकारकज्ञानसत्त्व इव तदसत्त्वेऽपि पृथिवीतरभिन्नेत्यनुमितिवारणाय च तादृशहेतुताया आवश्यकत्वात्,

अथ पर्वतीयवन्ह्यादौ संनिकर्षादिघटितप्रत्यक्षसामग्र्यसत्त्वेन तस्य प्रत्यक्षविशेषात्मकानुमितौ भानासम्भवेनानुमितौ प्रत्यक्षत्वमसम्भवि; तस्य प्रागप्रतीत्या ज्ञानलक्षणाया असम्भवात् सामान्यलक्षणायाः प्रत्यासत्तित्वस्य नवीनैः खण्डितत्वेन वह्नित्वादिसामान्यलक्षणासंनिकर्षस्यापि वक्तुमशक्यत्वादिति चेद्?

न–अनुमित्यनात्मकसंनिकर्षादिघटितसामग्र्यैवानुमित्यात्मकप्रत्यक्षे परामर्शादिघटितप्रत्यक्षविशेषसामग्र्यैव पर्वतीयवन्ह्यादेर्भानोपगमे दोषाभावात्,

न चानुमितौ प्रत्यक्षत्वोपगमे संनिकर्षहेतुतायां व्यभिचारः; लौकिकविषयतायास्तज्जन्यताऽवच्छेदकत्वोपगमेनानुमितौ तद-

भावेन तद्वारणेऽपि ज्ञानलक्षणप्रत्यासत्तेर्हेतुतायां व्यभिचारो-दुर्वार एवेति वाच्यम् ?

उक्तलाघवेनानुमितेः प्रत्यक्षत्वसिद्धौ प्रसक्तस्य तादृशव्य-भिचारस्य वारणायानुमित्यन्यालौकिकप्रत्यक्षत्वस्यैव ज्ञान-लक्षणप्रत्यासत्तेः कार्यताऽवच्छेदकत्वाङ्गीकारादिति चेन्न ?

मैवं-भिन्नविषयकप्रत्यक्षेऽनुमित्साविशिष्टानुमितिसामग्र्येव प्रतिबन्धिका; न तु तत्र प्रत्यक्षेच्छोत्तेजिकेति तत्र भिन्नविषयकप्र-त्यक्षत्वमेव प्रतिबन्ध्यताऽवच्छेदकम् , एवं च प्रत्यक्षत्वस्यानुमि-तौ स्वीकारे वन्ह्याद्यनुमित्साविशिष्टवन्ह्याद्यनुमितिसामग्रीसत्त्वे वन्ह्यादिगोचरानुमितेरप्यनुपपत्तिरिति तत्सामग्रीप्रतिबन्ध्यताऽव-च्छेदककोटावनुमित्यन्यत्वस्याधिकस्य निवेशनीयतया गौरवम् ,

न च तत्र शाब्दबोधादिसाधारण्यानुरोधेनानुमित्यन्यज्ञान-त्वस्यैव तादृशसामग्रीप्रतिबन्ध्यताऽवच्छेदकत्वमावश्यकमिति वाच्यम् ?

यादृशविषयविशेषेऽनुमित्साविशिष्टानुमितिसामग्र्यां सत्यां कदाऽपि शाब्दादिगोचरेच्छाविशिष्टशाब्दादिसामग्रीसमवधानं-नासीत्; तत्स्थलीयतादृशानुमितिसामग्रीप्रतिबन्ध्यताऽवच्छेदक-स्य शाब्दादिसाधारण्यानुरोधविरहात् ,

यत्तु-अनुमित्साविशिष्टवन्ह्याद्यनुमितिसामग्र्याः प्रतिबन्ध्य-ताऽवच्छेदककोटौ वन्ह्यादिप्रकारतानिरूपितपर्वतादिविषयताभि-न्नमुख्यविशेष्यताशालित्वरूपं भिन्नविषयकत्वं चेन्निवेश्यते तदै-वोपदर्शितगौरवसम्भवस्तदेव न; किन्तु लाघवाद्वन्ह्यादिप्रकारता-

निरूपितपर्वतादिविषयताशून्यत्वरूपमसमानविषयकत्वमेव निवेश्यते; एवं चानुमित्साविशिष्टवन्ह्याद्यनुमितिसामग्रीकाले वन्ह्याद्यनुमितेर्घटाद्यनुमितेश्च समूहालम्बनरूपायास्ताहशपर्वतादिविषयताशून्यत्वरूपतत्प्रतिबन्ध्यताऽवच्छेदकानाक्रान्ततया नानुपपत्तिरिति न तत्सामग्रीप्रतिबन्ध्यताऽवच्छेदककोटावनुमित्यन्यत्वनिवेशप्रयुक्तगौरवसम्भव इति,

तदसत्–तथा सति ताहशानुमितिसामग्र्यभावदशायां पर्वतो वन्हिमान् इति प्रत्यक्षमात्रसामग्रीसत्त्वे ताहशप्रत्यक्षे जायमाने ताहशानुमितिसामग्र्यभावरूपकारणबलात्ताहशपर्वतादिविषयताशून्यप्रत्यक्षत्वावच्छिन्नापत्तेर्दुर्वारत्वात् ताहशप्रत्यक्षत्वावच्छिन्नं प्रति ताहशपर्वतादिविषयिताशालिज्ञानसामग्र्याः प्रतिबन्धकत्वान्तरकल्पने पुनरतीवगौरवाद्, उपदर्शितभिन्नविषयकत्वस्य तत्प्रतिबन्ध्यताऽवच्छेदकत्वे तु तदानीं तदवच्छिन्नसामग्र्यभावादेव तदवच्छिन्नापत्त्यभावादिति वदन्ति,

नवीनास्तु-यत्सिसादिदर्शितरीत्या पूर्वोक्तगौरवविरहेऽपि न क्षतिः; स्थलान्तरेऽनुमित्यन्यत्वनिवेशप्रयुक्तगौरवसम्भवात्, तथा हि शाब्देच्छाविशिष्टशाब्दसामग्र्या अपि सामान्यतो भिन्नविषयकप्रत्यक्षत्वं प्रतिबन्ध्यताऽवच्छेदकं प्रत्यक्षसामग्र्या भिन्नविषये शाब्दसामग्र्यपेक्षयाऽपि दुर्बलत्वात् तथा चानुमितौ प्रत्यक्षत्वोपगमे भिन्नविषये शाब्दानुमितिगोचरेच्छासमवहितशाब्दानुमितिसामग्रीसमवधानदशायामनुमितिनिर्वाहाय तत्रानुमित्यन्यत्वनिवेशो गौरवम् ,

एवं पर्वतादौ वन्ह्यादेश्चाक्षुषाद्युपनीतभानस्येच्छासत्त्वेऽपि तत्र तदनुमितेरिच्छासहितसामग्रीदशायामनुत्पादात्तादृशसामग्र्याः समानविषयकान्यत्वादिकमनिवेश्यालौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्यन्यत्प्रतिबन्धकत्वं कल्पनीयम्,

न चासमानविषयकस्थलीयप्रतिबन्ध्यताऽवच्छेदकगर्भनिविष्टनिरुक्तासमानविषयकत्वशरीरे वन्ह्यादेर्लौकिकविषयतानिवेशात्तस्य समानविषयकोपनीतभानसाधारण्यसम्भवे किमेतादृशप्रतिबन्धकत्वान्तरकल्पनेनेति वाच्यम्।

समानविषयकशाब्दधीसाधारणतया समानविषयकलौकिकान्यत्वस्य भिन्नविषयकस्थलीयप्रतिबन्ध्यताऽवच्छेदकत्वासम्भवात् तस्यातथात्वेऽनुमित्साविशिष्टानुमितिसामग्रीदशायां भिन्नविषयकानुमित्युपपत्तये तत्प्रतिबन्ध्यताऽवच्छेदकगर्भेऽनुमित्यन्यत्वनिवेशस्यावश्यकत्वापाताच्च, पर्वतादिविषयकवन्हिज्ञानं जायतामित्याकारकप्रत्यक्षसाधारणधर्मप्रकारकानुमित्सादशायां प्रत्यक्षत्वप्रकारकेच्छाबलादुपनीतभानोत्पत्त्या भिन्नविषयकप्रत्यक्षादेश्चानुत्पत्त्या समानविषयकभिन्नविषयकसाधारणैकप्रतिबन्ध्यप्रतिबन्धकभावासम्भवाच्च,

एवं चानुमितौ प्रत्यक्षतोपगमे तादृशसामग्रीदशायामनुमितिनिर्वाहाय तत्रानुमित्यन्यत्वस्याधिकस्य निवेशनीयतया महागौरवमित्याहुः,

तच्चिन्त्यम्-एतादृशगौरवसम्भवेऽप्युक्तरीत्या पूर्वोक्तगौरवस्यापि ब्रह्मणाऽप्यदुर्वारत्वेन पूर्वोक्तगौरवविरहेऽपि न क्षति-

रित्यस्यासङ्गतत्वादिति कृतं पल्लवितेन,

तच्चानुमानं द्विविधं स्वार्थं परार्थं च, स्वार्थं स्वीयानुमितिजनकं, परार्थं परकीयानुमितिजनकं; परकीयानुमितिश्च न्यायप्रयोज्या, विवादविषयविषयकपरकीयानुमितेर्न्यायजन्यन्यायार्थज्ञानजन्यपरामर्शजन्यत्वाद्,

न च न्यायार्थज्ञानस्यैव परामर्शात्मकतया तत एव तत्संभवे किं तज्जन्यपरामर्शान्तराङ्गीकारेणेति वाच्यम् ?

वादिवाक्यस्याप्रमाणत्वग्रहेण तज्जन्यज्ञानेऽप्रामाण्यशङ्कासम्भवेन तदनास्कन्दितपरामर्शसम्पत्तये तदङ्गीकाराद्,

न्यायत्वं च धूमात्पर्वतो वह्निमानित्यादिविरुद्धतत्तदानुपूर्वीभेदकूटवदानुपूर्वीकत्वे सति पर्याप्तिसम्बन्धेन प्रतिज्ञाऽऽदिवाक्यपञ्चकनिष्ठपञ्चत्ववत्त्वम् , विरुद्धानुपूर्वीकेऽतिप्रसङ्गवारणाय सत्यन्तं; घटमानयेत्यादावतिप्रसङ्गवारणाय विशेष्यं, न्यायावयवेऽतिप्रसङ्गवारणाय पर्याप्तिसम्बन्धेनेति, प्रतिज्ञाऽऽदिवाक्यपञ्चकञ्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकं, तद् यथा पर्वते धूमेन वह्नौ साध्ये पर्वतो वह्निमान् धूमाद् यो यो धूमवान्सोऽग्निमान्यथा महानसं वह्निव्याप्यधूमवानयं तस्माद्वह्निमानिति, एवमन्यत्रोह्यम्, तच्च प्रत्येकं न्यायावयव इत्युच्यते, न्यायावयवत्वं च प्रतिज्ञाऽऽद्यघटकत्वे सत्युभयघटकभागद्वयाघटितत्वे सति न्यायान्तर्गतत्वं, प्रतिज्ञाऽऽद्येकदेशवारणायाद्यसत्यन्तम्, उभयघटकभागद्वयघटितेऽतिव्याप्तिवारणाय द्वितीयसत्यन्तम् , उदासीनेऽतिव्याप्तिवारणाय तृतीयसत्यन्तम्, एतन्निष्कर्षश्चास्मत्कृतभवानन्दीयव्याख्यायां सर्वोपकारि-

ण्यामनुसन्धेयम्, इह विस्तरभिया न प्रस्तूयते,

प्रतिज्ञात्वं च स्वाघटकपदसाकाङ्क्षपदघटितत्वे सति स्वघटकपदप्राग्वर्त्तिस्वघटकपदार्थमुख्यविशेष्यताशालिबोधजनकत्वे सति न्यायावयवत्वं, पर्वतो वन्हिमानित्यादौ स्वाघटकंहेत्ववयवघटकं पदं तत्साकाङ्क्षपदघटितत्वात् स्वघटकपदप्राग्वर्त्तिस्वघटकपदं पर्वतादिपदं, तदर्थमुख्यविशेष्यताशालिबोधजनकत्वाच्च लक्षणसमन्वयः, उदाहरणवारणाय प्रथमसत्यन्तं तस्येतरावयवान्वये निराकाङ्क्षत्वात्तद्व्युदासः, उपनयादिवारणाय द्वितीयं सत्यन्तं, तत्रोपनयस्यापि निगमनघटकप्राग्वर्तीदमादिपदार्थमुख्यविशेष्यताशालिशाब्दबोधजनकत्वात् स्वघटके साध्यपदविशेषणं, निगमनस्यापि स्वघटकपदप्राग्वर्त्युपनयस्थेदंपदार्थमुख्यविशेष्यताशालिशाब्दबोधजनकत्वात्तत्रातिप्रसङ्गवारणाय स्वघटकेति चरमपदविशेषणं, द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ हेत्ववयवस्यापि तादृशान्यत्वविशेष्यकबोधजनकत्वात्तत्रातिप्रसङ्ग इति विशेष्यतायां मुख्यत्वनिवेशः, उदासीनप्रतिज्ञासमानाकारवाक्यवारणाय तृतीयदलनिवेशः,

न चात्र स्वत्वस्याननुगमेन लक्षणाननुगम इति वाच्यम्?

अनुगतस्वत्वस्येश्वरवादेऽस्माभिर्व्यवस्थापितत्वाल्लक्ष्यस्याप्यननुगमेन लक्षणाननुगमस्यादोषत्वाच्च,

हेतुत्वं च स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं, धूमादित्यादिहेत्ववयवस्य पर्वतो वन्हिमानित्यादिप्रतिज्ञैकवाक्यतया धूमज्ञानज्ञाप्यवन्हिमान्पर्वत इत्यादिस्वार्थविशिष्टवैशिष्ट्यबोध-

जनकत्वाल्लक्षणसमन्वयः, अवयवान्तरस्य चातथात्वान्नातिप्रसङ्गः,

अत्रेदं बोध्यं–धूमादित्यादौ ज्ञानजन्यज्ञानविषयत्वरूपं ज्ञानज्ञाप्यत्वं लक्षणया पञ्चम्यर्थः,

अथैवं धूमव्याप्यवान्हिमान्पर्वत इत्याद्याकारकभ्रमात्मकज्ञानजन्यज्ञानविषयत्वस्य धूमादौ सत्त्वेन पर्वतो धूमवान् वन्हेरित्यादिवाक्यस्यापि योग्यत्वापत्तिः, ज्ञाने भ्रमान्यत्वनिवेशेऽपि द्रव्यत्वादिना धूमव्यापकताऽवगाहिज्ञानमादायोक्तापत्तिर्दुर्वारैवेति चेद् ?

मैवम्–उद्देश्यत्वे विधेयत्वे भ्रमान्यज्ञानजनकतानिरूपितजन्यताऽवच्छेदकत्वे च पञ्चम्याः खण्डशो लक्षणात्रयमुपेयते; तथा च मतुबर्थविशेषणताऽऽपन्नसाध्यवाचकवन्ह्यादिपदार्थस्य स्ववृत्तिवन्हित्वावच्छिन्नत्वादिसम्बन्धेन तत्पारतन्त्र्येण विधेयत्वेऽन्वयः; वन्ह्याद्यन्वितविधेयत्वस्य च निरूपितत्वसम्बन्धेनोद्देश्यत्वेऽन्वयस्तादृशोद्देश्यत्वस्य च पक्षवाचकपर्वतादिपदार्थे विशेष्यताऽवच्छेदकपर्वतत्वाद्यवच्छेदेनान्वयस्तादृशोद्देश्यतायां च भ्रमान्यज्ञानजनकतानिरूपितजन्यताऽवच्छेदकत्वरूपापरपञ्चम्यर्थस्यान्वयेन पर्वतो वन्हिमान्धूमादित्यादौ वन्हिमदभिन्नः पर्वतो भ्रमान्यधूमज्ञाननिष्ठजनकतानिरूपितजन्यताऽवच्छेदकत्वाश्रयवान्हित्वावच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यताऽऽश्रय इत्याद्याकारकोऽन्वयबोधः, पर्वतो धूमवान् वन्हेरित्यादौ च धूमवदभिन्नः पर्वतो भ्रमान्यवान्हिज्ञानजन्यताऽवच्छेदकधूमत्वावच्छिन्नविधेयतानिरूपितपर्वतत्वाद्यवच्छिन्नोद्देश्यताऽऽश्रय इत्याकारकान्वयबो·

धो वाच्यः; तत्र तादृशोद्देश्यतायां धूमव्याप्यवन्हिमान् पर्वत इत्यादिभ्रमात्मकज्ञानजन्यताऽवच्छेदकत्वाद् न तादृशवाक्यस्य योग्यताऽऽपत्तिः, नञ्समभिव्याहारस्थले च तादृशोद्देश्यतायामेव नञा भ्रमान्यज्ञानजन्यताऽवच्छेदकत्वाभावो बोध्यते; न तु विधेयतायां; तेन पर्वतो वन्हिमान्महानसीयधूमादित्यादिवाक्यस्य महानसत्वावच्छिन्नोद्देश्यतानिरूपितवन्हित्वावच्छिन्नविधेयतायां वन्हिव्याप्यमहानसीयधूमवन्महानसमित्याकारकभ्रमान्यज्ञानजन्यताऽवच्छेदकत्वसत्त्वेऽपि न प्रामाण्यानुपपत्तिः; तादृशविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यतायां तादृशभ्रमान्यज्ञानजन्यताऽवच्छेदकत्वाभावात् ,

न च धूमव्याप्यपर्वतीयवन्हिमान् पर्वत इत्याद्याकारकभ्रमान्यज्ञानजन्यताऽवच्छेदकत्वस्य धूमत्वावच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यतायां सत्त्वात् पर्वतो धूमवान् वन्हेरित्यादिवाक्यस्य योग्यत्वापत्तिरयोग्यत्वापत्तिश्च नञ्समभिव्याहृततादृशवाक्यस्येति वाच्यम् ?

धर्मिताऽवच्छेदकताऽनवच्छिन्नधर्मिताऽवच्छेदकतानिरूपकप्रकारतानिरूपितमुख्यविशेष्यत्वावच्छिन्नभ्रमान्यज्ञाननिष्ठजनकतानिरूपितजन्यताऽवच्छेदकत्वस्य पञ्चम्यर्थत्वोपगमात् , तादृशज्ञाने पर्वतीयत्वधर्मिताऽवच्छेदकताऽऽपन्नस्यैव वन्हित्वस्य व्याप्तिधर्मिताऽवच्छेदकतया भानाद्; इतरधर्मिताऽवच्छेदकत्वानापन्नविधेयत्वत्वनिष्ठधर्मिताऽवच्छेदकतानिरूपकाधिकरणप्रकारतानिरूपिताधेयत्वनिष्ठप्रकारतानिरूपितवन्ह्यादिहेतुनिष्ठविशे-

ष्यताशालितादृशपरामर्शमादाय तादृशवाक्ययोः प्रामाण्याप्रा-
माण्योपपादनवारणाय मुख्यविशेष्यताशालिपर्यन्तनिवेशनं,
व्याप्यविशेष्यकपरामर्शस्य कारणत्वोपगमे तदीयकारणतामा-
दाय तादृशापत्तिश्च पञ्चम्यर्थघटकीभूतजनकतायां विशेष-
णताऽऽपन्नज्ञानविशेषणताऽऽपन्नप्रकृत्यर्थविशेषणताऽऽपन्नप्रकृत्य-
र्थताऽवच्छेदकवन्हित्वादेर्व्युत्पत्तिवैचित्र्येण स्वावच्छिन्नप्रका-
रतानिरूपितमुख्यविशेष्यताऽवच्छिन्नत्वसम्बन्धेन तादृशज-
नकतायां तादृशान्वयोपगमेन तादृशकारणताव्यावर्तनेन वार-
णीया, प्रकृत्यर्थताऽवच्छेदकस्य जनकतायां तादृशान्वयोपगमेन
तत्तद्व्यक्तित्वेन पर्वतीयवन्ह्याद्यवगाहिधूमव्याप्यतत्तद्व्यक्तिमान्
पर्वत इत्याद्याकारकपरामर्शकारणतामादाय तादृशवाक्ययोः प्रा-
माण्याप्रामाण्योपपादननिरासोऽपि बोध्यः, पर्वतो धूमवान् पर्व-
तीयवन्हेरित्यादिवाक्यस्य प्रामाण्यनिर्वाहाय धूमव्याप्यपर्वतीयव-
न्हिमान् पर्वत इत्याकारकपरामर्शकारणतासङ्ग्रहार्थं निरुक्तपञ्च-
म्यर्थघटकधर्मिताऽवच्छेदकतायां प्रकृत्यर्थताऽवच्छेदकनिष्ठप्रका-
रत्वानिरूपितधर्मिताऽवच्छेदकताऽनवच्छिन्नत्वं निवेशनीयं, तादृश-
परामर्शे पर्वतीयवन्हेरित्यादिवाक्यस्थपञ्चमीप्रकृत्यर्थताऽवच्छेद-
कीभूतपर्वतीयत्वादिधर्मिताऽवच्छेदकताऽऽपन्नस्यैव वन्हित्वाद्य-
यरपञ्चमीप्रकृत्यर्थताऽवच्छेदकस्य व्याप्तिधर्मिताऽवच्छेदकतया
भानेन तत्र तादृशपरामर्शकारणतासङ्ग्रहः, पर्वतीयत्वादेश्च धूम-
वान्वन्हेरित्याद्यप्रमाणवाक्यस्थपञ्चमीप्रकृत्यर्थताऽनवच्छेदकतया
तत्र तादृशपरामर्शकारणताव्यावृत्तिरिति ध्येयम् ,

तत्र सामानाधिकरण्यसम्बन्धेन पर्वतीयत्वादिविशिष्टवह्नित्वादिकं धर्मितावच्छेदकीकृत्य व्याप्तिमवगाहमानस्य तादृशज्ञानस्य कारणताव्याप्त्यर्थं स्वप्रकृत्यर्थतावच्छेदकीयप्रकारताभिन्नप्रकारतानिरूपितविशेष्यतानवच्छिन्नत्वमपि निरुक्तपञ्चम्यर्थघटकधर्मितावच्छेदकतायां निवेशनीयम्,

न च पर्वतीयत्वादिधर्मिता तदवच्छेदकभावानापन्नवह्नित्वादिकमवगाहमानतादृशपरामर्शीयकारणतामादाय, तथाऽपि तादृशवाक्ययोः प्रामाण्याप्रामाण्योपपादनवारणमसम्भवीति वाच्यम्?

तादृशस्य वह्नित्वादेर्विधेयव्याप्तिधर्मितावच्छेदकतया भानानुपगमात्, तत्र स्वप्रकृत्यर्थतानवच्छेदकनिष्ठधर्मितावच्छेदकत्वानिरूपकत्वस्य निरुक्तपञ्चम्यर्थघटकप्रकारतायां निवेशादेव तादृशपरामर्शीयकारणतावच्छेदककोटिप्रविष्टप्रकारतायां स्वप्रकृत्यर्थतावच्छेदकपर्वतीयत्वादिनिष्ठधर्मितावच्छेदकतानिरूपकत्वसत्त्वेन तादृशकारणताकरणसम्भवाच्चेति दिक्,

उदाहरणत्वं चेतरान्वितस्वार्थबोधकन्यायावयवत्वं, यो यो धूमवान्स वह्निमान् यथा महानसमित्याद्युदाहरणार्थस्येतरान्वयाभावाल्लक्षणसमन्वयः,

नन्वत्र यत्पदे द्विर्वचनप्रयोगनियामिकाया महानसत्वमहानसान्यत्वादिना वक्तुर्यावत्साधनाधिकरणप्रत्यायनेच्छारूपवीप्सायाः किं फलम्?

न च साधनस्य यावदधिकरणे साध्यवत्त्वज्ञानमेव तत्फलं; यत्पदे वीप्सां विना यावद्धूमाधिकरणानुपस्थितौ तत्पदेन ता-

वतामधिकरणानां परामर्शासम्भवादिति वाच्यम् ?

ताहशज्ञानस्यानुमित्यजनकतया तथा वक्तुमशक्यत्वात् ,

न च व्याप्तिप्रत्यायनेच्छारूपवीप्साया अनुमित्यौपयिक-व्याप्तिबोध एव फलमिति वाच्यम् ?

व्याप्तेः पदार्थत्ववाक्यार्थत्वयोरभावेन तत्प्रत्यायनेच्छयाऽपि तच्छाब्दबोधासम्भवाद् मानसबोधे च वक्त्राभिप्रायस्यानुपयोगादिति चेद् ?

अत्राचार्यानुयायिनः—व्यभिचारशङ्कानिरसनमेव तत्फलं, वीप्सितयच्छब्दसमभिव्याहृततच्छब्देन यावतां धूमवतामुपस्थितौ तत्र वह्निबोधे यावद्धेत्वधिकरणे साध्यवत्त्वनिश्चये तेन विपरीत-निश्चयात्मकेन साधनाधिकरणे साध्याभाववत्त्वरूपव्यभिचार-ग्रहस्य प्रतिबन्धात् , ततश्च व्यभिचारज्ञानविरहसहकृतोदाहरण-जन्यसहचारज्ञानाद् मानसो व्याप्तिग्रहः सुलभः; न तु शाब्दो-व्याप्त्युपस्थापकाभावेन तदसम्भवात् ,

न च वीप्साया व्याप्तिरर्थ इति वाच्यम् ?

मानाभावात् ,

न च नित्यवीप्सयोरिति सूत्रमेव मानमिति युक्तम् ?

व्याप्तुमिच्छा वीप्सेति व्युत्पत्त्या व्याप्तिबोधनेच्छायां द्विर्वचनप्रयोगस्य तेनानुशासनेऽपि व्याप्तेर्द्विर्वचनार्थत्वाप्रतिपादनाद् अन्यथा नित्यव्याप्त्योरित्येवानुशासनमुचितं स्यात् ,

अथ सम्भवत्येव व्याप्तेः शाब्दबोधः;व्युत्पत्तिवैचित्र्येण धूम-वह्न्याद्योर्व्याप्यव्यापकभावसंसर्गेणान्वयबोधस्वीकाराद् वह्न्यादि-

वदस्य धूमव्यापकताऽऽदिविशिष्टवन्ह्यादौ लाक्षणिकत्वोपगमाद्वा, न चास्तु सः; तथाऽप्युपदर्शितरीत्या वीप्सासार्थक्यं सम्भवत्येवेति वाच्यम् ?

शाब्दबोधे व्यभिचारशङ्काया योग्यतासंशयपर्यवसन्नाया अनुगुणतया प्रतिबन्धकत्वाभावेनोक्तरीत्या सार्थक्यासम्भवादिति चेद् ?

न–तथा सति यो यो न वन्हिमान् स न धूमवानित्यादिव्यतिरेक्युदाहरणप्रयोगानुपपत्तेः; तस्योक्तरीत्या व्यतिरेकव्याप्तिशाब्दजनकत्वेऽप्यनुमित्युपयोगाभावाद् व्यतिरेकसहचारेणान्वयव्याप्तिग्रहालम्बनेन तस्यैवानुमितिजनकत्वाद्, मानसान्वयव्याप्तिग्रहस्य च व्यतिरेक्युदाहरणादपि सम्भवेनोदाहरणान्मानसव्याप्तिबोधाङ्गीकार एव तदुपपत्तेः; तस्मादुदाहरणवाक्यान्मानसो व्याप्तिबोध इत्येव वाच्यं; तथा चोक्तरीत्या वीप्सासार्थक्यं सम्भवत्येव,

अथवं केवलान्वयित्वेन गृहीतवाच्यत्वादिसाध्यके हेतावयमेतदभिन्न एतद्वृत्तियावद्धर्मवत्त्वादित्यत्र चैकमात्रवृत्तित्वेन गृहीतहेतौ साध्यसामानाधिकरण्यमात्रग्रहादेव मानसव्याप्तिबोधः सम्भवति, प्रथम साध्याभावाप्रसिद्ध्या द्वितीये तद्वृत्यधिकरणान्तरे हेतोरग्रहेण व्यभिचारज्ञानासम्भवादिति तत्रोक्तरीत्या द्विर्वचनसार्थक्यासम्भवः; साहचर्यलाभाय तद्विनिर्मुक्तोदाहरणप्रयोगस्यैव तत्रौचित्यादिति चेद् ?

न–इष्टापत्तेः, अत एवोभयसिद्धव्याप्तिकासाधकताऽनुमान-

स्थल उदाहरणमेव न प्रयुज्यते प्रयोजनाभावादित्याहुः,

अत्र मणिकारानुयायिनः—उदाहरणे वीप्साप्रयोगो न कर्तव्य एव वीप्साया वैयर्थ्यात्,

न च व्यभिचारशङ्कानिराकरणाय वीप्साप्रयोग इति युक्तम्?

वीप्सितशब्देन यावतां धूमवतामुपस्थितिस्तत्र वन्हिसम्बन्धबोधेऽप्यन्यत्र वन्ह्यभावग्रहेण व्यभिचारशङ्काया दुर्वारत्वात्,

न च वीप्सायाः सकलसाधनाधिकरणपरत्वग्रहेण यावत्साधनवति साध्यवत्त्वबोधाद् न व्यभिचारशङ्कासम्भव इति वाच्यम्!

एवं सति यद्योगप्राथम्ययोरेव साधननिष्ठसाध्यव्याप्तिपरत्वग्रहेण तस्माल्लक्षणया व्याप्तिशाब्दबोधसम्भवेन तत्र च व्यभिचारशङ्काया अप्रतिबन्धकत्वेन तन्निरासकतया वीप्सायास्सार्थक्यासम्भवात्,

न च व्याप्तिशाब्दबोधोपगम उक्तरीत्या व्यतिरेक्युदाहरणप्रयोगानुपपत्तिरिति वाच्यम्?

अस्माकं व्यतिरेकसहचारेण व्यतिरेकव्याप्तिग्रहेणोक्तरीत्या तादृशप्रयोगानुपपत्त्यभावाद्; अत एव प्राचां यन्नैवं तन्नैवमिति वीप्सयाऽघटितस्योदाहरणप्रयोगस्य नासङ्गतिः; आवश्यकश्चोदाहरणवाक्याद्व्याप्तिशाब्दबोधः; तथा सत्येव व्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शनिर्वाहकव्याप्तिप्रकारकज्ञाननैयत्यसंभवाद्, व्याप्तिमानसबोधाङ्गीकारे मानसे त्वनियम इति न्यायेन

कदा चिद् व्याप्तिविशेष्यकबोधस्यापि सम्भवेन तादृशपरामर्शसम्पादकज्ञाननैयत्याभावात्; किं च येन रूपेण सकलसाधनवति साध्यवत्त्वग्रहस्तदन्यरूपेण साध्याभावग्रहे बाधकाभावेन वीप्सासहस्रेणापि मानसव्याप्तिग्रहासम्भवेन वीप्सावैयर्थ्यं दुरुद्धरमेव,

एवमेकेनैव यत्पदेनैकरूपेण नानारूपेण वा सकलधूमाधिकरणोपस्थितिसम्भवे तदर्थं वीप्साऽऽदरो व्यर्थ एव,

न च सकृदुच्चरित इत्यादिव्युत्पत्तिविरोधान्नैवमिति वाच्यम्?

तादृशव्युत्पत्तेरनङ्गीकारात्; सकृदुच्चरितस्य नानाशक्त्या बोधकताया एवाव्युत्पन्नतया सर्वनाम्नां च बुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तैरैक्येन तादृशव्युत्पत्तेरविरोधाच्च; अन्यथा वीप्सास्थल एकस्यैव यत्पदस्य यत्पदद्वयरूपादेशस्थानितया पदभेदविरहेण वीप्सातोऽपि नानाऽर्थबोधानुपपत्तेः, कथं चिदर्थबोधकत्वनिर्वाहेऽपि बह्वर्थबोधानिर्वाहाद्, अत एव मणिकृता वीप्सायामपि व्यभिचारतादवस्थ्यमित्यनेन वीप्साया वैयर्थ्यमुक्तम्,

न चाग्रे वीप्सा च यत्पद एवेत्यादिना तदङ्गीकाराद् विरोध इति वाच्यम्?

तस्याभ्युपेत्यवादपरत्वेनाविरोधादित्याहुः,

दीधितिकारानुयायिनस्तु-वादिवाक्ये न स्वारसिकलक्षणा; अत एवैकयत्पदस्थले तथा न व्याप्तिबोध इति वीप्सास्थल एव व्याप्तिबोधोदयेन तत्स्थले धूमपदस्य व्याप्तौ वह्निपदस्यैव धूम-

व्यापकवह्नौ वा निरूढलक्षणैवोपेया; अनादितात्पर्यवती च लक्षणा निरूढलक्षणेत्युच्यते,

एवं च लक्षणाया अनादितात्पर्यवत्त्वनिर्वाहिका वीप्सेत्युदाहरणवाक्ये तत्प्रयोग आवश्यकः,

किञ्च–यद्युदाहरणेऽस्य व्याप्तिशाब्दबोधमात्रार्थं प्रयोगस्तदोपनयवद् व्याप्यपदेनैव हेतोरुपादानस्यौचित्येन सकलधूमाधिकरणे वन्ह्यधिकरणत्वबोधनायैवोदाहरणप्रयोग इत्युपेयम् ,

एवं च यत्पदस्य सकलधूमाधिकरणतात्पर्यकत्वेनैकयत्पदस्य तत्तात्पर्यकत्वानियमेन तादृशतात्पर्यग्रहार्थमुदाहरणे वीप्साऽऽवश्यकी; अपि च नित्यवीप्सयोरिति सूत्रेण नित्यमेव द्विर्वचनविधानेनैकयत्पदस्य सकलधूमाधिकरणपरत्वेऽसाधुत्वमेव स्यादतो द्विर्वचनस्यावश्यकतया वीप्साया आवश्यकत्वमर्थसिद्धमेवं,

न चैवं त्विनिगमनाविरहेण तत्पदेऽपि सा स्यादिति वाच्यम्!

एकेनैव तत्पदेन सकलोपस्थितिसम्भवे तद्द्वैयर्थ्यस्यैव विनिगमकत्वाद्; अत एव मणिकृताऽपि वीप्सा च यत्पद एव न तु तत्पदेऽपि विरूपोपस्थितयोरप्येकेन तत्पदेन परामर्शसम्भवाद्, यथा—

यद्यत्पापं प्रतिजहि जगन्नाथ! नम्रस्य तन्म—

इत्यादावित्युक्तम् ,

न चैवं वीप्सायामपि व्यभिचारतादवस्थ्यमित्यनेन पूर्वं स्वयं वीप्साया अनङ्गीकारात् पूर्वापरविरोध इति वाच्यम् !

पूर्वमापाततस्तदुक्त्योक्तास्वरसेन च वीप्सा चेत्यादेर्वस्तुग-

तिमनुरुद्धयोऽस्या विरोधाभावादिति प्राहुः,

मैथिलास्तु—वीप्सा व्यापकताऽर्थिका न तु तात्पर्यग्राहिका ; शक्तिग्राहकानुशासनसत्त्वे बाधके चासति वाचकत्वस्यैवौचित्यात् ,

तथा हि नित्यवीप्सयोरिति सूत्रं; तत्र सनो नेच्छावाचकत्वमपि तून्मुखत्वे लक्षणा, श्वा मुमूर्षति नदीकूलं पिपतिषतीतिवत् ; तथा च व्याप्त्युन्मुखत्वे व्यापकतापर्यवसिते शक्तिरेवानेनानुशासनेन प्रतिपाद्यते, वीप्सा च समुदायात्मकमेकमेव पदम् एकपदस्थाने द्विर्भावविधानात् ,

न चैवं नरो नर इत्यादिवीप्सास्थले रषाभ्यां नो णः समानपद इति सूत्रेण द्वितीयनकारस्य णत्वे नरो णर इत्यादिप्रयोगापत्तिरिति वाच्यम् ?

तस्य क्षुभ्नादिगणान्तर्गतत्वेन णत्वनिषेधात्, तस्य च समुदायस्यात्यन्ताभावः प्रतियोगित्वं चार्थः, ग्रामो ग्रामो रमणीय इत्यादौ आदेशिन आदेशावयवस्य वा ग्रामशब्दस्यार्थो ग्रामो द्विर्वचनार्थेऽत्यन्ताभावे; स च प्रतियोगितायां; सा पुनरत्यन्ताभावे; स च रमणीयत्वे पदार्थैकदेशेऽन्वेति; यद्वाऽन्योन्याभावोऽत्यन्ताभावश्च द्विर्वचनार्थः; आधेयतया आदेशिग्रामपदार्थविशेषितोऽन्योन्याभावो रमणीयत्वावच्छिन्नप्रतियोगितारूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनात्यन्ताभावेऽन्वेति; स रमणीयपदार्थेऽन्वेति, गेहे गेहे श्वेत्यादावाधेयतया गेहान्वितस्यान्योन्याभावस्य श्वत्वावच्छिन्नप्रतियोगिताऽवच्छेदकतासम्ब-

न्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः स्वत्वावच्छेदेनान्वेति, ब्राह्मणो ब्राह्मणोऽधीत इत्यादौ ब्राह्मणवृत्त्यन्योन्याभावस्याध्ययनकर्तृतात्वावच्छिन्नप्रतियोगिताऽवच्छेदकतासंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावोऽध्ययनकर्तृत्वे बुध्यते,

यद्वाऽभावमात्रं द्विर्वचनार्थः, उद्देश्यविधेययोश्च येन संसर्गेणान्वयस्तत्संसर्गावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नैव प्रतियोगिता द्विर्वचनार्थयोरभावयोः परस्परान्वये संसर्गमर्यादया भासते; तथा च ग्रामो ग्रामो रमणीय इत्यत्र रमणीयग्रामयोरन्वयस्तादात्म्येनैवेति ग्रामान्वितोऽभावस्तादात्म्यसंसर्गावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव द्वितीयाभावेऽन्वेति, ब्राह्मणो ब्राह्मणोऽधीत इत्यादौ ब्राह्मणवृत्त्यभावः समवायसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन द्वितीयाभावेऽन्वेति, गेहे गेहे श्वेत्यादौ गेहवृत्त्यभाव आधेयतासम्बन्धावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन द्वितीयाभावेऽन्वेतीत्यादिकमूह्यम् ,

अत्रैकस्यैव ग्रामपदार्थस्य विशेष्यतया विशेषणतया द्वेधाऽन्वयो द्विर्वचनार्थस्यैकरूपावच्छिन्नस्य च परस्परमन्वयो व्युत्तिवैचित्र्यादुपपन्नः,

एवं च धूमवान् धूमवान्वह्निमानित्यादौ धूमवन्निष्ठाभावाप्रतियोगिवह्निमान्धूमवानित्यन्वयबोधे व्याप्तिर्व्यापकता च विषय इति फलितं, ब्राह्मणोऽधीते न तु ब्राह्मणो ब्राह्मण इत्यादौ ब्राह्मणवृ-

स्यभावप्रतियोगित्वाभावाभाववद्ध्ययनकृतिमान् ब्राह्मण इति शाब्दबोधः;

एवं चोदाहरणवाक्ये व्याप्त्यवगमानुरोधेन वीप्साऽऽवश्यकीति सिद्धम् ,

ननु तथाऽपि वीप्सा तच्छब्द एवोचिता यो धूमवानितिवाक्येन विहितस्य धूमवतस्तच्छब्देन परामर्शे स स वह्निमानिति वीप्सया व्यापकत्वे बोधिते धूमवान्धूमव्यापकवह्निमानित्यन्वयबोधेनाभिमतव्याप्त्यवगमसम्भवात् ,

यच्छब्दवीप्सातश्च न वह्नेर्धूमव्यापकताबोधसम्भवः, उद्देश्यपदवीप्सया विधेय उद्देश्यव्यापकताबोधेन पर्वतमहानसादिव्यापकताया धूमे बोधेऽपि वह्नौ धूमव्यापकताया बोधासम्भवादिति चेत् ?

न—वक्ष्यमाणरीत्या यच्छब्दवीप्सातोऽप्यभिमतव्यापकताबोधसम्भवेन लाघवेन च यच्छब्द एव वीप्सोपगमात् ,

तथा हि–यच्छब्देनोपस्थिते पर्वतमहानसादौ पर्वतादिव्यापकधूमवत्तायां यच्छब्दघटितवीप्सावाक्येन बोधितायामेकेनापि तच्छब्देन पूर्वोस्थितो धूमवान् व्यापकता च पूर्वोस्थिता परामृश्यते, तयोः परस्परान्वयेन च धूमवन्निष्ठात्यन्ताभावाप्रतियोगी वह्निरिति वह्नौ धूमव्यापकताबोधसम्भवः, तच्छब्दस्य क्लृप्तया पूर्वोपस्थितमात्रपरामर्शकत्वव्युत्पत्त्यैव निर्वाह इति लाघवम् , तच्छब्दवीप्सोपगमे तु तस्यैव व्यापकताऽर्थकत्वेन तच्छब्दस्य पूर्वोपस्थितधूमपरामर्शकत्वं पूर्वानुपस्थितव्यापकतापरामर्शकत्वं चो-

पेयमिति व्युत्पत्तिभेदकल्पने गौरवमिति ; यच्छब्द एव वीप्सा समुचिता, एतेन पक्षद्वयेऽप्युपपत्तिसम्भवेन विनिगमनाविरहात् तच्छब्देऽपि वीप्सा दुर्वारेति निरस्तम् ,

यच्छब्दवीप्सायामुपदर्शितलाघवस्यैव विनिगमकत्वाद्, वीप्सा च यत्पदे न तु तत्पद इति मणिग्रन्थस्याप्युक्त एवाशयः, विरूपोपस्थितयोरप्येकेन तच्छब्देन परामर्शसम्भवादित्यनेन च लाघवमुक्तं; तेन ग्रन्थेन द्वयोर्धूमवत्त्वाव्यापकतयोर्विभिन्नाभ्यां रूपाभ्यां पूर्वोपस्थितयोरेवैकेन तच्छब्देन परामर्शो बुद्धिस्थमात्रतच्छब्दशक्तेरेकतच्छब्दार्थयोः परस्परमन्वयस्य व्युत्पत्तिसिद्धत्वाच्चेति प्रतिपादनेनोक्तलाघवसूचन एव पर्यवसानात् ,

न च तच्छब्दस्य पूर्वोपस्थितविशिष्टयच्छब्दघटितवाक्यार्थपरामर्शकत्वमेव व्युत्पत्तिसिद्धं न तु विशकलितपूर्वोपस्थितपरामर्शकत्वमपीति वाच्यम् ?

येन पच्यते तमानयेत्यादौ यच्छब्दघटितवाक्येनोपस्थितानां विशकलितानां पाककृतिपदार्थव्यक्तीनां तच्छब्देन परामर्श एव पाककर्त्तृव्यक्तिमानयेत्याद्यनुभवसिद्धशाब्दबोधस्योपपादनसम्भवाद् ; अन्यथा विशिष्टस्य यच्छब्दवाक्यार्थस्य व्यक्तिकर्त्तृकपाकस्य तच्छब्देन परामर्शेऽनन्वयप्रसङ्गाद्, यत्र तच्छब्देऽपि वीप्सा दृश्यते, तत्र तच्छब्दवीप्साया एव व्यापकत्वमर्थः ; यच्छब्दवीप्सा तु तत्र यच्छब्दबहिर्भावोपात्तव्यापकत्वस्यैव तच्छब्देन परामर्श इति यत्तदोर्नित्याभिसम्बन्धो व्युत्पत्तिसिद्धः ,

अथैवं यो यो धूमवान् स वह्निमानित्यादौ तच्छब्देन य-

च्छब्दार्थमहानसादेः परामर्शे धूमवन्महानसादिनिष्ठात्यन्ताभावाप्रतियोगित्वस्योदाहरणवाक्याद्बोधः स्यान्न तु धूमव्यापकत्वस्य,

यदि च यच्छब्दार्थमहानसादिपरिहारेण धर्मी धूमवत्त्वेन परामृश्यते तदाऽपि यो यः पचति स जानातीत्यादौ तदा पाककर्त्तुः परामर्शो न स्याद्; यच्छब्दघटितवाक्ये कृतिमद्वाचकपदाभावाद् वाक्यार्थपरामर्शे च पाककर्तृचैत्रादिव्यापकताया एव बोधः स्यादिति चेद् ?

न-यच्छब्दप्रवृत्तिनिमित्तचैत्रत्वादिपरिहारेण पूर्ववाक्यार्थस्य कृतिमतस्तच्छब्देन परामर्शोपगमात् समवायेन कृतिमति तच्छब्दस्य शक्तिरेव,

न च कृतित्वापेक्षया गौरवात्कृतिर्न सर्वनामप्रवृत्तिनिमित्तमिति वाच्यम् ?

तर्हि तत्र सर्वनाम्नां निरूढलक्षणोपगमेनादोषात्, तस्मादुदाहरणवाक्यादीप्साऽर्थव्यापकत्वप्रकारकबोध उत्पद्यत इति सिद्धम्,

एवं च यो यो धूमवानित्यनेन महानसादिर्महानसादिव्यापकधूमवानिति बोधः, स वन्हिमानित्यनेन धूमवान्धूमव्यापकवन्हिमानिति बोधः, यथा महानसमिति दृष्टान्तवाक्ये यथाशब्देन प्रकान्तवाक्यविधेयौ धूमवन्ही परामृश्येते; तेन महानसं धूमवद्वन्हिमदिति दृष्टान्तवाक्याच्छाब्दबोधः; अत एव धूमवान्धूमव्यापकवन्हिमानिति प्रक्रमे यथाऽयोगोलकमिति साधनविकलदृष्टान्तप्रयोगोऽपि साधुः स्यात्,

न च यथाशब्देन पूर्ववाक्योद्देश्यतावच्छेदकधर्मपरामर्शेन तादृशधर्मस्य धूमस्यायोगोलकेऽसत्त्वान्नोक्तदोष इति वाच्यम् ?

तथा सति मुखमाह्लादकं यथा चन्द्र इत्यादौ यथाशब्देन मुखपरामर्शेनायोग्यत्वप्रसङ्गादित्यपि निरस्तम् ,

यथाशब्देन पूर्वप्रक्रान्तवाक्यविधेययोर्धूमवन्ह्योः परामर्शेनायोगोलके च धूमाभावेन यथाऽयोगोलकमिति दृष्टान्तवाक्यस्याप्रामाण्योपपत्तिरिति प्राहुः,

वस्तुतस्तु–ग्रामो ग्रामो रमणीय इत्यादौ ग्रामत्वव्यापकरमणीयतादात्म्यसम्बन्धेन ग्रामे रमणीयस्यान्वयः, ब्राह्मणो ब्राह्मणोऽधीत इत्यादौ ब्राह्मणत्वव्यापकाध्ययनकृतिसमवायेन ब्राह्मणे कृतेरन्वयः स्वीक्रियते लाघवाद्, वीप्सा च तात्पर्यग्राहिका न तु व्यापकतावाचिकाऽपि, व्यापकतायाः संसर्गमर्यादयैव लाभेन शब्दार्थत्वकल्पने गौरवाद् , अनन्यलभ्यस्यैव शब्दार्थत्वात् ,

एवं च यो यो धूमवानित्याद्युदाहरणवाक्यादपि धूमव्यापकवन्हिमत्तादात्म्यसम्बन्धेन वन्हिमद्विधेयक एव शाब्दबोधः,

न चोदाहरणवाक्याद्व्यापकत्वप्रकारकबोधाभ्युपगमे तद्घटितशाब्दसामग्र्या वह्निर्न धूमव्यापक इत्याद्युपनीतभानादावतिरिक्तप्रतिबन्धकत्वाकल्पने लाघवात्तथैवोचितम् ; इच्छाया उत्तेजकत्वानुरोधेनान्यत्र क्लृप्तप्रतिबन्धकतयाऽनिर्वाहादिति वाच्यम् ?

इच्छाया हेतुत्वकल्पने तादृशलाघवासम्भवाद्; अन्यत्र क्लृप्तप्रतिबन्धकतयैवोपपत्तेः, इच्छाया उत्तेजकत्वकल्पेऽपि तादृशगौ-

रवस्य फलमुखत्वेनादोषाच्च,

अस्मन्मतेऽव्युक्तशाब्दसामग्र्या धूमवानुक्तसम्बन्धेन वह्निमच्छिन्न इत्याद्युपनीतभानादावतिरिक्तप्रतिबन्धकत्वाकल्पनेन लाघवसम्भवाच्च,

न च तथाऽपि यो यो वह्निमान्स धूमवान्नेत्यादिवाक्ये नञर्थान्वयानुपपत्तिः, वह्निव्यापकधूमवत्तादात्म्यादेः सम्बन्धस्याप्रसिद्धया तत्सम्बन्धावच्छिन्नप्रतियोगिताकधूमवद्भेदबोधसम्भवादिति वाच्यम् ?

तस्या व्याप्तिनिरूपणप्रस्तावे प्रागुपदर्शितरीत्योद्धारसम्भवात्,

अधिकमभिहितं प्राक् तत्रैवेति सारम्,

ननु यत्तदोरन्यतरानुपादानेऽविमृष्टविधेयांशदोषो; यथा–

तनोति योऽसौ सुभगे ! तवागत–

इत्यादाविति सर्वसिद्धम्,

एवं च यत्पद एव वीप्सा न तु तत्पदेऽपीत्यभ्युपगमे ;

यद्यत्पापं प्रतिजहि जगन्नाथ ! नम्रस्य तन्म–

इत्यादावविमृष्टविधेयांशदोषप्रसङ्गः ; यत्तदोर्नित्याभिसम्बन्धेन तत्र द्वितीययच्छब्दस्य द्वितीयतत्पदाभावेन साकाङ्क्षत्वाद्,

न च तत्र यदा तदाक्षेपान्न दोष इति वाच्यम् ?

यदः पूर्ववाक्यगतत्वेन तदाक्षेपासम्भवाद्, उत्तरवाक्यगतस्यैव यदस्तदाक्षेपकत्वात्,

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिक–

इत्यादिवदिति चेद् ?

३५

अत्र केचिद्–न हि वयं यावन्तो यच्छब्दास्तावन्तस्तच्छब्दा इति यत्तदोर्नित्याभिसम्बन्धबलाद् ब्रूमः; किन्तु यत्पदार्थस्तत्पदेन परामृश्यत इति ; तथा च प्रकृतेऽपि येन केन चित् प्रकारद्वयेन यत्पदाभ्यां परामृष्टं पापं तत्पदेन बुद्धिविषयताऽवच्छेदकपापत्वेन बोध्यत इति यत्पदस्य साकाङ्क्षत्वाभावान्नाविमृष्टाविधेयांशदोषप्रसङ्गः,

ननु तथाऽपि यत्पदवीप्सायां क चित्तत्पदे वीप्सा दृश्यते क चिन्नेत्यत्र किं विनिगमकमिति चेद् ?

न–यत्र प्रकृताक्रियाऽन्वयस्तत्पदार्थ एकदा भवितुं नार्हति तत्र तत्पदेऽपि वीप्सा; यत्र तु भवितुमर्हति तत्र तत्पदे प्रायशो न वीप्सा ; यथा–

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपाल–

इत्यादौ नरेन्द्रकन्यया क्रमेण व्यतीतानां क्रमेण वैवर्ण्यप्राप्तिरिति वीप्सा; यद्यत्पापं प्रतिजहीत्यादावेकदा सकलपापे हननान्वयसम्भवान्न तन्म इत्यत्र वीप्सा, प्रायश इत्युक्त्या तत्रापि क चिद्वीप्सेति लभ्यते ; यथा—

यां यां प्रियः प्रैक्षत कातराक्षीं–
सा सा ह्रिया नम्रमुखी बभूव–

त्यत्र; तत्र कातराक्षीकर्मकप्रेक्षणकर्तृप्रियरूपस्य यच्छब्दघटितवाक्येन बोधितस्य विशेष्यविशेषणभावव्यत्यासेन तच्छब्दपरामृष्टस्य प्रियकर्तृकप्रेक्षणकर्मकातराक्षीरूपस्य व्यापको ह्री-

नम्रमुखीभाव इत्यन्वयबोधस्यान्यथोपपादयितुमशक्यत्वादिति वदन्ति,

अपरे तु—यद्यदिति न पदद्वयं किन्तु नित्यवीप्सयोरिति सूत्रेण यदो द्वित्वापन्नोऽयमादेशस्तथा चादेशिनैकेन यदा तदा चैकेनैव रूपेण परामर्शः, आदेशस्तु साकल्येन सम्बन्धपरताग्राहक इति साथक्याद्यत्पदीयेनैवादेशेन तदुपपत्तौ न तत्पदस्यादेशः, तत्पदसाथक्ये तु तत्रैवादेशः ; यथा तत्तत्कर्मकृतं यदेवेत्यादौ,

एवं च यद्यदित्येकरूपावच्छिन्नं यावदुपस्थापयति तत्पदमपि तथैव तावदिति न वाक्यभेदोऽपि, यत्र च यत्पदे तत्पदे च वीप्सा श्रूयते तत्र सञ्चारिणीत्यादौ नैकत्राप्यादेशः किन्तु द्विकं द्विकं पदं क्रमभेदविवक्षया प्रयुज्यते, यत्र तु क्रमभेदविवक्षाविरहेऽपि तथा प्रयुज्यते तत्रैकत्रादेशो व्यर्थ एव ; यथा—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन—

इत्यादावित्याहुः,

केचित्तु—यद्यदाचरतीत्यादौ यदा यत्काले तदेव तत्काल एवेति तदेव तस्मादेव श्रेष्ठाचरितत्वादेवेति वाऽर्थ इत्याहुः,

यत्तु—रूपभेदविवक्षायामुभयत्र वीप्सेति तन्न—एकेनापि तत्पदेन रूपभेदेन बोधनसम्भवादित्यलं मन्दमतीनामुद्वेगकरविचारबाहुल्येन,

उपनयत्वं च स्वप्रतिपाद्यार्थमुख्यविशेष्यतानिरूपितेतरार्थनिष्ठप्रकारताशालिबोधजनकन्यायावयवत्वम् ; उपनयस्य स्वा-

र्थमुख्यविशेष्यकनिगमनार्थप्रकारकबोधजनकत्वात्लक्षणसमन्वयः, मुख्यविशेष्यतानिवेशान्न प्रतिज्ञायामतिप्रसङ्गः,

न च पृथिवीतरेभ्यो भिद्यते पृथिव्या इत्यादौ तादात्म्येन हेतुतायामितरभेदव्याप्यपृथिवीपृथिवीत्याद्युपनयासम्भव उद्देश्यताऽवच्छेदकविधेयताऽवच्छेदकयोर्भेद एव शाब्दबोध इति व्युत्पत्त्योद्देश्यताऽवच्छेदकविधेयताऽवच्छेदकयोरैक्ये शाब्दबोधानुपगमेन पृथिवीत्वविशिष्टे तादृशपृथिवीत्वविशिष्टस्यान्वयासम्भवादिति वाच्यम् ?

उद्देश्यताऽवच्छेदकताविधेयताऽवच्छेदकतापर्याप्त्यधिकरणैक्य एव शाब्दबोधानुपगमात् ,

अत्रेदं बोध्यम्-उद्देश्यताऽवच्छेदकविधेयताऽवच्छेदकयोरैक्ये शाब्दबोधो न भवति; अत एव दण्डवान् दण्डवान् रक्तदण्डवानिति बोधो न भवतीति प्राचीनाः,

नव्यास्तु—एकधर्मपर्याप्तोद्देश्यताऽवच्छेदकताविधेयताऽवच्छेदकताकशाब्दबोधो न भवति; अत एव दण्डवान् दण्डवानित्याकारकशाब्दबोधो न भवति; दण्डवान् रक्तदण्डवानित्याकारकशाब्दबोधो भवत्येवेति वदन्ति,

ननु दण्डवान् दण्डवानित्याकारकशाब्दबोधस्यापादकमेव नास्ति किमनया व्युत्पत्त्या तादृशशाब्दत्वस्य कस्य चित्कार्यताऽनवच्छेदकत्वात् ,

न च पदार्थोपस्थित्यादिसामान्यसामग्रीत एव तदापत्तिरिति वाच्यम् ?

दण्डवानित्येवशाब्दबोधोदयात् दण्डावच्छिन्नोद्देश्यतानिरूपितदण्डावच्छिन्नविधेयताकशाब्दस्य चापादकाभावात्,

न च दण्डवान् दण्डाभाववानित्येतादृशबाधाभावबलात्तादृशापत्तिरिति वाच्यम् ?

निर्वह्निर्वह्निमानितिवदनाहार्यतादृशबाधाप्रसिद्धेः,

नैवम्-दण्डवान् रक्तदण्डवान् दण्डवान्पीतदण्डवानित्यादिशाब्दबोधसाधारणदण्डत्वरूपेण दण्डावच्छिन्नोद्देश्यतानिरूपितदण्डत्वरूपेण दण्डावच्छिन्नविधेयताशालिशाब्दत्वावच्छिन्नं प्रति दण्डवत्पदोत्तरदण्डवत्पदज्ञानत्वेनाकाङ्क्षाज्ञानस्य कार्यकारणभावः कल्प्यत इति तद्बलादापत्तिर्निराबाधा,

यत्तु-घटवान् दण्डवान् पटवान् दण्डवानित्यादिसकलशाब्दसाधारणदण्डावच्छिन्नविधेयतानिरूपितोद्देश्यताऽवच्छेदकताऽवच्छेदकतासम्बन्धेन शाब्दत्वावच्छिन्नं प्रति दण्डावच्छिन्नविधेयतानिरूपितविषयताऽवच्छेदकताऽवच्छेदकतासम्बन्धेन योग्यताज्ञानस्य हेतुत्वं स्वीक्रियते तद्बलादप्यापत्तिरिति ;

तन्न-तादृशयोग्यताज्ञानेन स्वीयकार्यताऽवच्छेदकावच्छिन्ने जननीये घटवान् दण्डवान् पटवान् दण्डवानित्याद्यानुपूर्वीज्ञानानामन्यतमस्य सहकारित्वकल्पनात्तादृशान्यतमाभावेन तादृशापत्त्यसम्भवात्,

अथ को वा तद्वारणप्रकारः ? न हि व्युत्पत्तिभङ्गभिया सामग्र्याः कार्यानुत्पादकत्वं सम्भवतीति चेत् ?

न-दण्डत्वविशिष्टदण्डावच्छिन्नदण्डवद्विधेयतानिरूपितदण्ड-

त्वविशिष्टदण्डावच्छिन्नोद्देश्यताशालिशाब्दत्वावच्छिन्नं प्रति पदजन्यदण्डत्वानवच्छिन्नोपस्थितिः कारणम् ,

इत्थं च तादृशरक्तत्वाद्युपस्थितिकाले दण्डवान् रक्तदण्डवानित्येव शाब्दबोधः स्वीकार्यः; रक्तत्वभाने बाधकाभावात् ,

न च दण्डो न रक्तः दण्डवान् रक्तदण्डाभाववानित्यादिबाधसत्त्वे तादृशरक्तत्वाद्युपस्थितिकाले उक्तसामग्रीबलाद् दण्डवान्दण्डवानितिशाब्दबोधापत्तिरिति वाच्यम् ?

यतो दण्डो न रक्त इत्याकारकबाधाभावस्य दण्डो रक्त इति योग्यताज्ञानस्य वा दण्डत्वविशिष्टदण्डावच्छिन्नोद्देश्यतानिरूपिताभेदनिष्ठसांसर्गिकविषयतानिरूपितसम्बन्धित्वावच्छिन्नप्रकारताऽतिरिक्तविषयत्वानिरूपितरक्तत्वप्रकारताऽतिरिक्तविषयत्वानिरूपितकिञ्चिद्विषयतानिरूपितदण्डत्वावच्छिन्नविषयताशालिशाब्दत्वं दण्डो रक्तो दण्डवान् रक्तदण्डवानित्यादिसाधारणं कार्यताऽवच्छेदकं स्वीक्रियते,

एवं दण्डवान्न रक्तदण्डवानिति बाधाभावस्य दण्डवान् रक्तदण्डवानिति योग्यताज्ञानस्य वा दण्डत्वविशिष्टदण्डावच्छिन्नोद्देश्यतानिरूपितरक्तत्वप्रकारत्वातिरिक्तप्रकारत्वानिरूपितदण्डत्वविशिष्टदण्डवद्विधेयताशालिशाब्दत्वं दण्डवान्दण्डवान् रक्तदण्डवानित्यादिसकलशाब्दबोधसाधारणकार्यताऽवच्छेदकं कल्प्यत इति तादृशबाधकाले न दण्डवान्दण्डवानित्यादिशाब्दापत्तिरिति,

केचित्तु—नीलदण्डवान्दण्डवान् रक्तदण्डवान् दण्डवानित्याद्यानुपूर्व्यवच्छिन्नवाक्याद् दण्डवान्नीलदण्डवान् दण्डवान् रक्तद-

ण्डवानित्यादिशाब्दबोधवारणाय विशिष्य दण्डत्वविशिष्टदण्डाव-
च्छिन्नपर्याप्तोद्देश्यतानिरूपितरक्तदण्डत्वविशिष्टदण्डत्वपर्याप्तविधे-
यताशालिशाब्दत्वावच्छिन्नं प्रति दण्डत्वविशिष्टदण्डवदुद्देश्यवा-
चकपदोत्तररक्तदण्डत्वविशिष्टरक्तदण्डवद्विधेयवाचकपदज्ञानत्वेनै-
वाकाङ्क्षाज्ञानस्य हेतुता कल्प्यते न तु सामान्यतो दण्डवत्पदो-
त्तरदण्डवत्पदज्ञानत्वेन, एवमन्यत्रापि विशिष्यैवाकाङ्क्षा-
ज्ञानस्य हेतुता कल्प्यते,

इत्थं चोक्ततादृशोद्देश्यवाचकपदोत्तरतादृशविधेयवाचकपद-
ज्ञानाभावाद् दण्डत्वविशिष्टदण्डवदुद्देश्यतानिरूपितदण्डत्वविशि-
ष्टदण्डवद्विधेयताशालिशाब्दत्वस्य कार्यताऽनवच्छेदकत्वाद् न
तादृशकार्यापत्तिरित्याहुः,

अपरे तु—दण्डत्वपर्याप्तनिरवच्छिन्नावच्छेदकताकविधेयताऽ-
वच्छेदकतानिरूपितदण्डवन्निष्ठविधेयतानिरूपितोद्देश्यतानिरूपि-
तावच्छेदकतानिरूपितनिरवच्छिन्नावच्छेदकत्वसम्बन्धेन शाब्द-
त्वावच्छिन्नं प्रति स्वविषयताऽवच्छेदकत्वसम्बन्धेन दण्डत्वानव-
च्छिन्नोपस्थितेर्हेतुत्वाद् दण्डत्वे तादृशोपस्थित्यभावाद् नापत्ति-
रिति पर्याप्तिनिवेशाद् दण्डवान् रक्तदण्डवानिति बोधो भवति,
प्राचां मते तु तादृशबोधस्याप्यनुदयात्पर्याप्तिर्न निवेश्यत इत्याहुः,

परे तु—दण्डत्वपर्याप्तनिरवच्छिन्नावच्छेदकताकविधेयताऽवच्छे-
दकतानिरूपितदण्डवन्निष्ठविधेयतानिरूपितोद्देश्यतानिरूपिताव-
च्छेदकतानिरूपितनिरवच्छिन्नावच्छेदकत्वसम्बन्धेन शाब्दत्वाव-
च्छिन्नं प्रति दण्डत्वभेदस्य हेतुत्वाद् ; दण्डत्वे च दण्डत्वभेदाभा-

वान्न दण्डवान्दण्डवानिति बोधापत्तिः, पर्याप्तिनिवेशश्च पूर्ववदि-
त्याहुः,

अधिकमुक्तं प्रागिति दिक्,

निगमनत्वं चेतरावयवार्थनिष्ठविशेष्यतानिरूपितस्वार्थनि-
ष्ठप्रकारताशालिबोधजनकन्यायावयवत्वं ; निगमनस्योपनयार्थ-
विशेष्यकस्वार्थप्रकारकबोधजनकत्वाल्लक्षणसङ्गतिः,

ननु पक्षपरिग्रहाय पर्वतो वह्निमानिति प्रतिज्ञाप्रयोगः; कुत-
इत्याकाङ्क्षया धूमादित्यादिहेतुप्रयोगः कथमस्य गमकत्वमित्या-
काङ्क्षायां व्याप्त्या पक्षधर्मतया वेति क्रमेण तत्प्रदर्शनायोदाहर-
णोपनययोः प्रयोग इत्येवं रीत्याऽवयवचतुष्टयसार्थक्येऽपि निगम-
स्यानुपयुक्ततया तत्प्रयोगो निष्फल इति चेद्?

न—आबाधितत्वासत्प्रतिपक्षितत्वज्ञानस्यानुमितिहेतुतया त-
दर्थं निगमनप्रयोगस्यावश्यकत्वात्,

न च बाधाभावसत्प्रतिपक्षाभावयोः स्वरूपसतोरेव हेतुतया
तज्ज्ञानस्यानुमितिहेतुत्वे मानाभाव इति वाच्यम्?

ज्ञानस्य प्रतिबन्धकत्वं जनकज्ञानविघटनद्वारैवेति नियमब-
लेन यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति निय-
मबलेन तज्ज्ञानस्यानुमितिहेतुत्वसिद्धेः,

न च प्रत्यक्षेऽबाधितत्वादिज्ञानस्याहेतुतया व्यभिचार इति
वाच्यम्?

परोक्षज्ञान एव तादृशनियमोपगमात्; शाब्दबोधे बाधाद्य-
भावरूपयोग्यताज्ञानस्य हेतुतया तत्रापि न व्यभिचारः,

न चैवमप्यनुमितौ सिद्धिमादाय शाब्दबोधे चासाधुत्वज्ञान-मादाय व्यभिचार इति वाच्यम् ?

प्राचां साध्यसन्देहस्य पक्षतात्वेनानुमितिहेतुतया साधुत्व-ज्ञानस्य शाब्दबोधहेतुतया दोषाभावात्; स्मरणेऽप्यबाधितत्वादि-ज्ञानं हेतुरतो न तत्रापि व्यभिचारः, यद्वा बाधादेरनुमितावेव प्रति-बन्धकत्वं न त्वन्यत्र तत्रोत्पन्नेऽप्रामाण्यग्रहाङ्गीकाराद् अत एवा-नुमित्यसाधारणदोषतया बाधादेर्हेत्वाभासत्वमिति प्राचां मता-वलम्बनान्न दोषः,

न चोक्तनियमे ग्राह्याभावाद्यनवगाहित्वनिवेशान्नोक्तरीत्या-ऽनुमितावबाधितत्वादिज्ञानहेतुतासिद्धिरिति वाच्यम् ?

तन्निवेशो गौरवात्,

न च तथाऽप्युक्तनियमे मानाभावान्न तत्सिद्धिरिति वाच्यम्?

तथाऽप्यन्वयव्यतिरेकाभ्यामेव तत्सिद्धेः,

न च तयोः सन्दिग्धत्वान्न तत्सिद्धिरिति वाच्यम् ?

सन्देहे लाघवतर्कस्य निर्णायकतया वक्ष्यमाणरीत्या लाघ-वेन तत्सिद्धेरावश्यकत्वात्,

तथा हि—अनुमितावबाधित्वादिज्ञानहेतुत्वे तद्घटितानुमिति-सामग्र्या बाधितत्वसत्प्रतिपक्षितत्वादिरूपभिन्नविषयकप्रत्यक्षादौ प्रतिबन्धकत्वं न कल्प्यते तादृशानुमितिसामग्रीकाले तद्घटकाबा-धितत्वादिज्ञानस्य बाधमुद्रयैव तादृशप्रत्यक्षादौ प्रतिबन्धकतया तदनुत्पत्तिनिर्वाहाद्; अन्यथा तन्निर्वाहाय तादृशातिरिक्तप्रतिब-न्धकताकल्पनस्यावश्यकतया गौरवापत्तेः,

न चाबाधितत्वज्ञानस्यानुमितिहेतुत्वे पक्षे साध्याभावो बाधः तदभावश्च साध्यमेवेति पक्षे साध्यवत्ताज्ञानमनुमितिहेतुरिति फलितं; तथा च सिद्धसाधनापत्तिरिति वाच्यम् ?

अबाधितत्वज्ञानहेतुतायाः साध्याभावाभावत्वरूपबाधाभावत्वेन तज्ज्ञानहेतुतापर्यवसन्नतया सिद्धिप्रतिबन्धकतायाश्च साध्यताऽवच्छेदकावच्छिन्नसाध्यप्रकारताकनिश्चयत्वेन प्रतिबन्धकतापर्यवसानेन सिद्धसाधनानवकाशादिति सम्प्रदायः,

के चित्तु—बाधाभावज्ञाने सति बाधज्ञानानुदयेन बाधज्ञानप्रतिबन्धद्वाराऽबाधितत्वादिज्ञानस्यानुमित्यौपायिकत्वं न त्वनुमितिहेतुत्वमित्याहुः,

अन्ये तु—प्रमामात्रे गुणो हेतुरप्रमायां दोषो हेतुरिति प्रमाऽनुमितौ गुणानुरोधेन संशयनिश्चयसाधारणमबाधितत्वादिज्ञानमपि हेतुरित्याहुः,

नवीनास्तु—उत्पन्नानुमितौ बाधितविषयकत्वादिशङ्कयाऽप्रामाण्यशङ्काव्युदासायाबाधितत्वादिज्ञापनं कथकसम्प्रदायासिद्धमावश्यकम्; अन्यथा न्यूनत्वापत्त्याऽपसिद्धान्तापत्त्या च निग्रहापत्तेः; अत एव स्वस्वसिद्धान्तानुसारेण मीमांसकैरवयवत्रयं बौद्धैर्द्वयमेवोद्भाव्यते कदा चित् समयबन्धबलादेकोऽपि नोद्भाव्यत इति प्राहुः,

अथ निगमनात्कथमबाधितत्वादिज्ञानम् ? अबाधितत्वादेर्निगमनघटकपदार्थत्ववाक्यार्थत्वयोरभावादिति चेद् ?

मैवं—व्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतुसम्बन्धेन पक्षे प्रतिषा-

दितस्य साध्यस्य पुनस्तत्सम्बन्धेन प्रतिपादनस्य किं प्रयोजनमिति प्रयोजनजिज्ञासायां तस्माद्वह्निमानित्यस्यानुवादत्वेनाबाधितत्वादिज्ञानमेव प्रयोजनतया निश्चीयते; तद्बोधश्च साध्यपदस्याबाधितत्वादिविशिष्टे लक्षणया, यदि च मानसबोधादिना तात्पर्यनिर्वाहे लक्षणाकल्पनमन्याय्यं यथा धूमोऽस्तीतिवाक्यस्य वह्निपरस्याप्यानुमानिकवह्निबोधमादाय निर्वाहस्तथा प्रकृतेऽपीत्युच्यते; तदा निगमनवाक्यार्थबोधानन्तरं मानस एवाबाधितत्वादिबोध इति ध्येयमिति सङ्क्षेपः।

अनुमाने च हेतोराभास इति व्युत्पत्त्या हेत्वाभासव्यपदेश्या व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधाख्याः पञ्च हेतुदोषा भवन्ति; तत्सम्बन्धाच्च हेतुवदाभासन्त इति व्युत्पत्त्या दुष्टहेतवोऽपि हेत्वाभासा इत्युच्यन्ते, तत्सम्बन्धश्चायं हेतुर्व्यभिचारीत्यादिप्रतीतिनियामको ग्राह्यस्तेन नातिप्रसङ्गः,

हेत्वाभासत्वं च यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्,

न च बाधसत्प्रतिपक्षयोरनुमितिप्रतिबन्धकज्ञानविषयत्वेऽपि व्यभिचारादेरतथात्वादव्याप्तिरिति वाच्यम्?

अनुमितिपदेन पक्षः साध्यव्याप्यहेतुमान् साध्यवांश्चेत्याकारकसमूहालम्बनानुमितेर्विलक्षणाद्; यद्विषयकत्वेनेत्यत्र तृतीयाऽर्थोऽवच्छिन्नत्वं तच्चावच्छेदकतानिरूपकत्वम्; अवच्छेदकत्वं चात्रानतिरिक्तवृत्तित्वं न तु स्वरूपसम्बन्धविशेषरूपं; बाधत्वादिना घटाद्यवगाहिज्ञानस्यापि निरुक्तानुमितिप्रतिबन्धकत्वेन

बाधविषयकत्वादेरतथात्वात् ,

न चैवमपि विशिष्टस्यानातिरिक्ततया ह्रदाद्यात्मकवन्ह्यभाव-वद्ह्रदादिविषयकत्वस्य केवलह्रदादिज्ञानसाधारणस्य निरुक्तानु-मितिप्रतिबन्धकताऽतिरिक्तवृत्तितयाऽतथात्वं दुर्वारमिति वाच्यम् ?

यद्विषयकत्वेनेत्यनेन यादृशरूपावच्छिन्ननिरूपितविषयित्व-स्योक्तत्वाद्, अनतिरिक्तवृत्तित्वं च व्याप्यत्वं; तच्च स्वव्यापक-तत्कत्वरूपं न तु तदभाववदवृत्तित्वरूपं; तेन वन्ह्यभावत्वाद्यव-च्छिन्नप्रकारतानिरूपितस्य ह्रदत्वाद्यवच्छिन्ननिरूपितस्य यत्कि-ञ्चिद्विषयित्वस्य प्रकृतानुमितिप्रतिबन्धकताशून्यावृत्तित्वेऽपि ह्रद-त्वाद्येकदेशमात्रवृत्तिधर्मावच्छिन्ने नातिप्रसङ्गः, प्रकृतानुमितिप्र-तिबन्धकताशून्यह्रदइत्याकारकज्ञानसाधारणह्रदत्वाद्यवच्छिन्ननि-रूपितविषयितात्वावच्छिन्नव्यापकत्वस्य प्रकृतानुमितिप्रतिबन्ध-कतायामसत्त्वाद्, यादृशरूपावच्छिन्ननिरूपितविषयतासामान्ये तादृशप्रतिबन्धकताऽनतिरिक्तवृत्तित्वनिवेशे सामान्यपदार्थस्य व्यापकत्वस्य निवेशेनातिगौरवात् ,

न च संशयाहार्याप्रामाण्यज्ञानास्कन्दितज्ञानसाधारणव-न्ह्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयिताव्यापकत्वं तादृशप्रति-बन्धकतायामसम्भवीति वाच्यम् ?

प्रतिबन्धकतापदस्य प्रतिबन्धकताऽवच्छेदकविषयितापर-तया तादृशविषयितायां तादृशरूपावच्छिन्ननिरूपितविषयिताव्या-पकत्वस्य सुघटकत्वात् ,

न च पाषाणमयत्वविशिष्टपर्वतत्वाद्यवच्छिन्ननिरूपितविष-

यितायाः पाषाणमयो वन्ह्यभाववानित्याकारकज्ञानविशिष्टं यत्र पर्वतः पाषाणमय इत्याद्याकारकं ज्ञानं ; तदीयं यदवच्छेदकधर्मदर्शनविधया प्रतिबन्धकत्वं तदवच्छेदकविषयिताव्याप्यत्वेन तादृशधर्मावच्छिन्नेऽतिप्रसङ्ग इति वाच्यम् ?

प्रतिबन्धकताऽवच्छेदकपदस्याभावनिष्ठावच्छेदकताभिन्नं—यदवच्छेदकत्वं तत्पर्याप्त्यधिकरणपरतया तादृशावच्छेदकतापर्याप्त्यधिकरणस्य पाषाणमयो वन्ह्यभाववानिति ज्ञानवैशिष्ट्यघटितधर्मस्य तादृशधर्मावच्छिन्ननिरूपितविषयिताव्यापकत्वासम्भवाद्; आहार्यभेदरूपानाहार्यत्वसंशयान्यत्वरूपनिश्चयत्वाप्रामाण्यज्ञानाभावादिनिष्ठानामवच्छेदकतानामभावनिष्ठावच्छेदकताभिन्नत्वाभावेन तादृशावच्छेदकतापर्याप्त्यधिकरणस्य विषयिताविशेषज्ञानत्वोभयरूपस्य ज्ञानीयत्वविशिष्टवन्ह्यभावविशिष्टह्रदत्वावच्छिन्ननिरूपितविषयित्वं प्रति व्यापकत्वस्य सुघटतया ज्ञानपदस्यानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयपरताऽनुपगमाद्, अत एव ज्ञानपदोपादानमर्थवद्, इच्छाऽऽदिसाधारणीं ज्ञानीयत्वाद्यविशेषितताहशविषयितां प्रति तादृशप्रतिबन्धकताऽवच्छेदकतापर्याप्त्यधिकरणविषयिताविशेषज्ञानत्वोभयस्य व्यापकत्वासम्भवाद्,

अथैवं ह्रदत्वाद्येकदेशमात्रवृत्तिधर्मावच्छिन्नेऽतिप्रसङ्गो दुर्वारः; वन्ह्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयित्वस्याभावनिष्ठावच्छेदकताभिन्नावच्छेदकतापर्याप्त्यनधिकरणत्वेन तादृशपर्याप्त्यधिकरणस्य ह्रदत्वविशिष्टनिरूपितविषयिताविशेषज्ञानत्वोभयरूपस्य ह्रदत्वाद्येकदेशधर्मावच्छिन्ननिरूपितविषयित्वं प्रति व्याप-

कत्वसम्भवादिति चेद् ?

न—प्रतिबन्धकताऽवच्छेदकविषयितानिरूपकाभावस्यैवाभावपदेन विवक्षितत्वाद्, वह्न्यभावादेः प्रतिबन्धकताऽवच्छेदकविषयितानिरूपकत्वेनाहार्यभेदाद्यात्मकाभावस्य चाताद‍ृशत्वेन कस्यापि दोषस्यासम्भवात् ,

वस्तुतस्तु—यद्‌यद्धर्मावच्छिन्नविषयितात्वावच्छिन्नं यत्र प्रतिबन्धकताऽवच्छेदकं तत्तद्धर्मावच्छिन्नत्वेनैकैकविषयितामन्तर्भाव्य स्वावच्छेदकतत्तद्धर्मावच्छिन्नविषयितासमुदायनिरूपकत्वसम्बन्धेन व्यापकत्वं तत्प्रतिबन्धकतायां विशेषणतयाऽवच्छेदकत्वघटकं वाच्यम् ; तथा च ताद‍ृशज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताऽवच्छेदककोटिप्रविष्टपाषाणमयत्ववन्ह्यभावत्वाद्यवच्छिन्नविषयिताघटितविषयितासमुदायनिरूपकत्वस्य पाषाणमयत्वविशिष्टपर्वतत्वाद्यवच्छिन्ननिरूपितविषयितानिरूपके पाषाणमयत्वादिविशिष्टे वन्ह्यभावाद्यनवगाहिनि पाषाणमयः पर्वत इत्याकारकज्ञाने सत्त्वासम्भवेन ताद‍ृशधर्मावच्छिन्ननिरूपितविषयितां प्रति ताद‍ृशसम्बन्धेन ताद‍ृशप्रतिबन्धकताया व्यापकत्वासम्भवाद् न ताद‍ृशधर्मावच्छिन्नेऽतिप्रसङ्गः, अत्र कल्पे ज्ञानस्येति प्रतिबन्धकतायामन्वितं न तु विषयितायां ; तथा च प्रतिबन्धकतायां ज्ञानवृत्तित्वलाभः ; तेन कामिनीजिज्ञासाऽऽदिकमादाय कामिनीसाक्षात्कारादौ नातिप्रसङ्ग इति ध्येयम् ,

अथ याद‍ृशरूपपदेन दोषताऽवच्छेदकरूपमुपादेयं ; तच्च न सामानाधिकरण्यसम्बन्धेन वन्ह्यभावविशिष्टह्रदत्वादिकं ताद‍ृश-

रूपविशिष्टनिरूपितविषयितायाः प्रकृतानुमितिप्रतिबन्धकताशून्ये ह्रदादिरूपधर्म्यंशे वन्ह्यभावादिरूपग्राह्याभावानवगाहिज्ञाने वर्त्तमानत्वाद्, नापि वन्ह्यभावह्रदत्वोभयादिकं तादृशोभयाद्यवच्छिन्नविषयितया ह्रदत्वादिविशिष्टे विशेषणतया वह्न्यभावानवगाहि; एकत्र द्वयमितिरीत्या ह्रदत्ववन्ह्यभावाद्युभयावगाहि यज्ज्ञानं यच्च वन्ह्यभावादिकं धर्मिताऽवच्छेदकीकृत्यैव ह्रदत्वाद्यवगाहि ज्ञानं प्रकृतानुमितिप्रतिबन्धकताशून्यं तदुभयसाधारणत्वात्,

न च प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वेन यादृशरूपावच्छिन्ननिरूपितविषयितां निवेश्य तत्रानतिरिक्तवृत्तित्वं निवेशनीयं तथा च प्रागुक्ततत्तज्ज्ञानीयतादृशोभयाद्यवच्छिन्ननिरूपितविषयितायास्तादृशप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वाभावेन निरुक्तप्रतिबन्धकताऽनतिरिक्तवृत्तित्वविरहेऽपि न यादृशरूपपदेन तदुभयोपादानेऽनुपपत्तिरिति वाच्यम् ?

तथा सति ह्रदत्ववन्ह्याद्यभावत्वादिरूपैकदेशमात्रवृत्तिधर्मस्यापि यादृशरूपपदेनोपादानसम्भवात् तत्तद्धर्मावच्छिन्नेऽतिप्रसङ्गस्य दुर्वारत्वात्,

न च यादृशधर्मावच्छिन्ननिरूपितविषयितायां किञ्चिद्धर्मनिष्ठधर्मिताऽवच्छेदकतानिरूपितमुख्यविशेष्यतानिरूपितत्वविशेषणं प्रक्षिप्य प्रतिबन्धकताऽनवच्छेदकीभूततदुभयाद्यवच्छिन्ननिरूपितविषयिताव्यावृत्तिः सम्भवति यज्ज्ञानं वन्ह्यभावादिकं धर्मिताऽवच्छेदकीकृत्यैव ह्रदत्वादिकमवगाहते यच्च घटाभावादिकं

धर्मिताऽवच्छेदकीकृत्यैव ह्रदत्ववन्ह्यभावाद्युभयमवगाहते तदुभयज्ञानीयतादृशोभयधर्मावच्छिन्ननिरूपितविषयिताऽव्याप्तेस्तावताऽप्यसम्भवादिति चेद् ?

न—यादृशधर्मावच्छिन्ननिरूपितं यत्किञ्चिद्विषयित्वं यादृशधर्मावच्छिन्नानिरूपितं तादृशतादृशधर्मावच्छिन्नानिरूपितविषयिताविरहकूटवज्ज्ञानीयं तादृशरूपावच्छिन्नानिरूपितप्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकताऽऽश्रयवन्ह्याद्यभावह्रदत्वोभयाद्यवच्छिन्नानिरूपितह्रदत्वाद्यवच्छिन्नविशेष्यकवन्ह्यभावादिप्रकारकज्ञानीयं विषयित्वमेव यादृशरूपावच्छिन्ननिरूपितविषयित्वं विवक्षणीयं तादृशविषयित्वसामान्ये प्रकृतानुमितिप्रतिबन्धकताऽव्याप्यत्वस्य सुघटत्वात् तदुभयाद्यवच्छिन्ने लक्षणसमन्वयः ; ह्रदत्वाद्येकदेशमात्रवृत्तिधर्मावच्छिन्ननिरूपितयत्किञ्चिद्विषयित्वे वन्ह्यभावह्रदत्वोभयावच्छिन्नानिरूपितत्वसत्त्वात् तदुभयाद्यवच्छिन्ननिरूपितविषयिताभावकूटवज्ज्ञानं ह्रद इत्याकारकमेव तदीयह्रदत्वाद्यवच्छिन्ननिरूपितं विषयित्वं वन्ह्यभावप्रकारित्वानिरूपितमेव तादृशविषयित्वे निरुक्तप्रकृतानुमितिप्रतिबन्धकताऽवच्छेदकत्वासत्त्वेन तद्धर्मावच्छिन्ने नातिप्रसङ्गः,

न च निरुक्तज्ञानीयतादृशरूपावच्छिन्नानिरूपितविषयित्वे स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेनैवोपपत्तौ किं तादृशावच्छेदकत्वाश्रयाविषयितासामान्येऽनतिरिक्तवृत्तित्वानिवेशेनेति वाच्यम् ?

प्रागुक्तावच्छेदकधर्मदर्शनविषयपाषाणमयत्वविशिष्टपर्वतत्वावच्छिन्नेऽतिप्रसङ्गवारणार्थं तदुपादानाद् , ज्ञानभेदेन विषयि-

ताभेदमते पाषाणमयो वन्ह्यभाववानित्याकारकज्ञानकालीनतद्दी-यपाषाणमयत्वविशिष्टपर्वतत्वाद्यवच्छिन्ननिरूपितयत्किञ्चिद्विष-यितायाः प्रकृतानुमितिप्रतिबन्धकताऽनतिरिक्तवृत्तित्वेन पाषा-णमयत्वविशिष्टपर्वतत्वाद्यवच्छिन्नेऽतिव्याप्तिवारणार्थं विषयिता-सामान्यनिवेशनं; तथा चासम्भववारणाय विषयितायां स्वरूप-सम्बन्धरूपप्रतिबन्धकताऽवच्छेदकतानिवेश इति ध्येयम्,

एतेन वन्ह्यभावह्रदत्वावच्छिन्ननिरूपितविषयितासामान्यस्य जातिमान् वन्ह्यभाववानित्याकारकप्रकृतानुमित्यप्रतिबन्धकज्ञा-नसाधारणतया तादृशविषयितायां प्रतिबन्धकत्वानतिरिक्तवृत्ति-त्वानुपपत्तिः समाहिता, ह्रदो वन्ह्यभाववानित्याकारकज्ञानीये वन्ह्य-भावह्रदत्वोभयावच्छिन्ननिरूपितयत्किञ्चिद्विषयित्वे जातित्ववि-शिष्टह्रदत्वाद्यवच्छिन्ननिरूपितत्वाभावसत्त्वात् तादृशधर्मावच्छिन्न-निरूपितविषयिताविरहकूटवत्प्रतीतिवृत्तित्वस्य तादृशतादृशधर्मा-वच्छिन्ननिरूपितविषयितायामसत्त्वादिति,

तथा च वस्तुतस्त्वित्यादिपूर्वोक्तकल्पे ज्ञानस्येति का-मिनीजिज्ञासाऽऽदिप्रतिबन्धकतावारणाय प्रतिबन्धकतायामिवा-नतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिर्वाहाय विषयितायामप्यन्वित-मित्याशय इत्यवधेयम्,

अत एव यादृशयादृशरूपावच्छिन्ननिरूपितविषयितासामान्यं-प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदक-त्वाश्रयस्तादृशरूपवत्त्वं हेतुदोषत्वमित्याशङ्कनमपि निरस्तम्, पूर्वोक्तयुक्त्या वन्ह्यभावह्रदत्वाद्युभयस्यैवोपादेयतया तादृशोभया-

द्यवच्छिन्ननिरूपितविषयितायाः प्रकृतानुमित्यप्रतिबन्धकज्ञान-साधारणतया प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्ध-रूपावच्छेदकताविरहादिति दिक्,

न च तथाऽपि प्रमेयत्वविशिष्टव्यभिचारादावतिप्रसङ्गो दुर्वार इति वाच्यम् ?

यादृशरूपावच्छिन्ने तादृशविशिष्टान्तराघटितत्वस्य निवेशाद्; अत एवोक्तं दीधितिकृता विशेषणीयं च तादृशविशिष्टान्तराघटितत्वेनेति, अत्र तादृशपदं प्रकृतानुमितिप्रतिबन्धकताऽनतिरिक्तवृत्तिविषयितानिरूपकविशिष्टपरम्; अन्तरपदं घटकताऽनवच्छेदकधर्मावच्छिन्नपरं तादृशविशिष्टस्यान्तरं तादृशविशिष्टान्तरमिति षष्ठीतत्पुरुषसमाससिद्धं; तथा च प्रकृतसमूहालम्बनानुमितिनिरूपितयद्यत्प्रतिबन्धकताऽनतिरिक्तवृत्ति स्वावच्छिन्ननिरूपितविषयित्वं तत्तत्प्रतिबन्धकताऽनतिरिक्तवृत्ति यादृशधर्मनिरूपितं-विषयित्वं प्रत्येकं तादृशधर्मविशिष्टघटकताऽनवच्छेदका ये ये धर्माः प्रत्येकं तद्धर्मावच्छिन्नाघटितत्वसमुदायः स्वावच्छिन्ने विशेषणतया निवेशनीय इति पर्यवसितार्थः, स्वपदं यद्रूपावच्छिन्ने लक्षणसमन्वयस्तद्रूपपरं, धूमाभाववद्वृत्तित्वविशिष्टवह्नित्वाद्यवच्छिन्ननिरूपितविषयित्वं पर्वतो धूमवान्धूमव्याप्यवह्निमांश्चेत्याकारकसमूहालम्बनानुमितिनिरूपितयद्यत्प्रतिबन्धकताऽनतिरिक्तवृत्ति तत्तत्प्रतिबन्धकताऽनतिरिक्तवृत्तिधूमाभाववद्वृत्तित्वविशिष्टवह्नित्वमेयत्वादिविशिष्टं तदवच्छिन्ननिरूपितविषयित्वादिकं प्रत्येकं तन्निरूपकतादृशवह्नित्वादिविशिष्टघटकताऽनवच्छेदका ये धर्माः प्रत्येकं तद्ध-

पावच्छिन्नाघटितत्वकूटस्य तादृशवह्नित्वावच्छिन्ने सत्त्वाल्लक्षणसमन्वयः, तादृशवह्नित्वावच्छिन्नस्याधेयतासम्बन्धेन वह्निविशिष्टधूमाभाववद्वृत्तित्वादिरूपतादृशधर्मिविशिष्टघटकताऽनवच्छेदकेनाभाववद्वृत्तित्वविशिष्टवह्नित्वेन घटितत्वेऽपि न क्षतिः, प्रत्येकं तादृशविशिष्टद्वयविषयकज्ञानयोः स्वस्वावच्छेदकाविषयितयोर्भेदेन प्रतिबन्धकतयोर्भेदाद् मेयत्वविशिष्टव्यभिचारत्वव्यभिचारविशिष्टमेयत्वत्वविशिष्टयोः प्रकृतानुमितिनिरूपिताया यद्यत्प्रतिबन्धकताया अनतिरिक्तवृत्तिविषयिताकत्वं तत्तत्प्रतिबन्धकताऽनतिरिक्तवृत्तिविषयितानिरूपकशुद्धव्यभिचारत्वावच्छिन्नस्य घटकताऽनवच्छेदकमेयत्वत्वावच्छिन्नघटितत्वात्तयोर्नातिव्याप्तिः,

न च बाधविशिष्टव्यभिचारत्वावच्छिन्नेऽतिव्याप्तिरिति वाच्यम् ?

तस्य प्रकृतानुमितिनिरूपितयद्यत्प्रतिबन्धकताऽनतिरिक्तवृत्तिविषयिताकत्वं तत्तत्प्रतिबन्धकताऽनतिरिक्तवृत्तिविषयितानिरूपककव्यभिचारविशिष्टबाधत्वाद्यवच्छिन्नस्य घटकताऽनवच्छेदकेन बाधवैशिष्ट्यादिनाऽवच्छिन्नेन बाधविशिष्टव्यभिचारादिना घटितत्वाद् , धूमव्यभिचारिवह्निमदयोगोलकं धूमवद् वह्नेरित्यादौ व्यभिचारघटितबाधादेः प्रकृतानुमितिनिरूपितयद्यत्प्रतिबन्धकताऽनतिरिक्तवृत्तिविषयिताकत्वं तत्तद्घटकीभूतव्यभिचारादेस्तत्प्रतिबन्धकताऽन्तर्गतप्रकृतपक्षताऽवच्छेदकाद्यवच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यताऽवच्छेदकाद्यवच्छिन्नप्रकारताऽवच्छिन्नप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताया नानतिरिक्तवृत्तिविष-

यिताकत्वं येन तद्घटकताऽनवच्छेदकपक्षताऽवच्छेदकावच्छिन्न-घटितत्वेन लक्षणमव्यापकं स्यात्; परं तु शुद्धव्यभिचार-घटितबाधत्वशुद्धबाधत्वघटितव्यभिचारत्वमेयत्वादिविशिष्टतदव-च्छिन्नानां तत्प्रतिबन्धकताऽनतिरिक्तवृत्तिविषयताकत्वं तत्तद्रू-पावच्छिन्नघटकताऽनवच्छेदकधर्मावच्छिन्नाघटितत्वस्य सूपपन्न-त्वान्नाव्याप्तिः,

एवं वह्न्यभावव्याप्यजलकालीनत्वविशिष्टह्रदत्वावच्छिन्ने नातिव्याप्तिः,

तादृशतादृशविशिष्टान्तर्गतवह्न्यभावव्याप्यजलविशिष्टह्रदत्वा-द्यवच्छिन्नमपि तद्घटकताऽनवच्छेदककालीनत्वाद्यवच्छिन्नघटि-तत्वादिति,

न च वह्न्यभावव्याप्यजलविशिष्टह्रदत्वाद्यवच्छिन्ने सत्प्र-तिपक्षेऽव्याप्तिः, तादृशतादृशविशिष्टसमुदायान्तर्गतवह्न्यभावव्या-प्यजलकालीनत्वविशिष्टजलविशिष्टह्रदत्वाद्यवच्छिन्नमपि तद्घट-कताऽनवच्छेदकवह्न्यभावव्याप्तिविशिष्टजलविशिष्टह्रदत्वादिकं त-दवच्छिन्नेन घटितत्वादिति वाच्यम्?

अन्तरपदार्थताऽवच्छेदके घटकताऽनवच्छेदके स्वावच्छिन्ना-विषयकप्रतीतिविषयताऽवच्छेदकत्वविशेषणोपादानात्, स्वपदं-यद्रूपावच्छिन्ने लक्षणसमन्वयस्तद्रूपपरमिति सम्प्रदायः,

अत्र दीधितिकृदनुयायिनस्तु—उक्तहेतुदोषलक्षणे पर्वतो-वह्निमान् धूमादित्यादौ वह्न्यभाववद्ह्रदवह्न्यभाववद्द्रव्यादेर्घटा-भाववत्पर्वतमहानसीयवह्न्यभाववत्पर्वतादेर्घटाभाववत्पर्वतमहान-

सीयधूमाभाववत्पर्वतादेश्च दोषत्वारणायानुमितौ प्रकृतपक्षताऽव-च्छेदकावच्छिन्नसाध्यकत्वं प्रकृतहेतुताऽवच्छेदकावच्छिन्नहेतुक-त्वमवश्यं निवेश्यम्,

एवं च तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्साध्यकतद्ध-र्मावच्छिन्नतद्धेतुकानुमितिप्रतिबन्धकताऽनतिरिक्तवृत्ति यद्धर्मा-वच्छिन्नविषयकत्वं स धर्मस्तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्न-तत्साध्यकतद्धर्मावच्छिन्नतद्धेतुदोष इति फलितम्,

इत्थं च तद्धर्मावच्छिन्नाभावं धर्मिताऽवच्छेदकीकृत्य तद्धर्मा-वच्छिन्नप्रकारताकानाहार्यज्ञानानभ्युपगमेन निर्वह्निः पर्वतो वह्नि-मानित्यनुमितेरलीकतया निर्वह्निः पर्वतो वह्निमान्वह्निव्यभिचा-रिधर्मादित्यादौ वह्न्यभाववत्पर्वतरूपपक्षवह्निव्यभिचारित्वाभाव-वद्धूमरूपधर्मात्मकहेत्वप्रसिद्ध्योरुक्तदोषलक्षणाव्याप्तिर्दुर्वारा,

एवं तद्धर्मं धर्मिताऽवच्छेदकीकृत्य तद्धर्मावच्छिन्नावृत्ति-त्वावच्छिन्नप्रकारताकानाहार्यज्ञानानभ्युपगमेन पर्वतः पर्वतावृत्ति-वह्निमानित्यनुमितेरलीकतया पर्वतः पर्वतावृत्तित्वविशिष्टवह्नि-मान्पर्वतावृत्तिधर्मादित्यादौ पर्वतवृत्तित्वविशिष्टवह्निरूपसाध्या-प्रसिद्धिपर्वतवृत्तित्वविशिष्टधूमरूपधर्मात्मकहेत्वप्रसिद्ध्योरुक्तहेतुदो-षलक्षणाव्याप्तिरित्युक्तहेतुदोषलक्षणवाक्यस्य यद्विषयकनिश्च-यस्य विरोधिविषयताप्रयुक्तः तदुत्तरानुमितौ पक्षे साध्यवैशि-ष्ट्यावगाहित्वस्य साध्यव्याप्तिविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वमित्यर्थः, प्रयुक्तत्वं चात्र व्यापकत्वं, तथा चानाहार्याप्रामाण्यज्ञानानास्कन्दितयद्विषयकनिश्चयनिष्ठविरोधि-

विषयताशालिनिश्चयाव्यवहितोत्तरानुमितित्वव्यापको यत्पक्षताऽवच्छेदकविशिष्टपक्षे यत्साध्यताऽवच्छेदकविशिष्टसाध्यावगाहित्वस्य यत्साध्यताऽवच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टयद्धेतुताऽवच्छेदकाविशिष्टे हेतुमत्त्वावगाहित्वस्य चोभयोरभावस्तत्त्वंतत्पक्षताऽवच्छेदकावच्छिन्नपक्षकतत्साध्यताऽवच्छेदकावच्छिन्नसाध्यकतद्धेतुताऽवच्छेदकावच्छिन्नहेतुदोषत्वमित्यर्थः परिष्करणीयः, अत्र यत्पदं दोषत्वेनाभिमतव्यक्तिपरं; जलह्रदो वह्निमान्धूमादित्यादौ वह्न्यभावविशिष्टजलह्रदविषयकानिश्चयनिष्ठा या वह्न्यभावविशिष्टजलह्रदविषयता तच्छालिताद्दशनिश्चयाव्यवहितोत्तरानुमितिसामान्ये ह्रदे वह्निवैशिष्ट्यावगाहित्वाभावसत्त्वेन तथाविधोभयाभावसत्त्वात्तथाविधनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकत्वस्याक्षततया लक्षणसमन्वयः,

अत्र यद्विषकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्ताद्दशोभयाभावस्तत्त्वमिति कृते निर्वह्निः पर्वतो वह्निमानित्यनुमितौ वस्तुमात्रेऽतिव्याप्तिः, ताद्दशानुमितेरलीकतया वस्तुमात्रविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये ताद्दशोभयाभावस्य सत्त्वादतो विरोधिविषयिताशालित्वं निश्चयविशेषणम् ,

न च ह्रदो वह्निमान्धूमादित्यत्र घटवत्भूतलादावतिप्रसङ्गः; घटवद्भूतलविषयकसमूहालम्बननिश्चयनिष्ठवह्न्यभाववद्ह्रदात्मकविरोधिविषयिताशालिनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकत्वस्य ताद्दशोभयाभावे सत्त्वादिति वाच्यम् ?

यद्विरोधिविषयताशालिनिश्चयाव्यवहितोत्तरानुमितित्वव्या-

पकत्वस्य तादृशोभयाभावस्तत्त्वं हेतुदोषत्वमिति विवक्षणेनोक्ता-तिप्रसङ्गाभावात् ,

विरोधित्वं चात्र तादृशोभयाभावप्रतियोगिताऽवच्छेदक-कोटिप्रविष्टविषयताव्यापकविषयताशालिज्ञानत्वावच्छिन्नप्रतिब-न्धयतानिरूपितप्रतिबन्धकतावच्छेदिका यादृशविशिष्टविषयता तत्त्वं; न तु ग्राह्याभावतद्व्याप्यान्यतरविशिष्टधर्मिताऽवच्छेदकाव-च्छिन्नत्वं घटाभावस्यापि क चिद् गृह्यतया तदभावात्मकघटव-द्भूतलस्यापि निरुक्ताविरोधितयोक्तातिप्रसङ्गतादवस्थ्यापातात् ,

नन्वेवं तादृशज्ञानत्वावच्छिन्नप्रतिबन्ध्यताघटितविरोधित्व-निर्वचने लक्षणेऽसम्भवः,

तथा हि बाधादिप्रतिबन्ध्यताऽवच्छेदकं न विशिष्टबुद्धित्वं-बाधादिकाले प्रत्यक्षेच्छासत्त्वे विशिष्टप्रत्यक्षानुदयापत्तेः,

न च प्रत्यक्षेच्छाया उत्तेजकत्वोपगमान्न दोष इति वाच्यम् ?

बाधादिकाले प्रत्यक्षेच्छासत्त्वेऽनुमित्याद्यापत्त्या तथा वक्तु-मशक्यत्वात् ,

एवं च बाधादिप्रतिबन्ध्यताऽवच्छेदकं प्रत्यक्षत्वानुमितित्वादि-कमेव वाच्यं तथा च ज्ञानत्वावच्छिन्नप्रतिबन्ध्यतानिवेशेऽसम्भवो-दुर्वार इति चेद् ?

तर्हि तादृशोभयाभावप्रतियोगिताऽवच्छेदककोटिप्रविष्टवि-षयताव्यापकविषयताशाल्यनुमितित्वावच्छिन्नप्रतिबन्ध्यतानिरू-पितप्रतिबन्धकताऽवच्छेदिका यादृशविशिष्टविषयता तद्रूपविरो-धित्वस्यैव प्रकृते निवेशेनानुपपत्त्यभावात् ,

अथैवमपि यादृशसाध्यविशिष्टपक्षनिर्णयकाले सिषाधयिषाबलात्कदाऽपि तादृशपक्षावगाहिन्यनुमितिर्न जाता; तादृशसाध्यवत्पक्षेऽतिप्रसङ्गः; निरुक्तव्यापकविषयताशाल्यनुमितित्वावच्छिन्नप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽवच्छेदकतादृशनिश्चयाव्यवहितोत्तरानाहार्यमानसत्वव्यापकत्वस्य तादृशोभयाभावे विवक्षणीयत्वात्; तादृशसाध्यवत्पक्षविषयताशालिनिश्चयाव्यवहितोत्तरंतादृशपक्षविषयकानुमित्यनुत्पादेऽपि तादृशपक्षविषयकानाहार्यमानसोत्पादेन तत्र तादृशोभयाभावासत्त्वेनोक्तातिप्रसङ्गाभावात्,

एतेन तादृशोभयाभावप्रतियोगिताऽवच्छेदककोटिप्रविष्टविषयताव्यापकविषयताशाल्यनुमितित्वावच्छिन्नप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽवच्छेदिका यादृशविशिष्टविषयता तत्त्वं हेतुदोषत्वमित्यस्यैव समीचीनतयेतरांशवैयर्थ्यमित्यपि परास्तम्,

तथा सत्युक्तस्थलीयसाध्यवत्पक्षेऽतिप्रसङ्गापत्तेः,

अथावच्छेदकत्वस्य स्वरूपसंबन्धरूपतयाऽलम्भवः; ह्रदत्वेन घटाद्यवगाहिवन्ह्यभावत्वादिनापटाद्यवगाहिभ्रमादप्यनुमिति प्रतिबन्धेन ह्रदत्वावच्छिन्नविषयतानिरूपितवन्ह्यभावत्वावच्छिन्नविषयताया एवानुमितिप्रतिबन्धकताऽवच्छेदकतया वन्ह्यभाववज्जलह्रदादिविषयतायामनुमितिप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वाभावादिति चेन्न ?

न—अत्रावच्छेदकत्वस्यानतिरिक्तवृत्तित्वरूपस्य निवेशात्,

केचित्तु-तादृशोभयाभावप्रतियोगिताऽवच्छेदककोटौ यत्सम्बन्धावच्छिन्नयद्धर्मावच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्नवृ-

त्ति तद्धर्मावच्छिन्नाभावतद्व्याप्यान्यतरत्वमेवात्र विरोधित्वम्,

न चैवं तथाविधान्यतरत्वमेव हेतुदोषत्वमास्तामिति वाच्यम् ?

तथा सति पर्वतो वह्निमान्धूमादित्यादौ पर्वतत्वादिसामानाधिकरण्येन वह्नेः साध्यतायां वह्न्यभाववत्पर्वतादावतिप्रसङ्गात् तत्र तस्य तथाविधान्यतररूपत्वात्,

तथाविधान्यतरात्मकयद्विरोधिविषयताशालिनिश्चयाव्यवहितोत्तरानाहार्यमानसत्वव्यापकस्ताडशोभयाभावस्तत्त्वं हेतुदोषत्वमित्युक्तौ तु नायं दोषः; वन्ह्यभाववत्पर्वतरूपतथाविधविरोधिविषयताशालिनिश्चयाव्यवहितोत्तरोत्पन्ने पर्वतत्वसामानाधिकरण्येन वह्निविषयके तादृशानाहार्यमानसे तथाविधोभयाभावासत्त्वादित्याहुः,

तदसत्-वह्न्यभाववत्पर्वतो वह्निमान्धूमादित्यादौ पर्वतत्वसामानाधिकरण्येन पक्षतायां वह्न्यभाववत्पर्वतेऽतिप्रसङ्गाद्, वह्न्यभाववत्पर्वतो वह्निमानित्यनाहार्यमानसस्यालीकतया वह्न्यभाभाववत्पर्वतनिश्चयाव्यवहितोत्तरोत्पन्नघटादिविषयकानाहार्यमानसे तादृशोभयाभावसत्त्वात्,

यत्तु-प्रयुक्तत्वमत्र स्वरूपसम्बन्धविशेषः; स चात्रैतद्वृत्तिप्रतिबन्धकताऽवच्छेदकप्रयुक्तः प्रतिबन्ध्यताऽवच्छेदकाभाव इति प्रतीत्या प्रतिबन्ध्यताऽवच्छेदकाभाव इव प्रतिबन्ध्यताऽवच्छेदकघटितोभयाभावादावपि स्वीक्रियते प्रतीतेर्दुर्वारत्वात्,

एवं च तादृशोभयाभावप्रतियोगिताऽवच्छेदककोटौ यद्धर्म-

वच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्यता निविष्टा तद्धर्मा-वच्छिन्नाभावतद्व्याप्यान्यतराविशिष्टतद्धर्मावच्छिन्नात्मकयादृश-विशिष्टविषयत्वप्रयुक्तस्तथाविधविषयताशालिनिश्चयाव्यवहितो-त्तरानाहार्यमानससामान्ये तादृशोभयाभावस्तादृशविशिष्टत्वं हेतु-दोषत्वमिति लक्षणवाक्यार्थस्तत्र च नोक्तदोष इति,

तन्न-निर्वह्निः पर्वतो वह्निमानित्यादौ पर्वतत्वावच्छेदेन पक्षतायां वह्न्यभाववत्पर्वतेऽव्याप्तेः, प्रतिबन्ध्यताऽवच्छेदकघ-टितोभयाभावस्यैव प्रतिबन्धकताऽवच्छेदकप्रयुक्ततया वह्न्यभा-ववत्पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताया-बाधादिप्रतिबन्ध्यताऽवच्छेदकत्वेन तद्घटितोभयाभावस्य वह्न्य-भाववत्पर्वतविषयत्वाप्रयुक्तत्वात् ,

न च निर्वह्निः पर्वतो वह्निमानित्याहार्यप्रत्यक्षाभ्युपगमेन निर्वह्निः पर्वतो वह्निमानिति ज्ञानं प्रति निर्वह्निपर्वतविशेष्यक-वह्निप्रत्यक्षं जायतामित्याकारकेच्छाविरहविशिष्टपर्वतविशेष्यक-वह्न्यभावप्रकारकनिश्चयत्वेन प्रतिबन्धकत्वकल्पनान्नैष दोष इति वाच्यम् ?

लाघवेन तथाविधज्ञाने तथाविधेच्छाया एव हेतुत्वाभ्युपग-मेनोक्तरीत्या तथाविधदोषोद्धारासम्भवात्, प्रतिबन्ध्यताऽवच्छे-दकघटितधर्माभावस्यापि प्रतिबन्धकताऽवच्छेदकप्रयुक्तत्वप्रतीतेः कलहग्रस्ततयोपायान्तरस्याप्यशक्यत्वादिति दिक्,

अथात्र पक्षताऽवच्छेदकाभावविशिष्टपक्षरूपाश्रयासिद्ध्या-दावेतल्लक्षणाव्याप्तिः, काञ्चनमयः पर्वतः काञ्चनमयवह्निमान्

काञ्चनमयधूमादित्यादौ काञ्चनमयत्वविशिष्टपर्वतादेरप्रसिद्ध्या तद्घटितोभयाभावाप्रसिद्धेः,

न चोभयाभावप्रतियोगिताऽवच्छेदककोटौ पक्षताऽवच्छेदका-दिवैशिष्ट्यनिवेशे प्रयोजनाभावान्नैवमिति वाच्यम् ?

वह्न्यभाववद्ध्रदादिविषयकज्ञानोत्तरं द्रव्यत्वादिना ह्रदादि-विशेष्यकस्य द्रव्यं वह्निमदित्यादिज्ञानस्योदयेन लक्षणेऽसम्भ-ववारणाय पक्षताऽवच्छेदकादिवैशिष्ट्यानिवेशस्यावश्यकत्वा-दिति चेद् ?

न—वैज्ञानिकस्य पक्षताऽवच्छेदकादिवैशिष्ट्यस्यात्रानिविष्टत-योभयाभावप्रतियोगिताऽवच्छेदककोटौ पक्षताऽवच्छेदकवैशिष्ट्या-दिविषयतानिरूपितविषयताया एव निवेशेनोक्ताव्याप्त्यभावात्,

न च तथाऽप्यत्यन्ताभावप्रतियोगित्वादिरूपानुपसंहारित्वेऽ-व्याप्तिः; तन्निश्चयस्यान्वयव्याप्तिग्रहाप्रतिबन्धकतया तद्विषयक-निश्चयाव्यवहितोत्तरानाहार्यमानससामान्येऽन्वयव्याप्त्यवगाहि-त्वघटितोभयाभावस्यासत्त्वादिति वाच्यम् ?

निरुक्तसाध्यवैशिष्ट्यावगाहित्वान्वयव्याप्तिविशिष्टहेतुमत्ता-ऽवगाहित्वव्यतिरेकव्याप्तिविशिष्टहेतुमत्ताऽवगाहित्वैतत्त्रित्वाव-च्छिन्नप्रतियोगिताकाभावस्य विवक्षणेनोक्तदोषाभावाद्, उक्ता-नुपसंहारित्वज्ञानस्य साध्याभावव्यापकीभूताभावप्रतियोगित्वरू-पव्यतिरेकव्याप्तिग्रहप्रतिबन्धकतया तथाविधानाहार्यमानससा-मान्ये तादृशत्रित्वावच्छिन्नाभावसत्त्वात्,

न चैवमपि निर्वह्निः पर्वतो वह्निमानित्यादौ वह्न्यभावव-

त्पर्वतादावव्याप्तिः; तत्र तादृशत्रित्वावच्छिन्नप्रतियोगिताकाभावप्रतियोग्यप्रसिद्धेरिति वाच्यम्?

आहार्यज्ञान एव तत्प्रसिद्धेः,

वस्तुतस्तु—पक्षताऽवच्छेदकावच्छिन्नपक्षे साध्यताऽवच्छेदकावैशिष्ट्यस्य साध्यताऽवच्छेदकावच्छिन्नसाध्यनिरूपितव्याप्तिविशिष्टहेतुताऽवच्छेदकावच्छिन्नवैशिष्ट्यस्य चावगाहिज्ञानविरोधिज्ञानत्वमुपदर्शितलक्षणवाक्यार्थः, उपदर्शितत्रित्वावच्छिन्नाभावघटितलक्षणापेक्षया लाघवात्, अत्र तथाविधोभयवैशिष्ट्यावगाहित्वव्यापकविषयिताऽवच्छिन्नानाहार्यमानसनिष्ठप्रतिबन्ध्यतानिरूपितज्ञानवृत्तिप्रतिबन्धकताऽवच्छेदकीभूता यादृशविशिष्टविषयता तत्त्वं हेतुदोषत्वमिति निष्कर्षः,

तेन तथाविधोभयवैशिष्ट्यावगाहिघटविषयकसमूहालम्बनप्रतिबन्धकज्ञानविषयत्वमादाय वह्निमान्धूमादित्यादौ न घटाभावाद्यावतिव्याप्तिः, अवच्छेदकत्वमत्रानतिरिक्तवृत्तित्वमतो नासम्भवः,

निर्वह्निः पर्वतो वह्निमानित्याहार्यतथाविधज्ञानविषयताव्यापकीभूतवह्न्यभाववत्पर्वतविषयताशालिज्ञानमादाय निर्वह्निः पर्वतो वह्निमानित्यादौ वह्निमत्पर्वतादौ लक्षणसमन्वयः,

एतदर्थमेव तथाविधोभयवैशिष्ट्यवगाहित्वावच्छिन्नप्रतिबन्ध्यतां विहाय तथाविधविषयताव्यापकविषयताऽवच्छिन्नप्रतिबन्ध्यतानिवेशः, वह्निमान्धूमादित्यादौ सिद्धिविषयीभूतवह्निमत्पर्वतादावतिप्रसङ्गवारणाय प्रतिबन्ध्यतायामनाहार्यमानसत्वाद्यवच्छिन्नत्वनि-

वेशः, कामिनीजिज्ञासामादाय कामिनो ज्ञानेऽतिप्रसङ्गवारणाय प्रतिबन्ध्यतायामनाहार्यमानसवृत्तित्वनिवेशः, कामिनीजिज्ञासामादाय कामिनीज्ञानेऽतिप्रसङ्गवारणाय प्रतिबन्धकतायां ज्ञानवृत्तित्वनिवेश इति वदन्ति,

नव्यास्तु—जलह्रदो वह्निमान्धूमादित्यादौ यदङ्कुरविशेषमादाय वह्न्यभाववज्जलह्रदविषयकं नियतसमूहालम्बनं जातं तदङ्कुरविशेषेऽतिव्याप्त्या; यत्र च तदङ्कुराभाववान्पर्वतस्तदङ्कुरवानित्यादौ तथाविधाहार्यज्ञानं कस्यापि न जातं तत्र तदङ्कुरवत्पर्वतेऽव्याप्त्या च नोक्तलक्षणमपि सम्यक्; किन्तु यत्र यावन्तो हेतुदोषाः सम्भवन्ति तावदन्यतमत्वमेव हेत्वाभासत्वम्,

न चैवं सर्वमात्मवद्गगनादित्यादावात्माभाववत्सर्वात्मकत्वाध आत्माभावव्याप्यसर्वात्मकसत्प्रतिपक्षे गगनाभाववत्सर्वात्मकस्वरूपासिद्धौ त्रितयसाधारणहेत्वाभासलक्षणासम्भवः; तथाविधसर्वान्यस्याप्रसिद्ध्या तावदन्यान्यत्वरूपतावदन्यतमत्वस्य तत्तल्लक्षणत्वासम्भवादिति वाच्यम्?

तत्र तावदवृत्त्यभावत्वरूपस्यैव हेत्वाभासलक्षणत्वाङ्गीकारात्, तावदवृत्तेरवृत्तेरेव प्रसिद्ध्याऽप्रसिद्ध्यभावादिति प्राहुरिति सङ्क्षेपः।

तत्र साध्यताऽवच्छेदकविशिष्टसाध्यग्रहसाधनताऽवच्छेदकविशिष्टसाधनग्रहनिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽनवच्छेदकत्वे सति व्याप्तिग्रहनिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकतायाज्ञानवृत्तित्वविशिष्टविषयतासम्बन्धेनावच्छेदकत्वं व्यभिचारत्वम्,

साधारण्यज्ञानस्यान्वयव्याप्तिघटकाव्यभिचारग्रहप्रतिबन्धकतया-ऽसाधारण्यज्ञानस्य तद्घटकसाध्यसामानाधिकरण्यग्रहप्रतिबन्धकतयाऽनुपसंहारित्वज्ञानस्य व्यतिरेकव्याप्तिग्रहप्रतिबन्धकतया साधारण्यादिरूपव्यभिचारे लक्षणसमन्वयः,

अवच्छेदकत्वं चानतिरिक्तवृत्तित्वं; तेन साधारण्यत्वादिना घटादिविषयकज्ञानस्याव्यभिचारादिग्रहप्रतिबन्धकतया साधारण्यादेस्तत्प्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेऽपि न क्षतिः; साध्याप्रसिद्धिसाधनाप्रसिद्ध्योरतिव्याप्तिवारणाय सत्यन्तं, असाधारण्यादिविषयतयेच्छाऽऽदिवृत्तित्वेन तादृशप्रतिबन्धकताऽनतिरिक्तवृत्तित्वासम्भवाद्विषयतायां ज्ञानवृत्तित्वविशिष्टत्वनिवेशः, एवमग्रेऽपि,

अथान्वयव्याप्तिव्यतिरेकव्याप्त्युभयसाधारणव्याप्तित्वस्यैक्याभावेनान्वयव्याप्तिव्यतिरेकव्याप्त्योरेकतरस्या अत्र निवेशे साधारण्यानुपसंहारित्वयोरेकतरासङ्ग्रहः; किञ्च साध्यात्यन्ताभाववदवृत्तित्वरूपान्वयव्याप्तिव्यापकसामानाधिकरण्यरूपान्वयव्याप्त्योरनुगमकरूपाभावेनैकतरनिवेशे साधारण्यासाधारण्ययोरेकतरासङ्ग्रहः, साध्यसामानाधिकरण्यस्य निष्कृष्टसाध्यात्यन्ताभाववदवृत्तित्वरूपान्वयव्याप्त्यघटकतया तन्मात्रनिवेशेऽसाधारण्येऽव्याप्तिरिति चेद् ?

न—साध्यात्यन्ताभाववदवृत्तित्वरूपान्वयव्याप्तिसाध्यसामानाधिकरण्यव्यतिरेकव्याप्त्येतत्रितयमात्रावगाहिसमूहालम्बनग्रहस्यैव प्रतिबन्ध्यतया लक्षणे निवेशेनानुपपत्त्यभावात् ।

स च व्यभिचारस्त्रिधा—साधारण्यासाधारण्यानुपसंहारित्व-भेदात्, साधारण्यत्वं च साध्यताऽवच्छेदकविशिष्टसाध्यग्रहसाधनताऽवच्छेदकविशिष्टसाधनग्रहनिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽनवच्छेदकत्वे सति साध्यात्यन्ताभाववद्वृत्तित्वरूपान्वयव्याप्तिग्रहनिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताया ज्ञानवृत्तित्वविशिष्टविषयतासम्बन्धेनावच्छेदकत्वं, धूमवान्वह्नेरित्यादौ वह्न्यादौ धूमाभाववद्वृत्तित्वादिग्रहस्य तत्र निरुक्तान्वयव्याप्तिग्रहप्रतिबन्धकतया साध्याभाववद्वृत्तित्वरूपसाधारण्ये लक्षणसमन्वयः,

न चैवं साध्यताऽवच्छेदके हेतुसमानाधिकरणाभावप्रतियोगिताऽवच्छेदकत्वरूपसाधारण्येऽव्याप्तिः; तज्ज्ञानस्य ग्राह्याभावानवगाहितया निरुक्तव्याप्तिग्रहाप्रतिबन्धकत्वाद्; मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वे च मानाभावादिति वाच्यम् ?

लाघवेन साध्याभाववद्वृत्तित्वस्यैव साधारण्यत्वाङ्गीकारात्,

न चैवं निरुक्तावच्छेदकत्वग्रहकालेऽपि व्याप्तिग्रहापत्तिरिति वाच्यम् ?

क्षणैकविलम्बस्यादोषतया तत्र द्वितीयक्षणे साध्याभाववद्वृत्तित्वग्रहं कल्पयित्वा तेनैव व्याप्तिग्रहप्रतिबन्धोपगमात् ,

न चैवं साध्याभाववद्वृत्तित्वग्रहोत्पत्तिकाले व्याप्तिग्रहः स्यादिति वाच्यम् ?

तस्य कार्यकालवृत्तितया प्रतिबन्धकत्वोपगमाद् , अत एव साध्यवद्भिन्नवृत्तित्वादावव्याप्तिरपि निरस्ता, गौरवेण तस्यापि साधारण्यत्वानुपगमाद् , उक्तरीत्यैव तद्ग्रहेऽपि व्याप्तिग्रहप्रति-

बन्धोपपत्तेः,

न च साध्याभाववद्वृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतु-साधारण्येन साध्यवद्भिन्नवृत्तित्वादेरेव साधारण्यत्वाङ्गीकार-आवश्यक इति वाच्यम्?

निरवच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव तत्त्वोपगमाद् अन्यथा भेदस्याव्याप्यवृत्तितामते भवन्मतेऽप्यगतेः,

अथैवमपि सन्दिग्धोपाधेर्दूषणत्वानुपपत्त्या व्यभिचारसन्दे-हस्यापि व्याप्तिग्रहप्रतिबन्धकतया संशयनिश्चयसाधारणसाध्या-भाववद्वृत्तित्वग्रहस्यैव प्रतिबन्धकत्वं वाच्यं; तथा च सद्धेतावपि पक्षमन्तर्भाव्य; साध्याभावांशे संशयात्मकसाध्याभाववद्वृत्तित्व-ज्ञानासम्भवेन व्याप्तिग्रहप्रतिबन्धापत्त्याऽनुमितिमात्रोच्छेदापत्ति-रिति चेद्?

न—साध्याभावांशे निश्चयात्मकवृत्तित्वांशे संशयनिश्चय-साधारणसाध्याभाववद्वृत्तित्वज्ञानस्यैव निरुक्तव्याप्तिग्रहप्रतिब-न्धकत्वोपगमात्,

अथ तथाऽपि साध्याभावांशे निर्धर्मिताऽवच्छेदकधूमाभाव-वद्वृत्तिर्वह्निरित्यादिज्ञानस्य साध्याभावांशे सधर्मिताऽवच्छे-दकस्य धूमाभाववदयोगोळकवृत्तिर्वह्निरित्यादिज्ञानस्य च व्याप्ति-ग्रहप्रतिबन्धकत्वं सर्वानुभवसिद्धं तदनुपपन्नम्; उभयानुगमक-रूपाभावेनैकतरस्य प्रतिबन्धकत्वेऽपरस्यासङ्ग्रहादिति चेद्?

न—साध्यनिष्ठप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यता-शून्यत्वे सति साध्याभावनिष्ठप्रकारतानिरूपितविशेष्यताऽवच्छे-

दकतद्धर्मातिरिक्तधर्मानवच्छिन्ना या साध्याभावनिष्ठप्रकारता-निरूपितविषयता तन्निरूपितवृत्तित्वविषयतानिरूपितहेतुविशे-ष्यताशालिज्ञानत्वेनोपदर्शितद्विविधज्ञानसाधारणेन साध्याभा-वांशे संशयात्मकज्ञानव्यावृत्तेन रूपेण प्रतिबन्धकत्वस्योक्तावनुप-पत्त्यभावादिति सम्प्रदायः,

नव्यास्तु—साध्याभावांशे संशयात्मकमपि साध्याभाववद्वृत्तित्वज्ञानं प्रतिबन्धकमेव ; अन्यथा तस्याप्रतिबन्धकत्वे वह्नि-मान्धूमादित्यादौ विपक्षे साध्याभावपक्षविपक्षान्यतरत्वरूप-हेतोः साहचर्यनिश्चयेन सर्वत्र साध्याभावव्याप्तिनिश्चयाभा-वेन वह्न्यभावव्याप्यपर्वतह्रदान्यतरत्ववान्पर्वत इत्याद्याकारक-साध्याभावव्याप्यप्रकारकपक्षविशेष्यकनिर्णयात्मकसत्प्रतिपक्षस-म्भवेन सर्वत्र सन्दिग्धसाध्यपक्षकहेतुस्थलेऽनुमितिविलोपापत्तेः; तथा च साध्याभावांशे संशयवारकसत्यन्तघटितोपदर्शितरूपेणैव साध्याभाववद्वृत्तित्वज्ञानस्य प्रतिबन्धकत्वमास्थेयम्,

न चैवं सर्वत्र सद्धेतौ पक्षे साध्यसन्देहसत्त्वेन पक्षमन्तर्भाव्य साध्याभावांशे संशयात्मकसाध्याभाववद्वृत्तित्वज्ञानसम्भवेन व्या-प्तिग्रहप्रतिबन्धापत्त्याऽनुमितिमात्रोच्छेदापत्तिरिति वाच्यम् ?

तत्रानुकूलतर्कस्योत्तेजकत्वेन तदभावविशिष्टसाध्याभावव-द्वृत्तित्वज्ञानस्यैव प्रतिबन्धकतया वह्निमान्धूमादित्यादिसद्धेतौ कार्यकारणभावग्रहादिरूपानुकूलतर्कसत्त्वेन व्याप्तिग्रहोत्पत्तौ बाधकाभावात्,

न चैवमनुकूलतर्कसत्त्वे साध्याभाववद्वृत्तित्वानिर्णयेऽपि

व्याप्तिग्रहापत्तिरिति वाच्यम् ?

साधारण्यनिर्णयाभावविशिष्टानुकूलतर्काभावविशिष्टसाधारण्यज्ञानत्वेनैव प्रतिबन्धकत्वोपगमात्,

न चैवमपि तस्य प्रतिबन्ध्यताऽवच्छेदकं व्याप्तिग्रहत्वमेव; तथा च साधारण्यसन्देहेऽपि व्याप्त्यनुमितेर्व्याप्तिशाब्दस्य वोद्‌षाद्व्यभिचार इति वाच्यम् ?

अनुकूलतर्कस्यैव व्याप्तिव्याप्यवत्तापरामर्शस्य पदजन्यव्याप्त्युपस्थितेश्चोत्तेजकत्वोपगमेनादोषात्,

यद्वा-उक्तरूपेण प्रतिबन्धकतायां व्याप्तिप्रत्यक्षत्वमेव जन्यताऽवच्छेदकमतो नोक्तव्यभिचारः, साधारण्यनिर्णयत्वेनानुमितौ शाब्दबोधे च प्रतिबन्धकत्वान्तरमेव; तत्र तत्रानुकूलतर्कादिकं नोत्तेजकं प्रयोजनाभावात्,

वस्तुतस्तु—व्याप्तिप्रत्यक्षत्वावच्छिन्नं प्रत्यनुकूलतर्कमुत्तेजकीकृत्य साधारण्यज्ञानत्वेनैकं प्रतिबन्धकत्वमपरं च तमनुत्तेजकीकृत्य साधारण्यादिनिर्णयत्वेन प्रतिबन्धकत्वं लाघवाद्, उक्तरूपेणैकप्रतिबन्धकत्वे साधारण्यनिर्णयाभावानुकूलतर्काभावयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्धकताबाहुल्यावच्छेदकगौरवाच्चोक्तप्रत्यक्षस्थलेऽपि साधारण्यानिर्णयस्य पृथगेव प्रतिबन्धकत्वमित्येव सारम्,

इदं तु बोध्यं-पूर्वोपदर्शितरीत्या साध्यात्यन्ताभाववद्वृत्तित्वस्यैव साधारण्यत्वे साध्यात्यन्ताभाववद्वृत्तित्वमेव साधारण्यलक्षणमस्तु न तूक्तं साध्याभाववद्वृत्तित्वरूपान्वयव्याप्तिग्रहप-

तिबन्धकताघटितं गौरवादिति,

असाधारणत्वं च—ज्ञानवृत्तित्वविशिष्टविषयतासम्बन्धेन साध्यताऽवच्छेदकावच्छिन्नसाध्यसाधनताऽवच्छेदकावच्छिन्नसाधनोभयविषयकज्ञाननिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताया अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वाभाववत्त्वे सति साध्यताऽवच्छेदकविशिष्टसाध्यसाधनताऽवच्छेदकताया ज्ञानवृत्तित्वविशिष्टविषयतासम्बन्धेनातिरिक्तवृत्तित्वरूपावच्छेदकत्वं वह्निमान् गगनादित्यादौ गगनादौ वह्न्याद्यसामानाधिकरण्यज्ञानस्य वह्न्यादिसामानाधिकरण्यग्रहप्रतिबन्धकतया साध्यासामानाधिकरण्यरूपासाधारण्ये लक्षणसमन्वयः, शेषं पूर्वोक्तदिशाऽवसेयम्,

अथात्रापि लाघवेन साध्यासामानाधिकरण्यस्यैकस्यैवासाधारण्यतया साध्यासामानाधिकरण्यत्वमेवासाधारण्यलक्षणमस्तु कृतं निरुक्तलक्षणेनेति चेद् ?

न—इष्टापत्तेरिति सङ्क्षेपः,

अनुपसंहारित्वं च साध्यताऽवच्छेदकविशिष्टसाध्यसाधनताऽवच्छेदकविशिष्टसाधनोभयमात्रविषयकज्ञानाविरोधिनिष्ठा या साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिप्रकारकसाधनविशेष्यकग्रहनिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकता तदनतिरिक्तवृत्तिर्या ज्ञानवृत्तित्वविशिष्टयादृशविशिष्टविषयिता तत्त्वं, वाच्यं प्रमेयत्वादित्यादौ साध्यविशेष्यकात्यन्ताभावाप्रतियोगित्वज्ञानस्य साधनविशेष्यकात्यन्ताभावाप्रतियोगित्वज्ञानस्य चोपदर्शितव्यतिरेकव्याप्तिग्रहप्रतिबन्धकतया साध्यसाधननि-

ष्ठात्यन्ताभावाप्रतियोगित्वरूपानुपसंहारित्वे लक्षणसमन्वयः,

अत्र समवेतज्ञेयत्ववत्वान् समवेतवाच्यत्वादित्यादौ समवेतत्वाभावविशिष्टज्ञेयत्वरूपसाध्याप्रसिद्धौ समवेतत्वाभावविशिष्टवाच्यत्वरूपसाधनाप्रसिद्धौ वाऽतिव्याप्तिवारणायाविरोधित्वान्तनिवेशः, तदर्थश्च साध्यताऽवच्छेदकविशिष्टसाधनताऽवच्छेदकविशिष्टसाधनोभयमात्रविषयकज्ञाननिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकत्वाभाववत्त्वम् ,

न चैवं सति यत्र साध्याप्रसिद्ध्याद्यनुपसंहारित्वोभयविषयकसमूहालम्बनमेव जातं तत्रत्यानुपसंहारित्वेऽव्याप्तिरिति वाच्यम् ?

साध्यताऽवच्छेदकविशिष्टसाध्यसाधनताऽवच्छेदकविशिष्टसाधनोभयमात्रविषयकज्ञाननिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽनवच्छेदिका व्यतिरेकव्याप्तिग्रहनिष्ठप्रतिबन्ध्यतानिरूपितप्रतिबन्धकताऽवच्छेदिका च ज्ञानवृत्तित्वविशिष्टयादृशविशिष्टविषयता तादृशविशिष्टत्वमनुपसंहारित्वमिति निष्कर्षेणानुपपत्त्यभावात् ,

अत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वमतो न पूर्वोपदर्शितरीत्याऽसम्भवः, अत्र विषयितायां ज्ञानवृत्तित्ववैशिष्ट्यनिवेशादिच्छासाधारणतथाविधविशिष्टविषयितायाः तथाविधप्रतिबन्धकानतिरिक्तवृत्तित्वविरहेऽपि न क्षतिः,

अथैवमपीदं प्रमेयमभावप्रतियोगित्वविशिष्टवाच्यत्वादित्यत्रात्यन्ताभावाप्रतियोगित्वरूपानुसंहारित्वेऽव्याप्तिः, प्रमेयत्वाभावव्यापकाभावप्रतियोगित्ववदभावप्रतियोगित्वाभावविशिष्टवाच्यत्वमित्याकारकज्ञानस्याहार्यस्यैव प्रसिद्धस्यापि कस्या-

ष्यप्रतिबन्ध्यतया तन्निष्ठप्रतिबन्ध्यतायाया अप्रसिद्धया तद्घटितल-क्षणस्य तत्रागमनासम्भवादिति चेद् ?

न—व्यतिरेकव्याप्तिप्रकारकसाधनताऽवच्छेदकावच्छिन्नवि-शेष्यकज्ञानविषयिताव्यापकीभूतविषयिताऽवच्छिन्नप्रतिबन्ध्यता-यास्तत्र निवेशेनानुपपत्त्यभावात्; तादृशव्यापकविषयताशालि यद्बाध्यत्वं प्रमेयत्वाभावव्यापकीभूताभावप्रतियोगित्येतादृशज्ञानं तन्निष्ठप्रतिबन्ध्यतामादाय तत्रत्योपदर्शितानुपसंहारित्वे लक्षण-गमनसम्भवात्,

ननु तथाऽप्युपदर्शितव्यतिरेकव्याप्तिविषयकत्वघटितलक्षणस्या-त्यन्ताभावाप्रतियोगित्वविशिष्टसाध्यरूपानुपसंहारित्वेऽव्याप्तिः; साध्यविशेष्यकात्यन्ताभावाप्रतियोगित्वप्रकारकज्ञानस्य भिन्नवि-विशेष्यप्रकारतयाऽत्यन्ताभावविशेष्यकप्रतियोगितासंसर्गकसाध्य-प्रकारकज्ञानाप्रतिबन्धकत्वेनोपदर्शितलक्षणगमनासम्भवादिति चेद् ?

न-अत्यन्ताभावाप्रतियोगित्वविशिष्टसाध्यरूपानुपसंहारित्व-स्य प्रकृते प्रतियोगितासम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिताका-भावविशिष्टात्यन्ताभावरूपस्य विवक्षणात्,

अत्रेदं विचार्यते—अत्रात्यन्ताभावत्वावच्छेदेन प्रतियोगिता-सम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वं विवक्षितम्; अ-भावत्वाश्रययत्किंचिद्व्यक्तौ तथाविधसाध्याभाववत्त्वं वा ?

आद्ये प्रमेयं वाच्यत्वादित्यत्र तथाविधानुपसंहारित्वाप्र-सिद्धिः; प्रमेयत्वघटोभयाभावीयप्रतियोगितासम्बन्धेन प्रमेयत्वा-

देस्तथाविधात्यन्ताभावे सत्त्वेनाभावत्वावच्छेदेन तथाविधप्रमेयत्वाभावासत्त्वात् ,

अन्त्ये वह्निमान्धूमादित्यत्र धूमहेतावव्यनुपसंहारित्वं स्याद्, अभावत्वाश्रये घटाभावे प्रतियोगितासंबन्धेन वह्निरूपसाध्याभावसत्त्वेन तथाविधानुपसंहारित्वस्य तत्रानपायात् ,

एतेनाभावत्वावच्छेदेन साध्यताऽवच्छेदकसम्बन्धावच्छिन्नसाध्यताऽवच्छेदकावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वमनुपसंहारित्वं वाच्यमित्यपि परास्तम् ,

स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तत्सम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयत्वाभावस्याप्रसिद्धेः, अभावत्वावच्छेदेन तादृशप्रमेयत्वाभाववत्त्वस्याप्रसिद्ध्या प्रमेयत्वसाध्यकहेतावनुपसंहारित्वाभावप्रसङ्गादिति,

अत्रोच्यते—साध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छेदेन साध्यताऽवच्छेदकावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नसाध्याभाववत्त्वमनुपसंहारित्वमित्यत्रानुपपत्तिविरहात् , प्रमेयत्वादिसाध्यकस्थले स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य घटाभावस्यैव प्रसिद्धतया स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छेदेन तादृशप्रमेयत्वाभावसत्त्वात् ,

यद्वा—अभावत्वावच्छेदेनावच्छिन्नसाध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकसाध्यताऽवच्छेदकाभाववत्त्वमनुपसंहारित्वं वाच्यमतो नानुपपत्तिः ; यतः प्रमेयत्वादिसाध्यकस्थले साध्यताऽवच्छेदकावच्छिन्नसाध्यताऽ-

वच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या तथाविधसम्बन्धो न तादृशः सम्बन्धः; अपि तु घटत्वाद्यवच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वमेव तादृशः सम्बन्धो वाच्यस्तेन व्यधिकरणसम्बन्धेन प्रमेयत्ववत्त्वाभावस्य केवलान्वयितया भावत्वावच्छेदेन तेन सम्बन्धेन साध्यताऽवच्छेदकाभाववत्त्वमक्षतमिति,

अथ तादृशोभयधर्मज्ञानस्याभावविशेष्यकसाध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासंसर्गकसाध्यप्रकारकज्ञानं प्रति न प्रतिबन्धकत्वं; तेन सम्बन्धेन साध्यप्रकारकबुद्धिं प्रति तत्सम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावप्रकारकज्ञानस्यैव ग्राह्याभावावगाहितया प्रतिबन्धकत्वात् ,

एवं च तादृशधर्मद्वयज्ञानस्य साध्याभावघटितव्यतिरेकव्याप्तिग्रहाविरोधितयोपदर्शितानुपसंहारित्वलक्षणानाक्रान्तस्य तथाविधधर्मद्वयस्याप्यनुपसंहारित्वरूपत्वं न घटत इति चेद् ?

मैवं—यतः साध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छेदेन साध्यताऽवच्छेदकावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वमनुपसंहारित्वमिति मते साध्यताऽवच्छेदकावच्छिन्नप्रतियोगितासम्बन्धेन साध्यविशिष्टो यः साध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्तद्व्यापकाभावप्रतियोगित्वमेव व्यतिरेकव्याप्तिः ; अवच्छिन्नसाध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकसाध्यताऽवच्छेदकाभाववत्त्वस्याभावत्वावच्छेदेन सत्त्वमनुपसंहारित्वमिति मते त्ववच्छिन्नसाध्यताऽ-

वच्छेदकसम्बधावच्छिन्नप्रतियोगितासम्बन्धेन साध्यताऽवच्छेदक-विशिष्टो योऽभावस्तद्व्यापकाभावप्रतियोगित्वमेव व्यतिरेकव्याप्तिरिति विवक्षणेनानुपपत्त्यभावात्,

वस्तुतस्तु—स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्ना या साध्यताऽवच्छेदकता तदवच्छेदकावच्छिन्नस्य साध्यीयप्रति-योगिताऽवच्छेदकसम्बन्धेन यदधिकरणं तदवृत्तित्वे सति वृत्ति-मत्त्वं व्यतिरेकव्याप्तिर्लाघवाद्, उदाहरणं चास्याः संयोगाभाव-वान् द्रव्यत्वाभावात् पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्याद्य-भावसाध्यकहेतौ; पर्वतो वह्निमान्धूमादित्यादिभावसाध्यकहेतौ त्वन्वयव्याप्तिरेव,

एवं चैतादृशव्यतिरेकव्याप्तिग्रहनिष्ठप्रतिबन्ध्यतानिरूपित-प्रतिबन्धकताया ज्ञानवृत्तित्वविशिष्टविषयतासम्बन्धेनानतिरिक्त-वृत्ति यादृशविशिष्टं तादृशविशिष्टमनुपसंहारित्वम्,

एवं च पूर्वोपदर्शितसम्बन्धावच्छिन्ना या साध्यताऽवच्छेद-कता तदवच्छेदकावच्छिन्नस्य साध्यीयप्रतियोगिताऽवच्छेदकस-म्बन्धेन यदधिकरणं तदवृत्तित्वविशिष्टवृत्तिमत्त्वाभावविशिष्टहेतुः तदधिकरणवृत्तित्वविशिष्टहेतुरेव वाऽनुपसंहारित्वम्, उदाहरणं चास्य ह्रदो निर्धूमो द्रव्यत्वात् पृथिवीतरेभ्यो भिद्यते द्रव्यत्वा-दित्यादौ; अत्रातथाविधस्य धूमवदवृत्तिद्रव्यत्वस्य धूमवदवृ-त्तित्वविशिष्टवृत्तिमत्त्वाभावविशिष्टद्रव्यत्वस्य पृथिवीतरवृत्तित्व-वद्द्रव्यत्वस्य पृथिवीतरावृत्तित्वविशिष्टवृत्तिमत्त्वाभावविशिष्टद्र-व्यत्वस्य चानुपसंहारित्वरूपत्वादिति न कोऽपि दोषः,

एतेन साध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेन साध्यीयो यद्यत्तद्वद्वृत्तित्वविशिष्टवृत्तिमत्त्वमेव व्याप्तिः, तादृशव्याप्तिज्ञानमेवानुमितिकरणं लाघवात्,

ननु साध्याभाववदवृत्तित्वविशिष्टवृत्तिमत्त्वं व्याप्तिस्तज्ज्ञानं वा कारणं, तत्राभावत्वस्य निवेशे गौरवात्,

एवं चात्यन्ताभावाप्रतियोगिसाध्यादिरूपस्यानुपसंहारित्वस्य न हेत्वाभासत्वं न वा साध्याधिकरणवृत्तित्वरूपासाधारण्यस्य हेत्वाभासत्वं तयोर्ज्ञानस्य तथाविधव्याप्तिज्ञानाविरोधित्वादित्यपि निरस्तम्,

यतो वह्न्यादिविधेयकानुमितिं प्रति तादृशव्याप्तिज्ञानस्य हेतुत्वेऽपि द्रव्यत्वाभावादिहेतुकसंयोगाभावादिसाध्यकानुमितिं प्रति समवायसम्बन्धेन संयोगवदवृत्तित्वविशिष्टवृत्तिमत्त्वरूपाया निरुक्तव्यतिरेकव्याप्तिस्तज्ज्ञानमेव हेतुर्लाघवाद्; न तु संयोगाभावीययद्वृत्तित्वविशिष्टवृत्तिमत्त्वरूपान्वयव्याप्तिज्ञानं तत्राभावत्वस्य निवेशे गौरवाद्,

एवं धूमाभाववान् द्रव्यत्वाभावादित्यादावपि तथा, तथा च तादृशव्यतिरेकव्याप्तिज्ञानप्रतिबन्धकज्ञानविषयतयोपदर्शितव्यतिरेकव्याप्त्यभावविशिष्टहेतोरुपदर्शितव्यतिरेकव्याप्तिघटकतथाविधावृत्तित्वाभावविशिष्टहेतोस्तथाविधावृत्तित्वविशिष्टहेतोरेव वाऽनुपसंहारित्वस्य हेत्वाभासत्वमेव, पर्याप्तिसम्बन्धेन द्वित्वसाध्यकत्रित्वहेतावतिप्रसङ्गवारणाय साध्यासामानाधिकरण्यस्याव्याप्तिघटकतया निरुक्तासाधारण्यस्यापि हेत्वाभासत्वमित्यत्र न

कोऽपि दोष इत्यलं विस्तरेण ।

विरोधत्वं च साध्यव्यापकीभूताभावप्रतियोगित्वम् , अयं गौरश्वत्वादित्यादौ, गोत्वव्यापकीभूताभावप्रतियोगित्वादेरश्वत्वादौ सत्त्वाल्लक्षणसमन्वयः,

तस्य च साक्षादनुमितिप्रतिबन्धकज्ञानविषयतया दोषत्वम् , उक्तविरोधस्य साध्याभावनिरूपितव्यतिरेकव्याप्तिरूपतयाऽयं गौरश्वत्वादित्यादौ गोत्वव्यापकीभूताभावप्रतियोग्यश्वत्ववानित्यादिज्ञानस्य तदभावव्याप्यवत्ताज्ञानमुद्रया गोत्वाद्यनुमितिप्रतिबन्धकत्वात् ,

न चात्र वह्निमान् गगनादित्यसाधारणेऽतिव्याप्तिरिति वाच्यम् ?

वृत्तिमत्त्वस्यापि लक्षणे निवेशात् ,

वस्तुतस्तु—अश्वत्वाद्यात्मकाश्वत्वाभावाभावादेरपि गोत्वाद्यधिकरणे कालिकादिसम्बन्धेन वृत्तितयाऽश्वत्वाभावादेर्गोत्वादिव्यापकत्वानुपपत्त्याऽसम्भववारणाय व्यापकतायां प्रतियोगिवैयधिकरण्यमवश्यं निवेशनीयम् ,

एवं च द्रव्यं संयोगादित्यादिसद्धेतावतिव्याप्तिवारणायव्यापकीभूताभावेऽपि हेतुताऽवच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यं निवेशनीयम् ,

तथा च वह्निमान् गगनादित्यादौ गगनाद्यभावस्य हेतुताऽवच्छेदकवृत्तिनियामकसंयोगादिना प्रतियोग्यधिकरणाप्रसिद्ध्या प्रतियोगिवैयधिकरण्याभावेनातिव्याप्त्यसम्भव इति वृत्ति-

सत्त्वानिवेशेऽपि न दोष इति दिक्।

सत्प्रतिपक्षत्वं च साध्यात्यन्ताभावव्याप्यवत्पक्षत्वमेव, शब्दो नित्यः शब्दत्वादित्यादौ शब्दोऽनित्यः कृतकत्वादित्यादिना सत्प्रतिपक्षितेऽनित्यत्वव्याप्यकृतकत्ववच्छब्दे सत्प्रतिपक्षे साध्यात्यन्ताभावव्याप्यवत्पक्षत्वसत्त्वाल्लक्षणसमन्वयः

पूर्वोपदर्शितरीत्या लाघवेन साध्याभावव्याप्यवत्पक्षस्यैकस्यैव सत्प्रतिपक्षतया साध्यवद्भेदव्याप्यवत्पक्षादौ नाव्याप्तिः तज्ज्ञानस्यापि तदभावव्याप्यवत्ताज्ञानमुद्रया साध्यानुमितिप्रतिबन्धकत्वेन साक्षादनुमितिप्रतिबन्धकज्ञानविषयतया सत्प्रतिपक्षस्य दोषत्वमवसेयम्,

रत्नकोशकारस्तु—सत्प्रतिपक्षस्थले साध्याभावव्याप्यवत्ताज्ञानान्नानुमितिप्रतिबन्धः; साध्याभावव्याप्यवत्ताज्ञानस्य तु साध्यानुमितिप्रतिबन्धकत्वकल्पने गौरवात्; किन्तु साध्यव्याप्यवत्ताज्ञानात् साध्याभावव्याप्यवत्ताज्ञानाच्च जायमाना संशयात्मिकैव साध्यसाध्याभावोभयानुमितिर्जायत इत्याह,

तदसत्—तदभावव्याप्यवत्ताज्ञानकाले तदुपनीतभानादिवारणाय तत्र तस्य प्रतिबन्धकत्वे कल्पनीये तदुपनीतभानत्वादीनां बहूनां प्रतिबन्ध्यताऽवच्छेदकत्वकल्पने गौरवेण लाघवात्तद्विशिष्टबुद्धित्वस्यैव तत्प्रतिबन्ध्यताऽवच्छेदकत्वेन तत्प्रकारकज्ञानात्मकतत्संशयप्रतिबन्धकीभूतस्य तदभावव्याप्यवत्ताज्ञानस्य तदानीं सत्त्वेन सत्प्रतिपक्षस्थले संशयानुमितेरसम्भवात्,

अत्र रत्नकोशकारानुयायिनो नव्याः—तद्विशिष्टबुद्धित्वं तद-

भावव्याप्यवत्ताज्ञानप्रतिबन्ध्यताऽवच्छेदकं न सम्भवति; तथा सति तस्यैव तदभावव्याप्यवत्ताज्ञानाभावकार्यताऽवच्छेदकत्वस्य वाच्यतया तस्य च नित्यसाधारणधर्मस्य कार्यताऽवच्छेदकत्वानङ्गीकारेणासम्भवात्,

न च नित्यसाधारणधर्मस्यापि कार्यताऽवच्छेदकत्वोपगमान्न दोष इति वाच्यम्।

तथाऽपि चाक्षुषेच्छास्पार्शनेच्छाऽऽदिभेदेन नानाविधानामिच्छानामेकत्रोत्तेजकत्वासम्भवेन तद्विशिष्टबुद्धित्वस्य तदभावव्याप्यवत्ताज्ञानाभावकार्यताऽवच्छेदकत्वासम्भवात्,

तथा हि वन्ह्यभावव्याप्यवत्ताज्ञानकाले वह्निचाक्षुषं जायतामितीच्छाकाले वह्निचाक्षुषोत्पत्त्या तादृशज्ञानकाले वह्निस्पार्शनं जायतामितीच्छाकाले वह्निस्पार्शनोत्पत्त्या तन्निर्वाहार्थं तथाविधनानाविधेच्छाऽभावविशिष्टतदभावव्याप्यवत्ताज्ञानं तद्वत्ताबुद्धिं प्रति प्रतिबन्धकमिति न सम्भवति; तदभावव्याप्यवत्ताज्ञानकाले चाक्षुषसामग्र्यभावदशायां चाक्षुषं जायतामितीच्छासत्त्वे स्पार्शनसामग्रीबलात्स्पार्शनात्मकतद्वत्ताबुद्ध्यापत्तेः; तदानीं चाक्षुषेच्छाऽभावघटिततथाविधनानाविधेच्छाऽभावविशिष्टतदभावव्याप्यवत्ताज्ञानाभावरूपकारणसत्त्वादिति तत्प्रकारकचाक्षुषत्वावच्छिन्नं प्रति तथाविधचाक्षुषेच्छाऽभावविशिष्टतदभावव्याप्यवत्ताज्ञानत्वेन तथाविधस्पार्शनत्वावच्छिन्नं प्रति तथाविधस्पार्शनेच्छाऽभावविशिष्टतदभावव्याप्यवत्ताज्ञानत्वेन च प्रतिबन्धकत्वमिति चाक्षुषस्पार्शनादिभेदेन नानाविधप्र-

तिबप्रतिबन्ध्यप्रतिबन्धकभावकल्पनस्यावश्यकतया विशिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानत्वेन प्रतिबन्धकतायां मानाभावात् कथं प्रत्यक्षस्थलीयक्लृप्तेन विशिष्टबुद्धितदभावव्याप्यवत्ताज्ञानप्रतिबन्ध्यप्रतिबन्धकभावेन संशयानुमितिवारणमिति न जानीमः,

अथ माऽस्तूपदर्शितरीत्या प्रत्यक्षस्थलक्लृप्ततथाविधप्रतिबन्ध्यप्रतिबन्धकभावेन संशयानुमितिवारणं तथाऽपि शाब्दबोधादिस्थलीयक्लृप्तप्रतिबन्ध्यप्रतिबन्धकभावेन संशयानुमितिवारणं भवत्येव; तथा हि तदभावव्याप्यवत्ताज्ञानदशायां तत्प्रकारकशाब्दबोधतत्प्रकारकस्मरणादिवारणाय तत्प्रकारकशाब्दबोधत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानत्वेन तत्प्रकारकस्मरणत्वावच्छिन्नं प्रति तद भावव्याप्यवत्ताज्ञानत्वेन च नानाप्रतिबन्ध्यप्रतिबन्धकभावकल्पने गौरवात् तदपहाय प्रत्यक्षान्यतद्विशेष्यकतत्प्रकारकबुद्धित्वावच्छिन्नं प्रत्येव तादृशतदभावव्याप्यवत्ताज्ञानत्वेनैकप्रतिबन्ध्यप्रतिबन्धकभावकल्पने लाघवमिति साध्यतदभावोभयव्याप्यवत्ताज्ञानकाले क्व संशयानुमितिः?

तदभावव्याप्यवत्ताज्ञानीयोपदर्शितप्रतिबन्ध्यताऽवच्छेदकाक्रान्तायास्तस्यास्तदभावव्याप्यवत्ताज्ञानकाल उत्पत्त्यसम्भवादिति चेद्?

मैवं–प्रत्यक्षान्यतद्विशेष्यकतत्प्रकारकज्ञानत्वस्य तदभावव्याप्यवत्ताज्ञानप्रतिबन्ध्यताऽवच्छेदकत्वे प्रत्यक्षान्यत्वतद्विशेष्यकत्वतत्प्रकारकत्वज्ञानत्वानां विशेष्यविशेषणभावे विनिगमना-

विरहेण तदभावव्याप्यवत्ताज्ञानप्रतिबन्ध्यताऽवच्छेदकबाहुल्यात् तदभावव्याप्यवत्ताज्ञानप्रतिबन्धकताऽऽधिक्यं; तथाविधधर्मस्य तत्प्रतिबन्ध्यताऽवच्छेदकत्वे प्रतिबन्ध्यताऽवच्छेदकशरीरगौरवं चेति लाघवात् तद्विशेष्यककतदभावव्याप्यवत्ताज्ञानप्रतिबन्ध्यताऽवच्छेदकं विशिष्य तद्विशेष्यकतत्प्रकारकशाब्दबोधत्वादिकमेव वाच्यम्,

एवं च शाब्दबोधादिस्थलीयक्लृप्तप्रतिबन्ध्यप्रतिबन्धकभावेनापि संशयानुमितिवारणं न सम्भवत्येव,

ननु यदि सामानाधिकरण्यसम्बन्धेन प्रत्यक्षान्यत्वविशिष्टं तद्विशेष्यकतत्प्रकारकज्ञानत्वं चेत्तदभावव्याप्यवत्ताज्ञानप्रतिबन्ध्यताऽवच्छेदकं तदैवोपदर्शितरीत्या विनिगमनाविरहेण नानाप्रतिबन्ध्यताऽवच्छेदकमादाय तदभावव्याप्यवत्ताज्ञानप्रतिबन्धकताऽऽधिक्यं तदेव न; अपि तु प्रत्यक्षान्यत्वादिष्वेकत्र द्वयमिति रीत्या तदभावव्याप्यवत्ताज्ञाननिरूपितप्रतिबन्ध्यताया एकस्या एवावच्छेदकताया अभ्युपगमाद्, अवच्छेदकताभेदेनैव प्रतिबन्ध्यताभेदाद् न तथाविधधर्माणां प्रतिबन्ध्यताऽवच्छेदकत्वेऽपि प्रतिबन्ध्यप्रतिबन्धकभाववृद्ध्यापत्तिः; अवच्छेदकताया व्यासज्यवृत्तित्वशब्दार्थोऽप्ययमेव यन्नानाधर्मनिष्ठमेकमवच्छेदकत्वम्; अत एवोक्तं दीधितिकारैः—अवच्छेदकत्वं चेह तत्पर्याप्त्यधिकरणत्वमिति,

अथ यदि प्रत्यक्षान्यत्वज्ञानत्वादिनिष्ठतदभावव्याप्यवत्ताज्ञाननिरूपितं प्रतिबन्ध्यताऽवच्छेदकत्वमेकमुपेयते तदा नाना-

सम्बन्धावच्छिन्नैकावच्छेदकत्वप्रसङ्ग इति चेद् ?

न—नानासम्बन्धावच्छिन्नैकावच्छेदकत्वाङ्गीकारे क्षतिविरहात्,

न चैवं ज्ञानत्वनिष्ठसमवायसम्बन्धावच्छिन्नावच्छेदकतायाः प्रत्यक्षान्यत्वे स्वीकारे प्रत्यक्षान्यत्वे समवायसम्बन्धावच्छिन्नावच्छेदकताव्यवहारप्रसङ्ग इति वाच्यम् ?

इष्टापत्तेः,

न चावच्छेदकताया व्यासज्यवृत्तित्वाङ्गीकारेऽनुमितिं प्रति सिद्ध्यभावपरामर्शविशिष्टात्मत्वादिनैककारणपरिशेषापत्तिरिति वाच्यम् ?

विनिगमनाविरहेण तत्र परामर्शादेरपि हेतुत्वस्यावश्यकतया तत्र सिद्ध्यभावत्वपरामर्शत्वादिना प्रत्येककार्यकारणभावकल्पनस्यैवोचितत्वाद्; अन्यथा कारणताऽवच्छेदकगौरवप्रसङ्गात्,

वस्तुतस्तु—परामर्शत्वादिना स्वतन्त्रनियतान्वयव्यतिरेकाभ्यां परामर्शत्वादिनैव परामर्शादेः स्वतन्त्रहेतुत्वमुचितं न तूक्तरीत्या हेतुताऽवच्छेदकत्वम्,

एवं घटादिकं प्रति दण्डादिहेतुतायामपि बोध्यं; तस्मात्प्रत्यक्षान्यतत्प्रकारकतद्विशेष्यकज्ञानत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानत्वेन प्रतिबन्धकताकल्पनस्य निर्दुष्टतया तेन संशयानुमितिवारणे न किञ्चिद् बाधकमिति चेद् ?

मैवं—यतो भवदुपदर्शितरीत्या प्रत्यक्षान्यतत्प्रकारकतद्विशेष्यकज्ञानत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानं प्रतिबन्धकं-

तथाऽपि संशयानुमितिर्दुर्वारैव; तथा हि यत्र वह्निव्याप्यधूमवान्पर्वतोऽभावव्याप्यवान्पर्वत इति समूहालम्बनात्मकपरामर्शः; एवं महानसीयवह्नौ लाघवमिति लाघवज्ञानम्; अभावस्य महानसीयवह्निप्रतियोगिकत्वे लाघवमिति लाघवज्ञानं च; तत्र महानसीयवह्नौ लाघवमिति लाघवज्ञानसहकृताद् वह्निव्याप्यधूमवान्पर्वत इति परामर्शात् पर्वतो महानसीयवह्निमानित्यनुमित्युत्पत्तावभावस्य महानसीयवह्निप्रतियोगिकत्वे लाघवमिति लाघवज्ञानसहकृतादभावव्याप्यवान्पर्वत इति परामर्शात् पर्वतो महानसीयवह्न्यभाववानित्यनुमित्युत्पत्तौ च न किञ्चिद् बाधकं तदा महानसीयवह्न्यादिविधेयकानुमितिप्रतिबन्धकस्य महानसीयवह्न्याद्यभावव्याप्यवत्ताज्ञानस्याभावात्,

एवं च तत्र क्लृप्तसामग्रीबलात् पर्वते महानसीयवह्नितदभावोभयविधेयकानुमितेरर्थवशसम्पन्नतया संशयानुमितिरक्षतैव,

एतेन माऽस्तु प्रत्यक्षस्थलीयक्लृप्तप्रतिबन्ध्यप्रतिबन्धकभावेन संशयानुमितिवारणं; तथाऽपि परोक्षस्थलीयक्लृप्तप्रतिबन्ध्यप्रतिबन्धकभावेन संशयानुमितिवारणं सम्भवत्येव; तथा हि तदभावव्याप्यवत्ताज्ञानकाले तत्प्रकारकस्मृतिशाब्दबोधादिवारणाय तत्प्रकारकस्मृतित्वशाब्दबोधत्वाद्यवच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानत्वेन प्रतिबन्धकत्वकल्पने गौरवाल् लाघवेन तत्प्रकारकपरोक्षत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानत्वेनैकप्रतिबन्धकत्वं कल्प्यते,

परोक्षत्वं चानुमितिशाब्दबोधादिसाधारणो जातिविशेषः

तदभावव्याप्यवत्ताज्ञानप्रतिबन्ध्यतावच्छेदकत्वेन सिद्धः; तथा च साध्यतदभावोभयव्याप्यवत्ताज्ञानकाले कथं तत्प्रकारकसंशयानुमितिः ? परोक्षत्वाक्रान्तायास्तस्याः प्रतिबन्धकस्य तदभावव्याप्यवत्ताज्ञानस्य तदानीं सत्त्वादिति,

न च तादृशजातेरनुमितिसाधारण्ये मानाभाव इति वाच्यम् ? तस्यानुमित्यवृत्तित्वे बाधबुद्धिकालेऽनुमित्युत्पत्त्यापत्तेः तुल्ययुक्त्या बाधबुद्धिप्रतिबन्ध्यताऽवच्छेदकत्वस्यापि तत्रैवाङ्गीकारादित्यपि निरस्तम् ,

तथाऽप्युपदर्शितलाघवज्ञानसहकृतोपदर्शितपरामर्शस्थले संशयानुमितिप्रसङ्गात् साङ्कर्येण परोक्षत्वस्य जातित्वासम्भवाच्च; तथा हि भिन्नविषये स्वभावतोऽनुमितिसामग्र्या बलवत्त्वेनानुमित्साविशिष्टायास्तस्याः सुतरां बलवत्त्वं; तथा चानुमित्साविशिष्टायाः शाब्दबोधेच्छाविशिष्टसमानविषयकशाब्दबोधसामग्र्याभावघटितगुरुत्वानुमितिसामग्र्यां सत्यां घटपटादिप्रत्यक्षवारणायानुमित्यन्यगुरुत्वभिन्नविषयकज्ञानत्वं यदि तत्प्रतिबन्ध्यताऽवच्छेदकं तदाऽनुमित्यन्यत्वज्ञानत्वयोर्विशेष्यविशेषणभावविनिगमनाविरहात्प्रतिबन्ध्यप्रतिबन्धकभाववृद्ध्यापत्तेः; प्रतिबन्ध्यताऽवच्छेदकगौरवाच्चेति लाघवादनुमित्यन्यज्ञानवृत्तिजातिविशेषं स्वीकृत्य गुरुत्वभिन्नविषयकविजातीयत्वमेव गुरुत्वानुमित्साविशिष्टगुरुत्वानुमितिसामग्रीप्रतिबन्ध्यताऽवच्छेदकमुच्यते; तथा च तादृशजात्यभाववत्यामनुमितौ परोक्षत्वं परोक्षत्वाभाववति घटादिप्रत्यक्षे तादृशवैजात्यं सामानाधिकरण्यं च तयोः शाब्दबोधा-

दाविति तथाविधवैजात्यमादाय साङ्कर्यात् परोक्षत्वस्य जातित्वासम्भवेन दर्शितरीतिरसम्भवदुक्तिकैवेति प्रत्यक्षान्यतत्प्रकारकबुद्धित्वमेव तदभावव्याप्यवत्ताज्ञानप्रतिबन्ध्यताऽवच्छेदकं वाच्यं; तत्र तूपदर्शितरीत्या संशयानुमितौ न किञ्चिद् बाधकमीक्षामह इति वदन्ति,

अत्र चिन्तामणिकारमतानुयायिनः—यथा महानसीयवह्न्यादिप्रकारकानुमितिं प्रति महानसीयवह्न्याद्यभावव्याप्यवत्ताज्ञानं प्रतिबन्धकं तथा महानसीयवह्न्यादिप्रकारकानुमितिं प्रत्यभावस्य महानसीयवह्निप्रतियोगिकत्वे लाघवमिति लाघवज्ञानविशिष्टमभावव्याप्यवत्ताज्ञानमपि प्रतिबन्धकं कल्प्यते; अन्यथा महानसीयवह्न्यभावव्याप्यो यो लघुमहानसीयवह्निप्रतियोगिकत्वविशिष्टाभावकालीनपर्वतस्तद्वान् पर्वत इत्याकारकज्ञानस्य महानसीयवह्निविधेयकानुमितिं प्रति स्वातन्त्र्येण प्रतिबन्धकत्वकल्पनगौरवाद्; अस्मन्मते तदोपदर्शितलाघवज्ञानविशिष्टस्याभावव्याप्यवत्ताज्ञानस्यावश्यकतया तत्प्रतिबन्धकतयैव निर्वाहे तथाविधगुरुधर्मावच्छिन्नस्य तत्र प्रतिबन्धकत्वाकल्पनेन लाघवस्यातिस्पष्टत्वात् ,

एवं लघुमहानसीयवह्निप्रतियोगिकाभावकालीनो योभावव्याप्यवत्पर्वतस्तद्वान्महानसीयवह्न्यभाववानितितथाविधव्याप्यधर्मविशिष्टपर्वतत्वावच्छेदेनमहानसीयवह्न्यभावावगाहि यज्ज्ञानं तदुत्तरोत्पन्नलघुमहानसीयवह्निप्रकारकानुमितिं प्रति प्रतिबन्धकत्वे कल्पनीये तथाविधज्ञानाविशिष्टलघुमहानसीयवह्नि-

प्रतियोगिकाभावकालीनाभावव्याप्यवान्पर्वत इति ज्ञानत्वेनैव प्रतिबन्धकत्वं कल्पनीयं; वैशिष्ट्यं चात्र स्वाव्यवहितोत्तरत्वस्व-सामानाधिकरण्योभयसम्बन्धेन बोध्यम्,

एवं च तथाविधधर्मवैशिष्ट्यस्यात्र प्रतिबन्धकताऽवच्छेदक-कोटौ निवेशो गौरवं; तत्र तथाविधलाघवज्ञानविशिष्टाभावव्याप्यवत्ताज्ञानत्वेन प्रतिबन्धकत्वकल्पने तु तथाविधधर्मवैशिष्ट्यं प्रतिबन्धकताऽवच्छेदककोटौ न निवेशनीयमित्यपि लाघवम्,

एवं च कथं पूर्वोपदर्शितस्थले संशयानुमितिप्रसङ्गः? तत्प्रतिबन्धकस्योपदर्शितलाघवज्ञानविशिष्टाभावव्याप्यवत्ताज्ञानस्य तदानीं सत्त्वात्,

वस्तुतस्तु—तदनुमितौ तदभावव्याप्यवत्तानिश्चयस्योपदर्शितलाघवज्ञानाविशिष्टाभावव्याप्यवत्तानिश्चयस्य च स्वातन्त्र्येणातिरिक्ता प्रतिबन्धकताऽङ्गीक्रियते; तदङ्गीकारे तादृशनिश्चयकालीनाहार्यपरामर्शसिद्धिविपरीतनिश्चयभेदाः परामर्शनिष्ठकारणत्वासिद्ध्यादिनिष्ठप्रतिबन्धकताऽवच्छेदककोटौ न निवेश्यन्ते; तत्कालीनानुगतेच्छानां च सिद्ध्यादावुत्तेजकत्वं नोपपते, एवनुमितिं प्रतीच्छाविशिष्टायास्तादृशनिश्चयकालीनानुगताद्बाधकघटितस्मरणसामग्र्यास्तादृशनिश्चयघटितप्रत्यक्षादिसामग्र्याश्च प्रतिबन्धकत्वं न कल्प्यत इत्यादि बहुतरलाघवसम्भवादिति संशयानुमितिस्वीकारोऽसम्भवदुक्तिक एवेति प्राहुरिति कृतं पल्लवितेन।

असिद्धित्वं च साधारण्यभिन्नत्वे सति ज्ञानीयविषयतया परामर्शविरोधिताऽवच्छेदकत्वम्, आश्रयासिद्धिज्ञानस्य पक्षता-

ऽवच्छेदकावच्छिन्नपक्षग्रहविरोधितया स्वरूपासिद्धिज्ञानस्य हेतुमत्पक्षग्रहविरोधितया व्याप्यत्वासिद्धिज्ञानस्य व्याप्त्यादिग्रहविरोधितयाऽऽश्रयासिद्ध्यादौ लक्षणसमन्वयः,

साधारण्यज्ञानस्य परामर्शविरोधितया साधारण्येऽतिव्याप्तिवारणाय सत्यन्तनिवेशः, अवच्छेदकत्वमत्र न स्वरूपसम्बन्धविशेषः; काञ्चनमयः पर्वतो वह्निमान्धूमादित्यादौ काञ्चनमयत्वाभावविशिष्टपर्वतादिरूपाश्रयासिद्ध्यादावसम्भवापत्तेः पर्वतत्वादिरूपेण काञ्चनमयत्वाभावत्वादिरूपेण वस्त्वन्तरावगाहिज्ञानस्यापि काञ्चनमयत्वविशिष्टपर्वतादिविशेष्यकपरामर्शप्रतिबन्धकतया प्रतिबन्धकताऽवच्छेदककोटौ काञ्चनमयत्वाभावविशिष्टपर्वतादेरप्रवेशाद् अत एव नान्यूनवृत्तित्वमपि किन्त्वनतिरिक्तवृत्तित्वम्,

एवं च काञ्चनमयः पर्वतो वह्निमानित्यादौ काञ्चनमयत्वाभावविशिष्टपर्वतादेर्विषयतयेच्छासंस्कारादावपि सत्त्वात्काञ्चनमयत्वविशिष्टपर्वतादिविशेष्यकपरामर्शप्रतिबन्धकताऽनतिरिक्तवृत्तित्वविरहेणासम्भवापत्तिरतो ज्ञानीयाविषयतयेति, ज्ञानं चागृहीताप्रामाण्यकनिश्चयरूपं नातस्तद्दोषतादवस्थ्यम्,

अथैवमप्यसम्भवः काञ्चनमयत्वाभावविशिष्टपर्वतादेः केवलपर्वताद्यनतिरिक्ततया पर्वतइत्यादिकेवलपर्वतादिविषयकनिश्चयेऽपि विषयतया सत्त्वेन निश्चयीयाविषयतासम्बन्धेनाप्यनतिरिक्तवृत्तित्वविरहात्,

न च निश्चयीयविलक्षणविषयतासम्बन्धेनानतिरिक्तवृत्तित्व-

विरहेऽपि काञ्चनमयत्वाभाववत्पर्वतात्वादिविशिष्टपर्वतादिनिरूपितनिश्चयीयविलक्षणविषयतासम्बन्धेनानतिरिक्तवृत्तित्वमस्त्येवेति वाच्यम् ?

तथा सति तादृशविलक्षणविषयतासम्बन्धेन केवलपर्वतादेरप्यनतिरिक्तवृत्तितया तत्रातिव्याप्त्यापत्तेरिति चेद् ?

न—अगृहीताप्रामाण्यकनिश्चयीययादृशविशिष्टनिरूपितविषयतासामान्यं परामर्शप्रतिबन्धकताऽनतिरिक्तवृत्ति तादृशविशिष्टमसिद्धिरिति विवक्षणाद्; भवति च काञ्चनमयत्वाभाववत्पर्वतत्वविशिष्टपर्वतादिनिरूपिततादृशनिश्चयीयविषयतासामान्यमेव परामर्शप्रतिबन्धकताऽनतिरिक्तवृत्तीत्यदोषः, सामान्यपदोपादानाच्च केवलपर्वतादिनिरासः,

न च यादृशविशिष्टनिरूपितविषयतासामान्यविवक्षणे स्वरूपसम्बन्धरूपमवच्छेदकत्वमेव घटकमस्तु किमनतिरिक्तवृत्तित्वरूपावच्छेदकत्वविवक्षणेन काञ्चनमयत्वाभाववत्पर्वतत्वविशिष्टपर्वतादिनिरूपितविषयतासामान्यस्यैव काञ्चनमयत्वाभावत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतात्वेन तादृशप्रतिबन्धकताऽवच्छेदकतया केवलपर्वतत्वादिविशिष्टनिरूपितविषयतासामान्यस्य च तादृशप्रतिबन्धकताऽनवच्छेदकतया चादोषादिति वाच्यम् ?

काञ्चनमयत्वाभाववान्पर्वतो रूपवानित्यादिनिश्चयनिष्ठस्य काञ्चनमयत्वाभाववत्पर्वतत्वविशिष्टपर्वतादिनिरूपितरूपादिनिष्ठप्रकारत्वस्यापि सामान्यान्तर्गतस्य स्वरूपसम्बन्धरूपप्रतिब-

न्धकताऽवच्छेदकत्वविरहेणासम्भवापत्तेः,

अथ तथाऽपि घटो द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाव्यभिचरितसामानाधिकरण्याभावविशिष्टसत्त्वादिरूपव्याप्यत्वासिद्धावव्याप्तिः विशिष्टस्यानतिरिक्ततया तस्य द्रव्यव्यभिचरितत्वात्वविशिष्टसत्ताऽऽत्मकसाधारण्यभिन्नत्वाभावादिति चेद् ?

न—साधारण्यत्वावच्छिन्नविषयताभिन्नं तादृशनिश्चयीययादृशविशिष्टनिरूपितविषयतासामान्यं परामर्शप्रतिबन्धकताऽनतिरिक्तवृत्ति तादृशविशिष्टरूपत्वमसिद्धित्वमित्यत्र तात्पर्यात् ,

वस्तुतस्तु—हेत्वाभाससामान्यलक्षणवत्त्वव्यापकतत्त्कत्वमेवानतिरिक्तवृत्तित्वम् , अन्यथा तादृशविषयतासामान्येऽनतिरिक्तवृत्तित्वस्यानतिरिक्तवृत्तित्वे तादृशविषयतात्वव्यापकत्वरूपवत्तया व्यापकत्वान्तरप्रवेशे गौरवाद् , अन्यत्तद्वदेव बोध्यम् ,

न चैवमपि वह्निव्यभिचारिमेयत्ववान् पर्वतो वह्निमान्मेयत्वादित्यादौ वह्निव्यभिचारिमेयत्वादिरूपाश्रयासिद्धावव्याप्तिः; तदीयविषयतायाः साधारण्यत्वावच्छिन्नविषयताभिन्नत्वाभावादिति वाच्यम् !

तत्र तादृशमेयत्वादेः साधारण्यान्तर्भावेणासिद्ध्यनन्तर्गततयाऽलक्ष्यत्वेनादोषात् ,

नन्वत्रासाधारण्येऽनुपसंहारित्वे चातिव्याप्तिः; असाधारण्यज्ञानस्यान्वयव्याप्त्यवगाहिपरामर्शेऽनुपसंहारित्वज्ञानस्य च व्यतिरेकव्याप्त्यवगाहिपरामर्शे प्रतिबन्धकत्वादिति चेद् ?

न—लाघवेन साध्यात्यन्ताभाववदवृत्तित्वरूपव्याप्तिज्ञानस्यै-

वानुमितिहेतुतया तादृशान्वयव्याप्त्यवगाहिपरामर्शप्रतिबन्धकताया एवात्र लक्षणे निवेशात्,

न चैवं व्यतिरेकव्याप्त्यभावादिरूपव्याप्यत्वासिद्धावव्याप्तिरिति वाच्यम्?

तस्यानुपसंहारित्वमध्य एवान्तर्भावात्,

न च तथाऽप्यत्यन्ताभावाप्रतियोगिसाध्यरूपानुपसंहारित्वेऽतिव्याप्तिर्दुर्वारा तज्ज्ञानस्योपदर्शितपरामर्शप्रतिबन्धकत्वादिति वाच्यम्?

प्रतियोगितासम्बन्धेन साध्यीयवदवृत्तित्वज्ञानस्यैवानुमितिहेतुतया तादृशव्याप्त्यवगाहिपरामर्शप्रतिबन्धकत्वस्यैवात्र निवेशेन तादृशपरामर्शस्य प्रतियोगितासम्बन्धेन साध्यांशे निर्धर्मिताऽवच्छेदकतया निरुक्तानुपसंहारित्वज्ञानाप्रतिबन्ध्यत्वात्,

न चैवं साधारण्यभिन्नत्वनिवेशो व्यर्थः साध्याभाववद्वृत्तित्वरूपसाधारण्यज्ञानस्य भिन्नविषयकतया तादृशपरामर्शाप्रतिबन्धकत्वादिति वाच्यम्?

लाघवेन प्रतियोगितासम्बन्धेन साध्यीयवद्वृत्तित्वस्यैव साधारण्यरूपतया तज्ज्ञानस्य तादृशपरामर्शप्रतिबन्धकतया साधारण्येऽतिव्याप्तिसम्भवेन साधारण्यभिन्नत्वनिवेशस्यावश्यकत्वात्,

अथ व्याप्त्यभावप्रयुक्तव्याप्तिविशिष्टपक्षधर्मत्वाभावरूपव्याप्यत्वासिद्धिज्ञानस्य व्याप्तिविशिष्टपक्षधर्मताऽवगाहिपरामर्शप्रतिबन्धकतया तादृशव्याप्यत्वासिद्धौ लक्षणगमनसम्भवेऽपि पक्षधर्मताविशिष्टव्याप्त्यभावरूपव्याप्यत्वासिद्धावव्याप्तिः; वि-

शिष्टाभावस्यातिरिक्ततया तज्ज्ञानस्य विशिष्टज्ञान एव प्रतिबन्धकतया तादृशविशिष्टानवगाहिपरामर्शाप्रतिबन्धकत्वादिति चेद् ?

न-तस्य व्याप्यत्वासिद्धित्वानङ्गीकारेणालक्ष्यत्वात्,

न चैवं तस्य हेत्वाभासान्तरत्वे हेत्वाभासाधिक्यापत्तिरिति वाच्यम् ?

तज्ज्ञानस्य साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारकसमूहालम्बनानुमितिप्रतिबन्धकत्वाभावेन तस्य तादृशप्रतिबन्धकत्वघटितहेत्वाभासलक्षणानाक्रान्तत्वेन हेत्वाभासत्वस्यैव तत्रासम्भवादिति सङ्क्षेपः,

सा चासिद्धिस्त्रिधा—आश्रयासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्धिभेदाद्, आश्रयासिद्धित्वं च पक्षताऽवच्छेदकाभाववत्पक्षत्वम्, अस्ति चेदं काञ्चनमयः पर्वतो वह्निमान्धूमादित्यादौ काञ्चनमयत्वाभाववत्पर्वतादिरूपाश्रयासिद्धौ, स्वरूपासिद्धित्वं च हेतुताऽवच्छेदकावच्छिन्नाभाववत्पक्षकत्वम् अस्ति चेदं पर्वतो वह्निमान्महानसत्वादित्यादौ महानसत्वाभाववत्पर्वतादिरूपस्वरूपासिद्धौ, व्याप्यत्वासिद्धित्वं च तदुभयभिन्नासिद्धित्वम् अस्ति चेदं व्याप्त्यभावादिरूपव्याप्यत्वासिद्धौ,

न च व्याप्त्यभावस्यैव व्याप्यत्वासिद्धितया व्याप्त्यभावत्वमेव व्याप्यत्वासिद्धित्वमास्तां कृतं गुरुणोक्तलक्षणेनेति वाच्यम् ?

साध्यताऽवच्छेदकाभाववत्साध्यरूपसाध्याप्रसिद्धेः साधनताऽवच्छेदकाभाववत्साधनरूपसाधनाप्रसिद्धेश्च व्याप्यत्वासि-

द्धित्वेन सङ्ग्राह्यतयोक्तलक्षणं विनाऽनिर्वाहात्,

अत्र केचित् साध्याप्रसिद्ध्यादिवद् हेतुताऽवच्छेदकस्य व्याप्यताऽवच्छेदकत्वाभावोऽपि व्याप्यत्वासिद्धिः; अत एव वह्निमान् नीलधूमादित्यादौ व्यर्थविशेषणतास्थलेऽपि व्याप्यत्वासिद्धिरेव दोषः; अन्यथा तस्यादुष्टत्वे व्यर्थविशेषणतोद्भावने वादिनो निग्रहानुपपत्तेरिति वदन्ति,

तदसद्—नीलधूमत्वादेरपि व्याप्यताऽवच्छेदकत्वाङ्गीकारे बाधकाभावात्,

न च स्वसमानाधिकरणलघुव्याप्यताऽवच्छेदकान्तराघटितधर्मस्यैव व्याप्यताऽवच्छेदकत्वमिति नियम एव तदङ्गीकारे बाधक इति वाच्यम्?

तादृशनियमे मानाभावाद्, वाच्यं प्रमेयादित्यादौ प्रमेयत्वस्य व्याप्यताऽवच्छेदकत्वाभावापत्तेश्च; तस्य मेयत्वरूपतादृशधर्मान्तरघटितत्वात्,

न च नीलधूमत्वादेर्व्याप्यताऽवच्छेदकत्वाङ्गीकारे परार्थानुमानस्थले व्यर्थविशेषणानुद्भावनेन वादिनो निग्रहानुपपत्तिरिति वाच्यम्?

अधिकोक्त्यैव वादिनो निग्रहसम्भवादित्यधिकमन्यत्र मत्कृतौ द्रष्टव्यमिति दिक्,

अत्र केचिद्—आश्रयासिद्ध्यादेःपक्षताऽवच्छेदकादिबाधरूपतया न पृथग्दोषत्वं बाधनिर्णयस्य तत्तद्वत्ताबुद्धिं प्रति तदभाववत्तानिर्णयत्वेन प्रतिबन्धकतायाः क्लृप्ततयाऽऽश्रयासिद्ध्यादि-

ज्ञानस्य पक्षताऽवच्छेदकादिविशिष्टबुद्धौ स्वातन्त्र्येण प्रतिबन्धकत्वे मानाभावेन तेषां स्वतन्त्रदोषत्वाभावादित्याहुः,

तदसत्—पक्षताऽवच्छेदकादिबाधनिर्णयस्य पक्षताऽवच्छेदकाद्यंशे निर्धर्मिताऽवच्छेदकज्ञानाप्रतिबन्धकत्वेन काञ्चनमयोवह्निमानित्यादावाश्रयासिद्ध्यादिज्ञानस्य काञ्चनमयत्वाद्यंशे निर्धर्मिताऽवच्छेदकज्ञानं प्रति स्वातन्त्र्येण प्रतिबन्धकत्वस्यावश्यकतयाऽऽश्रयासिद्ध्यादिज्ञानादेः स्वतन्त्रदोषताया आवश्यकत्वादिति सङ्क्षेपः।

बाधत्वं च साध्याभाववत्पक्षत्वं; ह्रदो वह्निमान्धूमादित्यादौ वह्न्यभाववद्ह्रदादौ साध्याभाववत्पक्षत्वसत्त्वाल्लक्षणसमन्वयः,

न च कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाभाववदेतद्वृक्षेऽतिव्याप्तिस्तस्यापि साध्याभाववत्पक्षत्वाक्रान्तत्वादिति वाच्यम्?

निरवच्छिन्नसाध्याभाववत्त्वस्य विवक्षणाद्, वृक्षनिष्ठकपिसंयोगाभाववत्त्वस्य मूलाद्यवच्छिन्नत्वेनातिव्याप्त्यभावात्,

न चैवमपि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादावाकाशाभाववदात्मादावतिव्याप्तितादवस्थ्यम्; आत्मादेर्निरवच्छिन्नाकाशाभाववत्त्वादिति वाच्यम्?

साध्यताऽवच्छेदकसम्बन्धेन साध्यताऽवच्छेदकावच्छिन्नसाध्यतावत्ताग्रहविरोधितानियामकसम्बन्धेन साध्याभाववत्त्वस्य विवक्षणाद्, उपदर्शितस्थले च तादृशेन कालिकसम्बन्धेनाकाशाभाववत्त्वस्यात्मन्यभावात्,

न चैवं निरवच्छिन्नसाध्याभाववत्त्वस्य विवक्षणमफलं कपिसंयोग्येतद्वृक्षत्वादित्यादौ तादृशेन निरवच्छिन्नविशेषणतासम्बन्धेन कपिसंयोगाभाववत्त्वस्यैतद्वृक्षेऽसत्त्वेनैवातिप्रसङ्गाभावादिति वाच्यम् ?

कपिसंयोगतदभावयोर्विरुद्धत्वभ्रमदशायां केवलविशेषणतया कपिसंयोगाभाववत्ताग्रहस्यापि कपिसंयोगवत्ताग्रहप्रतिबन्धकतया केवलविशेषणतासम्बन्धस्यापि तादृशत्वेनातिप्रसङ्गतादवस्थ्यवारणाय तादृशसम्बन्धेन साध्याभाववत्त्वविवक्षणेऽपि निरवच्छिन्नत्वविवक्षणस्यावश्यकत्वात्,

नन्वत्र दोषान्तरासङ्कीर्णबाधोदाहरणासम्भवेन बाधस्य पृथग् दोषत्वमनुपपन्नं; ह्रदो वह्निमान्धूमादित्यादौ स्वरूपासिद्धेः ह्रदो वह्निमान्द्रव्यत्वादित्यादौ च व्यभिचारस्य सत्त्वात्,

यत्तु—धूमादिना द्रव्यत्वादिना वा ह्रदादौ वन्ह्यादिसाधने बाधो हेतुदोषः; प्रथमे स्वरूपासिद्धेर्द्वितीये च व्यभिचारस्य सत्त्वेऽपि तदज्ञानदशायां बाधज्ञानेनानुमितिप्रतिबन्धात्तस्यापि पृथग्दोषतासम्भव इति,

तदसत्—पक्षे साध्याभावस्य बाधतया तज्ज्ञानदशायां पक्षे हेतोरज्ञाने पक्षधर्मताज्ञानरूपकारणविरहादेवानुमितेरभावात्; पक्षधर्मताधीसत्त्वे च व्यभिचारज्ञानस्यैव सत्त्वात् साध्याभाववत्तया ज्ञायमाने धर्मिणि हेतुमत्ताज्ञानस्यैव व्यभिचारज्ञानत्वादिति चेद् ?

न-व्यभिचारज्ञानस्य व्याप्तिज्ञानविघटनेनैवानुमितिविरोधितया व्याप्यवत्तापरामर्शोत्तरं बाधज्ञाने सत्यनुमित्यनुत्पादस्य

तन्मात्रप्रयोज्यतया बाधस्य हेत्वाभासताया आवश्यकत्वात् ,

अत्र केचित्—सामान्यमुखव्याप्त्या यत्र पक्षधर्मताबलेन विशेषसिद्धिस्तत्पक्षे साध्यविशेषसाधकहेतुविशेषे तत्साध्यव्याप्तिज्ञानविघटकत्वेन व्यभिचारज्ञानस्यानुमितिप्रतिबन्धकता न सम्भवति तद्धेतौ तत्साध्यव्याप्तिज्ञानस्यानुपयोगाद्; अतः साक्षादेव व्यभिचारज्ञानस्यानुमितिप्रतिबन्धकतयोपदर्शितयुक्त्या न बाधस्य पृथग्दोषतासम्भवः; तथा हि ह्रदो वह्निमान् वह्निमत्त्वेन चैत्रकथितत्वाद् यो यद्वत्त्वेन चैत्रकथितः स तद्वान् यथा घटवत्त्वेन तत्कथितं गृहं घटवदित्यत्र; घटादिमत्त्वेन चैत्रकथितत्वे घटादिसहचारग्रहेण तत्र तद्व्याप्तिग्रहादिव वह्निघटितहेतावगृहीतवह्निसहचारस्य तद्व्याप्तिग्रहमन्तरेणैव ह्रदादौ वह्निघटितहेतुना वह्निः सिद्ध्यति; यदा च तादृशहेतुमति देशान्तरे वन्ह्यभावो गृहीतस्तदा न तत्सिद्धिरित्यत्र व्यभिचार एव प्रयोजकः; न तु व्याप्तिधीविघटनद्वाराऽन्यहेतावन्यसाध्यव्यभिचारग्रहस्यान्यहेतौ साध्यान्तरव्याप्तिग्रहाविरोधित्वात् ,

न च तत्साधने तत्साध्यव्याप्तिग्रहाभावव्याप्तिविशिष्टपक्षधर्मताज्ञानघटितानुमितिसामग्र्यभावादनुमितिरेव तत्र दुर्लभेति वाच्यम् ?

तत्राव्याप्तिविशिष्टपक्षधर्मताज्ञानाघटितस्य तत्साधनाविशेष्यकतत्साध्यव्यभिचारज्ञानाभावसमुदायघटितसामग्र्यन्तरस्यैवानुमित्युत्पादकत्वोपगमादित्याहुः ,

तत्तुच्छम्—व्याप्तिविशिष्टपक्षधर्मताज्ञानाघटिताया अनुमिति-

सामग्र्या असिद्धेरुक्तसामग्रीतोऽनुमितेरसम्भवेन सामान्यमुखव्याप्त्या पक्षधर्मताबलेन विशेषसिद्धेरनङ्गीकाराद; अत एव दीधितिकारैरपि यत्तदर्थाननुगमेन सामान्यमुखव्याप्त्या विशेषानुमानं दूषितमिति,

एवं स्वनिष्ठगन्धप्रागभावकालावच्छिन्नघटादौ पृथिवीत्वादिना गन्धादिसाधने वह्न्याद्यनवच्छेदकशिखरादिदेशावच्छिन्नपर्वतादौ धूमादिना वन्ह्यादिसाधने च न व्यभिचारः, निरवच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारत्वाद् न वाऽसिद्धिः पक्षे हेतुसत्त्वात् शिखराद्यवच्छिन्ने धूमाद्यभावसत्त्वेऽपि तदवच्छिन्ने धूमाभावज्ञानस्य तत्सामानाधिकरण्यमात्रेण धूमादिमत्ताग्रहाविरोधितया तादृशाभावज्ञानस्य प्रकृतानुमित्यौपायिकपक्षधर्मताज्ञानसामान्यविरोधित्वादतस्तत्र तत्पक्षताऽवच्छेदकावच्छिन्ने साध्याभावरूपो बाध एव दोष इति न दोषान्तरासङ्कीर्णबाधोदाहरणासम्भवेन बाधस्य पृथग्दोषत्वानुपपत्तिः,

अथ पक्षताऽवच्छेदकसामानाधिकरण्यमात्रं साध्यांशे सर्वत्रानुमितौ भासते न तु पक्षताऽवच्छेदकावच्छिन्नत्वमपि मानाभावाद् बाधाभावमात्रेणानुमितौ विषयभानेऽतिप्रसङ्गात्,

न च यद्भानमनुभवसिद्धं तद्भासकतामात्रं बाधाभावस्य कल्प्यत इति नातिप्रसङ्ग इति वाच्यम्?

अनुमितावबच्छेद्यावच्छेदकभावानुभवेऽपि विवादादिति चेद्?

न–अनुभवसन्देहे लाघवस्यैव निर्णायकतया प्रकृते लाघवेनानुमितावबच्छेद्यावच्छेकाभावभानोपगमात्, तथा हि गन्ध-

प्रागभावकालावच्छिन्नो घटो गन्धव्याप्यपृथिवीत्ववानित्याकारकपरामर्शाद्गन्धप्रागभावकालावच्छेदेनानुमितिं स्वीकृत्य तत्र तादृशपरामर्शस्य च हेतुत्वकल्पने गन्धप्रागभावकालावच्छिन्नो घटो गन्धव्याप्यवद्गन्धव्याप्यपृथिवीत्ववद्गन्धप्रागभावकालावच्छिन्नघटकालीनपृथिवीत्वं तद्वानित्याकारकस्यावच्छेदकावच्छेदेन प्रथमगन्धव्याप्यत्वावगाहिनस्तादृशपृथिवीत्वलिङ्गकपरामर्शस्यावच्छेदकावच्छेदेनानुमितौ हेतुत्वान्तरं न कल्प्यते; तदानीं प्रथमपरामर्शस्य तत्र सत्त्वेन तेनैव तादृशानुमित्युत्पत्तिनिर्वाहाद्; अन्यथोपदर्शितस्थलेऽवच्छेदकावच्छेदेनानुमितेः सर्वसिद्धतया तदनुरोधेन द्वितीयपरामर्शस्य गुरुरूपेण हेतुत्वान्तरकल्पने गौरवापत्तेः,

न च तादृशपरामर्शस्यापत्तावापाद्यव्यतिरेकनिर्णयमुद्रया हेतुत्वस्य क्लृप्ततया मयाऽपि न हेतुत्वान्तरं कल्प्यत इति वाच्यम्?

आपत्त्यनुमित्युभयसाधारणैकधर्माभावेन क्लृप्तेन निर्वाहासम्भवात्,

न च स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामानाधिकरण्योभयसम्बन्धेन तादृशपरामर्शवैशिष्ट्यं तत्र कार्यताऽवच्छेदककोटाववश्यं निवेश्यमन्यथा यावद्व्यतिरेकनिर्णयानां तत्त्वेन व्यभिचारापत्तेः, एवं चापत्तित्वानिवेशो प्रयोजनाभावेन तद्धेतुतयैवानुमितौ निर्वाहः सम्भवतीति वाच्यम्?

लघुभूतैकापाद्यव्यतिरेकनिर्णयस्यैव हेतुतयोक्तरीतेरसम्भवाद्,

एवं वह्निव्याप्यधूमवान् पर्वत इति परामर्शेन महानसीयवह्नीतरवन्ह्यभाववान्पर्वत इतीतरबाधसहकृतेन पर्वतो महानसीयवह्निमानित्यनुमित्युत्पत्त्या तत्र व्यभिचारासिद्ध्योरभावेन महानसीयवह्निबाधस्य दोषान्तरासङ्कीर्णस्य पृथग्दोषत्वमावश्यकम्,

अथेतरबाधसहकृतस्य सामान्यरूपेण व्यापकताऽवगाहिपरामर्शस्य विशेषरूपेण साध्यप्रकारकानुमितिजनकत्वे मानाभावोऽनुभवस्य सन्दिग्धत्वादिति चेद् ?

नैवम्—तादृशपरामर्शस्य विशेषधर्मप्रकारकानुमितिजनकत्वे वह्निव्याप्यमहानसीयेतरवन्ह्यभावोभयत्वावच्छिन्नलिङ्गकमहानसीयवह्नित्वाद्यवच्छिन्ननिरूपितव्याप्त्यवगाहिपरामर्शस्य महानसीयेतरवह्नित्वावच्छिन्नविधेयताकानुमितौ स्वातन्त्र्येण हेतुत्वान्तरं न कल्प्यते तादृशपरामर्शदशायामितरबाधघटितसामग्रीत एव तादृशानुमित्युपपत्तेरिति लाघवम् ,

एवं च तादृशानुमितिसामग्र्यास्तथाऽनुमित्युत्पादकत्वसिद्धावुपदर्शितरीत्या बाधस्य पृथग्दोषताया निष्प्रत्यूहत्वात् , शेषमुक्तरीत्या बोध्यम् , अधिकं भद्रानन्दीयव्याख्यायां प्रपञ्चितमस्माभिरिति नेह प्रस्तूयत इत्यलं पल्लवितेन ।

प्रसङ्गादत्र विचार्यते—भूतलत्वावच्छिन्नविशेष्यताकघटविशिष्टबुद्धौ भूतलत्वावच्छिन्नविशेष्यताकघटाभावनिश्चयत्वेनेत्यादिक्रमेण बाधविशिष्टबुद्ध्योः प्रतिबन्ध्यप्रतिबन्धकभावो बोध्यः,

एवं वैपरीत्येन भूतलत्वावच्छिन्नविशेष्यताकघटाभावविशिष्टबुद्धौ भूतलत्वावच्छिन्नविशेष्यताकघटनिश्चयत्वेनेत्यादिक्रमेणापि,

अथात्र घटनिश्चयत्वं दुर्वचम्,

न च घटाभावाप्रकारकत्वे सति घटप्रकारकज्ञानत्वं तदिति वाच्यम् ?

तथा सति भूतलं घटवत् तद्घटाभाववद् घटपटोभयाभाववदिति ज्ञानस्याप्रतिबन्धकत्वापत्तेः,

न च घटत्वावच्छिन्नाभावाप्रकारकत्वे सति घटत्वावच्छिन्नप्रकारकज्ञानत्वं तदिति वाच्यम् ?

घटत्वे प्रतियोगिताऽवच्छेदकतापर्याप्त्यनिवेशे भूतलं घटवद् नीलघटाभाववद् इत्यादिज्ञानस्याप्रतिबन्धकत्वापत्तेः, तन्निवेशे भूतलं नीलघटवन्न वेत्यादिसंशयस्यापि प्रतिबन्धकत्वापत्तेः तस्य नीलघटत्वावच्छिन्नाभावप्रकारकत्वेऽपि शुद्धघटत्वावच्छिन्नाभावाप्रकारकत्वात्,

न च शुद्धघटत्वावच्छिन्नाभावाप्रकारकत्वे सति शुद्धघटत्वावच्छिन्नप्रकारताकज्ञानत्वं तद् ; उक्तसंशये सत्यन्तसत्त्वेऽपि शुद्धघटत्वावच्छिन्नप्रकारताकत्वाभावान्न तस्य प्रतिबन्धकत्वापत्तिरिति वाच्यम् ?

तथा सति भूतलं नीलघटवदित्यादिज्ञानस्य प्रतिबन्धकत्वानुपपत्तेः,

न च तस्य नीलघटत्वावच्छिन्नाभावाप्रकारकत्वे सति नीलघटत्वावच्छिन्नप्रकारताकज्ञानत्वादिना स्वातन्त्र्येण प्रतिबन्धकत्वं कल्पनीयमिति वाच्यम् ?

तथा सति घटत्वघटिततत्तन्नानाधर्मावच्छिन्नप्रकारताक-

ज्ञानानां नानाविधस्वतन्त्रप्रतिबन्धकताकल्पने महागौरवापत्ते- रिति चेद् ?

न—अगत्या नानाप्रतिबन्धकत्वस्यावश्यकतया तादृशगौर- वस्याप्रामाणिकत्वेनादोषात् ,

केचित्तु—भूतलं नीलघटवदित्यादिज्ञाने शुद्धघटत्वावच्छिन्न- प्रकारताया अभ्युपगमेनैकयैव दर्शितप्रतिबन्धकतया निर्वाहेण तस्य स्वातन्त्र्येण प्रतिबन्धकत्वं नास्तीति नोक्तगौरवावकाशः,

न च घटत्वघटितधर्मावच्छिन्नप्रकारताकज्ञानमात्र एव शुद्ध- घटत्वावच्छिन्नप्रकारतास्वीकारे भूतलं नीलघटवन्न वेत्यादिसं- शयस्यापि प्रतिबन्धकत्वापत्तिरिति वाच्यम् ?

तादृशनिश्चयमात्र एव शुद्धघटत्वावच्छिन्नप्रकारतायाः स्वी- कारादित्याहुः,

तदसद्—भूतलं नीलघटवदिति ज्ञाने शुद्धघटत्वावच्छिन्नप्र- कताया अनुभवविरुद्धत्वात् ,

किञ्च यत्र भिन्नविषयकानुमितिसामग्र्यादिरूपप्रतिबन्ध- कसमवधानदशायां नीलघटत्वावच्छिन्नप्रकारताशालिज्ञानं जाय- तामितीच्छाऽस्ति ; तत्र जायमानस्य भूतलं नीलघटवदितिज्ञा- नस्य शुद्धघटत्वावच्छिन्नप्रकारताशालिज्ञानत्वं न सम्भवति तादृशप्रकारताशालिं ज्ञानं जायतामितीच्छाविरहविशिष्टभिन्नवि- षयकानुमितिसामग्र्यादिरूपप्रतिबन्धकस्य सत्त्वात् ,

न च शुद्धघटत्वावच्छिन्नप्रकारताशालि ज्ञानं जायतामि- तीच्छाया इव नीलघटत्वावच्छिन्नप्रकारताशालि ज्ञानं जायता-

मितीच्छाया अप्युत्तेजकत्वोपगमान्न दोष इति वाच्यम् ?

तादृशेच्छानां परस्परविशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्धकतावृद्धिप्रसङ्गात् तादृशप्रतिबन्धकसमवधाने नीलघटत्वावच्छिन्नप्रकारताशालि ज्ञानं जायतामितीच्छाकाले नीलत्वभासकसामग्र्यसत्त्वे भूतलं घटवदित्याकारकस्य शुद्धघटत्वावच्छिन्नप्रकारताशालिनो ज्ञानस्योत्पादापत्तेश्च,

न चेष्टापत्तिः; तादृशज्ञानोत्पादेऽप्युपदर्शितेच्छाविषयसिद्ध्यभावेनेष्टापत्तेरसम्भवात् ,

अथ सामग्रीप्रतिबन्धकतायामिच्छाया उत्तेजकत्वं नोपेयते-इच्छाऽधीनप्रत्यक्षे व्यभिचारवारणाय सामग्रीविशिष्टान्यत्वमेव सामग्र्यभावजन्यताऽवच्छेदकं स्वीक्रियते; इच्छाशून्यकाले कार्योपत्तिवारणाय तत्तदिच्छाविशिष्टं प्रति तत्तदिच्छात्वेन हेतुत्वमुपेयते,

न चैवमपि नीलघटत्वावच्छिन्नप्रकारताशालि ज्ञानं जायतामिच्छाकाले नीलत्वभासकसामग्र्यसत्त्वे शुद्धघटत्वावच्छिन्नप्रकारताकज्ञानापत्तिर्दुर्वारैवेति वाच्यम् ?

तादृशेच्छाजन्यज्ञाने द्विविधविषयतानैयत्येन तादृशसामग्र्यसत्त्वे व्यापकधर्मावच्छिन्नसामाग्र्यभावादेवोक्तापत्त्यसम्भवादिति चेद् ?

न–तथाऽप्यप्रामाण्यज्ञानोत्तेजकत्वानुरोधेन बाधनिर्णयस्य पृथक् प्रतिबन्धकत्वस्यावश्यकत्वाद् ; अन्यथा शुद्धघटत्वावच्छिन्नाभाववति शुद्धघटत्वावच्छिन्नप्रकारकं नीलघटत्वावच्छिन्नाभाववति नीलघटत्वावच्छिन्नप्रकारकमित्याद्यप्रामाण्यज्ञानानामेकत्रो-

त्तेजकत्व एकविधप्रकारताकनिश्चयसत्त्वेऽन्यविधप्रकारताघटिता-प्रामाण्यज्ञानसत्त्वे विशिष्टबुद्ध्यापत्तेर्दुर्वारताऽऽपत्तेः,

एवमन्यत्राप्यूह्यम्,

अथ समुच्चयोत्तरं संशयापत्तिः समुच्चयस्य तदभावाप्रकारकत्वरूपनिश्चयत्वाभावात्,

न चाव्याप्यवृत्तित्वज्ञानासत्त्वे समुच्चयासम्भवः; तत्सत्त्वे च तस्यैव प्रतिबन्धकत्वान्न संशयापत्तिरिति वाच्यम्?

विनश्यदवस्थाव्याप्यवृत्तित्वज्ञानजन्यसमुच्चयोत्तरं संशयापत्तेरिति चेद्?

अत्र केचिद्—विरोधसम्बन्धावच्छिन्नघटत्वावच्छिन्नाभावनिष्ठप्रकारतानिरूपिता या भूतलत्वावच्छिन्नविशेष्यता तच्छून्यत्वे सति घटत्वावच्छिन्नप्रकारतानिरूपिता भूतलत्वावच्छिन्नविशेष्यता तच्छालित्वरूपनिश्चयत्वं समुच्चयेऽप्यस्ति; संशयसमुच्चययोर्वैलक्षण्याय संशये विरोधो भासते न तु समुच्चय इत्युपगमादित्याहुः,

तदसत्—सर्वत्र संशये विरोधभाने मानाभावेन विरोधानवगाहिसंशयस्य प्रतिबन्धकत्वापत्तेः; तादृशसंशयस्य समुच्चयवैलक्षण्यानुपपत्तिश्च,

न च सर्वत्रैव संशये विरोधो भासते क्वचिद्विरोधभानं तु सामग्रीसमाजाधीनमिति दीधितिग्रन्थस्य क्वचिदित्यस्य संशय-इत्येवार्थो न तु क्वचित्संशय इति वाच्यम्?

तथा सति संशय इत्यस्यैव वक्तुमुचितत्वेन क्वचिदित्य-

स्यैव वैयर्थ्यप्रसङ्गेन क्वचित्संशय इत्यस्यैव दीधितिग्रन्थार्थत्वात्; यत्र भावकोटावेव विरोधो भातस्तादृशसंशयस्य विरोधित्वापत्तेर्दुर्वारत्वाच्च,

न च संशये कोटिद्वय एव विरोधः संसर्गतया भासत इति वाच्यम्?

तथाऽपि यत्र समुच्चयेऽपि विरोधो भातस्तादृशसमुच्चयस्याप्रतिबन्धकत्वापत्तेः,

न च समुच्चये विरोधो न भासत एवेति वाच्यम्?

तथाऽपि विरोधसम्बन्धेन घटाभावोभयनिश्चयस्य प्रतिबन्धकत्वानुपपत्तेः,

न च तस्य संशयरूपतया न निश्चयत्वमिति वाच्यम्?

साधारणधर्मवत्ताज्ञानादिरूपसंशयकारणाभावे निश्चयत्वसम्भवात्,

अपरे तु संशयसमुच्चयवैलक्षण्याय संशय उभयप्रकारतानिरूपितविशेष्यताया ऐक्यं; समुच्चये तु द्वित्वं; तथा च घटाभावनिष्ठप्रकारतयाऽनिरूपिता सती या घटनिष्ठप्रकारतानिरूपिता विशेष्यता तच्छालिज्ञानत्वमेव निश्चयत्वमिति संशयवारणं समुच्चयसङ्ग्रहः,

न च वैपरीत्ये बाधकाभावस्तावताऽपि संशयसमुच्चयवैलक्षण्यसम्भवादिति वाच्यम्?

उक्तरीत्या प्रतिबन्धकताऽवच्छेदकानिवेशनस्यैव विनिगमकत्वात्,

न च प्रत्येकज्ञानीयप्रत्येकप्रकारताद्वयनिरूपितविशेष्यताद्वयस्य क्लृप्ततया संशयेऽक्लृप्तविषयताऽन्तरकल्पने गौरवमिति वाच्यम् ?

संशये क्लृप्तविशेष्यताद्वयस्यैव प्रत्येकमनुभवबलेनोभयप्रकारतानिरूपितत्वाङ्गीकारेणाक्लृप्तविषयताकल्पने मानाभावाद् ; विषयताया ज्ञानस्वरूपतायां प्रत्येकज्ञानात्मकक्लृप्तविषयताऽऽत्मकत्वस्य संशयात्मकतदीयविषयतायामसम्भवाच्च ; उभयप्रकारतानिरूपितैकविशेष्यताया गौरवभयादनङ्गीकार एकत्र द्वयमितिन्यायसिद्धविषयताया विलयप्रसङ्गाच्च,

अथोक्तरूपेण प्रतिबन्धकत्वे भूतलं घटवद् भूतले घटाभाव इति संशयात्मकज्ञानस्य प्रतिबन्धकत्वापत्तिः ; तत्र भूतलत्वावच्छिन्नविशेष्यताया घटाभावनिष्ठप्रकारत्वानिरूपितत्वात् ,

न चोक्तज्ञानस्य न संशयत्वम् एकधर्मिकोभयप्रकारकज्ञानस्यैव संशयत्वादिति वाच्यम् ?

तत्तदभावोभयनिश्चयस्यैकत्रैकदाऽसम्भवेन तस्य निश्चयत्वासम्भवेनागत्या संशयत्वोपगमादिति चेद् ?

न-तदभावनिष्ठविषयतयाऽनिरूपिता सती या तन्निष्ठविषयतानिरूपिता विशेष्यता तच्छालिज्ञानत्वरूपानिश्चयत्वस्यैव प्रतिबन्धकताऽवच्छेदककोटौ निवेशाद् , भूतलं घटवद् भूतले घटाभाव इति ज्ञानेऽपि भूतलनिष्ठविषयताया एकत्वेनादोषात् ,

न च तत्र घटनिष्ठप्रकारतानिरूपितभूतलविशेष्यतायाघटाभावनिष्ठविशेष्यतानिरूपितभूतलप्रकारतायाश्च कथमैक्य-

मिति वाच्यम् ?

एकस्या एव भूतलनिष्ठविषयतायाः किञ्चिदंशे विशेष्यतात्वस्य किञ्चिदंशे प्रकारतात्वस्योपगमेन प्रकारतात्वविशिष्टा सती सा विषयता घटाभावनिष्ठविशेष्यतानिरूपिता विशेष्यतात्वविशिष्टा सती घटनिष्ठप्रकारतानिरूपितेत्यदोषात्,

अथ तथाऽपि भूतलं घटवत् सुन्दरभूतलं घटाभाववदिति ज्ञाने या शुद्धभूतलत्वावच्छिन्नविशेष्यता सा घटनिष्ठप्रकारतानिरूपिता सुन्दरभूतलत्वावच्छिन्ना या विशेष्यता सा घटाभावनिष्ठप्रकारतानिरूपितेति तादृशज्ञानस्य प्रतिबन्धकत्वापत्तिर्दुर्वारेति चेद् ?

न—तादृशज्ञानेऽप्येकैव भूतलविशेष्यता परन्तु तस्या एव विशेष्यताया अवच्छेदकताद्वयी ; एका शुद्धभूतलत्वेऽन्या च सुन्दरभूतलत्व इति शुद्धभूतलत्वावच्छिन्ना सती घटनिष्ठप्रकारतानिरूपिता सुन्दरभूतलत्वावच्छिन्ना सती घटाभावप्रकारतानिरूपितेत्यदोषात्,

न चोक्तज्ञानानां संशयत्व एकधर्मिताऽवच्छेदकविशिष्टे तत्तदभावोभयप्रकारकज्ञानस्यैव संशयत्वमिति प्रवादविरोध इति वाच्यम् ?

एकधर्मिणि तत्तदभावोभयवैशिष्ट्यावगाहिज्ञानस्यैव संशयत्वं न तु तत्तदभावोभयप्रकारताऽपि नियतेति दीधितिकृता कण्ठरवेणैवोक्ततया तादृशप्रवादस्याश्रद्धेयत्वादित्याहुः,

अन्ये तु निश्चयत्वं जातिविशेष एव प्रतिबन्धकताऽवच्छेदकः,

न चैवं भूतलं घटवत् चत्वरं घटवन्न वेतिसमूहालम्बनज्ञाने यदि निश्चयत्वं नास्ति तदा भूतले घटाभावविशिष्टबुद्ध्यापत्तिः; यदि निश्चयत्वमस्ति तदा चत्वरे घटसंशयप्रतिबन्धकत्वापत्तिरिति वाच्यम् ?

तस्याऽव्याप्यवृत्तित्वात्,

यद्वा ज्ञाने निश्चयत्वं व्याप्यवृत्त्येव निश्चयत्वावच्छिन्नाधिकरणताया अव्याप्यवृत्तित्वेन वृत्तित्वेन निश्चयत्वविशिष्टज्ञाने क्वचिद्वर्तते क्वचिन्नेत्युपगमान्न दोषः,

न चेयं रीतिः क्वापि न दृष्टेति वाच्यम् ?

सुरभि चन्दनमित्यादौ साक्षात्कारत्वस्य सर्वांश एव सत्त्वेऽपि साक्षात्कारत्वविशिष्टाधिकरणता चन्दन एव वर्तते न तु सौरभ इत्यस्य दृष्टत्वात्,

न च चाक्षुषत्वादिना सङ्करात्कथं निश्चयत्वस्य जातित्वमिति वाच्यम् ?

तस्य चाक्षुषत्वादिव्यापकत्वात्,

न चैवं ज्ञानत्वेन तुल्यव्यक्तिकतया कथं जातित्वमिति वाच्यम् ?

तस्या जातित्वबाधकत्वे प्रमाणाभावस्यैव बीजतया प्रकृते च जानामिनिश्चिनोमीत्याकारकप्रतीतिसत्त्वेन तुल्यव्यक्तिकजातिद्वयोपगमे बाधकाभावादित्याहुः,

इदं तु विशेष्यताऽवच्छेदकतासम्बन्धेन विशेष्यतासम्बन्धेन वा प्रतिबन्धकतामत एव तेन सम्बन्धेन वृत्तितायामेव तादृश-

विशिष्टाधिकरणतासम्भवान्न तु समवायेन प्रतिबन्धकतामत इति ध्येयम् ,

आहार्यज्ञानस्याप्रतिबन्धकतयाऽनाहार्यत्वं प्रतिबन्धकताऽवच्छेदककोटौ निवेशनीयम् ,

यत्तु—आहार्यज्ञानकाले संशयसामग्रीसत्त्वेन तस्य संशयात्मकतया निश्चयत्वाभावादेव वारणमिति तन्न घटाभावोऽवृत्तिरित्यवृत्तित्वग्रहकालीनाहार्यज्ञाने घटाभावभानासम्भवेन निश्चयत्वसम्भवात् ,

अत्र केचिद्—आहार्यज्ञानस्याप्रतिबन्ध्यत्वेऽपि प्रतिबन्धकत्वमस्त्येव ; अन्यथाऽऽहार्यज्ञानात्मकतर्कस्य व्यभिचारज्ञानादिप्रतिबन्धकत्वानुपपत्तेः ; तथा चानाहार्यत्वं प्रतिबन्धकतायां न निवेशनीयमित्याहुः,

तदसत्—तस्य व्यभिचारज्ञानादिनिष्ठव्याप्तिज्ञानादिप्रतिबन्धकतायामुत्तेजकत्वेन व्यभिचारज्ञानादिप्रतिबन्धकत्वाभावात् ,

किञ्च तर्कस्य मणिमन्त्रादिन्यायेन प्रतिबन्धकतया तत्रानाहार्यत्वानिवेशेऽपि ग्राह्याभावावगाहितया बाधप्रतिबन्धकतायां तन्निवेशनमावश्यकम् ; अन्यथा शरीरादिगोचराहं न गौर इत्याद्याहार्यज्ञानसत्त्वेऽप्यहं गौर इत्यादितद्गोचरप्रत्यक्षस्यानुभवसिद्धस्यानुपपत्तेः,

न चाहार्यत्वस्यानुगतस्य दुर्वचतया कथमनाहार्यत्वेन प्रतिबन्धकत्वमिति वाच्यम् ?

अनुगताहार्यत्वस्य च दुर्वचत्वेऽप्यगत्या तत्तद्व्यक्तित्वा-

वच्छिन्नप्रतियोगिताकाहार्यव्यक्तिभेदकूटरूपानाहार्यत्वस्याप्रतिबन्धकतायां निवेशाद्,

अथैकसम्बन्धेन घटाभाववत्ताज्ञानकाले सम्बन्धान्तरेण घटवत्ताज्ञानानुदयप्रसङ्गः ; तदानीं बाधरूपप्रतिबन्धकसत्त्वात्,

न च संयोगेन घटवत्ताबुद्धौ संयोगसम्बन्धेन घटाभाववत्ताज्ञानं प्रतिबन्धकमित्यादिक्रमेण सम्बन्धविशेषनियन्त्रितप्रतिबन्धकताया उपगमान्न दोष इति वाच्यम् ?

एवमपि संयोगसामान्येन घटाभाववत्ताज्ञानकाले सुन्दरसंयोगेन घटवत्ताज्ञानस्यैव संयुक्तसंयोगादिपरम्परासम्बन्धेन घटवत्ताज्ञानस्याप्यनुदयप्रसङ्गस्य दुर्वारत्वादिति चेद् ?

न–भूतलत्वावच्छिन्नविशेष्यतानिरूपितसंयोगनिष्ठसांसर्गिकविषयतानिरूपितघटप्रकारताशालिबुद्धौ भूतलत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसामान्यसम्बन्धावच्छिन्नप्रतियोगिताकघटाभाववत्तानिश्चयत्वेन प्रतिबन्धकतोपगमेनादोषाद्; उक्तपरम्परासम्बन्धस्थले प्रथमसंयोगीयविषयताया भूतलविशेष्यतानिरूपितत्वाभावेन चरमसंयोगीयविषयतायाश्च घटप्रकारतानिरूपकत्वाभावेन सुन्दरत्वविशिष्टसंयोगादिसम्बन्धस्थले च सुन्दरत्वादेः सम्बन्धताऽवच्छेदकतया संयोगादौ भूतलविशेष्यतानिरूपितत्वघटप्रकारतानिरूपकत्वसत्त्वेन च वैषम्येणादोषात्,

एतेन संयोगपर्याप्तसांसर्गिकविषयताकत्वं प्रतिबन्ध्यताऽवच्छेदकं परम्परासम्बन्धस्थले तद्घटकपदार्थकूट एव सांसर्गिकविषयता पर्याप्ता न तु संयोगे ; सुन्दरसंयोगादिसम्बन्ध-

स्थले च संयोग एव सांसर्गिकविषयता पर्याप्तेति वैषम्यान्नोक्त-दोष इति परास्तम् ,

उक्तरीत्यैव दोषवारणे प्रतिबन्ध्यतायां पर्याप्तिनिवेशे परम्परासम्बन्धघटकपदार्थकूटे सांसर्गिकविषयतापर्याप्तिस्वीकारे च मानाभावात् ,

प्राचीनानुयायिनस्तु—संयोगादिना घटादिप्रकारकभूतलादिविशेष्यकज्ञाने घटादौ संयोगादिप्रतियोगित्वं भूतलादौ तदनुयोगित्वं च भासते,

इत्थं च घटादिप्रतियोगिकत्वेन भूतलाद्यनुयोगिकत्वेन च या संयोगादिविषयता सैव संयोगादिना भूतलादौ घटाद्यभावनिश्चयप्रतिबन्ध्यताऽवच्छेदिका संयुक्तसंयोगादिपरम्परासम्बन्धस्थले च प्रथमसंयोगे भूतलानुयोगिकत्वाभानात् चरमसंयोगे च घटप्रतियोगिकत्वाभानान्न दोषः,

न च विशिष्टबुद्धौ सम्बन्धसम्बन्धभाने मानाभावः समूहालम्बनविशिष्टबुद्ध्योर्वैलक्षण्यस्य विषयतावैलक्षण्यादेवोपपत्तेरिति वाच्यम् ?

भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वरूपप्रकारत्वाविशेष्यत्वानुपपत्तेरेव तत्र मानत्वात् ,

भासमानत्वस्य प्रयोगित्वानुयोगित्वयोर्विशेषणत्वात् ,

न च भासमानत्वस्य वैशिष्ट्यांश एव विशेषणत्वोपगमान्नोक्तरीत्या विशिष्टबुद्धौ सम्बन्धसम्बन्धभानसिद्धिरिति वाच्यम् ?

तथा सति समवायस्यैकत्वेनायं घट इत्यादिज्ञाने घटत्वादे-

रिव पटत्वादेरपि प्रकारत्वापत्तेर्घटादेरिव पटादेरपि विशेष्यत्वापत्तेश्च दुरुद्धरत्वादित्याहुः,

अथ भूतलं घटाभाववदित्यादिबाधनिश्चयकाले भूतलं घटवदित्यादिप्रत्यक्षं जायतामितीच्छासत्त्वे भूतलं घटवदित्याद्याहार्यप्रत्यक्षोदयात्तत्र व्यभिचार इति चेदू ?

अत्र केचिदू-अनाहार्यत्वस्य प्रतिबन्ध्यताऽवच्छेदककोटौ निवेशादाहार्यप्रत्यक्षे न व्यभिचारः,

न चैवमिच्छासत्त्व इव तदसत्त्वेऽपि बाधकाल आहार्यप्रत्यक्षापत्तिरिति वाच्यम् ?

तत्तदाहार्यप्रत्यक्षे तत्तदिच्छाया हेतुत्वोपगमेनेच्छाशून्यकाले तादृशकारणविरहेणोक्तापत्त्यभावादिति वदन्ति,

वस्तुतस्तु-आहार्यप्रत्यक्षे व्यभिचारवारणायेच्छाया बाधप्रतिबन्धकताऽवच्छेदककोटावुत्तेजकत्वमेव कल्प्यते न त्वनाहार्यत्वस्य प्रतिबन्ध्यताऽवच्छेदककोटौ निवेशः; तथा सत्यप्रामाण्यज्ञानादीनां हेतुतामुपेत्याप्रामाण्यज्ञानविशिष्टान्यत्वादेः प्रतिबन्ध्यताऽवच्छेदककोटौ निवेशनीयतया तेन सहानाहार्यत्वस्य विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्धकताऽऽधिक्यप्रसङ्गात् ,

न चेच्छाया उत्तेजकत्वेऽपि तुल्ययुक्त्या प्रामाण्यज्ञानादीनामुत्तेजकत्वापत्त्या तदभावेन सह विशेष्यविशेषणभावविनिगमनाविरहेण प्रतिबन्धकताऽऽधिक्यं तुल्यमिति वाच्यम् ?

तथाऽप्यनाहार्यत्वस्य प्रतिबन्ध्यताऽवच्छेदकत्वे दोषविशेषाजन्यत्वलौकिकसंनिकर्षाजन्यत्वाभ्यां सह विशेष्यविशेषणभावे

विनिगमनाविरहेण प्रतिबन्धकताऽऽधिक्यस्य दुर्वारत्वात् ,

न चेच्छाया उत्तेजकत्वे दोषविशेषादीनामप्युत्तेजकतया तदभावेन सह विशेष्यविशेषणभावे विनिगमनाविरहेण तौल्यमिति वाच्यम् ?

वक्ष्यमाणरीत्या दोषविशेषाजन्यत्वादेः प्रतिबन्ध्यताऽवच्छेदककोटावेव प्रवेशात् ,

किञ्चानाहार्यत्वस्य प्रतिबन्ध्यताऽवच्छेदकत्वे तस्यानुगतस्य दुर्वचतया तत्तदिच्छाजन्यभेदकूटरूपतया तादृशभेदकूटस्य परस्परमप्रामाण्यज्ञानाविशिष्टान्यत्वादिना च समं विशेष्यविशेषणभावविनिगमनाविरहेण प्रतिबन्धकताऽऽधिक्येन गौरवम् ,

न चेच्छाया उत्तेजकत्वेऽप्यनाहार्यत्वस्य प्रतिबन्धकताऽवच्छेदककोटिनिविष्टस्य तत्तद्व्यक्तित्वावच्छिन्नभेदकूटरूपतया तेन सहेच्छाऽभावस्य विशेष्यविशेषणभावविनिगमनाविरहेण गौरवमिति वाच्यम् ?

आहार्यबाधबुद्धावप्रामाण्यग्रहोत्तरमेव विशिष्टबुद्ध्युत्पादोपगमेनानाहार्यत्वस्य प्रतिबन्धकताऽवच्छेदककोटावप्रवेशाद् ,

एवमनाहार्यत्वस्य प्रतिबन्ध्यताऽवच्छेदकत्वेन तत्तदिच्छानामाहार्यप्रत्यक्षहेतुत्वस्य कल्पने तत्तादिच्छाजन्यत्वावच्छिन्नभेदस्य प्रतिबन्ध्यताऽवच्छेदके निवेशो चातिगौरवम् ,

एवं बाधनिश्चयशून्यकाले सत्यामिच्छायां बाधनिश्चयाभावरूपकारणबलात्तादृशेच्छाजन्यभिन्नज्ञानवारणाय तादृशज्ञाने तत्तादिच्छायाः प्रतिबन्धकत्वमुपेत्य तदभावानां हेतुत्व-

कल्पने महागौरवम् ,

यदि च बाधजन्यत्वे सतीच्छाजन्यं यत्तद्भिन्नत्वरूपमनाहार्यत्वं प्रतिबन्ध्यताऽवच्छेदकमुपेयते,

एवं च बाधनिश्चयशून्यकाल इच्छासत्त्वे बाधनिश्चयाभावरूपकारणबलात्तादृशकार्यताऽवच्छेदकावच्छिन्नापत्ताविष्टापत्त्या नेच्छाऽभावानामुक्तरीत्या हेतुत्वाधिक्यमित्युच्यते ; तथाऽपि प्रतिबन्ध्यताऽवच्छेदककोटौ सत्यन्तस्य निवेशाधिक्यप्रयुक्तगौरवं-दुर्वारमेव,

अथेच्छाया उत्तेजकत्वेऽपि तस्याश्चाक्षुषेच्छात्वादिनैवोत्तेजकत्वमुपेत्य चाक्षुषत्वादिकं जन्यताऽवच्छेदकं वाच्यं प्रत्यक्षेच्छात्वेनोत्तेजकत्वे भिन्नरूपेणैकत्रोत्तेजकत्वे वा सत्यां चाक्षुषेच्छायां-चाक्षुषसामग्र्यामसत्यां सत्यां च स्पार्शनसामग्र्यां स्पार्शनापत्तेः,

इत्थं च चाक्षुषादिभेदेन कारणताबाहुल्यापत्तिरिच्छाया उत्तेजकत्वोपगमे दुर्वारेति चेद् ?

न-स्ववृत्तिप्रत्यक्षसजातीयविषयकत्वसम्बन्धेन कृतिविशिष्टेच्छात्वेनानुगमय्यैकधैवोत्तेजकत्वस्वीकारात् ; स्ववृत्तित्वं च कालिकसम्बन्धेन ; उक्तस्थले चाक्षुषेच्छायाश्च नोक्तसम्बन्धेन कृतिविशिष्टत्वं तादृशेच्छाविषयचाक्षुषस्य तत्कालीनकृतिवृत्तित्वाभावात् तदानीं चाक्षुषानुत्पादात् ; कालान्तरीयस्य च न कालिकसम्बन्धेन तत्कालीनकृतिवृत्तित्वं ; विभिन्नकालीनयोराधाराधेयभावविरहादित्युक्तदोषानवकाशः,

अस्तु वा चाक्षुषत्वादिकमेव जन्यताऽवच्छेदकं तथाऽप्युत्ते-

जकतामते षट्कारणतामात्रकल्पनं हेतुतामते च पूर्वोपदर्शित-रीत्या महागौरवं स्फुटमेव,

एतेनाहार्यप्रत्यक्षे व्यभिचारवारणाय जन्यतासम्बन्धेन बाध-निश्चयविशिष्टान्यत्वं बाधनिश्चयप्रतिबन्ध्यतावच्छेदककोटौ निवे-श्यते; इच्छाशून्यकाले बाधनिश्चयविशिष्टापत्तिवारणाय तत्तदि-च्छाविशिष्टं प्रति तत्तदिच्छाया हेतुत्वमुपेयत इत्यपि निरस्तम्,

इच्छाया उत्तेजकत्वकल्पापेक्षयैतन्मतेऽप्युपदर्शितरीत्या गौ-रवस्य स्फुटत्वात्,

इदं तु बोध्यम्—इच्छाया हेतुत्वमुत्तेजकत्वं वा प्रत्यक्षस्थल-एव न तु परोक्षस्थले तत्र बाधनिश्चये सति परोक्षज्ञानेच्छायां-सत्यामपि परोक्षज्ञानस्यानुभवविरुद्धत्वात् परोक्षज्ञानमनाहार्य-मिति सिद्धान्ताच्च,

केचित्तु-परोक्षज्ञानमप्याहार्यमुपेयते मुखं चन्द्र इत्यादौ रूपकादिस्थले मुखं न चन्द्र इत्यादिबाधनिश्चये सत्यपि शाब्दे-च्छावशात् शाब्दबोधस्योदयादित्याहुः,

अन्ये तु कविकाव्यस्थल एवाहार्यं परोक्षज्ञानं जायते न तु तद्भिन्नस्थले; सति बाधनिश्चये सत्यामपि शाब्देच्छायां तत्र शाब्दानुदयात्,

न च कविकाव्यस्थल इव तद्भिन्नस्थलेऽपि सति बाधनि-श्चये सत्यां शाब्देच्छायां शाब्दबोधः कुतो न जायत इच्छावि-रहविशिष्टबाधनिश्चयाभावस्याविशिष्टत्वादिति वाच्यम्?

चमत्कारसामग्रीविशिष्टाया एव शाब्देच्छाया उत्तेजकत्वा-

दू; अत एव कविकाव्यस्थल एव सहृदयानामेव तादृशो-बोधो न तु तद्भिन्नस्थले तत्स्थलेऽप्यसहृदयानामित्याहुः,

अपरे तु मुखं चन्द्र इत्यादौ रूपकादिस्थलेऽप्यनाहार्य एव शाब्दबोधः सर्वत्र परोक्षज्ञानमनाहार्यमेव,

न च तत्र बाधनिश्चयस्य प्रतिबन्धकस्य सत्त्वात् कथं-शाब्दबोध इति वाच्यम् ?

तत्र मुखतादात्म्येन बाधनिश्चये चन्द्रतादात्म्येन शाब्दबोध; चन्द्रतादात्म्येन बाधनिश्चये मुखतादात्म्येन शाब्दबोधः, उभयतादात्म्येन बाधनिश्चये न जायत एव शाब्दबोध इति वदन्तीति दिक्,

एवं बाधनिश्चये सति दोषविशेषे लौकिकसंनिकर्षे वा विशिष्टबुद्धेरुदयेन बाधप्रतिबन्ध्यताऽवच्छेदकोटौ दोषविशेषा-जन्यत्वं लौकिकसंनिकर्षाजन्यत्वं च निवेशनीयम्,

अथेच्छाऽप्रामाण्यज्ञानादीनामिव दोषविशेषाणां लौकिक-संनिकर्षाणां चोत्तेजकत्वमेव कुतो नाङ्गीक्रियत इति चेद् ?

न–तथा सतीच्छाऽभावादीनां दोषविशेषाभावादीनां चैकत्र निवेशप्रसङ्गेन तेषां परस्परं विशेष्यविशेषणभावे विनिगमनावि-रहप्रयुक्तप्रतिबन्धकताऽऽधिक्येन गौरवापत्तेः,

न चेच्छाऽऽदीनामुत्तेजत्वमुपेत्य दोषविशेषाजन्यत्वं लौकि-कसंनिकर्षाजन्यत्वं प्रतिबन्ध्यताऽवच्छेदककोटौ निवेश्यते; उक्त-दोषविशेषादीनामुत्तेजकत्वमुपेत्येच्छाजन्यभिन्नत्वादीनां प्रतिब-न्ध्यताऽवच्छेदकत्वमुपेयत इत्यत्र विनिगमनाविरह इति वाच्यम् ?

इच्छाऽऽदीनां तत्तदिच्छाजन्यबुद्धावतिरिक्तहेतुताकल्पनप्रयुक्तगौरवस्यैव विनिगमकत्वाद् दोषविशेषजन्यज्ञाने लौकिकसंनिकर्षजन्यज्ञाने च दोषविशेषलौकिकसंनिकर्षस्य हेतुत्वस्य चोभयवादिसिद्धत्वेन तत्प्रयुक्तगौरवस्याविनिगमकत्वात्,

किञ्च दोषविशेषादीनामुत्तेजकत्व आत्मवृत्तिबाधनिश्चये विषयेन्द्रियनिष्ठदोषाभावस्य विषयवृत्तिलौकिकसंनिकर्षाभावस्य सर्वदा सत्त्वेन सति बाधनिश्चये दोषविशेषादिदशायामपि विशिष्टबुद्ध्यनुदयापत्तिः; विषयनिष्ठप्रत्यासत्त्या प्रतिबन्धकत्वोगमेऽपीन्द्रियनिष्ठदोषाभावमादायोक्तदोषानिवृत्तिः,

एवमेकपुरुषीयलौकिकसंनिकर्षसत्त्वे पुरुषान्तरीयाविशिष्टबुद्ध्यापत्तिवारणाय लौकिकसंनिकर्षादौ तत्तत्पुरुषीयत्वनिवेशेन पुरुषभेदेन प्रतिबन्धकताभेदापत्तिः,

न च विषयेन्द्रियादिनिष्ठस्यापि दोषविशेषादेः स्वाश्रयविषयसम्बद्धेन्द्रियसंयुक्तमनःप्रतियोगिकविजातीयसंयोगादिरूपपरम्परासम्बन्धावच्छिन्नप्रतियोगिताकदोषविशेषाद्यभावस्य सामाधिकरण्यसम्बन्धेनात्मवृत्तिबाधनिश्चये निवेशान्नोक्तदोष इति वाच्यम्?

तस्य सम्बन्धत्वे मानाभावात् तन्निवेशप्रयुक्तगौरवापाताच्च,

इदमत्रावधेयम्—दोषविशेषाजन्यत्वस्य लौकिकसंनिकर्षाजन्यत्वस्य प्रतिबन्ध्यताऽवच्छेदककोटौ न पृथङ् निवेशः किन्तु साक्षात्करोमीत्यनुभवसिद्धलौकिकविषयताया दोषविशेषजन्यज्ञाने लौकिकसंनिकर्षजन्यज्ञाने च सत्त्वेन लौकिकविषयताका-

न्यत्वस्यैव निवेशात्तावतैवोभयजन्यज्ञाने व्यभिचारवारणसम्भवः,

अथैवमपि बाधनिश्चयाभावे सति च दोषविशेषे लौकिक-संनिकर्षे वा बाधनिश्चयाभावरूपकारणबलाल् लौकिकविषयता-कान्यविशिष्टबुद्ध्यापत्तिवारणाय तादृशविशिष्टबुद्धौ दोषविशेषादेः प्रतिबन्धकत्वमुपेत्य तदभावस्य हेतुत्वं कल्पनीयमित्येतन्मतेऽपि गौरवं दुर्वारमिति चेद् ?

न—लौकिकविषयताकान्यत्वं परित्यज्य लौकिकविषयताऽ-तिरिक्तलौकिकालौकिकविषयताशालिविशिष्टबुद्ध्युत्पादेन तादृ-शहेतुत्वान्तरस्याकल्पनात्,

न चैवं सति बाधनिश्चये सति च दोषविशेषादौ तादृशवि-षयताशालिविशिष्टबुद्ध्युत्पादेन व्यभिचारो दुर्वार इति वाच्यम् ?

तादृशलौकिकालौकिकविषयताया अन्यत्रानुभवासिद्धतया बाधाभावजन्यताऽवच्छेदकतयैव तस्याः सिद्ध्या सति बाधनिश्चये तादृशविषयताशालिज्ञानानुदयात्,

न च कार्यताऽवच्छेदकतयैव नातिरिक्तविषयतासिद्धिः क्वापि दृष्टेति वाच्यम् ?

विशेषणताऽवच्छेदकप्रकारकानिर्णयादिजन्यताऽवच्छेदकत-या विशिष्टवैशिष्ट्यविषयतासिद्धेर्दृष्टत्वात्,

यदि तादृशविषयतासिद्धिर्न कार्यताऽवच्छेदकतया किन्तु र-क्तदण्डवत्त्वेन पुरुषं जानामीत्याद्यनुभवबलादेवेत्युच्यते तथाऽपि न क्षतिः, क्लृप्ताया अलौकिकविषयताया एव लौकिकविषयताऽ-तिरिक्तत्वेन प्रतिबन्ध्यताऽवच्छेदकत्वोपगमाद् बाधनिश्चयशून्य-

कालीनं दोषविशेषादिजन्यज्ञानं विषयताद्वयशाल्येव ; बाधकालीनन्तु लौकिकविषयताशाल्येव ; अलौकिकविषयताया बाधाभावनियम्यत्वात् ,

अथ वा साक्षात्करोमीत्यनुभवबलादतिरिक्तालौकिकविषयता नोपेयते तस्या लौकिकसंनिकर्षादिजन्यताऽवच्छेदकतयैव सिद्धेः किन्तु तत्तद्विषयतावृत्तिलौकिकविषयतात्वं नाम कश्चिदतिरिक्तो धर्मस्तदनुगमकतयोपेयते ; तद्धर्मावच्छिन्नप्रतियोगिताकभेदेन भेदवद्विषयतैव बाधाभावजन्यताऽवच्छेदककोटौ निवेश्यते; उक्तस्थले च तादृशभेदवद्विषयताकं प्रत्यक्षं जायत एव बाधाभावकालीनदोषविशेषाजन्यज्ञाने तादृशधर्मावच्छिन्नविषयतायास्तदतिरिक्तालौकिकविषयतायाश्चोपगमात् ; तदानीं विषयताद्वयशालिज्ञानसामग्रीसत्त्वाद्बाधकालीनदोषविशेषादिजन्यज्ञाने च तादृशविषयतैवास्ति न तु तदतिरिक्तालौकिकविषयत्वमपि तस्य बाधाभावनियम्यत्वादिति न तत्र व्यभिचारः,

इदं त्ववधेयम्—एष प्रकारो न सार्वत्रिकः ; धर्मिताऽवच्छेदकभेदेन बाधप्रतिबन्धकताया भेदात् किन्तु यद्धर्मावच्छिन्नविशेष्यताकं दोषविशेषजन्यमेव ज्ञानं जायते तद्धर्मान्तर्भावेण प्रतिबन्धकतायां दोषविशेषजन्यताऽवच्छेदकलौकिकविषयतावच्छेद एव निवेश्यः, यद्धर्मावच्छिन्नविशेष्यताकं लौकिकसंनिकर्षजन्यमेव ज्ञानं जायते तद्धर्मान्तर्भावेण प्रतिबन्धकतायां लौकिकसंनिकर्षजन्यताऽवच्छेदकलौकिकविषयतावच्छेद एव निवेशनीयः ; परन्तु यत्र प्राकरक्तघटवृत्तीदंत्वं धर्मिताऽवच्छेदकीकृत्यामतादृशायां—

लौकिकसंनिकर्षजन्यं रक्ततादशायां च दोषविशेषजन्यं श्याम-वत्ताप्रत्यक्षं तत्र तद्धर्मान्तर्भावेण प्रतिबध्यप्रतिबन्धकभावे तत्त-द्विषयताद्वयाप्रतियोगिताकभेदद्वयनिवेशे गौरवापत्तिरिति तत्रैव तादृशविषयताद्वयनिष्ठलौकिकविषयतात्वनामकधर्मस्योक्तप्रतीति-सिद्धस्यानुगमकत्वमङ्गीक्रियते तादृशविषयताद्वयभेदनिवेशापेक्ष-योक्तधर्मावच्छिन्नप्रतियोगिताकस्यैकस्यैव भेदस्य निवेशे लाघ-वादिति दिक्,

केचित्तु-प्रत्यक्षे बाधनिश्चयस्य प्रतिबन्धकत्वं नोपेयते मानाभावात्,

न चानुमित्सा ऽऽदावपि तस्य प्रतिबन्धकत्वं न स्यादिति वाच्यम्?

बाधकालेऽनुमित्यादिवारणायैव तत्र तस्य प्रतिबन्धकत्व-कल्पनात्,

न च तर्हि बाधकाले प्रत्यक्षवारणाय तत्रापि तस्य प्रतिबन्ध-कत्वमावश्यकमिति वाच्यम्?

पर्वतोद्देश्यकवन्ह्यनुमितित्वस्य परामर्शादिकार्यताऽवच्छेदक-तया पर्वतविशेष्यकवह्निविशिष्टशाब्दबुद्धित्वादेस्तादृशयोग्यता-ज्ञानकार्यताऽवच्छेदकतया बाधकाले तदापादकसत्त्वेन तत्तद्धर्मा-वच्छिन्नापत्तिवारणाय तदावश्यकत्वेऽपि पर्वतो वन्हिमानित्यादि-प्रत्यक्षत्वस्य कस्यापि कार्यताऽनवच्छेदकतया तदवच्छिन्नस्या-पादकाभावात्,

अथ तादृशानुमितित्वादेराकस्मिकतावारणाय कार्यताऽव-

च्छेदकत्ववत्तादृशप्रत्यक्षत्वमपि कस्य चित्कार्यताऽवच्छेदकम-वश्यं-वाच्यम्,

वस्तुतस्तु पर्वतो वन्हिमानिति प्रत्यक्षं जायतामित्याद्याकारकेच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्यभावस्यैव तत्कार्यताऽवच्छेदकामिति तदवच्छिन्नापत्तिवारणार्थं तत्रापि वाधनिश्चयस्य प्रतिबन्धकत्वमावश्यकमिति चेद् ?

न—वाधनिश्चयकाले प्रकारान्तरेणैव प्रत्यक्षवारणसम्भवात्,

तथा हि घटोऽनित्य इति ज्ञानानन्तरमनित्यघटमहं जानामीत्यादिरेवानुव्यवसायो जायते न त्वनित्यज्ञानवानित्यादिः,

एवं घटघटत्वादिनिर्विकल्पकोत्तरघटादावेव घटत्वादिप्रत्यक्षं जायते न तु घटत्वादौ घटादेः प्रत्यक्षमिति विशेषणज्ञानस्य तत्तद्व्यक्तित्वेन तत्तद्विशिष्टप्रत्यक्षे हेतुत्वमवश्यमुपेयम्,

एवं च वाधनिश्चयकालीनविशेषणज्ञानस्य तत्तद्व्यक्तित्वेन तत्र हेतुत्वं नोपेयत इति वाधनिश्चयकाले क्लृप्तहेतुताकतत्तद्व्यक्तिरूपकारणविरहादेकवाधकाले विशिष्टप्रत्यक्षवारणसम्भवेन तत्र तस्य प्रतिबन्धकत्वे मानाभाव इत्याहुः,

अन्ये तु स्मरणं प्रत्यपि वाधानिश्चयस्य प्रतिबन्धकत्वे मानाभावः,

न च वाधनिश्चयकाले स्मरणवारणाय तदावश्यकमिति वाच्यम् ?

विरोधिज्ञानजन्यसंस्कारस्य विरोधिज्ञाननाश्यतया भूतलंघटवदित्यादिनिश्चयजन्यसंस्कारस्य भूतलं घटाभाववदित्यादि-

निश्चयनाश्यत्वेन भूतलं घटाभाववदित्यादिबाधनिश्चयकाले संस्काराभावादेवास्मरणसम्भवात्,

न च संस्कारनाशकाले स्मरणापत्तिः पूर्वक्षणे संस्कारसत्त्वादिति वाच्यम् ?

संस्कारस्य कार्यसहभावेन हेतुत्वात्,

न चैवं गौरवमिति वाच्यम् ?

बाधनिश्चयस्य स्मरणं प्रति प्रतिबन्धकत्वाकल्पनेन लाघवाद्; अत एव स्मरणेऽनुभवत्वेन हेतुत्वे सकृदनुभूतस्थले स्मरणोत्तरमस्मरणप्रसङ्गादिति दीधितिग्रन्थोऽपि सङ्गच्छते ; अन्यथा स्मरणोत्तरं संस्कारनाशकाले स्मरणसम्भवेन तदसङ्गतेः,

न च यत्र संस्कारनाशकाले भिन्नविषयकानुमित्यादिसामग्रीरूपस्मरणप्रतिबन्धकसमवधानं तत्स्थलपरतया तादृशग्रन्थोपपत्तिरिति वाच्यम् ?

यथाश्रुतेनैवोपपत्तौ तावद्दूरानुधावनवैफल्यादित्याहुः,

यत्तु—अनुमितावपि बाधनिश्चयस्य प्रतिबन्धकत्वं नास्ति मानाभावात्,

न चैवं बाधनिश्चयकालेऽनुमित्यापत्तिरिति वाच्यम् ?

पक्षधर्मताज्ञानविरहादेव तदापत्त्यभावात्,

न च यत्र परामर्शानन्तरं बाधनिश्चयस्तत्र पक्षधर्मताज्ञानसत्त्वादापत्तिरस्त्येवेति वाच्यम् ?

परामर्शस्य विशेषदर्शनतया तत्सत्त्वे बाधनिश्चयस्यैवासम्भवात्,

न च विनश्यदवस्थाप्रामाण्यज्ञानास्कन्दितपरामर्शानन्तरं-बाधनिश्चयेऽनुमित्यापत्तिर्दुर्वारा ;

यद्वा यत्र बाधनिश्चयानन्तरं परामर्शस्तत्रानुमित्यापत्तिरस्त्ये-वेति वाच्यम् ?

तदानीं व्यभिचारज्ञानसत्त्वादेवानुमित्यापत्तेरभावाद्, हेतौ साध्याभाववद्वृत्तित्वज्ञानस्येव साध्याभाववत्ताज्ञानविशिष्टहेतु-मत्ताज्ञानस्यापि व्यभिचारज्ञानत्वात्, अवच्छेदकधर्मदर्शना-दीनामिव ज्ञानद्वयसाधारणरूपेणैव व्यभिचारज्ञानस्यापि प्रति-बन्धकत्वात्,

न च व्यभिचारज्ञानस्य व्याप्तिग्रहविघटकतयैव विरोधितया प्रकृते च परामर्शस्य सत्त्वाद् न तस्य विरोधित्वमिति वाच्यम् ?

व्याप्तिनिश्चयसत्त्वेऽपि भिन्नेन्द्रियादिजन्यव्यभिचारज्ञानेऽनु-मित्यनुदयस्यानुभवसिद्धत्वेन व्यभिचारज्ञानाभावस्य स्वातन्त्र्ये-णानुमितिहेतुत्वात्,

न च यत्र व्याप्तिनिश्चयसत्त्वे व्यभिचारज्ञानं तत्र तयोरेक-तरं बाध्यं विरुद्धार्थग्राहकत्वादिति न्यायेन व्याप्तिनिश्चयेऽन्य-तरत्वेनाप्रामाण्यज्ञानान्नानुमितिरिति व्यभिचारज्ञानस्य न साक्षादनुमितिविरोधित्वमिति वाच्यम् ?

तथा सति प्रकृतेऽपि यत्र परामर्शानन्तरं बाधनिश्चयो-बाधनिश्चयानन्तरं वा परामर्शस्तत्राप्यन्यतरत्वेन परामर्शेऽ-प्रामाण्यज्ञानसत्त्वादेवानुमित्यापत्तेर्वारणादिति,

तदसद्–वन्हिव्याप्यधूमवान्पर्वत इति परामर्शेन महानसीय-

वन्हौ लाघवमिति लाघवज्ञानसहकृतेन पर्वतो महानसीयवन्हि-मानित्यनुमितेरुत्पत्त्या पर्वतो महानसीयवन्ह्यभाववानितिबाधनिश्चयकालेऽपि तादृशानुमित्यापत्तिस्तत्र विरुद्धार्थग्राहकत्वाभावेन परामर्शे उक्तन्यायेनाप्रामाण्यज्ञानाभावादिति बाधनिश्चयस्यानुमितौ प्रतिबन्धकत्वस्यावश्यकत्वात्,

केचित्तु–अनुमितौ स्वातन्त्र्येण बाधनिश्चयस्याप्रतिबन्धकत्वेऽप्युपमितौ बाधनिश्चयस्य प्रतिबन्धकताया आवश्यकतया तत्रानुमितिसाधारणधर्मस्य प्रतिबन्ध्यताऽवच्छेदकतयाऽनुमितावपि तत्सिद्धिरित्याहुरिति दिक्,

एवमुक्तानां हेत्वाभासानामसाधकतासाधकत्वेन सदुत्तरत्वम्; अन्यथाऽसाधकतासाधकत्वाज्ञाने सदुत्तरत्वापरिचयेन हेत्वाभासनिर्वचनानर्थक्यापत्तेः,

अथ विरुद्धत्वादिज्ञानादेव स्वार्थानुमितेरिव परेण यामनुमितिमुद्दिश्य प्रयोगः कृतः तत्प्रतिबन्धेऽसाधकतासाधनवैयर्थ्येन नासाधकतासाधकत्वं सदुत्तरत्वं, यद्वचसि वाद्युक्तदूषणावगतिः स निगृहीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यम् अन्यथाऽर्थान्तरत्वादिति चेद्?

मैवं–द्वयं ह्युद्देश्यं परानुमितिप्रतिबन्धः स्थापनायामसाधकतासाधनं च; तत्राद्योद्देश्यसिद्ध्यर्थमिदमनैकान्तिकमित्यादावेवोद्भाव्यते द्वितीयोद्देश्यसिद्ध्यर्थं चेदमसाधकमनैकान्तिकत्वादित्यादिक्रमेणासाधकतासाधनमावश्यकम्,

न चासाधकतासाधनस्योद्देश्यत्व एव मानाभाव इति वाच्यम्?

प्रतिबन्धकत्ववदसाधकतासाधकत्वेनापि दूषणत्वसम्भवे नापकर्षसूचकतया कथकसम्प्रदायानुरोधेनात्यन्ताशक्तिस्थापनार्थतयाऽप्युद्देश्यत्वात् , असाधकत्वं च वर्तमानं यदनुमितिप्रतिबन्धकताऽवच्छेदकरूपं तद्वत्त्वं, वर्त्तमानत्वविशेषणात् सत्प्रतिपक्षतोत्तीर्णहेतौ नातिव्याप्तिः, तथा चेदमिदानीमनुमितिप्रतिबन्धकताऽवच्छेदकरूपवद् अनैकान्तिकादित्वात् सम्मतवदित्यसाधकताऽनुमानं पर्यवसन्नम् अनुमितिप्रतिबन्धकताऽवच्छेदकं च रूपं-ज्ञाने विषयतयाऽनैकान्तिकादित्वमेव,

न च साध्याविशेषः; उपाधिविशेषेण रूपान्तरेण तस्यानुमेयत्वात् तोयत्वेन पिपासोपशमनसमर्थताऽवच्छेदकरूपवत्त्वानुमानवदिति दिक् ,

एवं निरूपितादनुमानादीश्वरसिद्धिः ।

अथेश्वरसाधकं कीदृशानुमानमिति चेद् ?

अत्र चिन्तामणिकारमतानुयायिनः—क्षित्यादिकं सकर्तृकं-कार्यत्वाद् घटवदित्यनुमानमीश्वरसाधकं, तदुक्तं चिन्तामणिकृताक्षित्यादौ कार्यत्वेन घटवत्सकर्तृकत्वानुमानादिति,

नन्वत्र क्षितित्वादीनां प्रत्येकं न पक्षताऽवच्छेदकत्वं तथा सति प्राचीनमते पक्षभिन्ने व्यभिचारसन्देहस्यापि दोषतयाऽङ्कुरजन्यादौ हेतोः सन्दिग्धव्यभिचारकत्वापत्तेः,

न च जन्यत्वमेव पक्षताऽवच्छेदकमिति वाच्यम् ?

प्राचीनमते पक्षताऽवच्छेदकैक्येऽप्यंशतः सिद्धसाधनस्य दोषतया घटादावंशतः सिद्धसाधनापत्तेः,

न च जन्यकृत्यजन्यत्वविशिष्टजन्यत्वं पक्षताऽवच्छेदकमिति वाच्यम्?

क्षित्यादीनामप्यदृष्टद्वाराऽस्मदीयकृतिजन्यत्वेनाश्रयासिद्धेः, कालीशरीरे यद्गौरं रूपं तस्यादृष्टद्वारा तपश्चरणादिकृतिजन्यत्वेनापक्षतया तत्र संदिग्धव्यभिचारकत्वापत्तेश्च,

न चादृष्टाद्वारकजन्यकृतिजन्यभिन्नजन्यत्वं पक्षताऽवच्छेदकम्, अदृष्टाद्वारकत्वं चादृष्टाजनकत्वं; तच्च कृतिविशेषणम्,

एवं च क्षित्यादेरदृष्टजनकास्मदीयकृतिजन्यत्वेऽप्यदृष्टाजनकजन्यकृतिजन्यभिन्नत्वेन पक्षताऽवच्छेदकाक्रान्ततया नाश्रयासिद्धिः,

एवङ्कालीशरीरे यद्गौरं रूपं तस्यादृष्टजनकतपश्चरणादिकृतिजन्यत्वेऽप्यदृष्टाजनकजन्यकृतिजन्यभिन्नत्वेन पक्षतया न सन्दिग्धव्यभिचारकत्वमपीति वाच्यम्?

शब्दफूत्कारादीनामदृष्टाजनककण्टादिगोचरकृतिजन्यत्वेन पक्षताऽवच्छेदकानाक्रान्ततया तत्रासन्दिग्धव्यभिचारकत्वाद्; गङ्गास्नानादीनामदृष्टजनकास्मदादिकृतिजन्यत्वेऽप्यदृष्टाजनकजन्यकृतिजन्यभिन्नत्वेन पक्षतया तत्रांशतः सिद्धसाधनापत्तेश्चेति चेद्?

न—स्वजनकान्तं गोचरान्तकृतिविशेषणं, शब्दफूत्कारादौ स्वजनकादृष्टाजनककण्टादिगोचरकृतिजन्यत्वेऽपि कण्टादेः शब्दाद्युपादानत्वाभावेन तत्कृतेः स्वोपादानगोचरत्वाभावेन पक्षतया न सन्दिग्धव्यभिचारकत्वं गङ्गास्नानादीनामदृष्टजनकस्वोपादान-

गङ्गाजलादिगोचरकृतिजन्यत्वेऽपि तददृष्टस्य स्वजनकत्वाभावेना- पक्षतया तत्र नांशतः सिद्धसाधनम्; अत एव स्वजनकत्वेनादृष्टं- विशेषितं, कालीशरीरे यद् गौररूपं तस्य स्वजनकादृष्टजनकत्वो- पादानतच्छरीरगोचरतपश्चरणादिकृतिजन्यत्वेन पक्षतया न तत्रापि सन्दिग्धव्यभिचारकत्वम्,

वस्तुतस्तु—क्षितित्वादीनां प्रत्येकमेव पक्षताऽवच्छेदकत्वे- ऽपि न क्षतिः,

न चैवमुक्तरीत्या सन्दिग्धव्यभिचारकत्वं दुर्वारमिति वाच्यम्?

साध्याभावांशे संशयात्मकस्य व्यभिचारसंशयस्य पक्ष इव पक्षसमेऽप्यदोषत्वात् तद्दोषत्वेऽप्यनुकूलतर्कादिना तन्निरास एव व्याप्तिग्रहस्योभयत्र तुल्यत्वात्,

यद्वा जन्यत्वमेकमेव पक्षताऽवच्छेदकं लाघवात्, पक्षता- ऽवच्छेदकावच्छेदेन साध्यसिद्धावंशतः सिद्धसाधनस्यादोषतया च नोक्तरीत्याऽशतः सिद्धसाधनं दोष इति दिक्,

साध्यं सकर्तृकत्वं च न कृतिजन्यत्वमात्रं क्षित्यादिजनका- दृष्टजनकयागादिगोचरास्मदादिकृत्या सिद्धसाधनसम्भवाद्, ना- प्युपादानगोचरकृतिजन्यत्वं तादृशकृतेर्हविरादियत्किंचिदुपादा- नगोचरतयोक्तसिद्धसाधनावारणाद्, उपादानगोचरत्वानिवेशे चाप्रसिद्धिः, ईश्वरासिद्धिदशायां क्षित्याद्युपादानगोचरकृतेरप्रसि- द्धेः किन्तु समवायेन कार्यत्वावच्छिन्नं प्रति विषयतयोपादानगो- चरकृतेर्हेतुता समवायविषयतोभयघटितसामानाधिकरण्यप्रत्या-

सत्त्वयवच्छिन्नकृतिजन्यत्वं साध्यम्,

एवं च यागादेः क्षित्याद्यनुपादानतया तद्गोचरास्मदादिकृतिजन्यत्वेन सिद्धसाधनानवकाशः,

न चैवं ध्वंसे व्यभिचार इति वाच्यम्?

सत्त्वस्य हेतुविशेषणत्वात् तस्य पक्षतया तत्र व्यभिचारस्यादोषत्वाच्च समवेतत्वस्य पक्षविशेषणत्वाच्च तत्र न बाधोऽपि,

यद्वा यथाश्रुतमेव साध्यं न तूक्तमत्यासत्त्वयवच्छिन्नत्वमपि तत्र निवेश्यं; यजेत मा हिंस्यादित्यादिश्रुत्या यागहिंसाऽऽदेः क्रियाविशेषस्यैवेष्टानिष्टहेतुतया बोधनेन तद्गोचरकृतेः क्षित्यादिहेतुत्वे मानाभावेनास्मदीयतादृशकृतिजन्यत्वमादाय सिद्धसाधनानवकाशात्,

एवं च ध्वंसे न बाधादिकमिति, कार्यत्वं च प्रागभावप्रतियोगित्वं, प्रागभावत्वं च गन्धानधिकरणकालवृत्त्यभावत्वम्, अभावत्वं चात्र सत्तावदन्यत्वम्,

वस्तुतस्तु–गन्धानधिकरणकालावृत्तित्वमेव हेतुर्लाघवात्, प्रागभावत्वस्याखण्डोपाधिरूपत्वे तु प्रागभावप्रतियोगित्वमेव हेतुरिति ध्येयम्,

न चानुकूलतर्काभावादुक्तानुमानमप्रयोजकमिति वाच्यम्?

अन्वयव्यतिरेकसिद्धस्य कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वस्यैवानुकूलतर्कत्वात्,

न च घटत्वपटत्वाद्यवच्छिन्नं प्रति कुलालकुविन्दादिकृतित्वेन कार्यकारणभावस्यावश्यकत्वेन सामान्यकार्यकारणभावे

मानाभाव इति वाच्यम् ?

यद्विशेषयोरितिन्यायेन तस्यावश्यकत्वात् ,

वस्तुतो घटत्वावच्छिन्नं प्रति कुलालकृतित्वादिना न हेतुत्वं किन्तु कुलालत्वादिनैव ; कुलालत्वादिकं चेष्टाविशेषवत्त्वादिकमेव कृतित्वावच्छिन्नस्य च लाघवात् कार्यत्वमेव कार्यताऽवच्छेदकम्,

न च कृतित्वावच्छिन्नस्य साक्षात्कारणत्वं न क्वापि दृष्टं चेष्टायां तद्दर्शनेऽपि तस्योपादानविषयकत्वमसिद्धमिति वाच्यम्?

नृत्यादिस्थले विलक्षणचेष्टायामिष्टसाधनताज्ञानानन्तरमुपादानविषयककृतित एव चेष्टाविशेषोत्पत्तेः,

न चैवमपि निराश्रयैव कृतिः सिध्यतु तावता च न तदाश्रयतयेश्वरसिद्धिरिति वाच्यम् ?

कार्यत्वावच्छिन्नं प्रति कृतित्वेनेव कर्तृत्वेनापि कारणत्वस्यान्वयव्यतिरेकसिद्धतया क्षित्यादिकर्तृत्वेनेश्वरसिद्धेरावश्यकत्वादित्याहुः,

दीधितिकारानुयायिनस्तु—कार्यत्वावच्छिन्नं प्रति कृतित्वादिना हेतुत्वाभावेऽपि लौकिककुलालाद्यकर्तृकखण्डकपालाद्युपादानकखण्डघटादिकर्तृतयेश्वरसिद्धिः—खण्डघटः सकर्तृको घटत्वादाद्यघटवदित्याद्यनुमानस्य घटत्वाद्यवच्छिन्नं प्रति कुलालादिकृतित्वादिना कार्यकारणभावमूलकस्य निष्प्रत्यूहत्वात् , कुलालत्वादिकं च विजातीयशिक्षावत्त्वादिकं विजातीयकृत्यादिमत्त्वपर्यवसन्नमीश्वरसाधारणम् ; अत एव नमः कुलालेभ्यः कर्मारेभ्य इति श्रुतिरपि संगच्छत इत्याहुः,

नव्यास्तु–प्रथममतं न युक्तं यद्विशेषयोरितिन्याये मानाभा-वेन कार्यत्वावच्छिन्नं प्रति कृतित्वादिना हेतुत्वासिद्ध्योक्तरीत्ये-श्वरसिद्धेरसम्भवात्,

द्वितीयमतमपि न सम्यक्–तथा सति लौकिककुलालादिव्या-पारं विनाऽपि खण्डघटादेरिवाद्यघटादेरपीश्वरमात्रादुत्पत्तिप्रस-ङ्गाद्,

न च लौकिककुलालकृत्यादेश्चेष्टाविशेषादिद्वारा तत्तद्घट-त्वाद्यवच्छिन्नं प्रत्याद्यघटादिवृत्तिवैजात्यावच्छिन्नं प्रति वा हेतुतया नेश्वरमात्रादाद्यघटाद्युत्पत्तिप्रसङ्ग इति वाच्यम् ?

तथा सति तादृशहेतुतयैवोपपत्तौ सामान्यतः कुलालादिकृ-तित्वादिनोक्तरीत्या हेतुतायां मानाभावेनोक्तरीत्येश्वरसिद्धेरस-म्भवात्, तस्मात्प्रकारान्तरेणैवेश्वरसिद्धिः–तथा हि कृष्णरामनृ-सिंहादिशरीरेषूद्देश्यत्वसम्बन्धाद्यनुकूलश्चेष्टाविशेषः श्रुतिस्मृ-तिपुराणादिसिद्धो दुरपन्हवः, चेष्टां प्रति कृतेरपि हेतुत्वं सर्वसि-द्धमेव, तथा च नानाकृतीनां तज्जनकत्वकल्पने गौरवात्; लाघवेन तज्जनकत्वेनैकस्याः कृतेः सिद्धौ तदाश्रयतयेश्वरसि-द्धिर्निराबाधा,

न च कृतेश्चेष्टां प्रत्यवच्छेदकतासम्बन्धेन हेतुतया नि-त्यकृतेश्च व्याप्यवृत्तितयाऽवच्छेदकाभावेन कथं ततश्चेष्टेति वाच्यम् ?

तादृशकार्यकारणभावबलेन व्याप्यवृत्तेरप्यवच्छेदकस्वी-कारात्, फलबलेन कृष्णादिशरीराणामेव कृत्यवच्छेदकत्वं ना-

स्मदादिशरीराणामिति नातिप्रसङ्गः,

न च कृष्णादिशरीरे सर्वदैव तादृशतादृशचेष्टा कथं नोत्पद्यत इति वाच्यम् ?

अस्मदादेरदृष्टस्य कालविशेषस्य वा सहकारित्वाभ्युपगमेनादोषात्,

एवं सर्गादौ वेदकर्तृत्वेनापीश्वरसिद्धिः कण्ठीयशब्दादिकं प्रति कण्ठावच्छिन्नकृतेर्हेतुत्वस्य सर्वसिद्धत्वात्,

एवं सर्गादौ घटाद्यनुकूलचेष्टाविशेषकर्तृत्वेनापीश्वरसिद्धिः, एतदभिप्रायैव च नमः कुलालेभ्यः कर्मारेभ्यश्चेति श्रुतिरपीति प्राहुः,

अत्रेदमवधेयम्—क्षित्यादेस्सकर्तृकत्वानुमाने लाघवोपनीतमेकत्वं कर्तरि भासते तच्च न संख्यारूपं नानाकर्तुरपि प्रत्येकमेकत्वसंख्यावत्त्वेनाव्यावर्तकत्वाद् नापि द्वित्वाद्यभाववत्त्वं घटादिकमादायेश्वरेऽपि तत्सत्त्वाद्, नापि क्षितिकर्तृवृत्तिप्रतियोग्यवृत्तिभेदाप्रतियोगित्वं सकर्तृकत्वानुमितेः पूर्वं क्षितिकर्तृत्वेन कर्तुरनुपस्थितेः,

न च क्षितिः सकर्तृका न वेति सन्देहोपस्थितं कर्तारमादाय तदुपपत्तिरिति वाच्यम् ?

तावताऽपि क्षितिकर्तुरेकत्वे लाघवमित्याकारकस्यैकत्वांशे निश्चयरूपस्य लाघवज्ञानस्यानुपपादनात् किन्तु कर्तृतदितरावृत्तित्वे सति लौकिककर्तृतदितरोभयावृत्ति यद् द्वित्वं तद्राहित्यम्, ईश्वरभिन्ने घटादौ जीवे च घटपटादिवृत्तिद्वित्वस्याजी-

वद्वयवृत्तिद्वित्वस्य च तादृशस्य सत्त्वान्नातिप्रसङ्गः, ईश्वरघटादि-वृत्तिद्वित्वमादायासम्भववारणाय सत्यन्तं जीवेश्वरवृत्तिद्वित्व-मादाय तद्वारणाय विशेष्यम्,

वस्तुतस्तु—दुःखदुःखवद्भेदोभयासमानाधिकरणत्वे सत्या-त्मानात्मवृत्तीतरद् यद् द्वित्वं तदनधिकरणत्वमेवेश्वर एकत्वं, जीवेश्वरोभयवृत्तिद्वित्वस्य दुःखदुःखवद्भेदोभयसमानाधिकरण-त्वाद्घटेश्वरोभयादिवृत्तिद्वित्वस्य चात्मानात्मवृत्तित्वान्नासम्भवः जीवेषु घटादौ च तादृशस्य जीवद्वयवृत्तिद्वित्वस्य घटद्वयादिवृत्तिद्वि-त्वस्य च सत्त्वान्नातिप्रसङ्गः, ईश्वरद्वयस्वीकारे च तदुभयवृत्तिद्वि-त्वस्यैव तत्र सत्त्वेन निरुक्तैकत्वं न सिध्येदित्यर्थादीश्वरैकत्व-सिद्धिः, ईश्वरकृतेरेकत्वं च समानाधिकरणकृतिमात्रवृत्तिद्वित्व-शून्यत्वं समानाधिकरणकृतिप्रतियोगिकप्रतियोग्यवृत्तिभेदाभा-ववत्त्वं वा; कृतिपदस्थाने ज्ञानेच्छापदे निवेश्य ज्ञानेच्छयोरप्ये-कत्वं निर्वाच्यम्,

अथोक्तरूपलाघवज्ञानस्य कार्यताऽवच्छेदकं नैककर्तृकत्व-प्रकारकानुमितित्वम् एककर्तृकत्वत्वावच्छिन्नव्यापकताऽवगाहि-परामर्शजन्यानुमितौ व्यभिचारात्, नापि स्वाव्यवहितोत्तरक्ष-णोत्पत्तिकत्वस्वसामानाधिकरण्योभयसम्बन्धेन तादृशलाघव-ज्ञानविशिष्टतादृशानुमितित्वं, सकर्तृकत्वपरामर्शं विनाऽपि लाघव-ज्ञानात् तादृशानुमितिप्रसङ्गात्,

न च लाघवज्ञानेन तादृशानुमितिजनने तादृशपरामर्शस्य सहकारित्वाभ्युपगमान्नोक्तानुमितिप्रसङ्ग इति वाच्यम्?

तादृशपरामर्शजन्यताऽवच्छेदकलाघवज्ञानजन्यताऽवच्छेदकयोः परस्परं सामान्यविशेषभावाभावेन परस्परं सहकारित्वासम्भवादिति चेद् ?

न–जन्यताऽवच्छेदकयोः सामानाधिकरण्यमात्रस्यैव सहकारितायां तन्त्रत्वेन सामान्यविशेषभावाभावेऽपि परस्परसहकारित्वे बाधकाभावात् ,

केचित्तु–क्षितिकर्तुरेकत्वे लाघवमिति लाघवज्ञानस्य तादृशलाघवज्ञानविशिष्टतादृशपदार्थाव्यवहितोत्तरक्षित्यादिविशेष्यकैककर्तृकत्वप्रकारकानुमितित्वं तादृशपरामर्शाव्यवहितोत्तरसकर्तृकत्वप्रकारकानुमितित्वं च तादृशपरामर्शजन्यताऽवच्छेदकमिति यत्तादृशपरामर्शस्य सामान्यसामग्रीत्वान्न केवलं लाघवज्ञानादनुमित्यापत्तिरित्याहुरिति संक्षेपः,

विस्तरस्त्वस्मत्कृतेश्वरवादेऽनुसन्धेयः,

यत्तु–क्षित्यादिरूपजगतः स्वभावसिद्धत्वेनोत्पत्तिमत्त्वसहेतुकत्वयोरभावात् कथं तादृशजगत्कर्तृत्वेनेश्वरसिद्धिरिति ?

तन्न–स्वभाववादमवलम्ब्योपलभ्यमानपूर्वापरावधिकस्यापि जगत उत्पत्तिमत्त्वसहेतुकत्वयोरनङ्गीकारेऽन्वयव्यतिरेकसिद्धस्य घटादौ दण्डादिकारणत्वस्य जगति सर्वसिद्धानामिच्छावत्त्वकर्मकामनाप्रवृत्तिनियतिबन्धप्रेत्यभावादीनां च विलयप्रसङ्गात् ,

अत्र सत्कार्यवादिनः सांख्याः–असत्कार्यवाद एवोक्तरीत्या जगत्कर्तृत्वेनेश्वरासिद्धिः सम्भाव्यते, स एव न सम्भवति ; विचारासहत्वात् ; किन्तु सत्कार्यवाद एव, तथा च नोक्तरीत्येश्वर-

सिद्धिः, तथा हि पूर्वमसतोऽग्रे सत्त्वरूपोत्पत्तिरेवासत्कार्यवादपर्यवसिता, तत्र घटादेः पूर्वमसत्त्वं दुर्वचं तद्धि न प्रागभावरूपं तत्र प्रमाणाभावात्,

न च घटो भविष्यतीतिप्रतीतिरेव तत्र प्रमाणं; तस्या वर्तमानकालोत्तरकालाविर्भावविषयकत्वात्,

नन्विदानीमागामिघटो नास्तीत्यादिप्रतीतिसिद्धं पूर्वकालवृत्तिकालिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रतियोगित्वमेव पूर्वमसत्त्वमिति चेद् ?

न—इदानीमित्यादिप्रतीतेः समवायादिसम्बन्धावच्छिन्नकालिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकघटाद्यभावविषयकत्वात्,

न च कालिकविशेषणतासम्बन्धस्यैकत्वेन कथं समवायादिसम्बन्धावच्छिन्नत्वमिति वाच्यम् ?

समवायादिदैशिकसम्बन्धभेदेन तदवच्छिन्नकालिकविशेषणताविशेषसम्बन्धस्य भेदात्,

युक्तं चैतद्—अन्यथेदानीं संयोगेन गोष्ठे गौर्न मन्दुरायामितिप्रतीतेर्निर्विषयत्वापत्तेः,

न च संयोगेन गोष्ठसम्बद्धे मन्दुरासम्बद्धे गोमति काले कालिकसम्बन्धावच्छिन्नप्रतियोगिताको गवाभावो विषय इति वाच्यम् ?

अभावस्य प्रतियोगिना सह विरोधेन बाधात्,

न च गोष्ठे संयोगेन विद्यमानस्य गोर्मन्दुरायां विद्यमानस्य

४७

संयोगावच्छिन्नप्रतियोगिताकगवाभावस्यैतत्कालावच्छिन्नत्वं तद्विषय इति वाच्यम् ?

मन्दुरायां संयोगेन गवाभावस्य व्याप्यवृत्तितयैतत्कालावच्छिन्नत्वासम्भवात् , तस्मात्संयोगावच्छिन्नकालिकसम्बन्धेन गौर्गोष्ठावच्छिन्नवृत्तिकः संयोगावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताको गवाभावो मन्दुराऽवच्छिन्नवृत्तिकस्तादृशप्रतीतिविषयो वाच्य इति कालिकसम्बन्धस्य दैशिकसम्बन्धभेदेन भेदोऽवश्यमभ्युपेयः,

न च सत्कार्यवादे घटादौ दण्डादेरपेक्षाविरहेण सर्वदा घटाद्युपलब्ध्यापत्तिरिति वाच्यम् ?

घटाद्याविर्भावे दण्डादेराविर्भावस्यापेक्षणात् ,

न चाविर्भावो दुर्वचः; संयोगसमवायाद्यवच्छिन्नस्य तादात्म्यावच्छिन्नस्य च कालिकसम्बन्धस्यैवाविर्भावपदार्थत्वात् तथा च घटाद्याविर्भावे दण्डाद्याविर्भावः कारणमिति पर्यवसन्नम्,

अथ कपालाद्याविर्भावस्य सार्वदिकत्वे घटाद्याविर्भावस्यापि तत्त्वप्रसङ्गः; कादाचित्कत्वे च घटादेरेव तथात्वमुचितम् असत्कार्यवादस्वीकारादपसिद्धान्तश्च, आविर्भूतस्य कारणाविर्भावस्य कार्याविर्भावं प्रति प्रयोजकत्वे चानवस्थाऽऽपत्तिरिति चेद् ?

न—असत्कार्यवादिमतेऽपि घटाद्युत्पत्तेः सार्वदिकत्वे सत्कार्यवादस्वीकारादपसिद्धान्त उत्पत्तेरप्युत्पत्तिस्वीकारे चानवस्थाप्रसङ्गः इति साम्यात् ; तस्मात् सर्वदा शुद्धकालिकसम्बन्धेन विद्यते कदा चित्तु तादात्म्याद्यवच्छिन्नकालिकसम्बन्धयोगादा-

विर्भवति घटादिरिति सत्कार्यवादनिष्कर्ष इत्याहुः,

अत्र न्यायविदः—सत्कार्यवाद आविर्भावस्य नित्यत्वानित्यत्वयोः सार्वदिकत्वानवस्थाऽपसिद्धान्तापत्तिरूपोक्तदोषा दुर्वाराः,

न चासत्कार्यवाद उत्पत्तेर्नित्यत्वेऽपसिद्धान्तोऽनित्यत्वे चानवस्थेति दोषो दुर्वार इति तौल्यमिति वाच्यम् ?

सूर्यचन्द्रकर्मणोः परस्पराश्रितयोर्युगपदुत्पादस्वीकारेण सूर्यकर्मसम्बन्धश्चन्द्रकर्मण उत्पत्तिश्चन्द्रकर्मसम्बन्धश्च सूर्यकर्मण उत्पत्तिस्तदुभयसम्बन्धश्च घटादेरुत्पत्तिरित्यभ्युपगमेनादोषात् ,

किंचाविर्भावस्य दुर्वचतया दुर्निरूपस्सत्कार्यवादः,

न च दैशिकसम्बन्धावच्छिन्नकालिकसम्बन्ध एवाविर्भाव इत्युक्तमेवेति वाच्यम् ?

कालिकविशेषणतायाः स्वरूपसम्बन्धरूपतयाऽभिन्नमहाकालात्मककालिकसम्बन्धस्य दैशिकसम्बन्धभेदेन भेदासंभवात् समवायवदेकेनैव तेन कालत्रयेऽपि तत्कालीनपदार्थविशिष्टबुद्धिजननसम्भवात् तदवच्छिन्नप्रतियोगिताक एव चात्यन्ताभाव इदानीमागामिघटो नास्तीतिप्रतीतिविषयः,

न चैवं संयोगेन गोष्ठे गौरित्यादिप्रतीतेर्विषयालाभ इत्युक्तापत्तिर्दुःसमाधेयेति वाच्यम् ?

कालिकसम्बन्धेन व्यतिरेकिधर्ममात्रस्याव्याप्यवृत्तित्वाभ्युपगमेनैतत्काले संयोगेन गोष्ठावच्छेदेन कालिकसम्बन्धेन गोर्मन्दुराऽवच्छेदेन कालिकसम्बन्धावच्छिन्नप्रतियोगिताकगवाभावस्य च तत्प्रतीतिविषयत्वाद् ; अत एव दीधितिकारेणाप्युक्त-

प्रतीतिमवलम्ब्यैव गवादिमति काले गवाद्यनधिकरणधर्म्यवच्छेदेन कालिकसम्बन्धावच्छिन्नप्रतियोगिताको गवाद्यभावः स्वीकृतः,

वस्तुतस्तु–कालिकसम्बन्धेन व्यतिरेकिधर्ममात्रस्याव्याप्यवृत्तित्वानभ्युपगमेऽपि न क्षतिः; उक्तप्रतीतेरेतत्काले स्वसंयोगी गोष्ठविशिष्टमहाकालात्मककालिकसम्बन्धेन गौः; स्वसंयोगिमन्दुराविशिष्टकालिकसम्बन्धावच्छिन्नप्रतियोगिताको गवाद्यभावश्च विषयः,

अथ वा–संयोगावच्छिन्नगोष्ठवृत्तिगवाधिकरणतायां मन्दुरावृत्तिसंयोगसम्बन्धावच्छिन्नगवाभावाधिकरणतायां चैतत्कालीनत्वमेवोक्तप्रतीतिविषयः तस्मादिदानीमागामिघटो नास्तीत्यादिप्रतीतिसाक्षिकं पूर्वकालवृत्तिकालिकसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रतियोगित्वरूपं पूर्वमसत्त्वं सुवचमिति पूर्वमसतोऽग्रे सत्त्वरूपोत्पत्तिपर्यवसन्नस्यासत्कार्यवादस्य सुनिरूपत्वम्; उक्तरीत्या दैशिकसम्बन्धावच्छिन्नकालिकसम्बन्धरूपाविर्भावस्य दुर्वचतयाऽऽविर्भावपर्यवसन्नसत्कार्यवादस्य दुर्निरूपत्वमिति सत्कार्यवादो न समञ्जसः।किंत्वसत्कार्यवाद एवेति वदन्ति,

एतेन–

असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।

शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्–

इतीश्वरकृष्णकारिकाऽनुसारेण सत्कार्यवाद आवश्यकः, कारिकाऽर्थस्तु करणं सत्ताविशेषः स पुनरसत्ताया विरुद्ध इति

न कदाऽप्यसत्कार्यम्, असतः शशविषाणादेः सत्त्वस्य कर्तुमशक्यत्वात्सत एव सत्कारणं तद्धर्मत्वाद्, दृष्टं च तिलेषु सत एव तैलस्य निष्पीडनेन करणम्, असतस्तु करणं न दृष्टं सिकताऽऽदेर्निष्पीडनेऽपि तैलानुत्पत्तेः, एवमुपादानेन ग्रहणात् सम्बन्धादपि सत्कार्यं न ह्यसतः सम्बन्धोऽस्ति,

न चासम्बद्धमेव कार्यं कारणैः क्रियत इति वाच्यम् ?

सर्वसम्भवाभावाद् असम्बन्धाविशेषे सर्वं सर्वस्माद्भवेत् तथा च सर्वत्र सर्वो न जायत इति तन्तौ पटः सत्यरूपेण प्रागवस्थित एवाविर्भवतीत्युन्नीयते ; किं चाशक्तस्य जनकत्वेऽतिप्रसङ्गात् शक्तस्य जनकत्वं वाच्यं; शक्तिश्चास्य न सर्वत्र किन्तु क्व चिदेवेति कथमसति कार्ये कारणस्य शक्तिर्नियता स्याद् असतोविषयत्वायोगात् तस्माच्छक्तस्य शक्यं शक्तिविषयो यस्तत् करणात्प्रागपि शक्यं सदेव किञ्च कारणभावात् कारणतादात्म्यादपि सत्कार्यम्,

न चावयवावयविनोर्भेदोऽस्ति तयोर्भेदेनाप्रतीतेः कपालं घटीभूतं तन्तुः पटीभूतः सुवर्णं कुण्डलीभूतमित्याकारकप्रतीत्या तयोरभेदसिद्धेः ; तस्मात्कार्याविर्भावात्पूर्वमपि कारणात्मना कार्यं विद्यत एवेति केषां चिदुक्तिरपि निरस्ता,

आविर्भावानिर्वचनेन सत्कार्यवादस्य दुरुपपादत्वात्,

किञ्च पूर्वकालवृत्त्यभावप्रतियोगिस्वरूपासत्त्वस्य विद्यमानस्वरूपसत्त्वस्य च कालभेदेनैकत्र समावेशेन विरुद्धतैव नास्ति, एवमुपादानोपादेयभावः पूर्वापरयोरपि न विरुद्धः कार्यात्पु-

र्मस्योपादानेन सह नित्यस्य समवायसम्बन्धस्य सत्त्वात्,

वस्तुतोऽसम्बद्धस्यापि कार्यस्य करणे न दोषः,

न चैवं सर्वत्र सर्वकार्यापत्तिरिति वाच्यम् ?

तन्त्वादीनां पटादावेव जनकत्वात्,

एवं शक्तिः कारणता; सा च सतोऽपि पटादेस्तन्त्वादावेव स्वभावात्, सत्कार्यवादेऽपि तन्त्वादेः पटादिशक्तिनियमे स्वभावभेदस्यैव शरणीकरणीयत्वात् कार्यकारणयोश्च मिथो भेद एव; अन्यथा कार्यकारणभावस्यैवानुपपत्तेरिति दिक्,

ननु तन्तुपटयोर्भेदे पटोत्पत्तौ पूर्वगुरुत्वाद् द्विगुणितगुरुत्वापत्तौ गुरुत्वाधिक्येन तत्कार्यावनतिविशेषाधिक्यापत्तिरिति चेद् ?

अत्र केचित्–गुरुद्रव्ययोस्समयोस्तोलन एकत्र तृणादिसम्बन्धे सति गुरुत्वाधिक्यादवनतिविशेषाधिक्यं कुतो न भवतीति वक्तव्यं; तृणादावपकृष्टगुरुत्वादिति चेत् प्रकृतेऽप्यवयविन्यत्यन्तापकृष्टगुरुत्वस्वीकारान्न दोष इत्याहुः,

अन्ये तु परमाणावेव गुरुत्वं स्वीक्रियते न द्व्यणुकादौ,

न चैवं द्व्यणुकादौ पतनादीनामनुपपत्तिरिति वाच्यम् ?

तत्र परमाणुगुरुत्वस्यैव परम्परासम्बन्धेन प्रयोजकत्वादित्याहुः,

नव्यास्तु–गुरुत्व एव मानाभावः क्षितिजलयोरधोगमनस्य वायुतेजसोस्तिर्यगूर्ध्वगमनवददृष्टवदात्मसंयोगादेवोपपत्तेः,

न च पतनासमवायिकारणतया गुरुत्वासिद्धिरिति वाच्यम् ?

पतनस्य सासमवायिकारणकत्वे मानाभावात् पतनप्रकर्ष-

स्त्ववयवाधिक्याद् अवयविगुरुत्वापकर्षत्वादिभिरपि तथैव वाच्यत्वादिति प्राहुः,

यत्तु—अवयवावयविनोर्गुणगुण्यादेर्भेदेऽप्यभेदे बाधकाभावः समवायस्थानीयस्य तादात्म्यस्याभेदेऽपि सम्भवादिति,

तन्न—आत्माकाशादेर्ज्ञानशब्दादिना तादात्म्याभावाद् घटो-नीलिमेत्यादिप्रतीत्यापत्तेश्चेत्यलं विस्तरेण,

स्यादेतद्—निरुक्तानुमानाद् यथेश्वरसिद्धिस्तथा वह्न्यादिर्दाहाद्यनुकूलातिरिक्तातीन्द्रियधर्मसमवायी दाहादिजनकत्वादात्मवदित्यनुमानाद्वह्न्यादौ दाहाद्यनुकूला सहजशक्तिर्दुर्वारा,

न चेदमनुमानमप्रयोजकमिति वाच्यम् ?

अतिरिक्तशक्त्यस्वीकारे करादौ वन्ह्यादिसमवधाने सति च मण्याद्यसमवधाने दाहाद्यापत्तेरेवानुकूलतर्कत्वात्,

न च दाहादौ मण्यभावादेः कारणत्वकल्पनान्नोक्तापत्तिरिति वाच्यम् ?

तेन रूपेण स्वतन्त्रकारणत्वकल्पने गौरवेण तदपेक्ष्य विलक्षणैकशक्तिमुपेत्य तद्वत्त्वेन वह्न्यादेः कारणत्वकल्पनस्यैवौचित्यात्,

अथ मण्यादिसमवधानकालीनवन्ह्यादिसत्त्वेऽपि शक्तिमद्वन्ह्यादिसत्त्वेन दाहापत्तिः,

न च मण्यादिसमवधानस्य शक्तिनाशकत्वान्नोक्तापत्तिरिति वाच्यम् ?

तथा सति मण्यादिसत्त्व उत्तेजकसत्त्वेऽपि दाहाद्यनुत्पत्त्यापत्तेः, न चोत्तेजकाभावविशिष्टमण्यादिसमवधानस्यैव शक्तिनाश-

कत्वमिति वाच्यम् ?

अतिरिक्तशक्तिकल्पने तादृशनाशधनाशकभावकल्पनं चापेक्ष्योत्तेजकाभावविशिष्टमण्यभावत्वादिना हेतुतायामेव लाघवादिति चेद् ?

न—अत्यन्ताभावस्य नित्यतया मण्यादिसमवधानेऽपि तादृशमण्याद्यभावसत्त्वेन दाहापत्तेः,

यत्तु—यत्क्षणावच्छेदेन यदधिकरणे कारणं द्वितीयक्षणावच्छेदेन तदधिकरणे कार्योत्पत्तिरिति हि सामग्रीव्याप्तिः,

एवं चात्यन्ताभावस्य नित्यतया मण्यादिसमवधानदशायां तादृशमण्याद्यत्यन्ताभावसत्त्वेऽपि तदधिकरणे तादृशमण्याद्यभावसत्त्वे तत्कालस्यावच्छेदकत्वं नोपेयत इति मण्यादिसमवधानकाले तदवच्छेदेन तादृशमण्याद्यभावासत्त्वान्न तदा दाहाद्यापत्तिरिति,

तदसद्—मन्मतेऽपि यत्क्षणावच्छेदेन शक्तिमान् वह्निर्यत्र वर्तते तद्द्वितीयक्षणावच्छेदेन तत्र दाहोत्पत्तिरिति सामग्रीव्याप्तिस्वीकारेण मणिसमवधानकालस्य मण्यभावस्येव शक्तेरप्यनवच्छेदकत्वेन तत्क्षणावच्छेदेन कारणताऽवच्छेदकविशिष्टकारणस्य तत्क्षणावच्छेदेनासत्त्वात् तदुत्तरं दाहाद्यापत्तेर्वारणादिति चेद् ?

नैवम्—विलक्षणशक्तिमत्त्वेन वह्नेः कारणत्वम् उत मण्यभावस्येत्यत्र विनिगमकाभावः,

न च तेन रूपेणाभावस्य कारणत्वे वन्ह्यसत्त्वेऽपि दाहापत्तिरिति वाच्यम् ?

पद्धत्यसमवधानकालस्य शक्तेरनवच्छेदकतयोपदर्शितरीत्या सामग्रीव्याप्तिस्वीकारेणैवापत्त्यभावात् ,

एवं च विनिगमनाविरहेणोभयोः कारणत्वे शक्तिमत्त्वेन वह्नेरेव कारणत्वं न तु मण्यभावस्येति कल्पनं निर्युक्तिकम् ,

न च तथाऽपि शक्तिसिद्धिरागतैवेति वाच्यम् ?

मण्यभावस्यापि शक्तिमत्त्वेन हेतुत्वे मणिवह्निसंयुक्तदेशघटाद्यन्यतरत्वावच्छिन्नाभावस्यापि शक्तिमत्त्वेन हेतुत्वमादाय विनिगमनाविरहेणानन्तकार्यकारणभावकल्पनाऽनन्तशक्तिकल्पनागौरवस्य दुर्वारतया तादृशमण्यभावत्वादिना हेतुत्वस्यैवोचितत्वाद् ,

न च तादृशमण्यभावत्वेन हेतुत्वेऽपि तादृशान्यतरत्वावच्छिन्नाभावहेतुत्वमादाय विनिगमनाविरहोऽस्त्येवेति वाच्यम् ?

तादृशमण्यभावत्वेन हेतुत्वे हेतुताऽवच्छेदकशरीरलाघवस्यैव विनिगमकत्वात् ,

तस्माद् वन्ह्यादौ दाहाद्यनुकूलशक्तिकल्पनं निर्युक्तिकमेव,

ननु माऽस्तु वन्ह्यादौ दाहाद्यनुकूला शक्तिस्तथाऽपि तृणारणिमणिषु वह्निजनकत्वावच्छेदकतया शक्तिविशेषमुपेत्य वह्नित्वावच्छिन्ने तेषामेकशक्तिमत्त्वेन हेतुत्वस्यावश्यकतयाऽतिरिक्तशक्तिसिद्धिः,

न च वह्नित्वावच्छिन्ने तृणत्वादिना प्रत्येकमेव हेतुताऽस्तु किमतिरिक्तशक्त्येति वाच्यम् ?

परस्परव्यभिचारेण तादृशहेतुत्वस्यासम्भवाद् ,

न च तृणादिजन्यताऽवच्छेदकतया वह्नौ वैजात्यानि

स्वीकृत्य तत्तद्वैजात्यावच्छिन्नवह्निं प्रति तृणत्वादिना हेतुत्वं-कल्पनीयमिति वाच्यम् ?

तथा सत्यनेककार्यैककारणभावप्रसङ्गेन तदपेक्ष्य वह्नित्वावच्छिन्नं प्रति प्रत्येकशक्तिमत्त्वेनैकहेतुत्वस्यैवौचित्यादिति चेद् ?

न—फूत्कारादिकं विना तृणादितो वह्न्यापत्तिवारणाय शक्त्यवच्छिन्नेन वह्नित्वावच्छिन्ने जननीये फूत्कारनिर्मन्थनतेजःसंयोगादीनामन्यतमस्य सहकारित्वकल्पनस्यावश्यकतयाऽरणिसत्त्वे निर्मन्थनाद्यसत्त्वे फूत्कारसत्त्वे वन्ह्याद्यापत्तिवारणाय तत्तद्वैजात्यावच्छिन्नं प्रति तृणत्वादिना हेतुत्वमुपेत्य तृणत्वाद्यवच्छिन्नेन तत्तद्वैजात्यावच्छिन्ने जननीये फूत्कारत्वाद्यवच्छिन्नस्य सहकारित्वमुपेत्योक्तापत्तेर्वारणीयतयैकशक्तिमत्त्वेन हेतुत्वे मानाभावात् ,

अथ फूत्कारतृणसंयोगादावेव शक्तिः कल्प्यते तथा च स्वाश्रयीभूतसंयोगवत्त्वसम्बन्धेन शक्तिमत्त्वेन तृणादेरेकहेतुतयैव निर्वाहः,

अरणौ फूत्कारसम्बद्धशक्त्यस्वीकारेणोक्तसम्बन्धेन शक्तिमतः कारणत्वस्याभावादेवोक्तापत्तेर्वारणसम्भवादिति शक्तिर्दुर्वारेति चेद् ?

न—एवं सति तादृशशक्तिविशेषस्तृणफूत्कारसंयोगादौ कल्प्यत उत तत्कालीनवायुसंयोगादावेकशक्तिमत्त्वेन वाय्वादीनामपि हेतुत्वे बाधकाभाव इत्यत्र विनिगमनाविरहेण सर्वत्र तत्कल्पनेऽतिगौरवप्रसङ्गेन लाघवात्तत्तज्जातिविशेषान् स्वीकृत्य

तत्तद्वैजात्यावच्छिन्नं प्रति तृणत्वादिना हेतुत्वकल्पनस्यैवौचि-
तत्वात्,

न चैवं दीधितिकाराणां शक्तिमत्त्वेन तृणादेरेकहेतुतोक्तिः पदार्थखडनीयाऽसङ्गता स्यादिति वाच्यम् ?

तावता क्षतिविरहात्,

वस्तुतस्तु—यत्क्षणावच्छेदेन शक्तिमान् यत्क्षणावच्छेदेन यत्र तिष्ठति तत्र तदव्यवहितोत्तरक्षणावच्छेदेन वह्नित्वावच्छिन्नव-ह्निरूपकार्यमिति विलक्षणसामग्रीव्याप्तिः प्रकृते स्वीक्रियत इति नोपदर्शितापत्तिः,

तथा हि—यस्मिन्क्षणेऽरणौ निर्मन्थनं नास्ति किन्तु फूत्का-रसंयोगस्तादृशक्षणस्य शक्तेरवच्छेदकत्वास्वीकारेण तत्क्षणाव-च्छेदेनोपदर्शितसामग्र्या असत्त्वान्नोपदर्शितापत्तिरिति शक्तिमता वह्नित्वावच्छिन्ने जननीये फूत्कारसंयोगादीनामन्यतमस्य सह-कारित्वमेव न कल्प्यते,

एवं च वह्निं प्रत्येकशक्तिमत्त्वेन तृणादीनामेकहेतुत्वे न कोऽपि दोष इत्याशयेन दीधितिकाराणामुक्तिः सङ्गमनीयेति दिक्,

नन्वेवमपि मा भूत्सहजशक्तिराधेयशक्तिस्त्वावश्यकी ; तथा हि व्रीहीन् प्रोक्षति व्रीहीनवहन्तीत्यत्र प्रोक्षणजन्यः कालान्तर-भाव्यवघातजनकः शक्तिरूपो व्यापारो व्रीहिनिष्ठः कल्प्यते प्रोक्षणस्याशुविनाशितया कालान्तरीणावघाते साक्षाद्धेतुत्वास-म्भवादिति चेत् ?

न—प्रोक्षणजन्यपुरुषनिष्ठादृष्टविशेषरूपव्यापारेणैवोपपत्तौ

व्रीहिनिष्ठशक्तिकल्पने मानाभावात्,

न च विनिगमकाभावाद्व्रीहिनिष्ठतैव व्यापारस्य किं न स्यादिति वाच्यम्?

अनन्तव्रीहिनिष्ठत्वे गौरवेण पुरुषनिष्ठत्वे लाघवस्यैव विनिगमकत्वात्,

न च पुरुषनिष्ठस्य व्यापारस्य व्रीहिनिष्ठावघातं प्रति स्वाश्रयसंयोगित्वरूपपरम्परासम्बन्धेन हेतुत्वं; मम तु व्रीहिनिष्ठस्य साक्षादेव हेतुत्वमिति लाघवमिति वाच्यम्?

व्रीहिनिष्ठत्व एकव्रीहिनाशे तन्नाशापत्त्या यावद्व्रीहिनाशत्वेन तत्र हेतुत्वे तवैव गौरवात्,

न च पुरुषनिष्ठत्वे यावद्व्रीहिनाशेऽपि तन्नाशो न स्यादिति वाच्यम्?

तत्र कालादेरेव तन्नाशकत्वात्,

न च तस्य पुरुषनिष्ठत्वे स्वाश्रयसंयोगित्वरूपपरम्परासम्बन्धेन हेतुत्वेऽप्रोक्षितव्रीहावप्यवघातापत्तिः,

मम तु प्रोक्षितव्रीहिनिष्ठस्य तस्याप्रोक्षितव्रीहावभावान्न तदापत्तिरिति वाच्यम्?

स्वाश्रयनिरूपितविजातीयसंयोगसम्बन्धेनैव तस्य हेतुतयाऽप्रोक्षितव्रीहौ विजातीयसंयोगानुपगमेन तदापत्त्यभावात्,

न च पुरुषनिष्ठं तं प्रति प्रोक्षणस्य वैयधिकरण्येन हेतुत्वासम्भव इति वाच्यम्?

व्रीहिनिष्ठं प्रत्यपि जलसंयोगानुकूलकरादिक्रियारूपप्रोक्ष-

णस्य वैयधिकरण्येन हेतुत्वासम्भवात्,

न च व्रीहिनिष्ठं प्रति स्वजन्यजलसम्बन्धेन प्रोक्षणस्य हेतुत्वमिति वाच्यम्?

पुरुषनिष्ठं प्रत्यपि स्वानुकूलकृतिमत्त्वसम्बन्धेन हेतुत्वसम्भवात्

अथ प्रोक्षणजन्यव्यापारस्यानेकव्रीहिनिष्ठत्वे गौरवेण लाघवादात्मनिष्ठत्वे गयाश्राद्धजन्यादृष्टस्यामुत्रानेकपितृनिष्ठत्वे गौरवेण लाघवादेककर्त्तृनिष्ठताऽऽपत्तिः सिद्धान्तभङ्गेनेष्टापत्तेरभावात्,

न च फलसामानाधिकरण्यानुरोधेन तस्य नोक्तनिष्ठता न कर्त्तृनिष्ठतेति वाच्यम्?

अवघातरूपफलसामानाधिकरण्यानुरोधेन व्रीहिनिष्ठत्वस्याप्यापत्तेरिति चेत्?

अत्राहुः—अदृष्टस्य भोक्तृनिष्ठत्वेऽपि नानापुत्रकृतैकपित्रुद्देश्यकगयाश्राद्धस्थले भोक्तुरेकत्वेन लाघवसम्भवः,

न चैवं तस्य भोक्तृनिष्ठत्वं कर्तृनिष्ठत्वं वेति विनिगमनाविरह इति वाच्यम्?

तस्य कर्तृनिष्ठत्वे फलं प्रति स्वाश्रयविजातीयसंयोगिशरीरवत्त्वादिरूपपरम्परासम्बन्धेन हेतुत्वे गौरवेण लाघवादेव भोक्तृनिष्ठत्वात्,

न च भोक्तृनिष्ठत्वेऽपि गयाश्राद्धस्यादृष्टं प्रति परम्परासम्बन्धेन हेतुत्वे गौरवमिति वाच्यम्?

श्राद्धस्येच्छारूपत्यागात्मकतयोद्देश्यतासम्बन्धेन हेतुतया

गौरवाभावात्,

न च तादृशोद्देश्यतायां मानाभावो लाघवेन विषयतासि-द्धेरभावादिति वाच्यम्?

श्राद्धसमानाकारकालान्तरीणेच्छायां श्राद्धव्यवहाराभावेन तस्या अवश्योपेयत्वादिति दिक्,

अधिकमुपरिष्टाद्वक्ष्यते,

अथ व्रीहिनिष्ठायाः शक्तेरनङ्गीकारे व्रीहीन्प्रोक्षतीत्यादौ व्रीहीणां प्रोक्षणकर्मत्वानुपपत्तिः क्रियाजन्यफलशालित्वाभावा-दिति चेद्?

न-सक्तून् प्रोक्षतीत्यादाविवात्रापि जलसंयोगरूपप्रोक्षण-जन्यफलमादायैव कर्मत्वोपपत्तेः,

युज्यते चोक्तरीत्यैव व्रीहीणां प्रोक्षणकर्मत्वम् अन्यथा व्रीहि-निष्ठायाः शक्तेरुपगमेऽपि कर्मत्वस्य धात्वर्थताऽवच्छेदकफलशालि-त्वरूपत्वे कर्मत्वानुपपत्तेर्दुर्वारत्वात्, लौकिकप्रोक्षण आधेयशक्ते-स्त्वयाऽप्यनङ्गीकारेण तस्या धात्वर्थताऽवच्छेदकत्वाभावाद्, अत-एवास्मन्मतेऽपि व्रीहीणां स्वाश्रयविजातीयसंयोगरूपसम्बन्धेन प्रोक्षणजन्यादृष्टशालितया न कर्मत्वोपपत्तिः तस्य लौकिकप्रोक्ष-णेऽसम्भवेन धात्वर्थताऽवच्छेदकत्वासम्भवात्,

एतेन रक्तः पट इति प्रतीत्या रक्तस्य स्वाश्रयसंयोगेन पटमात्रनिष्ठत्ववत् संस्कृतो व्रीहिरिति प्रतीत्या स्वरूपसम्बन्धवि-शेषेणात्मनिष्ठादृष्टस्य व्रीहिमात्रनिष्ठतया तस्य तेन सम्बन्धेनाव-घातं प्रति हेतुत्वेन प्रोक्षितव्रीहावेवावघातो नाप्रोक्षित इत्यवघात-

नियमः; तेन सम्बन्धेन प्रोक्षणजन्यादृष्टशालितया व्रीहीणां कर्मत्वं चोपपद्यत इति शूलपाणिमिश्राद्युक्तमपि निरस्तम्,

तस्य धात्वर्थताऽनवच्छेदकत्वात् संस्कृतो व्रीहिरितिप्रतीतेः रक्तः पट इति प्रतीतिवत् परम्परयाऽदृष्टस्य व्रीहिमात्रनिष्ठतयोपपत्तौ साक्षात्स्वरूपसम्बन्धविशेषेण व्रीहिमात्रनिष्ठत्वे मानाभावाच्च,

यत्तु—यो यद्गतफलार्थितया क्रियते स तद्गतातिशयजनक इति नियमेन प्रोक्षणस्य व्रीहिगतावघातरूपफलार्थितया क्रियमाणत्वेन व्रीहिगतशक्तिरूपातिशयजनकत्वस्यावश्यकतया व्रीहिनिष्ठशक्तिसिद्धिरिति,

तदसत्—जलसंयोगमादाय सिद्धसाधनेन शक्त्यसिद्धेः; उक्तनियमस्य कालान्तरभाविफलानुकूलातिशयजनकत्वगर्भत्वेऽप्यात्मनिष्ठादृष्टमादायोपपत्तौ शक्तौ मानाभावः,

न चोक्तनियमस्य साक्षात्तद्गतत्वघटिततया शक्तिसिद्धिरिति वाच्यम्?

तथाऽपि तादृशनियमस्य वह्निगतहविस्सम्बन्धरूपफलार्थितया क्रियमाणे वह्निगतकालान्तरभाविफलानुकूलातिशयाजनके हविःप्रक्षेपे व्यभिचारेणासिद्धौ तद्बलेन शक्तिसिद्धेरसम्भवात्,

केचित्तु—शत्रुनिष्ठवधार्थितया क्रियमाणे शत्रुनिष्ठातिशयाजनके कर्त्तृगतादृष्टजनकश्येनादौ व्यभिचारादनुकूलतर्काभावाच्च तादृशनियमोऽप्रामाणिकः, अस्तु वा तादृशनियमस्तथाऽपि न तद्बलात् शक्तिसिद्धिः प्रोक्षणादेर्व्रीहिगतफलार्थितया क्रिय-

माणत्वस्यैवासिद्धेः प्रोक्षणादेः प्रधानाङ्गत्वेनादृष्टद्वारा प्रधानापूर्वफलकत्वाद् अत एव कृष्णले द्वारबाधेनावघातबाधेऽपि प्रोक्षणम्,

न चैवमेकस्य प्रोक्षणादन्यस्यावघातात्फलसिद्ध्यापत्तिरिति वाच्यम्?

व्यक्तिवचनानामिति न्यायेन प्रोक्षणकर्मणामेवावघातकर्मत्वलाभादित्याहुरिति दिक्,

एतेनाभिमन्त्रितपयःपल्लवादौ विषचालनादिशक्तिरपि निरस्ता वेदितव्या, तत्रापि मन्त्रपाठादितः पुरुष एवादृष्टस्वीकारात्,

यत्तु–देवताप्रतिमाऽऽदौ प्रतिष्ठाऽऽदिजन्यः चण्डालादिस्पर्शनाश्यश्च शक्तिविशेषोऽङ्गीकार्यः, न हि तत्र प्रतिष्ठाकर्त्तुरदृष्टेन निर्वाहः; तथा सति व्याधिकरणेन चण्डालादिस्पर्शेन तन्नाशस्यासम्भवितया चण्डालादिस्पृष्टप्रतिमापूजनादपि फलापत्तेः, प्रतिमानिष्ठशक्त्यङ्गीकारे च तस्याः समानाधिकरणचण्डालादिस्पर्शनाश्यत्वसम्भवान्नानुपपत्तिः, तस्याः पूजाफलहेतुत्वादिति,

तन्न–प्रतिष्ठाकर्तृगतादृष्टनाशं प्रति चण्डालादिस्पर्शस्य संयोगरूपस्य स्वाश्रयनिरूपितविजातीयसंयोगसम्बन्धेन हेतुत्वसम्भवेन चण्डालादिस्पृष्टप्रतिमापूजनात्फलोत्पत्त्यसम्भवाद्; अत एव मार्जनादिना प्रतिष्ठितपूर्वप्रतिमाऽऽरम्भकावयवसंयोगनाशेन प्रतिमाऽन्तरोत्पत्तावपि पूजाफलनिर्वाहः; अन्यथाऽऽश्रयनाशेन प्रतिष्ठाजन्यशक्तिनाशे पूजाफलानिर्वाहात्,

वस्तुतस्तु–प्रतिष्ठाकर्तृगतादृष्टं न चण्डालादिस्पर्शनाश्यं तदनाशेऽपि बाधकाभावात्,

न चैवं चण्डालादिस्पृष्टप्रतिमापूजनेऽपि फलापत्तिरिति वाच्यम् ?

स्वाश्रयनिरूपितविजातीयसंयोगसम्बन्धसमवायसम्बन्धोभयघटितसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकचण्डालादिस्पर्शाभावविशिष्टतादृशादृष्टस्यैव पूजाफलहेतुत्वोपगमात् ,

न चैवमपि प्रतिष्ठाकर्तरि मुक्ते तददृष्टनाशात्पूजाफलानुपपत्तिरिति वाच्यम् ?

तस्मिन्मुक्तेऽपि तददृष्टानाशात् कालादेरेव तन्नाशकत्वोपगमात् ,

एतेन तुलापरीक्षाऽऽदिविधिना तुलाऽऽदौ शक्तिर्जन्यते तथा च तुलाऽऽरूढस्य नमनोन्नमनादिकमित्याधेयशक्तिरावश्यकीत्यपि निरस्तम् ,

तत्रापि तुलाऽऽरूढ एव जयपराजयान्यतरजनकादृष्टविशेषोपगमेन तज्जन्यतुलानमनोन्नमनादेव तस्य जयपराजयान्यतरनिर्वाहात् ,

न च तददृष्टस्य व्यधिकरणतया कथं तुलागतनमनोन्नमनहेतुत्वमिति वाच्यम् ?

स्वाश्रयनिरूपितविजातीयसंयोगसम्बन्धेनैव तस्य तत्र हेतुत्वसम्भवात् ,

न च विनिगमनाविरहेण तुलायामेव कथं शक्तिर्न स्वीक्रियत इति वाच्यम् ?

परस्परसंयुक्तानेककाष्ठसूत्रादेः तुलापदार्थत्वेनैतेषु तत्स्वी-

कारे गौरवेण लाघवादेकस्मिन्नेवादृष्टविशेषस्वीकारस्योचितत्वात्,

के चित्तु—प्रतिष्ठाविधौ पूजाफलाफलयोस्तुलापरीक्षाऽऽदिविधौ जयपराजययोश्च देवतासन्निकर्षविप्रकर्षावेव प्रयोजकावित्याहुः,

अथाशोकादौ कामिनीचरणाभिघातदोहदादिना शक्त्याधानमवश्यमुपेयं कथमन्यथा चरणाभिघातदोहदादिषु नष्टेष्वप्यशोकादौ पुष्पोदय इति चेद् ?

अत्र मणिकाराः—कामिनीचरणाभिघाते दोहदादिभिराकृष्टभागान्तरजनितवृक्षान्तरादावेव पुष्पोदयः कालान्तरे पुष्पाद्युत्कर्षाद् वृक्षावयवोपचयावश्यम्भावेन वृक्षभेदावश्यकत्वात्,

यद्वा कामिनीचरणदोहदादिसंयोगध्वंसस्यैव समयविशेषावच्छिन्नस्य पुष्पोदयहेतुत्वमित्याहुः,

नव्यास्तु—अनुभवस्मरणयोरिव नियतेन पौर्वापर्येण सामयिकपुष्पोदयं प्रति चरणाभिघातदोहदादेः कारणत्वेऽवधृते तद्व्यापारत्वेनानुभवे संस्कार इव तत्पुष्पोदयभोक्तृगतादृष्टमेव कल्प्यते; न ह्यत्र मणिकारोक्तरीत्याऽदृष्टं विनैवोपपत्तिः सम्भवति, कामिनीचरणाभिघातादेर्लघोर्भागान्तराकर्षकत्वे मानाभावाद्; नापि चरणादिसंयोगध्वंस एव पुष्पोदयहेतुर्न तु चरणादिसंयोग इति द्वितीयकल्पोऽपि मणिकारोक्तः समञ्जसः; तथा सत्यनुभवध्वंस एव स्मृतिजनकोऽस्तु किमर्थमनुभवस्य स्मरणजनकत्वं कल्पयित्वा संस्कारस्य व्यापारत्वकल्पनं क्रियते ? तस्मा-

न्मङ्गलाद्याचारतुल्यतयाऽविगीतशिष्टाचारत्वेन वेदमूलकत्वक- ल्पनाद् दृष्टद्वाराभावे सति कालान्तरभाविफलजनकतया विहित- त्वेनादृष्टद्वारकत्वमेवास्य युक्तम्,

एवं च सर्वत्र मीमांसकोक्तशक्तिस्थले दृष्टद्वारसम्भवे ते- नैवोपपत्तिः; तदभावे त्वदृष्टेनैवेति न कुत्राप्याधेयशक्तिसिद्धि- रिति प्राहुः,

एवं ताम्रकांस्यादावम्लभस्मसंयोगजन्यशुद्धिरपि नाधेय- शक्तिरूपा, शक्तिविशेषाभावेऽपि तत्र तत्संयोगध्वंसस्य तत्संयोग- समानकालीनास्पृश्यस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभाव- सहितस्य शुद्धिपदार्थत्वात्,

केचित्तु—तत्र भस्मादिसंयोगजनितः कांस्याद्युपभोगकर्तृ- निष्ठोऽदृष्टविशेषः परम्परासम्बन्धेन कांस्यादिनिष्ठः शुद्धिपदार्थ- इत्याहुः,

एवमाचमनैकादशाहादिजन्या शुद्धिर्मलसंयोगपितृमरणादि- जन्याऽशुद्धिश्च नाधेयशक्तिरूपा किन्त्वदृष्टविशेषरूपैव,

अथानयोरुभयोरप्यदृष्टविशेषरूपत्वमुतैकस्यादृष्टविशेषरूप- त्वमपरस्य तदभावरूपत्वमिति चेद् ?

अत्र केचिद्—विनिगमनाविरहेणोभयोरेवादृष्टविशेषरूपत्वं न त्वेकस्यापराभावरूपत्वमित्याहुः,

पक्षधरमिश्रानुयायिनस्तु—अशुद्धिरेवादृष्टविशेषरूपा तद्ध्वंस- एव च शुद्धिपदार्थः; तदुक्तं—पक्षधरमिश्रैः प्रतिबन्धकाधर्मविशेषध्वं- सरूपत्वात् शुद्धिपदार्थस्येति, अस्यार्थः—मलसंयोगादिजन्याचम-

नादिनाश्यो दुरदृष्टविशेषोऽशुद्धिस्तद्ध्वंसः शुद्धिरिति,

यत्तु—इदमयुक्तं मलादिसंयोगनाश्याचमनादिजन्यादृष्टविशेषः शुद्धिस्तद्ध्वंसोऽशुद्धिरित्यस्यापि वक्तुं शक्यत्वात्,

न च मलादिसंयोगात् पितृमरणादितश्चाधर्मविशेषस्यावश्यकत्वेन तस्यानित्यतया तन्नाशस्याप्यावश्यकत्वेन तन्नाशजनकत्वमेवाचमनादेरेकादशाहादेश्च कल्प्यते लाघवाद्; न तु धर्मविशेषरूपशुद्धिजनकत्वमिति वाच्यम्?

पितृमरणादेः शुद्धिध्वंसमात्रजनकत्वेनाधर्मजनकत्वे मानाभावात्,

न चाशुद्धेः शुद्धिध्वंसरूपत्वे पूर्वनिमित्ताशौचादेव शुद्धिध्वंसे द्वितीयेन निमित्तेन प्रतियोगिविरहात् शुद्धिध्वंसरूपाशुद्धिजननासम्भवाद् अघानां यौगपद्ये तु ज्ञेयाऽशुद्धिर्गरीयसेतिवचनविरोध इति वाच्यम्?

तद्वचनस्य लक्षणया निमित्तयौगपद्यपरत्वात्,

न चैवं लक्षणाकल्पने गौरवमिति वाच्यम्?

अघशब्दस्यातिपातकादिनवविधपातकेष्वेव रूढतया शुद्धिध्वंसरूपाया अशुद्धेरघत्वाभावेन भवन्मतेऽपि तत्र लक्षणाया आवश्यकत्वात्,

न चाशुद्धेः शुद्धिध्वंसरूपत्वेऽशुद्धेः प्रतिबन्धकत्वं न स्याद् लाघवात् शुद्धित्वस्यैव हेतुताऽवच्छेदकतया शुद्धिध्वंसाभावत्वेनाहेतुतया तदभावत्वेन कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकताऽनुपपत्तेः; अन्यथा दण्डत्वेन दण्डाभावाभावरूपदण्डस्य घट-

हेतुतया दण्डाभावत्वेन घटं प्रति प्रतिबन्धकत्वापत्तेरिति वाच्यम् ?

अशुद्धेः प्रतिबन्धकताप्रतिपादकवेदाभावेन तस्याः प्रतिबन्धकत्वाभाव इष्टापत्तेः,

अथैवमशुचिः कर्म न कुर्वीतेत्यस्य शुद्धिध्वंसवान् कर्म न कुर्वीतेत्येव भवन्मतेऽर्थो वाच्यस्तथा च चण्डालादिस्पर्शानन्तरं स्नातोऽपि कर्म न कुर्यात् चण्डालादिस्पर्शजन्यस्य पूर्वशुद्धिध्वंसस्य तदानीमपि सत्त्वात्,

न च यावच्छुद्धिध्वंसवान् कर्म न कुर्वीतेति तदर्थ इति वाच्यम् ?

तथा सत्याशौचकालेऽपि भाविशुद्धिध्वंसाभावेन कर्मकरणापत्तेरिति चेद् ?

न—त्वन्मतेऽपि शुद्धः कुर्यादित्यस्याशुद्धिध्वंसवान्कुर्यादित्यर्थकतया स्नानोत्तरं चण्डालादिस्पर्शेऽपि स्नानजन्यप्राक्तनाशुद्धिध्वंसस्येदानीमप्यनुवृत्त्या कर्मकरणापत्तेः,

न च यावदशुद्धिध्वंसवान् कुर्यादिति तदर्थ इति वाच्यम् ?

शुद्धिकालेऽपि भाव्यशुद्धिध्वंसाभावेन यावदशुद्धिध्वंसाभावेन कर्मकरणानापत्तेः,

न च शुद्ध इत्यस्याशुद्धिसामान्याभाववानित्यर्थ इति वाच्यम् ?

तथा सत्यशुचिरित्यादेरपि शुद्धिसामान्याभाववानित्यर्थकत्वसम्भवेन ममाप्यदोषात्; तस्माद्विनिगमकाभावेनाचमनादि-

जन्यो मलसंयोगादिनाश्य एकादशाहादिजन्यः पितृमरणादि-नाश्यश्च धर्मविशेष एव शुद्धिः पितृमरणादिमलसंयोगादिजन्य-एकादशाहाचमनादिनाश्योऽधर्मविशेषोऽशुद्धिरित्येव सम्यगिति कैश्चिदुक्तम् ,

तदसत्—अशुद्धेः शुद्धिध्वंसरूपत्वे जननाशौचमध्ये यद्यपरं-जननं स्यात् तदा तदशौचव्यपगमे शुद्धिरिति वचनविरोधात्, तथा हि तदशौचव्यपगम इत्यस्य हि तज्जन्यशुद्धिध्वंसव्यपगम-इत्यर्थ एव त्वया वाच्यस्तत्र व्यपगमो ध्वंसः ; अत्यन्ताभावो-वा ? नाद्यः—ध्वंसस्य ध्वंसासम्भवाद् नान्त्यः—उत्तरकाले तस्य सर्वदैवानुवृत्तेः,

न च तत्राशौचपदं तज्जन्यशुद्धिध्वंसावच्छिन्नदशाहादि-कालपरमिति वाच्यम् ?

लक्षणाऽऽपत्तेरुक्तदोषाच्च, तस्मादशुद्धेरधर्मविशेषरूपत्वाव-श्यकत्वे तद्ध्वंसादेव शुद्धिव्यवहारोपपत्तौ न शुद्धेर्धर्मविशेष-रूपत्वं गौरवादिति प्राहुरिति दिक् ,

एवं चिकित्सास्थलेऽपि धातुसाम्येनैव निर्वाहे नाधेयशक्ति-कल्पनमिति बोध्यम् ,

अथ तथाऽपि व्रीह्यारम्भकपरमाणुष्ववश्यं व्रीहिप्रयोजक आ-धेयशक्तिविशेषोऽवश्यमुपेयः ; अन्यथा व्रीह्यादिवापे व्रीह्यादीना-मापरमाणवन्तं भङ्गेन तदारम्भकपरमाणुभिर्व्रीह्यादय एवोत्पाद्यन्ते न यवादय इत्यत्र नियामकाभावप्रसङ्गाद् ; अनियतारम्भवादि-मते तैरपि कदा चिद्यवाद्यारम्भादिविचित्रपाकजविलक्षणरूप-

सादिविशिष्टाः परमाणव एव व्रीह्याद्यारम्भका इत्युपगमेनैव सर्वसामञ्जस्यात् ,

एवमाद्यकर्षणादिना परमाणुपाकपरम्पराविशेषादेव हैमन्तिकसस्योत्पत्तिर्द्रष्टव्या,

अथ यत्र पाकजगुणा न सन्ति जलवाय्वादौ; तत्र क्व चिदुद्भूतरूपादिकमुत्पद्यते क्व चिन्नेत्यत्र नियामकान्तराभावेण तदनुकूलाधेयशक्तिविशेषोऽवश्यमुपेय इति चेद् ?

न–तत्राप्युद्भूतरूपत्वावच्छिन्नं प्रत्युद्भूतरूपत्वादिना हेतुत्वाकल्पनेनैवोद्भूतानुद्भूतरूपाद्युत्पत्तिनियमानिर्वाहात् ,

न चोद्भूतरूपवज्जलारम्भकपरमाणुत एवानुद्भूतरूपादिमज्जलाद्यारम्भात् तथा नियमो न सम्भवतीति वाच्यम् ?

अनियतारम्भवादिमतेऽपि तथा कल्पने प्रमाणाभावाद्, उद्भूतत्वमनुद्भूतत्वं च प्रागेव निरुक्तमित्यलं विस्तरेण,

अथातिरिक्तशक्तेरनङ्गीकारे दण्डचक्रादिकं घटशक्तं तुरीवेमादिकं पटशक्तमित्यादिव्यवहाराणां किन्निमित्तमिति चेत् ?

कारणताया एव तन्निमित्तत्वाद् , दण्डो घटशक्त इत्यादेर्दण्डो घटकारणमित्याद्यर्थकतया कारणताया एव शक्तिरूपत्वाभ्युपगमात् ।

ननु किमिदङ्कारणत्वम् ?

न च कार्याभावप्रयोजकीभूताभावप्रतियोगित्वमेव तत् ; प्रयोजकत्वं च व्यापकत्वमिति वाच्यम् ?

तथा सति घटादेरभावस्यापि घटारम्भकसंयोगाद्यभाव-

व्यापकत्वेन घटादेर्घटद्वारम्भकसंयोगादिकारणत्वप्रसङ्गात् ,

अथ प्रयोजकत्वं स्वरूपसम्बन्धविशेष एवेति चेद् ?

न—तत्र मानाभावात् ,

न च दण्डाभावप्रयुक्तो घटाभावः घटाभावप्रयोजको दण्डाभाव इत्यादिप्रतीतिरेव तत्र मानमिति वाच्यम् ?

तस्याः स्वप्रतियोगिप्रयुक्तप्रतियोगिकत्वस्वप्रतियोगिप्रयोजकप्रतियोगिकत्वादिविषयकतयैवोपपत्तेः ; किं च यदि स्वरूपसम्बन्धविशेषः प्रयोजकत्वं तदा कारणत्वमेव स्वरूपसम्बन्धविशेषरूपमस्तु ; किं स्वरूपसम्बन्धविशेषरूपप्रयोजकत्वघटितोक्तरूपकारणत्वेन ,

न चास्तु कारणत्वं स्वरूपसम्बन्धविशेष एवेति वाच्यम् ?

तस्य कारणस्वरूपत्वे तन्मात्रग्रहेऽपि कारणत्वबोधापत्तेः कारणताऽवच्छेदकदण्डत्वादिस्वरूपत्वेऽप्युक्तापत्तौ दण्डः कारणमित्यादिसहप्रयोगानुपपत्तेश्च दुर्वारत्वादिति चेद् ?

अत्राहुः—यत्र कार्याभावव्याप्यतेतरसमवधानाभावावच्छिन्ना तत्कारणं, तथा हि बीजेऽङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते; इतरसमवधानसत्त्वे बीजादङ्कुरोत्पत्तेः; किं त्वितराभावेनावच्छिद्यते, इतराभावे बीजस्याङ्कुराभावनियतत्वात् शिलाशकले त्वङ्कुराभावव्याप्यता शिलात्वेनैवावच्छिद्यते न त्वितराभावेण, इतरसमवधानेऽपि शिलाशकलादङ्कुरानुत्पत्त्येतरसमवधानस्य वैयर्थ्येन तद्व्याप्यतायामनवच्छेदकत्वात् ,

अथ बीजेऽङ्कुरोत्पत्तावपि यत्र बीजं तत्र कदाऽपि नाङ्कुरो-

त्पत्तिरतो यत्र वीजं तत्र सर्वदैवाङ्कुराभावेण बीजे कार्याभावव्या-
प्यताया वीजत्वेनैवावच्छेदादिति वीजं कारणं न स्यादितरा-
समवधानानवच्छेद्यत्वादिति चेद् ?

न–तादात्म्यसम्बन्धेन कार्याभावव्याप्यताया विवक्षितत्वात्, तथा च तादात्म्यसम्बन्धेन स्वस्मिन्नेव बीजं न बीजाधिकरण इति तादात्म्यसम्बन्धेन कार्याभावव्याप्यता वीजत्वत्वादिना तादात्म्यसम्बन्धेन स्वरूपतो वीजत्वादिनैव वाऽवच्छिद्यते न त्वितरासमवधानेन; इतरसमवधानेऽपि तादात्म्यसम्बन्धेन वीजत्वाद्यधिकरणे बीजत्वादौ कदाऽपि कार्यानुत्पत्तेः,

नन्वेवं समवायिकारणमेव कारणं स्यान्न तु निमित्तकारणं-दण्डादि, तादात्म्यसम्बन्धेन तद्वति दण्डादौ सर्वदैव कार्याभावेणेतरसमवधानाभावस्य वैयर्थ्येन तद्व्याप्यतायामवच्छेदकत्वाभावादिति चेद् ?

न–उत्पत्तिकालीनसम्बन्धावच्छिन्नप्रतियोगिताककार्याभावस्य विवक्षितत्वात्, स च सम्बन्धस्समवायोऽवध्यवधिमद्भावश्च दण्डाद्घट इत्यादिप्रतीत्या कार्यनिरूपितस्यावध्यवधिमद्भावसम्बन्धस्य कारणमात्र एवाङ्गीकाराद् अत एवेतरसमवधाने गोमये वृश्चिको दण्डे घट इति तत्रापि कार्याभावव्याप्यतेतरासमवधानावच्छिन्नैवेति न दोषः,

एतेन शिलायामपि संयोगेन कदा चिदङ्कुरस्य सत्त्वेन तत्रापि शिलात्वेनैव कार्याभावव्याप्यता नावच्छिद्यते किन्तु संयोगेनाङ्कुरसत्त्वप्रयोजकाभावे सत्येव कार्याभावव्याप्यतेति तत्रापी-

तरसमवधानाभावेनैव कार्याभावव्याप्यताऽवच्छिद्यत इति तदपि कारणं स्यादिति निरस्तम् ,

उत्पत्तिकालीनसम्बन्धावच्छिन्नाङ्कुराभावस्य संयोगेनाङ्कुरवत्यपि सत्त्वाद् न हि शिलायामङ्कुरसमवायोऽङ्कुरावधित्वं वाऽस्ति,

न चारण्यस्थदण्डादौ घटानारम्भककपाले वा घटादिस्वरूपयोग्ये सर्वदैव कार्याभावात् तत्राव्याप्तिरिति वाच्यम् ?

तादृशजातीयत्वस्य विवक्षितत्वाद् अत एव विषयतया कार्यमात्रजनक ईश्वरज्ञानादावपि नाव्याप्तिः, तत्रेश्वरज्ञाने निरुक्तकार्याभावव्याप्यत्वस्याप्रसिद्धावपि विषयतया घटादिजनककुलालादिप्रत्यक्षजातीयत्वेन लक्षणसत्त्वात्, तथा च तादात्म्यसम्बन्धेन यन्निष्ठोत्पत्तिकालीनसम्बन्धावच्छिन्नप्रतियोगिताककार्याभावव्याप्यता; उत्पत्तिकालीनकार्यसम्बन्धाभावव्याप्यता चेतरसमवधानाभावावच्छिन्ना तज्जातीयत्वं कारणत्वमिति पर्यवसितम् ,

न चेतरसमवधानाभावत्वे कार्याभावव्याप्यतायामितरसमवधानाभावत्वमवच्छेदकं तच्चेतरसमवधानाभावगर्भमिति तत्रातिप्रसङ्ग इति वाच्यम् ?

इतरसमवधानाभावेनेत्यस्येतरसमवधानाभावसहकृतत्वेनेत्यर्थकतया तत्रेतरसमवधानाभावस्य व्याप्यताऽवच्छेदकत्वेऽपीतरसमवधानाभावसहकृतत्वस्यातत्त्वेनादोषात् ,

वस्तुतस्तु–प्रागभाववत्त्वमेव कारणत्वं लाघवाद्, अवध्यवधिमद्भावसम्बन्धेन सर्वत्र कारणे कार्यस्य वृत्त्या तत्प्रागभाव-

सत्त्वाद् अरण्यस्थदण्डादौ लक्षणगमनं तज्जातीयत्वेन पूर्ववदेव; अत एवेतराभावसहकृतत्व इतरासहकृतत्वत्वस्य कार्याभावव्याप्यताऽवच्छेदकत्वेन तद्घटकतयेतरसमवधानाभावसहकृतत्वस्यावच्छेदकत्वेऽपि न तत्रातिव्याप्तिः,

न च प्रागभावत्वं प्रतियोगिजनकाभावत्वं तथा चात्माश्रय इति वाच्यम्?

प्रागभावत्वस्याखण्डोपाधिरूपत्वात् तदनङ्गीकारे तु गन्धानाधारसमयावृत्त्यभावत्वमेव प्रागभावत्वम्,

यदि च कार्यकारणयोरवध्यवधिमद्भावसम्बन्धे मानाभावो दण्डाद् घट इत्यादिप्रतीतेरन्यथैवोपपत्तेः; किंच प्रथमलक्षणमितरासमवधानादिदुर्वचपदार्थघटितं गुरु च, वस्तुतस्त्वित्यादिनोक्तं द्वितीयलक्षणमपि न चारु, प्रागभावत्वस्य गन्धानाधारेत्यत्र विनिगमनाविरहेण नीलानाधारत्वादिनिवेशप्रसङ्गेनाननुगमादिति विभाव्यते तदाऽनन्यथासिद्धत्वे सति कार्यनियतपूर्ववर्त्तित्वमेव कारणत्वम्, अत्र नियतपूर्ववर्त्तिनामन्यथासिद्धानां वारणाय सत्यन्तम्, अनन्यथासिद्धानामनियतपूर्ववर्तिनां वारणाय विशेष्यम्,

न चानियतपूर्ववर्त्तिनामन्यथासिद्धत्वोपगमेनानन्यथासिद्धत्वासिद्ध्या विशेष्यदलवैयर्थ्यमेवेति वाच्यम्?

वक्ष्यमाणरीत्याऽन्यथासिद्धत्वस्य तत्तद्व्यक्तित्वावच्छिन्नभेदकूटरूपतयाऽनियतपूर्ववर्त्तिनां तत्तद्व्यक्तित्वावच्छिन्नाप्रतियोगिताकभेदकूटानिवेशो गौरवेण विशेष्यदलेनैव तद्वारण-

स्यौचित्यात्,

न च दण्डादेरपि द्रव्यत्वादिनाऽन्यथासिद्धतयाऽसम्भव इति वाच्यम् ?

अन्यथासिद्ध्यनिरूपककार्यनियतपूर्ववर्त्तिताऽवच्छेदकधर्मवत्त्वस्यैव कारणत्वाद्; अत एवारण्यस्थदण्डादेः कार्यनियतपूर्ववर्त्तित्वाभावेऽपि तत्र नाव्याप्तिः, दण्डत्वादेस्तादृशधर्मस्य तत्रापि सत्त्वात्, कार्यनियतपूर्ववर्तिताऽवच्छेदकत्वं च कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणदेशनिष्ठाभावप्रतियोगिताऽनवच्छेदकत्वं, दण्डादेरपि कार्याधिकरणे कालान्तरावच्छेदेनाभावसत्त्वादसम्भववारणाय यावच्छेदेनेत्यन्तम्, अत्र कार्याधिकरणता कार्यताऽवच्छेदकसम्बन्धावच्छिन्ना ग्राह्या; तेन कालिकादिसम्बन्धेन घटाद्यधिकरणनिष्ठाभावप्रतियोगिताऽवच्छेदकत्वेऽपि दण्डत्वादेर्नासम्भवः, प्रतियोगिता च कारणताऽवच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, तेन दण्डत्वादेः कार्याधिकरणकपालादिनिष्ठसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगिताऽवच्छेदकत्वेऽपि न दोषः,

न च तथाऽपि यागादेः स्वर्गादिकारणत्वानुपपत्तिः; स्वर्गाद्यव्यवहितप्राक्क्षणावच्छेदेन स्वर्गाद्यधिकरणे यागाद्यभावसत्त्वादिति वाच्यम् ?

यागादेः स्वजन्यापूर्वसम्बन्धेन स्वर्गादौ कारणत्वात् तादृशप्रतियोगिताऽनवच्छेदकस्वस्वव्यापारान्यतरत्ववत्त्वस्यैव तत्त्वाच्च,

ननु घटादौ कपालसंयोगादेः कारणत्वानुपपत्तिः; तेषामव्याप्यवृत्तितया घटाद्यधिकरणनिष्ठाभावप्रतियोगिताऽनवच्छेदकत्वस्य कपालसंयोगत्वादावसत्त्वात्,

न चाभावे प्रतियोगिवैयधिकरण्यं निवेशनीयं; तथा च प्रतियोग्यनधिकरणकार्याधिकरणनिष्ठाभावप्रतियोगिताऽनवच्छेदकत्वस्य कपालसंयोगत्वादौ सत्त्वान्न दोष इति वाच्यम्?

तथा सति समवायेन ज्ञानादिकं प्रति समवायेनेच्छात्वादिनाऽपि कारणत्वापत्तेः; ज्ञानाद्यधिकरणनिष्ठेच्छाऽऽद्यभावस्य प्रतियोगिवैयधिकरण्याभावात्, एवमेकघटाद्यव्यवहितप्राक्क्षणावच्छेदेनापरघटाद्यधिकरणे दण्डाद्यभावसत्त्वाद्दण्डादावव्याप्तिः,

न च स्वाव्यवहितप्राक्क्षणावच्छिन्नस्वाधिकरणवृत्तित्वसम्बन्धेन कार्यवैशिष्ट्यस्याभावे निवेशान्नैव दोष इति वाच्यम्?

तथाऽपि घटत्वाद्यवच्छिन्नं प्रति तत्कपालत्वादिना तादात्म्येन हेतुताऽऽपत्तेः, घटाद्यधिकरणकपालाद्यन्तरे व्याप्यवृत्तेस्तत्कपालत्वाद्यवच्छिन्नभेदस्य वृत्तौ घटाद्यधिकरणस्य प्राक्क्षणस्यानवच्छेदकतया तादृशभेदमादायातिप्रसङ्गवारणस्याशक्यत्वात्,

न च कालावच्छिन्नवृत्तिकभेदाप्रसिद्ध्यैव नातिप्रसङ्ग इति वाच्यम्?

कालिकाव्याप्यवृत्तिभेदस्यैव तादृशस्य प्रसिद्धेः, तदनभ्युपगमे तु घटादौ तादात्म्येन कपालत्वादिना कारणत्वानुपपत्तिर्दुर्वारा तादृशभेदाप्रसिद्धेः, किञ्च विषयतासम्बन्धेनेच्छाऽऽदौ विषयतया ज्ञानादेः कारणत्वानुपपत्तिः; अवच्छेद्याधिकरणा-

सम्बद्धक्षणस्यानवच्छेदकतयेच्छाऽव्यवहितप्राक्क्षणावच्छिन्नस्य विषयतासम्बन्धेनेच्छाऽऽद्याधिकरणीभूतो योऽनागतपाकादिस्तद्वृत्तित्वस्याभावेऽप्रसिद्ध्या तल्लक्षणासम्भवात्,

अथ स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसम्बन्धावच्छिन्ना या कार्यनिष्ठभेदप्रतियोगिताऽवच्छेदकता तदनवच्छेदकत्वमेव कार्यनियतपूर्ववर्तिताऽवच्छेदकत्वं, सामानाधिकरण्यं च कार्यकारणभावघटकसम्बन्धाभ्यां बोध्यं, घटाद्यधिकरणे कपालसंयोगाद्यभावस्य सत्त्वेऽपि कुत्रापि घटादावुक्तोभयसम्बन्धेन कपालसंयोगादिमतो भेदस्यासत्त्वेन निरुक्तप्रतियोगिताऽवच्छेदकताऽनवच्छेदकत्वस्य कपालसंयोगत्वादौ सत्त्वान्नाद्यदोषावकाशः कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वस्यानिवेशान्नेतरेऽपि दोषा इति चेत्?

न-तथा सति घटादिकं प्रति रूपाभावत्वादिनाऽपि कारणत्वापत्तेः; रूपात्यन्ताभावस्य नित्यतया सर्वेष्वेव घटादिषु तदधिकरणक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वस्य सत्त्वात् सर्वेषामेव तेषामधिकरणे कपालादावुत्पत्तिकालावच्छेदेन रूपाभावस्य सत्त्वात्तत्सामानाधिकरण्यस्यापि तेषु सत्त्वादिति चेदु ?

मैवं-स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वसमानाधिकरणवृत्तित्वसम्बन्धेन कार्यविशिष्टो योऽभावस्तदीयसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताऽनवच्छेदकत्वस्यैव कार्यनियतपूर्ववर्तिताऽवच्छेदकत्वरूपत्वोपगमेनादोषादु, अव्याप्यवृत्तीनां कपालसंयोगादीनां समवायेनैवाव्याप्यवृत्तितया सामानाधिकरण्यसम्बन्धे-

जातथात्वेन घटादिसमानाधिकरणे कपालादिवृत्तिधर्मे घटाद्यव्य-वहितपूर्वक्षणावच्छेदेन सामानाधिकरण्यसम्बन्धावच्छिन्नप्रति-योगिताकतदभावस्यासत्त्वेन तेषां कारणत्वोपपत्तिः,

एवं विषयतयेच्छाऽऽदिसमानाधिकरणस्यानागतपाकादिवृ-त्तिधर्मस्येच्छाऽऽद्यव्यवहितपूर्वक्षणसम्बद्धतया तन्निष्ठाभाववृत्ति-त्वस्य तदवच्छिन्नतयाऽप्रसिद्ध्यभावेन तल्लक्षणगमनसम्भवान्न विषयतयेच्छाऽऽदौ विषयतया ज्ञानादेः कारणत्वानुपपत्तिः,

न च सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकाभा-वस्य सर्वस्य व्याप्यवृत्तितया तद्वृत्तित्वस्य निरवच्छिन्नतया निरुक्तलक्षणासम्भव इति वाच्यम्?

व्याप्यवृत्तेरपि प्रतीतिबलेनावच्छेदकाभ्युपगमात्, स्वा-व्यवहितपूर्वक्षणानवच्छिन्नत्वावच्छिन्नत्वोभयाभावरूपस्य स्वा-व्यवहितपूर्वक्षणावच्छिन्नत्वस्य निवेशेनादोषाच्च; अत एव घटत्वाद्यवच्छिन्नं प्रति तत्कपालत्वादिना कारणताऽऽपत्तिः-कपालत्वादिना कारणताऽनुपपत्तिश्च पूर्वपक्षोक्ता परिहृता भवति, अत्र प्रथमं सामानाधिकरण्यं कार्यताऽवच्छेदकसम्बन्धेन स्वा-धिकरणे स्वरूपसम्बन्धेन वृत्तित्वरूपं, द्वितीयं च सामानाधि-करण्यं कारणताऽवच्छेदकसम्बन्धेन स्वाधिकरणे स्वरूपसम्ब-न्धेन वृत्तित्वरूपमतो न सम्बन्धभेदमादाय दोष इति दिक्,

अन्यथासिद्ध्यनिरूपकत्वं च तद्धर्मावच्छिन्नं प्रति तद्धर्माव-च्छिन्नव्यापकताऽवच्छेदकीभूतयद्यद्धर्मावच्छिन्नेऽभियुक्तानां कार-णत्वाद्यव्यवहारस्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्व-

मेव, अन्यस्य दुर्वचत्वात्,

यत्तु–प्रसिद्धान्यथासिद्धिपञ्चकानिरूपकत्वमेव तत्सुवचम्, अन्यथासिद्धिपञ्चकं च यथा–अन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववर्त्तिताग्रहस्तस्य तं प्रत्यन्यथासिद्धिरेका यथा ज्ञानादिकं प्रति शब्दसमवायिकारणत्वेनाकाशस्य शब्दवत्त्वापेक्षया गुरुत्वेन प्रतियोगिताऽनवच्छेदकतया निरुक्तप्रतियोगिताऽनवच्छेदकत्वरूपनियतपूर्ववर्तिताऽवच्छेदकत्वस्य शब्दसमवायिकारणत्वे सत्त्वात्,

एवं कारणान्तरेण यस्य यं प्रति पूर्ववर्त्तिताग्रहस्तस्य तं प्रति द्वितीया–यथा घटादिकं प्रति दण्डविशिष्टचक्रादेः, एवमन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्कार्यं प्रति तत्कारणसहभूतस्य तृतीया–यथा पाकजरूपादिकं प्रति गन्धादिप्रागभावस्य, एवमगुरुव्याप्यधर्मेण यस्य यं प्रति कारणत्वं सम्भवति तस्य तं प्रति गुरुव्यापकधर्मेणान्यथासिद्धिश्चतुर्थी–यथा घटादिकं प्रति प्रमेयदण्डत्वद्रव्यत्वादिना दण्डादेः, एवं यद्धर्मावच्छिन्नं प्रति जनकताऽवच्छेदको यो धर्मस्तदवच्छिन्नं प्रति तस्य पञ्चम्यन्यथासिद्धिः यथा घटत्वाद्यवच्छिन्नं प्रति दण्डत्वादेरितीति,

तदसद्–उत्तरसंयोगं प्रति विभागादेर्हेतुत्वापत्तेः विभागत्वावच्छिन्ने निरुक्तान्यथासिद्धिपञ्चकाभावात्,

एवं प्रतिबन्धकाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वापत्तेश्च तत्तद्व्यक्तित्वविशिष्टे प्रसिद्धान्यथासिद्धिपञ्चकाभावात्,

न चैवमुक्तभेदकूटस्य प्रातिस्विकरूपेण युगसहस्रेणापि

ज्ञातुमशक्यतया कारणत्वस्य दुर्ज्ञेयत्वापत्तिरिति वाच्यम् ?

तादृशभेदकूटविशिष्टविशेषणताविशेषसम्बन्धेन निरुक्तनियतपूर्ववर्तिताऽवच्छेदकत्ववत्त्वस्यैव कारणताशरीरे निवेशनीयत्वात् सम्बन्धज्ञानस्य विशिष्टबुद्ध्यहेतुतयाऽनुपस्थितानामेव भेदानां सम्बन्धत्वेन भानसम्भवेनादोषात्,

न च निरुक्तभेदकूटविशिष्टविशेषणताविशेषस्य सम्बन्धत्वे मानाभाव इति वाच्यम् ?

तस्य सांसर्गिकविषयतावत्त्वरूपसम्बन्धत्वे बाधकाभावस्यैव मानत्वाद् अन्यथा परम्परासम्बन्धमात्रस्यैव सम्बन्धत्वोच्छेदापत्तेः,

न चैवमपि दण्डत्वेन घटजनकत्वमित्यादौ शाब्दबोधानुपपत्तिः; निरुक्तानियतपूर्ववर्तिताऽवच्छेदकधर्मस्य दण्डत्वादिरूपस्य दण्डत्वाद्यनवच्छिन्नत्वेन तृतीयार्थावच्छिन्नत्वस्य जनकत्वेऽन्वयासम्भवादिति वाच्यम् ?

तत्राभेदस्य तृतीयाऽर्थत्वोपगमेन घटत्वावच्छिन्नं प्रत्यन्यथासिद्ध्यनिरूपको नियतपूर्ववर्तिताऽवच्छेदकश्च धर्मो दण्डत्वाभिन्न इत्याद्याकारकशाब्दबोधसम्भवेनादोषात्,

वस्तुतस्तु—अन्यथासिद्ध्यनिरूपकत्वं न निरुक्तभेदकूटरूपं तथा सति घटादिकं प्रत्यन्यथासिद्धिनिरूपकं यत्प्रमेयदण्डत्वादि तदन्यस्य दण्डात्वाद्यभेदविरहेण दण्डत्वादिना घटादिजनकत्वानुपपत्तेः; किन्तु घटत्वाद्यवच्छिन्नं प्रति नियतपूर्ववर्तिताऽवच्छेदकेन यादृशयादृशरूपेणाभियुक्तानां कारणत्वाव्यवहारस्तादृश-

तादृशधर्मानवच्छिन्नप्रकारताऽवच्छेदकत्वमेव घटत्वाद्यवच्छिन्नं-प्रत्यन्यथासिद्ध्यनिरूपकत्वमित्युपेयम् ,

एवं च दण्डत्वेन घटजनकत्वमित्यादौ तृतीयाऽर्थोऽवच्छिन्न-त्वमेव ; तस्य च निरुक्तान्यथासिद्ध्यनिरूपकत्वघटितायां प्रकार-तायामन्वयान्न काऽप्यनुपपत्तिः,

एतेन घटादिकं प्रत्यन्यथासिद्ध्यनिरूपकस्य नियतपूर्व-वर्त्तिताऽवच्छेदकस्य च दण्डत्वादेः प्रमेयदण्डत्वाद्यभिन्नतया प्रमेयदण्डत्वेन घटजनकत्वमित्यादिप्रयोगापत्तिरित्यपि निर-स्तमिति दिक्,

प्रकाशकारानुयायिनस्तु—अन्यथासिद्ध्यनिरूपकत्वं नोक्त-भेदकूटरूपं पञ्चान्यथासिद्धिनिरूपकत्वाभावरूपस्यैव तस्य सुव-चत्वात् , अन्यथासिद्धिपञ्चकं च—यथा येन सहैव यस्य यं-प्रति पूर्ववर्तित्वज्ञानं यथा घटं प्रति दण्डरूपस्य, अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववर्त्तित्वज्ञानं यथा श-ब्दं प्रति पूर्ववर्तित्वे ज्ञात एव घटं प्रत्याकाशस्य, अन्यत्र क्लृप्तपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वं यथा गन्ध-वति गन्धानुत्पादाद्गन्धं प्रति गन्धप्रागभावस्य नियतपूर्वव-र्तित्वकल्पनाद्गन्धं प्रति पाकजस्थले रूपप्रागभावादीनां, यथा वा घटाद्यन्तरं प्रति क्लृप्तपूर्ववर्तिताकदण्डादिजातीयेन तत्सहभूत-रासभादेस्तद्घटादावन्यथासिद्धत्वं यत्र जन्यपूर्वभावे ज्ञाते जन-कस्य पूर्वभावो ज्ञायते तत्र जन्येन जनकस्य यथा कुलालेन घटं प्रति कुलालपितुः यमादायैव यस्यान्वयव्यतिरेकौ गृह्येते तेन

तस्य यथा दण्डादिना दण्डत्वादेरिति,

अत्र येन सहैवेत्यादेरयं निष्कर्षः—स्वतन्त्रान्वयव्यतिरेकशालियन्निष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्ययन्निष्ठयद्धर्मावच्छिन्नविशेष्यताशालिनो यद्धर्मावच्छिन्नं प्रति पूर्ववर्तित्वं गृह्यते तद्धर्मावच्छिन्नस्य तस्य तेन रूपेण तद्धर्मावच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशालिना तेनान्यथासिद्धिः, स्वातन्त्र्यं चेतरान्वयाघटितत्वादिकमिति, भवति च दण्डरूपं घटपूर्ववर्त्तीतिज्ञानीयताद्दशविशेष्यताशालिनो दण्डरूपस्य स्वतन्त्रान्वयव्यतिरेकशालिना दण्डेनान्यथासिद्धिः, अत्र यन्निष्ठविषयतानिरूपितत्वमात्रनिवेशे दण्डरूपं घटपूर्ववर्तीतिज्ञानीयरूपत्वनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यरूपनिष्ठरूपत्वावच्छिन्नविशेष्यताशालिनो रूपस्य रूपत्वेनान्यथासिद्धिप्रसङ्ग इति, शाल्यन्तं यत्पदार्थविशेषणम्,

न च तत्रेष्टापत्तिः; कारणेनाकारणस्यान्यथासिद्धेरेवाभियुक्तैरङ्गीकारात् तत्र रूपस्येव रूपत्वस्याप्यकारणत्वात्,
न चात्र स्वतन्त्रान्वयव्यतिरेकशालियन्निष्ठविषयतानिरूपितयन्निष्ठेत्याद्येवास्तु कृतं यत्पदार्थे स्वतन्त्रान्वयव्यतिरेकशून्यत्वविशेषणेनेति वाच्यम्?

अत्र दण्डचक्रयोर्घटपूर्ववर्तिताज्ञानं दण्डवच्चक्रं घटपूर्ववर्त्तीत्याकारकं वृत्तं; तत्रैतज्ज्ञानीयस्वतन्त्रान्वयव्यतिरेकशालिदण्डनिष्ठविषयतानिरूपितचक्रनिष्ठचक्रत्वावच्छिन्नविशेष्यताशालिनश्चक्रस्य दण्डेनान्यथासिद्धिवारणाय स्वतन्त्रान्वयव्यतिरेकशून्य-

विशेषणस्यावश्यकत्वात् ,

न च दण्डादिना दण्डत्वादेरन्यथासिद्धरप्यत्रैवान्तर्भावः सम्भवति तथा च यमादायैवेति पञ्चम्यन्यथासिद्धिर्व्यर्थेति वाच्यम् ?

दण्डो घटपूर्ववर्ती दण्डत्ववान् घटपूर्ववर्तीत्यादिज्ञानीयस्वतन्त्रान्वयव्यतिरेकशालिदण्डनिष्ठविशेष्यताऽऽत्मकविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यदण्डत्वादिनिष्ठप्रकारतारूपविषयतायायद्धर्मावच्छिन्नविशेष्यतात्वाभावेन तस्या अत्रान्तर्भावासम्भवात् ,

न च विशेष्यतात्वपर्यन्तानिवेशवैयर्थ्येन दण्डत्ववान् घटपूर्ववर्त्तीत्यादिज्ञानमादायात्रैवान्तर्भावः सम्भवत्येवेति वाच्यम् ?

विषयतात्ववद्विशेष्यतात्वस्याप्यखण्डत्वेन यथासन्निवेशे वैयर्थ्याभावात् ,

ननु तथाऽपि वह्न्याद्यनुमितिं प्रत्यप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शत्वादिना हेतुत्वं धूमपरामर्शत्वादिनाऽप्रामाण्यज्ञानाभावत्वादिना पृथगेव हेतुत्वमिति पक्षद्वयेऽप्यप्रामाण्यज्ञानाभावेन धूमपरामर्शादेरन्यथासिद्धिप्रसङ्गो दुर्वारः; तत्राप्यप्रामाण्यज्ञानाभावविशिष्टधूमप्रकारकपरामर्शः वह्न्यनुमितिपूर्ववर्तीत्यादिज्ञानीयस्वतन्त्रान्वयव्यतिरेकशाल्यप्रामाण्यज्ञानाभावनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यधूमप्रकारकपरामर्शादिनिष्ठपरामर्शत्वाद्यवच्छिन्नविशेष्यताशालिनो वह्न्याद्यनुमितित्वावच्छिन्नं प्रति पूर्ववर्तित्वज्ञानादिति चेद् ?

न–स्वतन्त्रान्वयव्यतिरेकशून्ययन्निष्ठाखण्डधर्मावच्छिन्नवि-

शेष्यताशालित्वविवक्षणेन परामर्शत्वादेरखण्डधर्मत्वाभावेनोक्तातिप्रसङ्गानवकाशाद् , रूपत्वादेश्चाखण्डधर्मतया नासम्भवः; अत एव कुलाजनको घटपूर्ववर्त्तीतिज्ञानीयस्वतन्त्रान्वयव्यतिरेकशालिकुलालनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यकुलालजनकनिष्ठकुलालजनकत्वावच्छिन्नविशेष्यताशालिनो घटपूर्ववर्तित्वग्रहात् स्वतन्त्रान्वयव्यतिरेकशालिना कुलालेनैव कुलालपितुरेतदन्यथासिद्धिमध्यनिवेशसम्भवेन यत्र जन्यपूर्वभाव इत्यादिचतुर्थान्यथासिद्धिवैयर्थ्यमिति शङ्काया अपि निरासः,

कुलालजनकत्वस्याखण्डधर्मत्वाभावात् ,

वस्तुतो—विशेष्यतायामखण्डधर्मावच्छिन्नत्वं न निवेश्यते किन्तु स्वतन्त्रान्वयव्यतिरेकशून्यस्वतन्त्रान्वयव्यतिरेकिताऽवच्छेदकधर्मसमानाधिकरणत्वमेव निवेश्यते धूमपरामर्शस्य च न स्वतन्त्रान्वयव्यतिरेकिताऽवच्छेदकाप्रामाण्यग्रहाभावत्वसामानाधिकरण्यमिति न धूमपरामर्शस्याप्रामाण्यग्रहाभावेणान्यथासिद्धिः न वा कुलालपितुः स्वतन्त्रान्वयव्यतिरेकिताऽवच्छेदककुलालत्वसामानाधिकरण्यमिति कुलालपितुर्न तदन्यथासिद्ध्यन्तर्भावशङ्काऽपि,

अथैतत्कल्पे स्वतन्त्रान्वयव्यतिरेकशालियन्निष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकिताऽवच्छेदकसमानाधिकरणयन्निष्ठयद्धर्मावच्छिन्नविशेष्यताशालिनो यद्धर्मावच्छिन्नं प्रति पूर्ववर्तित्वं गृह्यते तद्धर्मावच्छिन्नस्य तद्धर्मावच्छिन्नं प्रति तेनान्यथासिद्धिरित्येव निष्कर्षोऽस्तु द्वितीययत्पदार्थे स्वतन्त्रान्वयव्यतिरेक-

शून्यत्वस्य निवेशो माऽस्तु, चक्रादेश्च दण्डवच्चक्रं घटपूर्ववर्तीत्यादि-ज्ञानीयोक्तविशेष्यताशालित्वेऽपि स्वतन्त्रान्वयव्यतिरेकिताऽवच्छेदकदण्डत्वादिसामानाधिकरण्याभावेन चक्रादेर्दण्डादिनाऽन्यथा-सिद्धिप्रसङ्गाभावादिति चेद् ?

न—समवेतत्वसम्बन्धेन दधिविशिष्टं दधि दधिपूर्ववर्तीतिज्ञा-नीयस्वतन्त्रान्वयव्यतिरेकशालिदधिनिष्ठविषयतानिरूपितस्वत-न्त्रान्वयव्यतिरेकिताऽवच्छेदकदधित्वसमानाधिकरणदधिनिष्ठद-धित्वावच्छिन्नविशेष्यताशालिनो दध्नो दध्नाऽन्यथासिद्धिवार-णाय स्वतन्त्रान्वयव्यतिरेकशून्यत्वस्य द्वितीययत्पदार्थविशेषण-तया निवेशस्यावश्यकत्वात्, तादृशावच्छेदकसामानाधिकरण्यं-च तादृशावच्छेदकताघटकसम्बन्धेन बोध्यं तेन सम्बन्धभेदमा-दाय न दोष इति दिक्,

अन्यं प्रतीत्यादि—

न च यागादेरपूर्वपूर्ववृत्तित्वं गृहीत्वैव स्वर्गादिकं प्रति-पूर्ववर्तित्वग्रहाद् यागादेः स्वर्गादावन्यथासिद्धिः स्यादिति वाच्यम् ?

तद्ग्रहं विनाऽपि साक्षात्परम्परासाधारण्येन स्वर्गपूर्ववर्त्ति-त्वग्रहात्,

एतेन यागादेः स्वर्गपूर्ववर्तित्वं गृहीत्वैवापूर्वपूर्ववृत्तित्वग्र-हादपूर्वे यागादेरन्यथासिद्धिरपि परिहृता, अन्यहेतुत्वेनैव सिद्ध-स्यान्यथासिद्धावेतत्पर्यवसानाद्, अत एव कुलालपितुरप्यत्रै-वान्तर्भावसम्भवे यत्र जन्यपूर्वभाव इत्यादिचतुर्थान्यथासिद्धिवै-

यर्थ्यमिति शङ्काया नावकाशः, तत्रापि कुलालपितुः कुलालहेतुकत्वेनैवासिद्ध्या मानान्तरसिद्धस्य तस्य कुलालपूर्ववृत्तित्वग्रहं विनाऽपि साक्षात्परम्परासाधारणफलपूर्ववर्तित्वग्रहात्,

न चैवमाकाशादेर्घटादिकं प्रतीव संयोगादिकं प्रत्यपि हेतुता न स्यात् तत्रापि शब्दं प्रति पूर्ववर्तित्वग्रहोत्तरमेव संयोगादिकं प्रति पूर्ववर्तित्वग्रहादिति वाच्यम्?

अन्यं प्रतीत्यादेर्यद्धर्मे यद्धर्मावच्छिन्ननिरूपितपूर्ववर्तिताऽवच्छेदकत्वग्रहोत्तरकाल एव यद्धर्मावच्छिन्ननिरूपितनियतपूर्ववर्तिताऽवच्छेदकत्वग्रहस्तद्धर्मावच्छिन्नस्य तद्धर्मावच्छिन्नं प्रति तेन रूपेण कारणतायामन्यथासिद्धिरित्यर्थकतयाऽऽकाशस्याप्याकाशत्वेन रूपेण संयोगत्वावच्छिन्नं प्रति कारणत्वेऽन्यथासिद्धेरिष्टत्वाद्, द्रव्यत्वेन रूपेण संयोगत्वावच्छिन्नं प्रति पूर्ववर्तित्वग्रहस्य च शब्दत्वावच्छिन्ननिरूपितपूर्ववर्त्तित्वग्रहोत्तरकालीनत्वाभावेन गगनस्य द्रव्यत्वेन रूपेण संयोगत्वावच्छिन्नं प्रति कारणत्वे बाधकाभावात्,

एतेनाकाशस्य घटादिकं प्रति तद्व्यक्तित्वशब्दाश्रयत्वादिना कारणत्वापत्तिर्दुर्वारा तेन रूपेणोपस्थितस्याकाशस्य शब्दपूर्ववर्तित्वग्रहं विनाऽपि घटादिपूर्ववर्तित्वग्रहसम्भवादित्यपि निरस्तम्,

अन्यहेतुत्वेनैव सिद्धस्यान्यथासिद्धावेव तत्पर्यवसानेनाकाशस्यातीन्द्रियतया तस्य प्रत्यक्षादिप्रमाणासिद्धतया शब्दो द्रव्यहेतुको जन्यगुणत्वादित्यनुमानादेव कार्यकारणभावरूपानुकूल-

तर्कसहितात् तत्सिद्ध्या येन केनापि रूपेणाकाशोपस्थितौ शब्दपूर्ववर्तित्वग्रहस्यापेक्षिततया तदुपस्थिते शब्दपूर्ववर्तित्वग्रहोत्तरकालीनतया तद्व्यक्तित्वादिना घटादिकारणतायामपि निरुक्तान्यथासिद्धेरेव बाधकत्वात्,

न च शब्दप्रत्यक्षे श्रोत्रत्वेन कारणत्वं न स्यात्; आकाशात्मकश्रोत्रस्य शब्दपूर्ववृत्तित्वं गृहीत्वैव शब्दप्रत्यक्षपूर्ववर्तित्वग्रहेणान्यथासिद्धत्वादिति वाच्यम् ?

अन्यं प्रतीत्यस्य फलाननुगुणमन्यं प्रतीत्यर्थकतया प्रत्यक्षे विषयस्य हेतुतया शब्दस्य फलानुगुणतया समवायिकारणविधया शब्दहेतुतयैवेन्द्रियविधया शब्दप्रत्यक्षहेतुतयाऽपि सिद्ध्याऽन्यहेतुतयैव श्रोत्रस्य सिद्ध्यभावेन चादोषात्,

न चैवमपि कार्यमात्रे कालदिशोरहेतुत्वापत्तिः; तत्रापि कालिकादिपरत्वापरत्वपूर्ववर्तित्वग्रह एव कार्यमात्रे कालदिशोः पूर्ववर्तित्वग्रहादिति वाच्यम् ?

तादृशपूर्ववर्तित्वग्रहं विनाऽप्याधारत्वेन पूर्ववर्तित्वग्रहसम्भवात् तादृशपूर्ववर्तित्वग्रहं विनाऽपीदानीमत्र घट इत्यादिप्रतीत्यैव कालदिशोः सिद्धतया कारणत्वे बाधकाभावाच्चेति दिक्,

अन्यत्रेत्यादि—नन्वन्यत्र गन्धवति गन्धानुत्पादस्थले क्लृप्तनियतपूर्ववर्तिना गन्धप्रागभावेण पाकजस्थले गन्धं प्रति रूपादिप्रागभावाणां यथाऽन्यथासिद्धिस्तथाऽन्यत्र रूपादिमति रूपाद्यनुत्पादस्थले क्लृप्तनियतपूर्ववर्तिभिः रूपादिप्रागभावैः पाकजस्थले गन्धं प्रति गन्धप्रागभावस्यान्यथासिद्धिः स्यादिति चेद् ?

नैवम्—अन्यत्र क्लृप्तेत्यस्यावश्यक्लृप्तेत्यर्थकत्वाद्, अवश्यक्लृप्तत्वं च शीघ्रोपस्थितिकत्वं, तच्च गन्धप्रागभावस्यैवास्ति गन्धं प्रति कारणताविचारे गन्धरूपप्रतियोगिन उपस्थित्या तस्योपस्थितेरिति; तेन रूपादिप्रागभावानामन्यथासिद्धिः, रूपाद्यनुपस्थित्या रूपादिप्रागभावानामनुपस्थित्या न शीघ्रोपस्थितिकत्वमिति न तैर्गन्धप्रागभावस्यान्यथासिद्धिः, क्वचित् शरीरलाघवरूपमप्यवश्यक्लृप्तत्वम् अत एव व्यासज्यवृत्तिघटाकाशद्वित्वादिप्रत्यक्षवारणाय व्यासज्यवृत्तिधर्मप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य न हेतुत्वं-यावत्त्वनिवेशेन गौरवात् किन्तु तत्र स्वाश्रयसमवेतत्वसम्बन्धेन प्रत्यक्षविषयत्वाभावस्य प्रतिबन्धकत्वमुपगम्य तदभावस्य हेतुत्वं-तत्र शरीरलाघववतोक्ताभावेन गुरुशरीरस्य यावदाश्रयप्रत्यक्षस्यान्यथासिद्धिः,

यत्तु—द्रव्यप्रत्यक्षे शरीरलाघववता महत्त्वेन गुरुशरीरस्यानेकद्रव्यवत्त्वस्यान्यथासिद्धिरित्युदाहरणम्,

तदसद्—आत्मप्रत्यक्षे व्यभिचारेण द्रव्यप्रत्यक्षेऽनेकद्रव्यवत्त्वस्य नियतपूर्ववर्तित्वाभावादेवाकारणत्वसम्भवेऽन्यथासिद्ध्यनपेक्षणात्,

न च बहिर्द्रव्यप्रत्यक्षत्वस्य जन्यताऽवच्छेदकत्वेन व्यभिचार इति वाच्यम्?

बहिष्ट्वस्य दुर्वचत्वाद् गौरवाच्च, क्वचिल्लाघवान्तरस्याप्यवश्यक्लृप्तत्वरूपता; अत एव व्याप्यधर्मावच्छिन्नेन व्यापकधर्मावच्छिन्नस्यान्यथासिद्धिः कारणाल्पत्वलाघवात्,

न चैवं सम्बन्धादिलाघवमादायावश्यक्लृप्तेन दण्डादिना दण्डरूपादेरन्यथासिद्धौ किमन्यान्यथासिद्ध्येति वाच्यम्?

शब्दानुगमेनैक्यस्याकिञ्चित्करतया तत्तल्लाघवकृतावश्यक्लृप्तत्वानामत्राप्रवेशेनान्येषामवैयर्थ्यादिति दिक्,

यत्र जन्यपूर्वभाव इत्यादि, स्वजन्यस्य यत्फलं प्रति पूर्ववर्तित्वे ज्ञाते स्वस्य यत्फले पूर्ववर्तित्वं ज्ञायते तत्फलं प्रति स्वजन्येन स्वस्यान्यथासिद्धिरित्यर्थः, घटं प्रति कुलालपितुः साक्षादजनकत्वेन कुलालस्य घटजनकत्वं गृहीत्वैव तद्द्वारा घटपूर्ववर्तित्वग्रहेण घटं प्रति कुलालेन तत्पिताऽन्यथासिद्ध इति दिक्,

यमादायैवेति, यथा दण्डादिना दण्डत्वादेरन्यथासिद्धिः; यथा प्रथमे नास्यान्तर्भावस्तथा प्रागेवोक्तमिति दिक्,

न चोत्तरदेशसंयोगं प्रति विभागत्वादिना विभागस्य कारणत्वापात्तिरेवं प्रतिबन्धकाभावस्य तद्व्यक्तित्वेन कारणत्वापत्तिश्चैतन्मते दुर्वारा तत्रोक्तान्यथासिद्धिपञ्चकाभावादिति वाच्यम्?

इष्टापत्तेः, विभागस्य हेतुत्वे मानाभावेन पूर्वसंयोगनाशद्वयस्य प्रतिबन्धकाभावस्य सर्वसिद्धहेतुत्वानुपपत्त्या तद्व्यक्तित्वेन प्रतिबन्धकाभावस्य हेतुत्वे चाभावत्वावच्छिन्नकारणताकाभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्यैवासम्भवेन प्रतिबन्धकाभावहेतुत्वस्यैवानुपपत्त्या चानुपपन्नकारणताकत्वस्याप्यवश्यक्लृप्तत्वान्तर्भावमुपेत्य तृतीयान्यथासिद्ध्यन्तर्भावसम्भवाच्च न प्रतिबन्धका-

भावहेतुत्वस्यैव,

न च तथाऽपि मणिकारेण चतुर्थपञ्चमान्यथासिद्धी विहाय त्रिविधान्यथासिद्धेरेवोक्त्या तद्विरोधापत्तिरिति वाच्यम् ?

तस्या उपलक्षणतयाऽन्यद्वयाक्षेपकत्वेन तद्विरोधाभावाद् युक्तिसिद्धेऽर्थे ग्रन्थविरोधस्यादोषत्वाच्चेत्याहुः,

मणिकारानुयायिनस्तु—अन्यथासिद्धिस्त्रिविधैव चरमान्यथासिद्धिद्वये मानाभावाद् , येन सहेत्यादेरवच्छेद्यावच्छेदकान्यतरभूतेन सहेत्याद्यर्थकतया दण्डत्वादेराद्यायामन्तर्भावः कुलालस्य शीघ्रोपस्थितिकतया कुलालपितुरपि तृतीय एवान्तर्भावइत्याहुः,

अन्ये तु—अवश्यक्लृप्तेत्यादिरेकैवान्यथासिद्धिः, तथा चावश्यकल्पनीयं नियतं लघु पूर्ववर्ति यत्तत्सहभूतं स्वतन्त्रान्वयव्यतिरेकहीनं सर्वमेव तेनान्यथासिद्धमिति फलितमित्याहुः,

परे तु—अन्यथासिद्धिशब्दो यौगिक एव न तु पारिभाषिकः, तथा च यस्य यत्कार्यं प्रति नियतपूर्ववर्तित्वम् अन्यथा प्रकारान्तरेण सिद्धं संवद्धं सम्भवति तत्कार्यं प्रति तदन्यथासिद्धं-प्रकारान्तरं च क्व चित् स्वतन्त्रान्वयव्यतिरेकाभावः यथा दण्डरूपादेः क्व चित्प्रमाणाभावः यथा घटादिकं प्रत्याकाशरासभादेः क्व चिद्गौरवं यथा कुलालपित्रादीनाहुः,

एतानि चत्वार्यपि मतान्यन्यथासिद्धिकुक्षिनिविष्टावश्यकत्वादीनां दुर्वचतयाऽसमञ्जसानि,

न च तेषामतिरिक्तत्वोपगमान्न दुर्वचत्वमिति वाच्यम् ?

तेषामतिरिक्तत्वोपगमे कारणत्वस्यैवातिरिक्तत्वोपगमस्यौचित्यात् तस्मात्पूर्वोपदर्शितभेदकूटरूपमेवान्यथासिद्ध्यनिरूपकत्वमित्येव न्यायः,

नवीनास्तु—कार्यनियतपूर्ववर्तिताऽवच्छेदकं दण्डत्वादिमत्त्वमेव कारणत्वं न त्वन्यथासिद्ध्यनिरूपकत्वमपि निवेशनीयं तन्निवेशे प्रयोजनाभावात्,

न चैवं तदज्ञानेऽपि कारणत्वज्ञानापत्तिरिति वाच्यम् ?

कारणत्वज्ञाने तज्ज्ञानस्य हेतुत्वात् तदज्ञानेऽपि कारणत्वज्ञानस्येष्टत्वाच्चेति प्राहुः,

दीधितिकारानुयायिनस्तु—कारणत्वं नोक्तरूपत्वेन कार्यताऽवच्छेदकाविशेषगर्भं, तेन सामान्यतः कारणत्वेन निश्चिते वस्तुनि किंधर्मावच्छिन्नं प्रतीदङ्कारणमिति विशेषजिज्ञासाऽनुपपत्तेः किन्तु पदार्थान्तरमेव,

युज्यते चैतदेव; अन्यथेष्टसाधनताबोधकानां स्वर्गकामो यजेतेत्यादिविधीनां प्रामाण्यानुपपत्तेः, तथा हि तेषां स्वर्गादिप्रतियोगिककारणतासामान्यबोधकतयैव हि प्रामाण्यं न तु कार्यताऽवच्छेदकविशेषगर्भकारणताबोधकत्वेनानुपस्थितस्वर्गत्वादेर्गङ्गास्नानादिजन्यस्वर्गे व्यभिचारेण यागकार्यताऽवच्छेदकत्वासम्भवाद् वैजात्यस्य कारणताग्रहोत्तरं तदनुपपत्त्या कल्पनीयत्वेन पूर्वमनुपस्थितत्वात्,

यत्तु—कारणपदप्रवृत्तिनिमित्तं कारणत्वं कार्यताऽवच्छेदकविशेषगर्भमेव, प्रवृत्त्यौपयिकं च योगक्षेमसाधारणं कार्यताऽव-

च्छेदकं विशेषागर्भमन्यदेव तद्बोधकतयोक्तविधीनां प्रामाण्योपपत्तिरिति,

तदसद्-एकेनैवातिरिक्तकारणत्वेनोपपत्तौ प्रवृत्त्यौपयिककारणत्वान्तरकल्पने मानाभावात्,

न च कारणत्वस्यातिरिक्तत्वे दण्डत्वादेर्नियतपूर्ववर्तित्वावच्छेदकत्वाग्रहेऽपि तेन रूपेण घटादिजनकत्वस्य ज्ञानापत्तिरिति वाच्यम् ?

तेन रूपेण घटादिजनकत्वज्ञाने तद्रूपविषयविशेष्यकघटादिनियतपूर्ववर्तिताऽवच्छेदकत्वज्ञानस्य हेतुत्वोपगमात् ,

न चैवं व्यञ्जकतयाऽऽवश्यकत्वात् तस्यैव कारणतारूपत्वमास्तामिति वाच्यम् ?

कार्यताऽवच्छेदकघटत्वाद्यनुपस्थितावपि दण्डः कारणं न वा; दण्डः कारणमित्यादिप्रत्ययानुरोधेनैव तस्यातिरिक्तत्वोपगमात् ,

एवं घटादौ दण्डादेः कार्यत्वमप्यतिरिक्तं न तु दण्डादिनियतोत्तरवर्तिताऽवच्छेदकधर्मवत्त्वं दण्डादेरनुपस्थितावपि घटः कार्यो न वा घटः कार्य इत्यादिप्रत्ययानुरोधादिति प्राहुः,

अत्रेदं बोध्यम्-अतिरिक्तकारणतावादिनाऽपि कारणतात्वमतिरिक्तमवश्यमुपेयम् अन्यथा कारणतायास्तदवच्छेदकभेदाभिन्नाया अननुगमेनानुगतप्रतीत्यनुपपत्तेः; तथा च घटत्वाद्यनुपस्थितावपि दण्डः कारणं न वा दण्डः कारणमित्यादिप्रतीतेः कारणतात्वावच्छिन्नविषयकत्वेनोपपत्तौ घटत्वाद्यनुपस्थितौ तादृशप्रतीतेरसिद्धतया चातिरिक्तकारणत्वे मानाभावः; अन्यथा व्यापकसा-

मानाधिकरण्यादिरूपव्याप्त्यादेरपि साध्यताऽवच्छेदकादिघटिततया तदनुपस्थितावपि धूमो व्याप्यो न वा धूमो व्याप्य इत्यादिप्रत्ययानुरोधेन व्याप्त्यादेरप्यतिरिक्तपदार्थत्वाङ्गीकारापत्तेः,

न चैवमुक्तायाः स्वर्गकामो यजेतेत्यादिविधीनां प्रामाण्यानुपपत्तेर्दुर्वारतैवेति वाच्यम् ?

तत्र विजातीयस्वर्गनिरूपितसमवायादेरेव कार्यताऽवच्छेदकसम्बन्धत्वोपगमेन स्वर्गत्वादेरेव कार्यताऽवच्छेदकत्वोपगमात् कार्यताऽवच्छेदकवैजात्यस्य स्वर्गधर्मत्वेनैव तत्र कारणताघटकत्वोपगमेन स्वरूपतस्तदनुपस्थितावपि स्वर्गधर्मत्वेन तद्घटितकारणताबोधसम्भवाच्चेति,

अधिकं शब्दपरिच्छेदे वक्ष्यत इति दिक्,

अत्रेदं बोध्यं—कारणपदप्रवृत्तिनिमित्तं प्रवृत्तिजनकेष्टसाधनताज्ञानविषयताऽवच्छेदकं च निरुक्तकारणत्वमेव न तु भिन्नम् एकेनैवोभयोपपत्तेः,

न च कारणपदस्य नानाऽर्थताऽऽपत्तिः ? इष्टत्वाद्, अतिरिक्तकारणतात्वस्य समभिव्याहृतपदोपस्थाप्यताऽवच्छेदकत्वस्य तदादिपदवद् बुद्धिविषयताऽवच्छेदकत्वस्य चोपलक्षणतया कार्यताऽवच्छेदकाद्यनुगमकतया शक्यताऽवच्छेदकताऽवच्छेदकत्वस्वीकारेण वा नानाऽर्थत्वपरिहारसम्भवाच्च,

अथ वा—व्याप्तिलक्षणोपदर्शितरीत्या व्याप्तिपदवत्कारणपदस्य कार्यताऽवच्छेदकधर्माद्यनन्तर्भावेणाभावप्रतियोगिताऽवच्छेदकधर्माश्रये खण्डशः शक्तिः समभिव्याहारविशेषाच्च दण्डादौ

घटादिकारणतालाभ इति न नानाऽर्थता दण्डो घटकारणमित्यादावन्वयबोधोऽप्युपदर्शितरीत्यैव बोध्यः,

यत्तु—पारिमाण्डल्यादिभिन्नत्वं सामान्यतः कारणपदप्रवृत्तिनिमित्तमिति,

तन्न—पारिमाण्डल्याद्यनुपस्थितावपि कारणत्वप्रत्ययाद्, यदप्युक्तरूपं कारणपदप्रवृत्तिनिमित्तमेव प्रवृत्त्यौपयिकं कारणत्वंचान्यदेव प्रवृत्तिजनकज्ञाननिष्ठविषयताविशेषरूपं वा लाघवादिति,

तदप्यसद्—एकेनैवोपपत्तेः, अनुमित्यौपयिकव्याप्त्यादेरपि विषयिताविशेषरूपत्वापत्तेश्च, अन्यत्स्वयमूह्यं सुधीभिरिति दिक्,

तच्च कारणत्वं त्रिविधं-समवायिकारणत्वासमवायिकारणत्वनिमित्तकारणत्वभेदात्, तत्र समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वं यथा घटादौ कपालादेः, प्रत्यक्षादौ विषयादेस्तादात्म्यसम्बन्धावच्छिन्नकारणतावत्त्वेऽपि तस्या विषयतासम्बन्धावच्छिन्नकार्यतानिरूपितत्वेन तादात्म्यसम्बन्धावच्छिन्नकार्यतानिरूपितत्वाभावान्न तत्रातिप्रसङ्गः, इच्छाऽऽदौ ज्ञानादेस्समवायसम्बन्धावच्छिन्नकार्यतानिरूपितकारणताशालित्वेऽपि तस्याः समवायसम्बन्धावच्छिन्नत्वेन तादात्म्यसम्बन्धावच्छिन्नत्वाभावान्न तत्राप्यतिप्रसङ्गः, समवायसंबन्धावच्छिन्नकार्यतानिरूपितसमवायस्वाश्रयसमवायान्यतरसम्बन्धावच्छिन्नकारणत्वमसमवायिकारणत्वं यथा घटादौ कपालसंयोगादेर्घटरूपादौ कपालरूपा-

देशे द्रव्यतत्समवेतादिचाक्षुषरूपादेरुक्तान्यतरसम्बन्धावच्छिन्न-कारणतावत्त्वेऽपि तस्या विषयतासम्बन्धावच्छिन्नकार्यतानिरूपितत्वेन समवायसम्बन्धावच्छिन्नकार्यतानिरूपितत्वाभावान्नातिप्रसङ्गः, घटादौ कपालादेः समवायसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावत्त्वेऽपि तस्यास्तादात्म्यसम्बन्धावच्छिन्नतयोक्तान्यतरसम्बन्धावच्छिन्नत्वाभावान्न तत्राप्यतिप्रसङ्गः, समवायस्वाश्रयसमवाययोरेकैकसम्बन्धावच्छिन्नत्वस्य कारणतायां निवेशे कपालसंयोगतद्रूपाद्योरेकैकस्यासंग्रह इति तदन्यतरसम्बन्धावच्छिन्नत्वस्य निवेशः,

ननु समवायेन पटादौ तुरीतन्तुसंयोगादेस्समवायेन कारणतया तत्र तस्याप्यसमवायिकारणत्वापत्तिः,

न च तुरीसंयोगत्वेनैव तस्य हेतुत्वं न तु तुरीतन्तुसंयोगत्वेनेति वाच्यम् ?

तुरीतन्तुसंयोगत्वेनैव तदापत्तेरेवमप्यनपायात् ,

न चेष्टापत्तिः ?

तुरीतन्तुसंयोगनाशेन पटनाशापत्त्या तदसम्भवात् ,

न च पटनाशे तन्तुद्वयसंयोगनाशत्वेन प्रतियोगितासम्बन्धेन द्रव्यनाशे स्वप्रतियोगिसमवायित्वव्यापकसमवायेन नाशत्वेन वा कारणत्वोपगमान्न तन्नाशात्पटनाशापत्तिः, चरमेऽव्यवहितोत्तरत्वस्य कार्यताऽवच्छेदके निवेशान्न समवायिकारणनाशजन्यद्रव्यनाशे व्यभिचार इति वाच्यम् ?

तथाऽपि तान्त्रिकाणां तुरीतन्तुसंयोगे पटासमवायिकारण-

त्वव्यवहाराभावेणेष्टापत्तेः कर्तुमशक्यत्वात्,

अथ तुरीतन्तुसंयोगे पटासमवायिकारणत्वापादनं न युक्तं-तुरीतन्तुसंयोगं विना पटाद्युत्पादवारणाय संयोगेन तुरीत्वेनैव कारणत्वोपगमात् तुरीसंयोगत्वापेक्षया तुरीत्वस्य कारणताऽवच्छेदकत्वे लाघवात्,

न चैवं संयोगेन चक्षुरादीनामेव कारणतया निर्वाहेण चक्षुरादिसंयोगत्वेन कारणत्वं न स्यादिति वाच्यम्?

चक्षुरादीनां प्रमाकरणत्वानुरोधेन तत्कल्पनाया आवश्यकत्वात्,

न च संयोगेन तुरीत्वेन कारणत्वेऽनेकसंयोगेषु कारणताऽवच्छेदकसम्बन्धत्वकल्पनागौरवेण लाघवात् तुरीसंयोगत्वेन हेतुत्वं कल्प्यते गुरुभूतेऽप्येकस्मिन्कारणताऽवच्छेदकत्वकल्पनाऽपेक्षयाऽनेकेषु कारणताऽवच्छेदकसम्बन्धत्वकल्पनाया गुरुत्वादिति वाच्यम्?

कारणताऽवच्छेदकधर्मग्रहस्य प्राथमिकतया प्रथमग्रहे लघुभूतधर्मे कारणताऽवच्छेदकत्वनिर्णये जाते तदुत्तरं कल्पनायाः फलमुखत्वेनादोषत्वात्,

न चैवं पटं प्रति लाघवात् संयोगेन तन्तुत्वेनैव हेतुतया तन्तुसंयोगत्वेन हेतुत्वं न स्यादिति वाच्यम्?

भावकार्यस्यासमवायिकारणजन्यत्वनियमानुरोधेनैव तादृशहेतुतासिद्धेरिति चेद्?

न-तथाऽप्यभिघातं प्रति वेगस्यासमवायिकारणत्वाप-

त्तेर्दुर्वारत्वात् ,

न चेष्टापत्तिः, अभिघातत्वस्य संयोगत्वव्याप्यजातिविशेषरूपतया संयोगत्वावच्छिन्नं प्रत्येव क्रियाया असमवायिकारणत्वस्य क्लृप्ततया तान्त्रिकाणां तथा व्यवहारेण वेगस्य निमित्तकारणत्वात् ,

यदि च वेगस्य न साक्षादभिघातहेतुत्वमपि तु क्रियाजननद्वारा तत्रापि वेगजन्यताऽवच्छेदकं न क्रियात्वं वेगाभावेऽपि नोदनेन क्रियोत्पादात् किन्तु वेगजन्यताऽवच्छेदकतया सिद्धा क्रियात्वव्याप्या जातिरेव,

एवं च तादृशजात्यवच्छिन्नं प्रति वेगत्वेन हेतुत्वमभिघातत्वावच्छिन्नं प्रति च विजातीयक्रियात्वेनेति वेगस्याभिघातकारणतायां मानाभावः

न चाभिघातत्वावच्छिन्नं प्रति विजातीयक्रियात्वेन कारणत्वं वेगत्वेन कारणत्वं वेत्यत्र विनिगमनाविरहेण वेगकारणताया अपि सिद्धिरिति वाच्यम् ?

वेगानाशेऽपि क्रिययाऽभिघातजननसन्देहेन क्रियां विनाऽभिघाताजननिर्णयेन च परित्यज्य च निश्चिताव्यभिचारकमितिन्यायेन सन्दिग्धव्यभिचारकेण वेगत्वेन कारणत्वासम्भवस्यैव विनिगमकत्वादिति विभाव्यते ; तदाऽप्यभिघाते स्पर्शस्य विभागे पूर्वसंयोगस्य सुखादावदृष्टस्येच्छाऽऽदौ ज्ञानादेश्चासमवायिकारणत्वापत्तिर्दुर्वारेति चेद् ?

मैवं—तत्र तान्त्रिकाणामसमवायिकारणत्वव्यवहाराभावस्य

सिद्धतयेष्टापत्तेः

यद्वाऽभिघातत्वावच्छिन्नकार्यतानिरूपितस्पर्शवृत्तिकारणताऽऽन्यत्वं विभागत्वावच्छिन्नकार्यतानिरूपितसंयोगवृत्तिकारणताऽन्यत्वमात्मविशेषगुणावृत्तित्वं चासमवायिकारणताशरीरघटककारणतायां निवेशनीयमिति सम्प्रदायः,

नव्यास्तु—कार्यविशेषघटितासमवायिकारणताशरीरप्रविष्टकारणत्वं न सामान्यतः कार्यविशेषाधिकरणनिष्ठाभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वरूपं किन्तु तत्तदसमवायिकारणताऽवच्छेदकरूपविशेषवत्त्वं तथा चाभिघातासमवायिकारणत्वमभिघातवन्निष्ठाभावप्रतियोगिताऽनवच्छेदकाक्रियात्ववत्त्वम् ,

एवं विभागासमवायिकारणत्वमपि क्रियात्वघटितं सुखादेरिच्छाऽऽदेश्चासमवायिकारणत्वमात्ममनःसंयोगत्वघटितं वाच्यमिति नोक्तापत्तिः,

एवं च पटादौ तुरीतन्तुसंयोगस्य तुरीतन्तुसंयोगत्वेन कारणत्वेऽप्यभिघाते विजातीयक्रियाद्वारा वेगस्य च कारणत्वेऽपि नासमवायिकारणत्वापत्तिः ; पटासमवायिकारणत्वस्य पटसमवायिनिष्ठाभावप्रतियोगिताऽनवच्छेदकतन्तुसंयोगत्वरूपधर्मवत्त्वघटितत्वाद् अभिघातासमवायिकारणत्वस्य च संयोगत्वावच्छिन्नाभिघातवन्निष्ठाभावप्रतियोगिताऽनवच्छेदकाक्रियात्ववत्त्वघटितत्वाद् अभिघातत्वावच्छिन्नवन्निष्ठाभावप्रतियोगिताऽनवच्छेदकवेगजन्यताऽवच्छेदकक्रियानिष्ठजातिमत्त्वघटितत्वाच्च,

यद्वाऽभिघातानन्तर्भावेण न निवेशः किन्तु सामान्यतः संयो-

गवन्निष्ठाभावप्रतियोगिताऽनवच्छेदकक्रियात्ववत्त्वानिवेशेनैवाभि-घाताख्यसंयोगतादितरसंयोगसाधारण्येन क्रियाया असमवायि-कारणतानिर्वाहः,

एवमन्यत्राप्यूह्यम् ,

न चैवमसमवायिकारणताशरीरेऽन्यथासिद्ध्यनिरूपकत्व-निवेशो व्यर्थः स्यादिति वाच्यम् ?

इष्टापत्तेः, कारणतासामान्यशरीर एव तन्निवेशात् ,

वस्तुतस्तु—तत्रापि तन्निवेशो व्यर्थ एव तस्यापि विशिष्य तत्तत्कारणताऽवच्छेदकधर्मघटितत्वेनैवानतिप्रसङ्गादिति प्राहुः,

केचित्तु—निमित्तकारणान्यवृत्तिकारणत्वस्यासमवायिकार-णताशरीरे निवेशान्नोक्तापत्तिरित्याहुः,

तदसद्—वक्ष्यमाणनिमित्तकारणताशरीरेऽसमवायिकारण-भेदनिवेशेन ज्ञप्तावन्योन्याश्रयापत्तेरिति दिक् ,

समवायिकारणासमवायिकारणभिन्नकारणत्वं निमित्त-कारणत्वं—यथा घटादौ दण्डादेः, समवायिकारणासमवायिका-रणयोरतिप्रसङ्गवारणाय भिन्नान्तनिवेशः,

नन्वीश्वरघटादिसंयोग ईश्वरस्य निमित्तकारणत्वानुपपत्तिः तस्य द्रव्यत्वेन रूपेण तादृशसंयोगकारणतया समवायिकारण-भिन्नत्वाभावाद्; इष्टापत्तौ चेश्वरस्य कार्यमात्रनिमित्तकारणता-सिद्धान्तविरोधादिति चेद् ?

अत्र केचिद्—उक्तलक्षणस्य यद्धर्मावच्छिन्नकार्यतानिरूपित-समवायिकारणताशून्यत्वविशिष्टयद्धर्मावच्छिन्नकार्यतानिरूपिता-

समवायिकारणताशून्यत्वसमानाधिकरणयद्धर्मावच्छिन्नकार्यता-निरूपितकारणताशालित्वं तद्धर्मावच्छिन्नं प्रति तस्य निमित्त-कारणत्वमित्यर्थकतया नानुपपत्तिः, जन्यत्वावच्छिन्नकार्यतानि-रूपितसमवायिकारणताशून्यत्वविशिष्टजन्यत्वावच्छिन्नकार्यता-निरूपितासमवायिकारणत्वशून्यत्वसमानाधिकरणजन्यत्वावच्छि-न्नकार्यतानिरूपितकारणताशालित्वस्येश्वरे सत्त्वात्,

अथैवं घटादिनिष्ठघटत्वाद्यवच्छिन्नकार्यतानिरूपितसमवा-यिकारणताया घटत्वाद्यवच्छिन्नकार्यतानिरूपितासमवायिकार-णतायाश्च कपालतत्संयोगादौ प्रसिद्धतया तच्छून्यत्वसमानाधि-करणघटत्वाद्यवच्छिन्नकार्यतानिरूपितकारणताशालित्वस्य द-ण्डादौ सत्त्वेन तत्र घटत्वाद्यवच्छिन्नकार्यतानिरूपितनिमित्तकार-णत्वसम्भवेऽपीश्वरघटसंयोगजन्यत्वावच्छिन्नकार्यतानिरूपितनि-मित्तकारणत्वस्यानुपपत्तिरेव जन्यत्वावच्छिन्नकार्यतानिरूपित-समवायिकारणताया जन्यत्वावच्छिन्नकार्यतानिरूपितासमवायि-कारणतायाश्चाप्रसिद्ध्या तच्छून्यत्वस्याप्रसिद्ध्योपदर्शितलक्षणस-मन्वयासम्भवादिति चेद् ?

नैवं—यद्धर्मावच्छिन्नकार्यतानिरूपितसमवायिकारणत्वं यद्ध-र्मावच्छिन्नकार्यतानिरूपितमसमवायिकारणत्वं च प्रत्येकं तत्तन्नि-ष्ठाभावप्रतियोगिताऽवच्छेदकं यद्धर्मावच्छिन्नकार्यतानिरूपित-यद्धर्मावच्छिन्नकारणत्वं तद्धर्माश्रयं प्रति तद्धर्माश्रयस्य निमित्त-कारणत्वमित्यस्य विवक्षितत्वाद्, अस्ति च घटत्वाद्यवच्छिन्नकार्य-तानिरूपिसमवायिकारणत्वासमवायिकारणत्वनिष्ठाभावप्रतियोगि-

ताऽवच्छेदकं घटत्वाद्यवच्छिन्नकार्यतानिरूपितदण्डत्वाद्यवच्छिन्नकारणत्वत्वमिति घटत्वाद्याश्रयघटादिकं प्रति दण्डत्वाद्याश्रयदण्डादावुपदर्शितनिमित्तकारणत्वसम्भवः,

एवं संयोगत्वावच्छिन्नकार्यतानिरूपितसमवायिकारणत्वासमवायिकारणत्वनिष्ठाभावप्रतियोगिताऽवच्छेदको जन्यत्वावच्छिन्नकार्यतानिरूपितेश्वरत्वावच्छिन्नकारणत्वत्वमिति तद्धर्माश्रयसंयोगं प्रति तद्धर्माश्रयस्येश्वरस्य निमित्तकारणत्वम् ,

एवमन्यत्राप्यूह्यमित्याहुः,

वस्तुतस्तु—अवच्छिन्नकार्यतानिरूपितसमवायिकारणतासम्बन्धावच्छिन्नप्रतियोगिताकत्वाभावसामानाधिकरण्यावच्छिन्नकार्यतानिरूपितासमवायिकारणतासम्बन्धावच्छिन्नप्रतियोगिताकत्वाभावसामानाधिकरण्यस्यावच्छिन्नकार्यतानिरूपितत्वैतत्त्रितयसम्बन्धेन कार्यताऽवच्छेदकतद्धर्मविशिष्टं तद्धर्मावच्छिन्नकारणत्वमेव तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नस्य निमित्तकारणत्वं जन्यत्वावच्छिन्नं प्रतीश्वरस्य निमितकारणतास्थले जन्यत्वस्याभावः तादृशसम्बन्धावच्छिन्नप्रतियोगिताको व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताक एव प्रसिद्ध इति न कोऽपि दोष इति सारम् ,

केचित्तु—समवायिकारणताऽसमवायिकारणताऽन्यकारणतावत्त्वं निमित्तकारणता ; अतो नेश्वरघटसंयोगं प्रतीश्वरस्य निमित्तकारणत्वानुपपत्तिरित्याहुरिति कृतमतिशयविस्तरेण ।

ननु शास्त्रे मोक्षोपयोगिपदार्थनिरूपणमेवाभियुक्तसम्मतम् ,

अनुमानस्य च न मोक्षोपयोगित्वमित्यनुमाननिरूपणस्येयता प्रबन्धेन कृतस्य वैयर्थ्यमिति चेद् ?

न-श्रोतव्यो मन्तव्य इति श्रुतिवाक्येन प्रकरणप्राप्तमोक्षरूपेष्टसाधनत्वस्यात्मविशेष्यकेतरभेदानुमितिरूपमनने विधानेन तत्कारणस्यानुमानस्यापि मोक्षोपयोगितायाः सिद्धत्वात् ,

तदुक्तं मणिकृता परमप्रयोजनं त्वनुमानस्यापवर्ग इति,

एवं दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्याद्यनुमानस्यैव वैदिकसाधारण्येन सर्वान्प्रति मोक्षे प्रमाणतयोपन्यासेन मोक्षस्य प्रामाणिकत्वोपपादकतयाऽप्यनुमानस्य मोक्षोपयोगित्वं द्रष्टव्यम् ,

स च मोक्षो यद्यपि नाना दर्शनेषु नानारूपतयोक्तस्तथाऽपि दुःखेनात्यन्तविमुक्तश्चरतीति श्रुतिसंवादेन दुःखात्यन्तविमुक्तिरूपः, तत्र यद्यपि दुःखात्यन्तविमुक्तेर्दुःखात्यन्ताभावरूपतयाऽसाध्यत्वेन घटादिसाधारण्येन च मोक्षरूपता न सम्भवति; तथाऽपि दुःखात्यन्तविमुक्तिरात्यन्तिकदुःखनिवृत्तिरूपा विवक्षितेति नोक्तदोषः, अत्र निवृत्तिर्ध्वंसः, आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखासमानकालीनत्वं, तच्च निवृत्तिविशेषणं, तथा च स्वसमानाधिकरणदुःखासमानकालीनो दुःखध्वंसो मोक्ष इति पर्यवसितंमोक्षदशायां स्वसमानाधिकरणदुःखाभावेन दुःखध्वंसस्य तदसमानकालीनत्वाल् लक्षणसमन्वयः, संसारिणां दुःखसत्त्वेनेदानींतनदुःखध्वंसे तदसमानाकालीनत्वाभावान्नातिव्याप्तिः, दुःखासमानकालीनत्वमात्रस्य दुःखध्वंसविशेषणत्वे चरममोक्षे लक्षण-

समन्वयसम्भवेऽपि; इदानीन्तने शुकवामदेवादिमोक्षे स्वव्यधिकरणास्मदादिदुःखसमानकालीनतया लक्षणसमन्वयो न सम्भवतीत्यतः स्वसमानाधिकरणत्वं दुःखविशेषणतयोपात्तम्, उपात्तदुःखध्वंसस्यापि तादृशचरमदुःखसमानकालीनतया न तत्रातिव्याप्तिः,

न च सुषुप्तिदशायां दुःखाभावेन दुःखध्वंसे तादृशदुःखसमानकालीनत्वाभावादतिव्याप्तिरिति वाच्यम्?

तादृशदुःखासमानकालीनत्वस्य तादृशदुःखसमानकालीनभिन्नत्वरूपतया सुषुप्तिकालीनदुःखध्वंसस्य सुषुप्त्युत्तरं तादृशदुःखसमानकालीनतया तदवच्छिन्नभिन्नत्वाभावात् अत्यन्ताभावस्याव्याप्यवृत्तित्वेऽप्यन्योन्याभावस्य व्याप्यवृत्तित्वात्,

न च तथाऽपि स्वत्वस्याननुगमेन लक्षणाननुगम इति वाच्यम्?

स्वसामानाधिकरण्यकालिकविशेषणतोभयसम्बन्धेन दुःखवान् यस्तद्भिन्नदुःखध्वंसस्य मोक्षरूपतयाऽननुगमाभावात्, संबन्धमध्ये स्वत्वस्य परिचायकतया निवेशेन सम्बन्धाननुगमस्यादोषत्वादिति दिक्,

केचित्तु—दुःखात्यन्ताभाव एव मोक्षो दुःखेनात्यन्तविमुक्त इति यथाश्रुतश्रुत्यनुरोधात्, तस्य स्वतोऽसाध्यत्वेऽपि स्वप्रतियोगिसाधनमिथ्याज्ञानादिध्वंसरूपेण सम्बन्धेनात्मवृत्तेर्मोक्षत्वोपगमेन तादृशसम्बन्धस्य साध्यतयैव सम्बन्धिनोऽत्यन्ताभावस्य साध्यता; न वा घटादिसाधारण्यम्,

न चैवमावश्यकत्वान्मिथ्याज्ञानादिध्वंस एव मोक्षोऽस्त्विति वाच्यम् ?

तस्य सुखदुःखाभावान्यत्वेन स्वतोऽपुरुषार्थतया मोक्षत्वासम्भवादित्याहुः,

तदसत्-दुःखसाधनमिथ्याज्ञानादिध्वंसस्य दुःखात्यन्ताभावसम्बन्धत्वे मानाभावात् ,

न च दुःखेनात्यन्तविमुक्त इत्यादिश्रुतिरेव तत्र मानमितिवाच्यम् ?

तस्या आत्यन्तिकदुःखनिवृत्तिपरतायाः प्रागेवोक्तत्वात् ,

प्राभाकरास्तु—आत्यन्तिकदुःखप्रागभाव एव मोक्षः,

न च प्रागभावस्यानादितया कस्यापि दुःखप्रागभावस्य स्वसमानाधिकरणदुःखासमानकालीनत्वरूपमात्यन्तिकत्वं न सम्भवतीति वाच्यम् ?

स्वसमानाधिकरणदुःखापूर्ववर्तित्वस्यैव दुःखप्रागभावनिष्ठात्यन्तिकत्वरूपत्वात् ; तथा च स्वसामानाधिकरण्यस्वपूर्ववर्तित्वोभयसम्बन्धावच्छिन्नप्रतियोगिताकदुःखाभाववान् दुःखप्रागभावो मोक्ष इति पर्यवसितं, मुक्तस्य भाविदुःखाभावेन मुक्त्यात्मकदुःखप्रागभावस्योक्तोभयसम्बन्धावच्छिन्नदुःखाभाववत्वात् लक्षणसमन्वयः, संसारितादशायां चाग्रे दुःखस्योत्पत्त्येदानीन्तनदुःखप्रागभावस्योक्तोभयसम्बन्धेन भाविदुःखवत्तयोक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकदुःखाभाववत्वविरहान्नातिव्याप्तिः,

न च प्रागभावस्यासाध्यतया तत्त्वज्ञानसाध्यत्वानुपपत्ति-

रिति वाच्यम् ?

तत्त्वज्ञानादिषु सत्सु दुःखकारणमिथ्याज्ञानवासनाऽऽदिविगमे दुःखं नोत्पद्यत इत्युत्तरकालसम्बन्धरूपस्य योगक्षेमसाधारणसाध्यत्वस्य तत्रापि सम्भवादित्याहुः,

तदप्यसत्-प्रागभावे मोक्षत्वस्य प्रतियोगिविकल्पग्रासेनासम्भवात् , तथा हि न तावन्मोक्षरूपप्रागभावस्य स्वसमानाधिकरणपूर्वदुःखं प्रतियोगि सम्भवति तथा सति तस्य ध्वंसत्वापत्तेः, नापि स्वसमानाधिकरणभाविदुःखं तथा ; मुक्तस्य भाविदुःखाभावाद्; नापि स्वव्याधिकरणमन्यदीयदुःखं तथा; प्रागभावस्य स्वव्यधिकरणप्रतियोगिकत्वाभावाद् , नापि दुःखमात्रं तथा, स्वपरावृत्तेर्दुःखमात्रस्यालीकत्वेन प्रतियोगित्वासम्भवाद् ,

न चैवं तुल्ययुक्त्या प्रायश्चित्तादेरपि दुःखप्रागभावफलकत्वानुपपत्तिरिति वाच्यम् ?

इष्टापत्तेः, तस्य पापध्वंसफलकत्वस्यैवाभ्युपगमाद्; अत एव

प्रायः पापं विजानीयाच्चित्तं तस्य विशोधन—

मित्यादिस्मृतिरपि प्रायश्चित्तादेः पापध्वंसफलकतामेव वदतीति,

भाट्टास्तु—नित्यसुखाभिव्यक्तिरेव मोक्षः,

न चैवमेकस्या अभिव्यक्तेर्नाशेऽमुक्तिः स्यादिति वाच्यम् ?

तादृशाभिव्यक्तिधाराया एव मोक्षत्वोपगमाद् एकस्या नाशेऽप्यन्यस्या उत्पत्त्या धाराया अविच्छेदात् ,

न च नित्यसुखे मानाभावान्नैवमिति वाच्यम् ?

आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमितिश्रुतेरेव मान-त्वात्, तथा हि सुखपर्यायानन्दशब्दस्य स्यादानन्दथुरानन्द इति कोशात्पुंल्लिङ्गत्वेऽपि छन्दसि बहुलमित्यनुशासनान्नपुंसकलिङ्गत्वं-ब्रह्मणो रूपमित्यस्यात्मनो धर्म इत्यर्थः, मोक्षे मोक्षसमये प्रति-ष्ठितं साक्षात्कृतमित्यर्थः, एतादृशश्रुत्या मोक्षकालीनसाक्षात्का-रविषयसुखसिद्धौ तस्योत्पादविनाशकल्पने गौरवेण लाघवान्नि-त्यत्वसिद्धिरित्याहुः,

तदप्यसत्-तन्मतेऽपि मोक्षदशायामात्यन्तिकदुःखनिवृत्ते-रावश्यकत्वेन तस्या एव मोक्षरूपत्वात्,

किञ्च ज्ञानरूपाया अभिव्यक्तेः शरीरादिसाध्यतया मो-क्षदशायां च शरीराभावेन तदसम्भवः,

न च निरवच्छिन्नमुक्तिकालीनाभिव्यक्तौ शरीरादिध्वंस-एव कारणं; सावच्छिन्नसंसारकालीनाभिव्यक्तौ च शरीरादीति वाच्यम् ?

एवं सामग्रीभेदकल्पने गौरवात्; अपि च नित्यत्वस्य प्रागभावाप्रतियोगित्वध्वंसाप्रतियोगित्वकालिकसम्बन्धेन घट-त्वादिमद्भिन्नत्वादिरूपतया नानात्वेन तत्त्वज्ञानकार्यताऽवच्छेद-कानन्त्यप्रयुक्तगौरवं दुर्वारम्,

न चैतन्मतस्यानन्दं ब्रह्मणो रूपमितिश्रुतिमूलकतया प्रामाणिकत्वाद् नोक्तदोषलेश इति वाच्यम् ?

तत्रत्यानन्दपदस्य दुःखाभावार्थकतया मोक्षे प्रतिष्ठि-तमित्यस्य सवासनमिथ्याज्ञाननिवृत्तावुत्तरावधिरहितं सत्

स्थितमित्यर्थकतयैतन्मतस्य ताद्दशश्रुतिमूलकत्वाभावादिति संक्षेपः,

अद्वैतवादिनो वेदान्तिनस्तु—अविद्यायां निवृत्तायां ज्ञानसुखस्वरूप आत्मा नित्योऽवतिष्ठते तथा च स एव मुक्तिपदार्थः तथा च स्वप्रकाशचिदानन्दस्वरूपं ब्रह्माभिन्न आत्मैव मुक्तिः; तस्याश्च स्वतोऽसाध्यत्वेऽप्यविद्यानिवृत्तिरूपतया साध्यत्वम्,

न चाविद्यानिवृत्तेरप्यधिकरणात्मरूपतयाऽऽत्मनश्च नित्यतया कथं साध्यत्वमिति वाच्यम्?

योगक्षेमसाधारणसाध्यत्वस्य तत्र सम्भवात्, तथा हि तत्त्वसाक्षात्कारसत्त्व उत्तरकालेऽविद्यानिवृत्तिरूपात्मसत्त्वे साक्षात्कारासत्त्वे चाविद्यानिवृत्तेरसत्त्वेन ब्रह्मण्यविद्यासत्त्वं; यथा घटध्वंसरूपं कपालं कपालरूपघटध्वंसाभावोऽपि कपालवृत्तिर्घट एव तथाऽविद्यानिवृत्तिरूपब्रह्मासत्त्वं ब्रह्मण्यविद्यैव,

एतेन ब्रह्मरूपाया मुक्तेर्नित्यत्वेन मुक्तिसाधने प्रवृत्त्यनुपपत्तिरित्यपि निरस्तम्,

कपाले सिद्धेऽपि घटध्वंसात्मककपालार्थं मुद्गरप्रहारादौ प्रवृत्तिवद् ब्रह्मणि सिद्धेऽप्यविद्यानिवृत्तिरूपब्रह्मार्थं मुक्तिसाधने प्रवृत्त्युपपत्तेः,

न चात्मनः सुखरूपत्वे मानाभाव इति वाच्यम्?

सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति सुषुप्त्यवसानकस्मृतिमूलस्य सुखाभिन्नात्मानुभवस्यैव मानत्वात्,

न च तत्र सुखं यथा स्यात्तथाऽस्वाप्समित्येवानुभवोपग-

मान्न सुखाभिन्नात्मविषयकानुभवस्य मानत्वमिति वाच्यम् ?

सुखमहमित्यभेदानुभवस्य नैयायिकैः स्वरुचिमात्रेणान्यथा कर्तुमशक्यत्वात्, तथा चोक्तम् अहो तार्किकता यदनुभवकलहग्रस्ततत्वेन प्रत्यवस्थानमिति, किंच सुषुप्तिकाले विषयासान्निध्येन वैषयिकसुखोत्पादकसामग्रीविरहान्नित्यमेव सुखं तत्कालेऽनुभूयत इत्यवश्यमङ्गीकरणीयं तथा च सिद्धे नित्यसुखे नित्यं विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतिवाक्येनात्मनि तदभेदबोधनं न विरुध्यते,

न चानन्दं ब्रह्मेतिसामानाधिकरण्येन बोधे स्यादानन्दथुरानन्द इति कोषसिद्धपुंलिङ्गताकाजहल्लिङ्गानन्दशब्दस्य नपुंसकलिङ्गत्वानुपपत्तिरित्यानन्दोऽस्यास्तीत्यानन्दशब्दस्यार्शआदिगणे पाठेनानन्दवत्त्वं मत्वर्थीयाच्प्रत्ययान्तेनानन्दशब्देन प्रतिपाद्यत इति वाच्यम् ?

छन्दसि लिङ्गवचनविभक्तिव्यत्ययस्य बहुधा दर्शनेन लिङ्गासङ्गतिविभीषिकाया दूरापास्तत्वात्,

न च व्यत्ययं विनैवोपपत्तौ लिङ्गव्यत्ययकल्पनैवानुचितेति वाच्यम् ?

आनन्दपदार्थस्याभेदान्वये सम्भवति मत्वर्थीयाच्प्रत्ययान्तान्तर्भावकल्पनाया एव गौरवेणानौचित्यात्,

एवमेतत्श्रुतिवाक्यादेव ज्ञानरूपताऽप्यात्मनः सिद्ध्यति,

न चैवमहं जानाम्यहं सुखीत्यादिप्रत्ययानां का गतिरिति वाच्यम् ?

एतेन त्वदुक्तमर्थं न जानामि; अहं ब्रह्म जानामीत्याद्यपि प्रत्यक्षं व्याख्यातम्,

न चोक्तप्रत्यक्षस्य भावरूपाज्ञानासाधकत्वेऽप्येतावन्तं-कालं न किञ्चिदवेदिषमिति स्मरणसिद्धसौषुप्तप्रत्यक्षमेव भाव-रूपाज्ञाने प्रमाणमिति वाच्यम् ?

उक्तप्रत्ययस्य तत्कालावच्छिन्नोऽहं तदानीं ज्ञानाभाववान् तत्कालीनज्ञानवत्त्वेनास्मर्यमाणत्वाद् यो यत्कालीनयद्विषयकज्ञान-वत्त्वेनास्मर्यमाणः स तत्कालीनतद्विषयकज्ञानाभाववान् यथाऽहं-प्रातःकालीनघटज्ञानत्वेनास्मर्यमाणस्तदानीन्तनघटविषयकज्ञाना-भाववानिति सामान्यमुखव्याप्तिमूलकज्ञानाभावानुमितिरूपतयै-वोपपत्तेः,

न चोपेक्षाऽऽत्मकज्ञानमादाय व्यभिचार इति वाच्यम् ?

व्यभिचारस्य स्वतोऽदूषकतया तदप्रतिसन्धानदशायां-व्याप्तिग्रहसम्भवात्,

न च व्यभिचारिलिङ्गजन्यत्वेनानुमितेर्भ्रमत्वं स्यादिति वाच्यम् ?

विषयाबाधेन प्रमात्वोपपत्तेः,

अथ भावरूपाज्ञानेऽनुमानमेव प्रमाणं; तथा हि जन्यसविक-ल्पकाजन्या घटादिचाक्षुषप्रमा स्वाविषयावरणस्वनिवर्त्यवस्त्वन्त-रपूर्विका; अप्रकाशितार्थप्रकाशत्वाद् अन्धकारे प्रथमोत्पन्नप्रदीप-प्रभावद्, अत्र धारावाहिकप्रमाऽन्तर्गतद्वितीयादिप्रभायां बाधवार-णाय पक्षे जन्यान्तं विशेषणं, साध्ये स्वाविषयावरणत्वं स्वजनना-

योग्यत्वं स्वानिवर्त्यत्वं स्वजन्यनाशप्रतियोगित्वं, वस्त्वन्तरत्वं-स्वभिन्नं, तत्र स्वप्रागभावपूर्वकत्वमादायार्थान्तरवारणायाद्यं विशेषणम्, इच्छाप्रागभावादिना तद्वारणाय द्वितीयं, स्वपूर्वकत्वेन तद्वारणाय तृतीयम्,

यद्वा—स्वप्रागभावान्यस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकत्वं-साध्यं; स्वप्रागभावान्यत्वं स्वसमानाधिकरणप्रागभावान्यत्वं-स्वनिवर्त्यत्वं पूर्वोक्तमेव, स्वदेशगतवस्त्वन्तरपूर्वकत्वं स्वसमानाधिकरणयोग्यत्वं ज्ञानेच्छाप्रागभावादिनाऽर्थान्तरवारणायाद्यम्, आत्मत्वादिना तद्वारणाय द्वितीयं, स्वजनकादृष्टादिना तद्वारणाय तृतीयमिति चेद् ?

न—अभावरूपान्धकारस्य प्रभानिवर्त्यत्वाभावेन दृष्टान्तासिद्धेः, अन्धकारेऽभावत्वस्यान्यत्र साधितत्वात्,

न च स्वप्रयोज्याभावप्रतियोगित्वमेव स्वानिवर्त्यत्वमिति वाच्यम् ?

इच्छाप्रागभावादिनाऽर्थान्तरतादवस्थ्यात्, पक्षदृष्टान्तसाधारणप्रकाशत्वस्यैक्याभावाच्च दृढतदनुकूलतर्काभावेनाप्रयोजकत्वाच्च,

एतेन चैत्रप्रमा चैत्रप्रमाप्रागभावातिरिक्तानादिनिवर्तिका प्रमात्वान्मैत्रप्रमावादित्याद्यनुमानानामप्यज्ञाने प्रमाणत्वं निरस्तम्,

अथ शब्द एव तत्र प्रमाणं, तथा हि तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प-

जा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढा-इति श्रुतिर्ब्रह्मज्ञानप्रतिबन्धकत्वेनानृतं प्रतिपादयन्ती भावरूपाज्ञाने प्रमाणम् ,

न च ऋतं पिबन्तावित्यत्र ऋतशब्दस्य सुकृतपरतयाऽत्रानृतशब्दस्य दुष्कृतपरत्वमेवेति वाच्यम् ?

उत्तरवाक्ये य आत्माऽपहतपाप्मेत्यादिनाऽऽत्मन अपहतपाप्मत्वप्रतिपादनेन दुष्कृतप्रत्यूढत्वासम्भवात् सुषुप्तौ कार्यमात्रनाशेन दुष्कृतस्यासम्भवाच्च, कारणात्मनाऽवस्थानोपगमे चाज्ञानसिद्धेरावश्यकत्वाद् ज्ञानप्रतिबन्धकस्यानादित्वावश्यकतया कर्मणः प्रतिबन्धकत्वासम्भवाच्चेति चेद् ?

न—अपहतपाप्मत्वस्याज्ञानेऽपि बोधकत्वाद् जीवनिष्ठत्वेनैव तस्य वाच्यत्वात् सुषुप्तौ कार्यमात्रनाशे मानाभावाद् जीवब्रह्मणोर्भेदस्यान्यत्र व्यवस्थापितत्वात् ,

ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनी—

तिस्मृत्या कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्य कर्मण्येव लाभाच्च,

न च पापस्य पुण्यस्य मिथ्याज्ञानजन्यसंस्कारस्य वा प्रतिबन्धकत्वमित्यत्र विनिगमनाविरहेण तद्भिन्नमेव भावरूपाज्ञानं तत्प्रतिबन्धकत्वेन कल्प्यत इति वाच्यम् ?

पापेऽनृतशब्दमुख्यार्थत्वस्यैव विनिगमकत्वात् ,

किञ्च वेदान्तिमतेऽपि शब्दजन्यशुद्धब्रह्मविषयकदृश्यात्मक-

साक्षात्कारस्याविद्यानिवृत्त्युपधायकत्वोपगमेनोक्तसाक्षात्कारका-रणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्याविद्यायामसम्भवः;

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन-

इति गीतावाक्यात् ,

एवं न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्तीति श्रुति-रपि न भावरूपाज्ञाने प्रमाणम् ,

अस्या ह्यर्थः–य इमाः प्रजा जजान=उत्पादयामास तं–यूयं न जानीथ; अन्यद्युष्माकम् , अन्तरं=व्यवधानं बभूव; नीहारेण तत्सदृशेनावरकेण प्रावृता यूयं जल्प्याः मनुष्योऽहमित्यादि-जल्पनशीलाः असुतृप इन्द्रियतर्पणशीला विषयासक्ता उक्थशा-सः स्तोत्रविशेषचरणशीलाः कर्ममात्रानुष्ठायिन इति, अत्र नीहा-रपदं साध्यवसानलक्षणया तत्सदृशमात्रपरं न तु विशिष्य धर्मि-परं तदनुपस्थितेः किन्त्वर्थगत्यैव तत्कल्प्यं, तच्च दुष्कृतमादाय पर्यवसन्नं सन्न भावरूपाज्ञानकल्पकं मानाभावाद्, एवमजामेकां-लोहितशुक्लकृष्णामितिश्रुतिस्थाजाशब्दोऽपि तत्सदृशपरस्तत्रैवप-र्यवस्यतीति साऽपि न भावरूपाज्ञाने मानम्, एवम्–एवमेवैषा माया स्वाव्यतिरिक्तानि परिपूर्णानि क्षेत्राणि दर्शयित्वा जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीतिश्रुतिबलादपि न तत्सिद्धिः, अस्या ह्ययमर्थः–मायाऽदृष्टं स्वस्माद्व्यतिरिक्तानि व्यतिरेकाभाववन्ति, स च कारणत्वेन जन्यमात्रेऽनुगमादुपपन्नः

न च व्यतिरिक्तशब्दस्य भिन्नार्थकतया स्वाभिन्नत्वस्य

कार्यजाते लाभाद् निमित्तकारणतादात्म्यस्य च कार्येऽनङ्गीकारादुपादानत्वलाभ इति वाच्यम् ?

अन्वयव्यतिरेकाभ्यामित्यादौ संसर्गाभावेऽपि व्यतिरेकशब्दप्रयोगदर्शनेन तस्य भेदमात्रवाचकत्वाभावात् परिपूर्णानि स्वस्वधर्मवन्ति क्षेत्राणि भोगसाधनानि दर्शयित्वा तन्निरूपितकारणताऽऽश्रयीभूतजीवस्य भोक्तृत्वनिर्वाहकतयेश्वरस्य सहकारितया च कारणं परैरपि जीवेशयोरनादित्वाङ्गीकारेण करोतेरुत्पत्त्यर्थकतायाः परित्यागस्यावश्यकत्वात् तदाह—आभासेनेति; उपचारेणेति तदर्थः, तदिदमुक्तमुदयनाचार्यैः—

इत्येषा सहकारिशक्तिरतुला माया दुरुन्नीतितो—

मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिते—

इत्यादि, सहकारिशक्तिरदृष्टं, तस्याभिधानाद्योजनात्तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिरितिश्रुतेस्तु श्रवणाद्यधीनसाक्षात्कारेण विश्वमायानिवृत्तिरन्ते प्रारब्धकर्मभोगसमाप्तौ तु भूयो विशिष्टदेहेन्द्रियादिरूपमायानिवृत्तिरित्यर्थं ब्रुवाणाऽस्माकमप्यनुकूलैव, मायापदमदृष्टपरमिति विशेषः, जीवन्मुक्तेः सर्वसिद्धत्वात्,

न च तस्यास्तत्त्वस्य सर्वाधिष्ठानस्य भावोऽविद्यानिवृत्तिरूपप्राप्तिर्यस्मादित्यर्थकतया कथमानुकूल्यमिति वाच्यम् !

तत्त्वभावादित्यस्य तत्त्वसाक्षात्कारादित्यर्थकत्वोपगमाद्, अभिधानात् अभिध्यानाद् निदिध्यासनादिति यावत् क्वचिदभिध्यानादित्येव पाठः, योजनात् श्रवणाद् एतयोस्तत्त्वभावे हेतुत्वेनान्वयः, एवं तरति शोकमात्मविदितिश्रुतिरपि न तत्र मानम्

आत्यन्तिकदुःखस्य शोकपदार्थत्वेन तरतेर्निवृत्त्यर्थकत्वेनास्माक-मेवानुकूलत्वात्,

एवमन्यश्रुतावपि सुधीभिरूह्यमिति दिक्,

वस्तुतस्तु—अद्वैतसत्त्व एव कथञ्चिद्वेदान्तिमतमुपपद्यते तदेव न, द्वैतस्य प्रत्यक्षादिप्रमाणसिद्धत्वेनापलपितुमशक्यत्वाद् आपाततोऽद्वैतपराणामपि सोपक्रमोपसंहाराणां श्रुतीनां प्रत्यक्षादिप्रमाणविरोधेनान्यथानयनस्यावश्यकत्वात्, ते चान्यथानयनप्रकारास्तत्तद्ग्रन्थेषु सुधीभिरवधेया इह ग्रन्थगौरवभयेन नोक्ताः,

न च तेषामसाम्प्रदायिकत्वात्तेऽप्रयोजका इति वाच्यम्?

साम्प्रदायिकत्वासाम्प्रदायिकत्वयोरसर्वज्ञापरिच्छेद्यत्वात् तथा च श्रुतिः कश्छन्दसां योगमावेद धीर इति तस्मात्सिद्धमात्यन्तिको दुःखध्वंसो मोक्ष इति, अत एव महर्षिणा गोतमेन बाधनालक्षणं दुःखमिति दुःखं निरुच्य तदत्यन्तविमोक्षोऽपवर्ग-इत्युक्तं बाधनालक्षणमित्यस्येतरद्वेषानधीनद्वेषविषय इत्यर्थः, उदयनाचार्यैरपि निःश्रेयसम्पुनर्दुःखानिवृत्तिरात्यन्तिकीत्युक्तम्,

नन्वेवमप्युक्तमोक्षत्वस्य तत्त्वज्ञानजन्यतावच्छेदकत्वानुपपत्तिः चरमदुःखध्वंसस्य स्वोत्तरोत्पन्नविशेषगुणादेव सम्भवाद् मोक्षदशायां तद्वत्यात्मनि दुःखजनकाधर्मरूपकारणाभावादेव दुःखानुत्पत्त्याऽर्थवशादेव तस्य स्वसमानाधिकरणदुःखासमानकालीनत्वनिर्वाहाद् आर्थसमाजरूपबाधकमस्तस्य कार्यताऽनवच्छेदकत्वाद् अन्यथा पुरुषान्तरीयदुःखासमानकालीनदुःखध्वंसत्वादेरपि किञ्चित्कारणकार्यताऽवच्छेदकत्वापत्तेरिति चेद्?

अत्र केचित् तत्त्वज्ञानस्य मुक्तित्वावच्छिन्ने न जनकत्वं किन्तु प्रयोजकत्वमेव; तथा हि शमदमध्यानधारणाऽऽदिभिः श्रवणादिक्रमेण तत्त्वज्ञानं; तस्माच्च सवासनमिथ्याज्ञानोन्मूलनं; मिथ्याज्ञाननिवृत्तौ च रागद्वेषमोहलक्षणदोषापायस्ततस्तन्मूलयोर्धर्माधर्मयोरनुत्पादस्तदुत्पत्तौ मिथ्याज्ञानवासनाया हेतुत्वात् तत्त्वज्ञानेन च तदुन्मूलनाद् उत्पन्नधर्माधर्मयोस्तु भोगादेव क्षय इति चरमदुःखनिवृत्तिरर्थवशसम्पन्नैव; इतरदुःखनिवृत्तिवत् स्वोत्तरोत्पन्नविशेषगुणेनैव चरमदुःखनाशसम्भवाद्; अत एवोक्तं भगवताऽक्षपादेन दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति रागद्वेषमोहा दोषा इति प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति च, सूत्र आरम्भपदं च बहुव्रीहिणा वागादिनिदानीभूतधर्माधर्मपरमिति, तत्त्वज्ञानिनां प्रवृत्तौ नेच्छा हेतुरतस्तत्त्वज्ञानिनामिच्छाविरहेऽपि न क्षतिः, तथा च श्रुतिः—असक्तोऽद्विषंश्च मुच्यत इति रागपदं वा मिथ्याज्ञानवासनासमानकालीनेच्छाविशेषपरमिति, तदयमर्थः—तत्त्वज्ञानान्मिथ्याज्ञाननिवृत्तिर्मिथ्याज्ञाननिवृत्तौ च तन्मूलानां रागद्वेषमोहलक्षणानां दोषाणामपायः; दोषापायेन तन्मूलकप्रवृत्तेरपायः, प्रवृत्तेरपाये च तन्मूलकधर्माधर्मानुत्पत्तौ जन्मापायः ततश्च शरीरापायान्न दुःखान्तरमिति, श्रुतिरपि-अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशत इति, प्रियाप्रिये सुखदुःखे वावेति संबोधनं यङ्लुकि निष्पन्नं वा वावसन्तमिति पदम्, अयमेवार्थस्तदपदर्शनसिद्धान्तसंक्षेप इत्यादिना बौद्धाधिकारे हेतूच्छेदे पुरुषव्यापारादित्यनेन द्रव्यकिरणावल्यां चाचार्यैर-

ष्युक्तः, अत्र दुःखजन्मेत्यादिसूत्रे उत्तरोत्तरत्वं व्युत्क्रमेण बोध्यम्,

अथ वा—उत्तरोत्तरमत्रत्यपाठक्रमेण तदनन्तरेति तत उत्तरोत्तरम् अनन्तरं यस्य पूर्वपूर्वस्य तत् पूर्वपूर्वं तदपायादित्यर्थः, स हि तत्त्वज्ञान इति चार्थाल्लब्धम्,

न च धर्माधर्मयोरुत्पत्तौ मिथ्याज्ञानवासनाया हेतुत्वापेक्षया तत्त्वज्ञानमेव प्रतिबन्धकमास्थीयतामिति वाच्यम्?

तत्त्वज्ञानिनामपि विहितनिषिद्धगोचरप्रवृत्तिप्राक्काले तत्त्वज्ञानासत्त्वेन धर्माधर्मयोरुत्पादप्रसङ्गादित्याहुः,

दीधितिकृतस्तु—चरमदुःखध्वंसस्य चरमदुःखोत्तरोत्पन्नविशेषगुणरूपकारणान्तरादेव सम्भवेन तस्य तत्त्वज्ञानजन्यत्वमित्यापाद्य दुःखबीजदुरितनाशस्यात्यन्तिकस्य मोक्षत्वं योग्यात्मविशेषगुणनाशवत् स्वोत्तरोत्पन्नस्वसमानाधिकरणगुणस्य जनकतया दुरितस्यायोग्यतया तन्नाशस्यान्यनासम्भवात् तत्त्वज्ञानाभावे दुरितोत्पत्त्या दुरितवच्छिन्नत्वानिर्वाहाच्च तत्त्वज्ञानमेव तत्र जनकं दुःखेनात्यन्तामित्यादिश्रुतिस्थदुःखपदं च तज्जनकदुरितपरमिति प्राहुः,

वस्तुतस्तु—आर्थसमाजस्थले साधकाभाव एव कार्यताऽवच्छेदकत्वे बाधकः, उपदर्शितमुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानहेतुतायाश्च श्रुतिस्मृत्यादिसिद्धतया न बाधः, दुःखजन्मेत्यादिसूत्रं च मिथ्याज्ञानादिनाशस्य द्वारताबोधकं न तु तत्त्वज्ञानस्य मुक्तिप्रयोजकतापरमिति न तद्विरोधोऽपीति तत्त्वम्, तच्च तत्त्वज्ञानं मानसात्मतत्त्वसाक्षात्काररूपमेव मुक्तिजनकं न तु

शाब्दादिरूपं; प्रत्यक्षभ्रमे प्रत्यक्षविशेषदर्शनस्यैव निवर्तकतयाऽहं गौर इति प्रत्यक्षभ्रमस्य शाब्दादिना निवृत्त्यसम्भवात्,

अथ तदात्ममात्रविषयकमन्यादृशं वा मोक्षजनकमिति चेद्?

अत्र प्राञ्चः–तमेवेत्यादिश्रुत्यैवकारबलादात्मान्याविषयकात्मविषयकज्ञानस्यैव मोक्षजनकतालाभेन तदेव मोक्षजनकम्,

न चात्मभाने मनस्संयुक्तसमवायरूपप्रत्यासत्तिबलादात्मत्वस्यापि भाने बाधकाभाव इति वाच्यम्?

आत्मान्याविषयविषयकज्ञानत्वावच्छिन्ने निदिध्यासनस्य प्रतिबन्धकत्वकल्पनात्,

न चैवमप्यात्मविशेष्यकतादात्म्यसम्बन्धेनात्मप्रकारकज्ञानस्य हेतुत्वं दुर्वारम् आत्मान्याविषयकत्वस्य तावताऽप्यनपायादिति वाच्यम्?

सप्रकारकात्मज्ञानत्वस्यैव निदिध्यासनप्रतिबन्ध्यताऽवच्छेदकत्वोपगमात्,

न च भिन्नक्रम एवकारस्तस्य च विदित्वेत्यनन्तरं योजनात्कर्मादेर्मोक्षजनकत्वं च व्यावर्त्यं; तथा च तमेवेत्यादिश्रुत्याऽऽत्मज्ञानान्यस्य मोक्षजनकत्वस्य व्यवच्छेदो लभ्यते न त्वात्मान्याविषयकज्ञानस्य मोक्षजनकत्वमिति वाच्यम्?

नान्यः पन्था विद्यतेऽयनायेतिश्रुतिविशेषेण; न कर्मणा न प्रजया धनेनेत्यादिश्रुत्या च कर्मादेर्मोक्षमोक्षाजनकत्वलाभेनैवकारस्य व्यत्यासे मानाभावादित्याहुः,

नवीनास्तु–द्वितीयाया विशेष्यत्वार्थकताया एव क्लृप्तत्वा-

त्वमेवेत्यादिश्रुत्याऽऽत्मान्यविशेष्यकज्ञानस्य मोक्षजनकत्वस्यैव लाभेन सप्रकारकात्मज्ञानस्य मोक्षजनकत्वं दुर्वारम्,

न च सर्वत्र विषयताया एव द्वितीयाऽर्थत्वं क्लृप्तमिति वाच्यम्?

शत्रुधननाशेच्छायां शत्रुधनमिच्छतीतिप्रयोगाभावेन तथा वक्तुमशक्यत्वाद्, अत एवात्मा द्रष्टव्य इत्यादितोऽध्यात्मत्वविशिष्टस्य ज्ञातव्यत्वलाभः, अत आत्मनोऽसाधारणधर्मेण निश्चयोऽप्रामाण्यशङ्काकलङ्कशून्यो मोक्षजनकः, अन्यथा मोक्षजनकात्मज्ञाने आत्मगतधर्माभाने परमात्मज्ञानस्य मोक्षजनकतापक्षे परमात्मन्यपि तद्गतधर्माभानस्य वक्तव्यतया वेदे परमात्मगतधर्माणांकथनस्य वैयर्थ्यापत्तेरित्यादिकमूह्यं, तथा चात्मनः शरीरादिभिन्नत्वेन साक्षात्कार एव मोक्षहेतुः श्रवणादिकं च तद्द्वारा मोक्षोपयोगि; अत एव संसारदशायामपि स्वाधीनस्य श्रवणपदवाच्यशाब्दबोधरूपात्मज्ञानस्य मननपदवाच्यायाः शास्त्रादिबोधितशरीरादिवैधर्म्यलिङ्गकात्मपक्षकेतरभेदानुमितेः श्रवणादिमूलकसंस्काराधीनतत्समानविषयकध्यानोपाहितेच्छाया निदिध्यासनपदवाच्यायाः सत्त्वेऽपि न मोक्षाद्यापत्तिः, तदानीं श्रवणादिप्रयोज्यात्मतत्त्वसाक्षात्काराभावात्,

न च संसारदशायामपि श्रवणादिसत्त्व आत्मतत्त्वसाक्षात्कार एव कथं नोत्पद्यत इति वाच्यम्?

तस्य चिरकालीनध्यानपरम्परासाध्यत्वाद्; अत एवोक्तं—स्मृतौ—

आगमेनानुमानेन ध्यानाभ्यासरसेन च ।

त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति,

ध्यानाभ्यासरसः पौनःपुन्येन स्मरणेच्छा, त्रिधा प्रज्ञां श्रवणमनननिदिध्यासनरूपत्रिविधज्ञानं प्रकल्पयन् सम्पादयन् उत्तमं योगमात्मतत्त्वसाक्षात्काररूपं लभते प्राप्नोतीत्यर्थः, श्रुतिबोधितोऽपि शरीरादिभिन्न आत्मनि यथाश्रुतश्रुत्यन्तरार्थविरोधेन तादृशश्रुतेरन्यार्थपरत्वशङ्कया तादृशबोधेऽप्रामाण्यशङ्कासम्भवादश्रद्धया निदिध्यासनं न घटत इति श्रवणानन्तरं मननस्योपयोगः युक्तिसिद्धार्थे प्रमितत्वावधारणे मनने सत्यश्रद्धानिवृत्तेः; तथा च शरीरादिभिन्नत्वेन मानसात्मसाक्षात्कार एव मोक्षजनक इति प्राहुः,

प्राचीनवेदान्तिनस्तु—तन्त्वौपनिषदं पुरुषं पृच्छामीतिश्रुतिबलादात्मन औपनिषदत्वेन तत्त्वमसीत्यादिमहावाक्यसाध्यात्मतत्त्वसाक्षात्कार एव मोक्षजनकः,

न चैवं श्रवणेनैव तत्सम्पत्तौ मननादिवैयर्थ्यमिति वाच्यम्?

श्रवणमात्रजन्यज्ञानस्यासम्भावनाविपरीतभावनामूलकाप्रामाण्यज्ञानास्कन्दिततया स्वकार्याक्षमतयाऽसम्भावनाविपरीतभावनानिराकरणाय मननादीनां सार्थक्यात्,

ननु शब्दस्य परोक्षज्ञानजनकत्वस्वभावेनापरोक्षज्ञानाजनकतया कथं तस्मादपरोक्षात्मसाक्षात्कार इति चेद्?

मैवं—शब्दादप्यपरोक्षसाक्षात्काराङ्गीकारात्, तथा हि ज्ञानस्यापरोक्षत्वं हि न स्वगतापरोक्षत्वं जात्या किन्त्वनावृतापरोक्षविषयकत्वेनैव; दशमस्त्वमसीतिवाक्यात्स्वाविषयकापरोक्षज्ञान-

दर्शनात् ,

न च तत्रापि परोक्षज्ञानमेवोत्पद्यत इति वाच्यम् ?

तथा सति नवैव वयमितिभ्रमस्य दशमस्त्वमसीत्युदासीनवाक्यश्रवणे निवृत्त्यनुपपत्तेः, साक्षात्कारिभ्रमे साक्षात्कारविपरीतज्ञानस्यैव निवर्तकत्वात् ,

एवं च महावाक्यात् स्वात्मज्ञानमप्यपरोक्षमेव तद्विषयस्यात्मनो यत्साक्षादपरोक्षं ब्रह्मेतिश्रुत्याऽपरोक्षत्वात् शब्दजन्यवृत्त्यावरणभङ्गेनानावृतत्वाच्च, पटादेस्तु वृत्त्याऽपरोक्षसाक्षिचैतन्याभेदादनावृतापरोक्षत्वम् ,

न चैवं सत्यनुमित्यादेरप्यपरोक्षत्वापत्तिरिति वाच्यम् ?

अनुमित्यादिस्थलेऽन्तःकरणस्य वहिर्निर्गमनाभावेन वन्ह्याद्यवच्छिन्नचैतन्यासम्बन्धितया वन्ह्याद्यवच्छिन्नचैतन्येन सह साक्षिचैतन्यस्यैकलोलीभावाभावेन वह्न्याद्यवच्छिन्नचैतन्यस्यावृततया वह्न्यनुमित्यादेरपरोक्षत्वप्रसङ्गाभावाद्, यदा त्वन्तःकरणवृत्तेर्वन्हिसम्बन्धदशायां वन्ह्यनुमितिस्तदा तादृशानुमित्तेरपरोक्षत्वमिष्टमेव,

न चैवमनुमितित्वादेरपरोक्षत्वविरुद्धत्वप्रवादासङ्गतिरिति वाच्यम् ?

अपरोक्षत्वस्य जातित्वानुपगन्तॄणामस्माकं तादृशप्रवादस्यैवाभावात्, तच्चात्मज्ञानमखण्डधर्मिविषयकमेव जहदजहत्स्वार्थलक्षणया पदार्थताऽवच्छेदकयोः शक्यांशयोस्त्यागेन धर्मिमात्रबोधनात् ,

न च शक्यमात्रबोधजनकवृत्तेः कथं लक्षणात्वमिति वाच्यम् ?

गङ्गाऽऽदिपदसाधारणस्य शक्यपरित्यागरूपधर्मसत्त्वेन लक्षणात्वोपचारात्, लक्षणापदप्रयोगोऽप्यौपचारिक एव न तु नैयायिकाङ्गीकृतलक्षणाया वास्तवमत्र सत्त्वम्, आत्मनोऽसङ्गत्वश्रुत्या कथमपि वास्तवसम्बन्धघटितलक्षणाया असम्भवाद्, अत एवेयं भागत्यागलक्षणेति गीयते, तस्य च भागत्यागरूपधर्मप्रयुक्तलक्षणात्वे पर्यवसानात्,

ननु सप्रकारकं ज्ञानं भ्रमविरोधि दृष्टम् इदं तु निष्प्रकारकं कथं भ्रमविरोधीति चेद् ?

न–विरोधिता हि फलबलकल्प्या; यस्मिन् सति प्रतिबन्धो दृश्यते स एव विरोधी स एवायं देवदत्त इति शाब्दज्ञाने सति नायं देवदत्त इति ज्ञानप्रतिबन्धो दृश्यते स च निष्प्रकारक एव न हि तत्र तत्ताविशिष्टेदन्ताविशिष्टयोरभेदो बोधयितुं शक्यते विशेषणांशेन सह धर्मिणोऽभेदाभावात् तथा च तत्तेदन्ताऽऽदिकं न विशेषणं किन्तूपलक्षणम्, एवं च तयोर्विशेष्यान्वयिनाऽनन्वय एवेत्यन्वयबोधबहिर्भाव एव; तस्मान्निष्प्रकारकज्ञानस्य तस्य प्रतिबन्धकत्वमवश्यमङ्गीकरणीयमित्याहुः,

नवीनवेदान्तिनस्तु–शाब्दबोधापरोक्षत्वस्वीकारे जन्यापरोक्षत्वावच्छिन्नं प्रतीन्द्रियत्वेन जनकतायां व्यभिचारः,

न च तत्पूर्वमपि मनोरूपेन्द्रियसत्त्वान्न व्यभिचार इति वाच्यम् ?

इन्द्रियेभ्यः परं मन इतिभगवद्गीतावचनविरोधापत्त्या मन-

स इन्द्रियत्वाभावात् ,

अथेन्द्रियत्वं न जातिः तेजस्त्वादिना सङ्करप्रसङ्गात् किन्त्विन्द्रियनिष्ठेष्वेकत्वेषु वैजात्यमुपेत्य विजातीयैकत्ववत्त्वमेवेन्द्रियत्वं वाच्यम् ,

तच्च वैजात्यं मनस एकत्वेऽप्युपेयत इति नोक्तव्यभिचारइति चेद् ?

न—मनस एकत्वेन तादृशवैजात्यसम्बन्धकल्पन एव गौरवात् तादृशवैजात्यं मनस एकत्वे स्वीक्रियत उत ब्रह्मविषयकशाब्दबोधाव्यवहितपूर्वकालीनपदार्थान्तरगतैकत्वे वेत्यत्र विनिगमनाविरहेण गौरवप्रसङ्गाच्च,

न च तादृशकार्यकारणभावे प्रमाणाभावान्न दोष इति वाच्यम् ?

चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुष्ट्वादिना हेतुत्वस्य सर्वसिद्धतया यद्विशेषयोरित्यादिन्यायेन तस्यावश्यकत्वात् ,

वस्तुतस्तु—गीतावाक्यस्येन्द्रियान्तरापेक्षयोत्कृष्टेन्द्रियत्वप्रतिपादनपरतयाऽविरोधेन मनस इन्द्रियत्वेऽपि शब्दादपरोक्षे मानाभावः, वेदान्तवाक्यात् प्रथमं ब्रह्मविषयकशाब्दबोधस्तदनन्तरं मननादि तदनन्तरं तत्सहकृतमनसा शुद्धब्रह्मविषयकनिर्विकल्पकं जायते तदेव तत्त्वज्ञानपदार्थस्तदेव च मोक्षजनकमित्यङ्गीकारेणैव निर्वाहाद् दशमस्त्वमसीत्यादावप्युक्तरीत्यैव निर्वाहः, तं त्वौपनिषदं पुरुषमितिश्रुतिप्रतिपाद्यमौपनिषदत्वमप्युपनिषत्सहकृतमनोजन्यज्ञानविषयत्वरूपमेवेति न तद्विरोधोऽपीति प्राहुः,

अथ भवतु तत्त्वज्ञानं मोक्षजनकं तद् जीवात्मविषयकम् ईश्व-

रात्मविषयकं वा मोक्षमुत्पादयतीति चेद् ?

न—मतभेदेनोभयस्यैव मोक्षजनकत्वात्, प्रपञ्चितं चैतदात्मत्वजातिविचारेऽस्माभिरिति तत्रैव द्रष्टव्यं ग्रन्थगौरवभिया नेह प्रस्तूयते,

ननु तथाऽपि यथा तमेवेत्यादिश्रुत्याऽऽत्मतत्त्वज्ञानस्य मोक्षजनकत्वं प्रतिपाद्यते तथा काशीमरणान्मुक्तिरित्यादिश्रुत्या काशीमरणादेरपि मोक्षजनकत्वं प्रतिपाद्यते,

एवं च तत्त्वज्ञानकाशीमरणयोस्तृणारणिमणिन्यायेन स्वातन्त्र्येण वैकल्पिकी कारणतोत द्वारद्वारिभावेणेति चेद् ?

अत्र केचित्—तत्त्वज्ञानवत् काशीमरणादिकं स्वातन्त्र्येणैव मोक्षजनकं; तमेवेत्यादिश्रुत्या तत्त्वज्ञानस्य स्वातन्त्र्येण मोक्षजनकताबोधनवत् काशीमरणादेरपि काशीमरणान्मुक्तिरित्यादिश्रुत्या स्वातन्त्र्येण मोक्षजनकताबोधनेन तत्त्वज्ञानद्वारा हेतुत्वे मानाभावात्,

अथ मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेनैव हेतुत्वं तमेवेत्यादिश्रुतेः, काशीमरणादिकं च न मुक्तिहेतुः तत्त्वज्ञानजन्यमुक्तौ व्यभिचारात् किन्तु तत्त्वज्ञान एव,

न चोपायान्तरजन्यतत्त्वज्ञाने व्यभिचारात्कथं तत्त्वज्ञानेऽपि हेतुत्वमिति वाच्यम् ?

तत्त्वज्ञाने काशीमरणादिजन्यताऽवच्छेदकतया वैजात्योपगमाद्; मुक्तेरभावरूपतया तत्र वैजात्यकल्पनाया असम्भवादिति चेद् ?

न—मुक्तित्वस्यैकस्याभावेन तत्त्वज्ञानकार्यताऽवच्छेदकत्वासम्भवात्, स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वस्य स्वत्वघटिततया तद्व्यक्तिविश्रान्तत्वेन तत्र दुःखध्वंसत्वस्य तत्तद्व्यक्तित्वस्यैव वा कार्यताऽवच्छेदकत्वात्,

वस्तुतस्तु—विशेषणज्ञानस्य विशेषणताऽवच्छेदकप्रकारकानिर्णयस्य च कार्यताऽवच्छेदकतया विषयिताविशेषसिद्धिवत् प्रतियोगिताविशेषोऽनुयोगिताविशेषो वा काशीमरणादिकार्यताऽवच्छेदकतया सिद्ध्यतीति स एव कार्यताऽवच्छेदकः; तेन निरुक्तदुःखध्वंसत्वस्य कथं चित्तद्व्यक्तिविश्रान्तत्वाभावेऽपि न क्षतिः,

एवं च तत्त्वज्ञानाजन्यमुक्तौ व्यभिचाराभावेन काशीमरणादेस्साक्षान्मुक्तिहेतुत्वे बाधकाभावः तत्त्वज्ञानद्वारा हेतुत्वे च सर्वत्र तत्त्वज्ञानकल्पने गौरवात् तत्त्वज्ञाने काशीमरणादिजन्यताऽवच्छेदकतया वैजात्यकल्पनाप्रयुक्तगौरवाच्च,

न च नान्यः पन्था विद्यतेऽयनायेतिश्रुत्या तत्त्वज्ञानान्यस्य मोक्षाजनकत्वप्रतिपादनात् तद्विरोध इति वाच्यम्?

तस्याः पूर्वोक्ततत्त्वज्ञानसजातीयव्यवच्छेदकपरतयाऽऽत्मतत्त्वज्ञानान्यज्ञाने मोक्षजनकत्वाभावे तात्पर्यात्,

अथ जन्तोः प्राणेषूत्क्रममाणेषु शिवस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वाऽथ मोक्षीभवतीति जाबालश्रुत्या काशीमरणस्य तत्त्वज्ञानद्वारा मोक्षहेतुत्वं प्रतिपाद्यते तत्रामृतशब्दस्य मोक्षपरत्वे पौनरुक्त्यापत्त्याऽमृती भूत्वेत्यस्य ज्ञानी भूत्वेत्यर्थकत्वात्,

एवं च काशीमरणादिकं तत्त्वज्ञानजनन एवोपक्षीणं पञ्चमी-

च प्रयोजकत्वपरेति चेद् ?

न—तत्रामृती भूत्वेत्यस्य जन्ममरणाभाववान् भूत्वेत्यर्थकतया तत्त्वज्ञानस्य द्वारत्वालाभात्,

न चैवं शिवोपदेशवैयर्थ्यं काशीमरणादेव जन्ममरणाभावसम्भवादिति वाच्यम् ?

एतादृशश्रुतिबलाच्छिवोपदेशद्वारा काशीमरणस्य मोक्षोपयोगित्वसम्भवात्,

वस्तुतस्तु—काशीमरणस्थले शिवस्योपदेशकत्वश्रुतिर्यत्रोत्तमाधिकारिब्राह्मणस्य काशीमरणं तत्र तत्त्वज्ञानं द्वारमित्येतत्परा न तु सर्वत्रैव तत्त्वज्ञानकल्पिका सर्वत्र तत्कल्पने मानाभावात्, किञ्च मुक्तिर्गङ्गाऽम्बुमज्जनादित्यत्र तत्त्वज्ञानाजनकतयाऽदृष्टस्यावश्यकत्वेन तद्धेतुरितिन्यायेन तत्त्वज्ञानकल्पनाऽनवकाशः; अन्यथा तत्र गङ्गाऽम्बुमज्जनानन्तरं झटित्येव तत्त्वज्ञानापत्तेः, अदृष्टस्य च समयविशेषसहकारेणैव परिपाकेण परिपक्वादृष्टादेव कार्योत्पादनिर्वाहाद् अत एव सुरधुनीशिवराजधानीमरणादितोब्राह्मणस्येव कीटपतङ्गादेरपि मुक्तिः करतलार्पिता नितरां शूद्रादेरिति प्रवादोऽप्युपपद्यते; अन्यथा सर्वत्र तत्त्वज्ञानापेक्षणे सर्वदुर्घटं स्यात् श्रोतव्यः श्रुतिवाक्येभ्य इत्यनेन संन्यस्य श्रवणं कुर्यादित्यनेन च श्रुतिवाक्यजन्यश्रवणस्यैव तत्त्वज्ञानहेतुत्वावगमेन शूद्रादेरिव गृहस्थस्यापि तत्रानधिकारात्,

नन्वेवं काशीमरणादेस्तत्त्वज्ञानस्य मोक्षं प्रति वैकल्पिकी कारणतेति पर्यवसितम्,

न चैतत्सम्भवति तथा सति व्रीहियवयोरिव काशीमरणादेस्तत्त्वज्ञानस्य च संवलने फलानुत्पादप्रसङ्गादिति चेद् ?

न—व्रीहियवापेक्षयाऽत्र वैषम्यात्, तथा हि व्रीहियवयोरेकप्रकरणे क्रमेण योगसाधनतया विधानेन यवस्य साधनतया प्रथमतोलाभे साधनान्तराकाङ्क्षाऽनुदयाद् व्रीह्यकरणको यागः किंकरणकफलसाधनमिति विकल्पमुख्याऽऽकाङ्क्षयैव यवविध्युत्थानं वाच्यं· तादृश्याश्चाकाङ्क्षाया व्रीहिकरणकत्वाभावविशिष्टविशेषरूपावच्छिन्नतदितरकरणकत्वविशिष्टे यागे फलसाधनताबोधाविषयकत्वाद् वाकाराध्याहारेण यवैर्यजतेतिवाक्याद् व्रीहिकरणकत्वाभावयवकरणत्वरूपोभयविशेषणाविशिष्टयागविषयक एव फलसाधनताबोधः स्वीकरणीयः, विशिष्टे च यस्य कार्यस्य साधनतयाऽन्वयो विशेषणस्य तत्कार्यप्रयोजकत्वे वेदस्य तात्पर्यमौत्सर्गिकमिति व्रीहिभिर्यजेतेत्यतो व्रीहिकरणकत्वस्येव यवाकरणकत्वस्य यवैरित्यतश्च यवकरणकत्वस्यैव व्रीह्यकरणकत्वरूपविशेषणस्यापि फलोपयोगित्वं प्रतीयत इत्युभयोरशास्त्रार्थता, प्रकृते च प्रकरणभेदाद् विधिप्रवृत्तेः पौर्वापर्यानियमेन मोक्षस्य किं साधनमित्येतावन्मात्राकाङ्क्षयैव साधनत्वेन तत्त्वज्ञानकाशीमरणादीनां विधानादितरासाहित्यविशिष्टानामेव तेषां मोक्षसाधनत्वप्रतीतेः, तत्त्वज्ञानकाशीमरणादिसाधनसंवलनेऽपि फलसिद्धिर्निर्बाधैव परस्पराभावस्यापेक्षिततया यथा व्रीहियवयोर्विरुद्धकल्पता तथा न प्रकृतेऽपि तु वाजपेयाश्वमेधादिवत् तृणारणिमणिवच्च पृथक्कल्पतैव विकल्प उभयोरशास्त्रार्थतेति प्रवादस्तु विरुद्धकल्परूप-

विकल्पपरो न तु पृथक्कल्परूपविकल्पपर इति न काऽप्यनुपपत्तिरित्याहुः,

अत्र वदन्ति—तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽनायेति ज्ञानादेव तु कैवल्यं—

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।

तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यती—

त्यादिश्रुतिभ्यः;

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमि—

त्यादिस्मृतिभ्यश्च तत्त्वज्ञानातिरिक्ते मोक्षाजनकत्वप्रतिपादनेन सर्वत्र मोक्षे तत्त्वज्ञानस्य नियतपूर्ववर्तित्वं क्लृप्तमिति काशीमरणादिस्थलेऽपि तत्त्वज्ञानद्वारैव तस्य मोक्षजनकत्वं न तु स्वातन्त्र्येण,

एवं चात्र हि जन्तोरित्यादिश्रुतिरप्यमृतीभूत्वेत्यस्य ज्ञानीभूत्वेत्यर्थकतया तत्त्वज्ञानद्वारा काशीमरणस्य मोक्षजनकत्वं प्रतिपादयन्त्यसङ्कोचेनैवोपपन्नेति न तस्या उत्तमाधिकारिपरतया सङ्कोचकल्पनं युक्तम्; अत एव

ब्रह्मज्ञानेन मुच्यन्ते नान्यथा जन्तवः क चित्।

ब्रह्मज्ञानं तदेवाह काशीसंस्थितिभागिनाम्।

दिशामि तारकं ह्यन्ते मुच्यन्ते ते तु तत्क्षणादि—

तिकाशीखण्डस्थवचनेन काशीमरणस्य तत्त्वज्ञानद्वारा मोक्षजनकत्वं स्पष्टमत्र प्रतिपादितमुपपद्यत,

न चैवं काशीमरणात् शूद्रादेः कथं मुक्तिः ? न हि शिवस्य तदुपदेशकत्वं सम्भवति स्वयमेवानधिकार्युपदेशं निषिध्य तदुपदेशकरणेऽश्रद्धेयवचनत्वप्रसक्तेरिति कीटपतङ्गादेरपि काशीमरणान्मुक्तिरनुपपन्ना तस्य कथमप्युपदेशासम्भवादिति वाच्यम् ?

काशीमरणोत्तरन्तेषां शरीरान्तरपरिग्रहेणोपदेशसम्भवात्,

इयांस्तु विशेषो यद्ब्राह्मणस्य तच्छरीरेऽप्युपदेशः प्रायः सम्भवत्येव; शूद्रादेः कीटपतङ्गादेश्च शरीरान्तरपरिग्रह एव, न हि काशीमरणसमकालमेव काशीमरणाव्यवहितोत्तरकालमेव वा शिवोपदेश इति नियमः? तथा सति काशीमरणाव्यवहितोत्तरमेव सर्वेषां मुक्तौ काश्यां मृतानां सकलजनसिद्धरुद्रपिशाचत्वादिकमप्यनुपपन्नं स्यात्,

एवं च मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेनैव हेतुत्वं काशीमरणादिकं च शिवोपदेशद्वारा श्रवणादिसम्पादकतया तत्त्वज्ञानोपयोगि न स्वातन्त्र्येण, अत एव श्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणाय काशीमरणजन्यताऽवच्छेदकं तत्त्वज्ञानगतं वैजात्यमित्यपि परास्तम्,

अवश्यापेक्षणीयशिवोपदेशेन श्रवणादिद्वारेणैव तेषां तत्त्वज्ञानोपयोगित्वोपपत्तौ स्वातन्त्र्येण तत्र तत्त्वज्ञानहेतुत्वे मानाभावात्,

वस्तुतस्तु—काशीमरणं सर्वेषामेव शरीरान्तर एव तत्त्वज्ञानजनकं न तूत्तमाधिकारिब्राह्मणस्यापि तच्छरीर एव तत्त्वज्ञानजनकं मृते शरीरे ज्ञानानुत्पादाद्, युज्यते च श्रवणादिद्वारे-

णैव काशीमरणस्य तत्त्वज्ञानजनकत्वम् अन्यथा शिवोपदेश-वैयर्थ्यात्,

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिरि-

त्यादिश्रुत्या श्रवणादेस्तत्त्वज्ञानजनकत्वप्रतिपादनेन तादृशवेदार्थपरित्यागे मानाभावाच्च; अत एव श्रुतिवाक्यजन्यश्रवणस्यैवाङ्गतया काशीमरणस्य तद्द्वारा तत्त्वज्ञानजनकत्वे शूद्रादेस्तत्रानधिकारेण श्रवणादेर्द्वारत्वासम्भवेन स्वातन्त्र्येणैव काशीमरणं तत्त्वज्ञानजनकम्,

न च श्रुतिशब्दस्य प्रमाणशब्दपरतया श्रुतिसमानार्थकलौकिकवाक्यादप्यात्मश्रवणसम्भवेन तत्त्वज्ञानोपपत्त्या शूद्रादेरप्यधिकारितेति वाच्यम्?

श्रुतिपदस्य प्रमाणशब्दमात्रपरत्वे मानाभावात्, तथात्वेऽपि;

आत्मानमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्।

ध्याननिर्मन्थनाभ्यासाद् ज्ञानाग्निर्मोक्षकारणमि—

तिश्रुतेः प्रणवानधिकारिणः शूद्रादेर्ज्ञानाधिकारित्वासम्भवादित्यपि परास्तम्,

शरीरान्तरपरिग्रह एव शिवस्योपदेशकतया शूद्रादेरपि शरीरान्तरपरिग्रहे प्रणवाधिकारसम्पत्त्या श्रवणादिसम्भवेन काशीमरणात् श्रवणादिप्रयोज्यतत्त्वज्ञानद्वारा मोक्षसम्भवेनानुपपत्त्यभावादित्यधिकमन्यत्रानुसन्धेयं सुधीभिरिति सङ्क्षेपः,

एतेन ज्ञानकर्मसमुच्चयवादोऽपि निरस्तः, तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेत्या-

दिश्रुतिस्मृत्यादिभिः कर्मणां तत्त्वज्ञान एवोपयोगस्य प्रतिपादनात् कर्मणां तत्त्वज्ञानोपयोगोऽप्यन्तःकरणशुद्धिद्वारा बोध्यः,

प्रत्यक्प्रवणतां बुद्धेः कर्माण्यापाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इवेति–

वचनात्,

आरुरुक्षोर्मुनेर्योगङ्कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यत–

इत्यादिभगवद्गीतावचनविरोधादपि ज्ञानकर्मसमुच्चयवादोऽन समञ्जस इत्यादिकमन्यत्रोह्यमिति दिक्,

नन्वनुमानस्य मोक्षोपयोगितया तत्प्रतिपादकाध्ययने लोकानां प्रवृत्तिसम्भवेऽपि सकलन्यायवैशेषिकशास्त्राध्ययने प्रवृत्त्यनुपपत्तिस्तस्य मोक्षोपयोगाभावादिति चेन्न ?

न–आत्मनि देहादिभेदानुमितिरूपमनने देहादिज्ञानस्य प्रतियोगिज्ञानतया बुद्ध्यादिज्ञानस्य लिङ्गज्ञानतयाऽपेक्षणेन तत्सम्पादकतयैव तस्य सार्थक्यात्,

अपरे तु–शास्त्रोक्तोपपत्तिज्ञानं विना न विवेकः, तद् विना नाश्रद्धामलक्षालनं, तेन विना सशङ्कस्य न चिरकालादरनैरन्तर्येण निदिध्यासने प्रवृत्तिः, न च तया विना तत्त्वसाक्षात्कार इत्यश्रद्धामलक्षालनेन शास्त्राध्यनसार्थक्यं, तथा हि–अश्रद्धा हि वेदेऽप्रामाण्यशङ्का; सा च वेदे प्रामाण्यनिश्चयेन निवर्तते तदनन्तरं वैदिककर्माणि श्रवणादौ प्रवृत्तिः, तदुपायश्च महाजनपरिग्रहो न तु पदार्थविवेचनम्; अविवेचितपदार्थानामपि महाजनपरिग्रहेण वैदि-

ककर्मणि प्रवृत्तिदर्शनात् , तथा च शास्त्रोपयोगोऽश्रद्धामलक्षालने न पदार्थविवेचनद्वारा किन्तु नित्यनिर्दोषत्वमहाजनपरिगृहीतत्वाप्तोक्तत्वादिबौद्धागमव्यावृत्तलिङ्गविवेचनद्वारैव, पदार्थविवेचनं तु मोक्षजनकं मननरूपानुमितिजनकलिङ्गपरामर्शजननद्वारैवेति बोध्यम् ,

अथ महाजनपरिग्रहघटकं जने महत्त्वं न सर्वत्वं बौद्धैरपरिग्रहेणासिद्धेः, नापि बहुत्वं बौद्धागमसाधारण्यादिति चेद् ?

न—परिग्रहभ्रष्टताहेतुरहितत्वस्यैव तत्त्वाद्, भ्रष्टताहेतवश्च बौद्धागमपरिग्राहिणामन्तःपातित्वादयः यथा जिनेन्द्रजगदिन्द्रप्रभृतीनां, तद्राहित्यं च वैदिकपरिग्राहिणां, न हि तदन्तःपातिनामत्र वैदिकेषु प्रवेशः, तैः पूज्यमानानामपि प्रत्युतात्राप्रवेशाद् वैदिकानां नीचानां चेतो भ्रष्टानां तत्र प्रवेश इत्यपि स्फुटमेव,

यद्यपि नित्यनिर्दोषत्वमपि नैयायिकमीमांसकोभयसाधारणं दुरुपपादं तदन्यतरसाधारणं चाप्रयोजकं तदुभययुक्त्योरेकत्र प्रामाण्यनिश्चयस्य कर्तुमशक्यत्वात्, तथाऽपि प्रवर्तमानसर्गप्रवाहव्यापकप्रवाहकत्वमेव नित्यत्वं तेनैव च निर्दोषत्वं, तादृशप्रवाहकत्वस्य निर्दोषत्वव्याप्यत्वात्, तस्य च न्यायमीमांसासाधारणत्वाद् बौद्धागमव्यावृत्तत्वाच्च, बौद्धागमो हि बुद्धेनावतीर्य कस्मिंश्चित् कलियुगे प्रवर्तित इति तदागम एव प्रतिपादयति; तेन तत्र प्रवर्तमानसर्गप्रवाहव्यापकप्रवाहकत्वशङ्काऽपि नेति भवति बौद्धागमव्यावृत्तोऽयं हेतुरिति, आप्तोक्तत्वमपि निर्दोषेण पुरुषेणार्थप्रतिपादनेच्छयोच्चारितत्वं ; तेनात्रापि नैयायिकमीमांसकोभयसाधा-

रण्यं नैयायिकैर्वेदस्येश्वरप्रणीतत्वाभ्युपगमाद् मीमांसकैरपि निर्दोषेण व्यासेनोच्चरितत्वस्य वेदेऽभ्युपगमादिति न काऽप्यनुपपत्तिरिति वदन्तीति कृतमतिशयविस्तरेण।

तच्च शास्त्रं त्रिधा—उद्देशलक्षणपरीक्षाभेदात्, तदुक्तं भाष्यकारैः—त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः—उद्देशो लक्षणं परीक्षा चेति, तत्र लक्षणजिज्ञासाप्रयोजकज्ञानविषयत्वे सति प्रकृतलक्ष्यप्रतिपादकशब्द उद्देशः; यथा प्रमाणप्रमेयेत्यादिसूत्रे प्रमाणादिपदं, तस्य किं प्रमाणलक्षणमित्यादिलक्षणजिज्ञासाप्रयोजकज्ञानविषयत्वात् प्रमाणादिरूपप्रकृतलक्ष्यप्रतिपादकत्वाच्च लक्षणसमन्वयः, उदासीने लक्षणपरीक्षाऽन्तर्गते च प्रमाणादिपदेऽतिव्याप्तिवारणाय सत्यन्तं लक्षणज्ञानमिष्टसाधनमिति शब्दजन्यज्ञानस्य लक्षणजिज्ञासाप्रयोजकस्य विषये साधनादिपदेऽतिव्याप्तेर्वारणाय विशेष्यदलम्,

केचित्तु—नाममात्रेण वस्तुसङ्कीर्तनमुद्देशः कीर्तनमात्रस्य गङ्गाघोषेऽतिव्याप्तेः समिति; तथा च ताल्वोष्ठपुटव्यापारेण कीर्तनं लब्धं तच्च न गङ्गाघोष इति न तत्रातिव्याप्तिः, तावन्मात्रं च वन्ध्यापुत्रादिशब्देऽतिप्रसक्तमिति वस्तुपदोपादानं वन्ध्यापुत्रस्य वस्तुत्वाभावान्नातिप्रसङ्गः, लाक्षणिकगङ्गापदेऽतिप्रसङ्गवारणाय नामेति शक्त्यर्थकम्,

यद्वा—काकरवेऽतिप्रसङ्गवारणाय नामेति पदेनेत्यर्थकं लक्षणवाक्येऽतिप्रसङ्गवारणाय मात्रेति प्रकृतपदार्थताऽवच्छेदकातिरिक्तासाधारणधर्मानुपरागेणेत्यर्थकं, लक्षणवाक्येन च लक्षणस्यैव

तादृशस्य बोधनान्नातिप्रसङ्गः,

यद्वा–लक्षणवाक्यान्यत्वमेव मात्रपदार्थः,

वस्तुतस्तु–नामधेयेन पदार्थाभिधानमात्रमुद्देश इति भाष्योक्त्याऽत्र मात्रपदव्यत्यासेन वस्तुसङ्कीर्तनमात्रं नामोद्देश इत्यर्थः, वस्तुप्रतिपादनमात्रतात्पर्यकः शब्द इति पर्यवसन्नमित्याहुः,

तदसद्–वन्ध्यापुत्रादिशब्दानां शक्याप्रसिद्ध्या शक्त्यभावेन वस्तुपदवैयर्थ्यात् समासे शक्त्यभावेन हेत्वाभासादिपदानामुपमितसमासरूपाणामुद्देशत्वानुपपत्तेश्च लक्षणवाक्यान्तर्गते लक्ष्यांशे परीक्षाऽन्तर्गतनाम्न्यातिव्याप्तेश्च,

अथ तस्य प्रतिपादनमात्रे न तात्पर्यं किन्तु तस्योद्देश्यत्वादिबोधनेऽपीति चेद् ?

न–तथा सति प्रमाणप्रमेयेत्यादिसूत्रस्य प्रमाणप्रमेयादेस्तत्त्वज्ञानं प्रति विषयत्वादिबोधनतात्पर्यकत्वाद्, आत्मशरीरेन्द्रियार्थेत्यादिविभागसूत्रस्य विशेषोद्देशरूपस्यापि प्रमेयादिसंज्ञाविधानतात्पर्यकत्वात् संज्ञाविधावुद्देश्यताबोधनतात्पर्यकत्वात्तत्राव्याप्तेः,

अथ प्रकारे तृतीयामाश्रित्य नाममात्रप्रकारकबोधजनकं वस्तुसङ्कीर्तनमुद्देश इत्यर्थः, उद्देशे नाम्न एव प्रकारत्वेन भानाद्; अत एवैतदुत्थापिते तन्नामकः क इति जिज्ञासाया असाधारणधर्मवत्ताबोधकलक्षणप्रणयनमिति चेद् ?

न–विशिष्यागृहीतशक्तिकस्थले पदमात्रस्य प्रकारत्वेऽपि लोकप्रसिद्धार्थकसंशयानिर्णयबुद्धिदुःखादिपदस्थले तत्तदर्थादिप्रकारकाणामपि प्रकारतया तत्राव्याप्तेः,

न चैवं तल्लक्षणस्यानाकाङ्क्षिताभिधानापत्तिरिति वाच्यम् ? वादिभेदेन लक्ष्याणां लक्षणानां च विप्रतिपत्त्या तत्त्वनिर्णयार्थं पुनराकाङ्क्षोपपत्तेः, अपि चासाधारणधर्मवत्तया ज्ञातानामौषध्यादीनां नामप्रश्नोत्तरे पदमात्रप्रकारकबोधजननादतिव्याप्तिः, अप्रसिद्धानां लक्षणवाक्यान्तर्गतलक्ष्यांशेऽतिव्याप्तिश्च ,

अथोद्देश्यताऽवच्छेदकताऽऽख्यविषयताशालिनाममात्रप्रकारकबोधजननतात्पर्यकः शब्द उद्देशः, उक्तोत्तरवाक्ये च नामविशिष्टमुद्दिश्य विधेयान्तरमस्तीति नातिव्याप्तिः, दुःखाद्युद्देशेऽपि दुःखपदवाच्यं किञ्चिदित्येव वक्तुस्तात्पर्यमस्तीति तत्र नाव्याप्तिरिति चेद् ,

न—प्रमाणप्रमेयेत्यादिसूत्रे सामान्योद्देशेऽव्याप्तेः, तत्र निःश्रेयसाधिगममुद्दिश्य प्रमाणादितत्त्वज्ञानजन्यत्वस्यैव विधानादिति दिक्,

स चोद्देशो द्विधा-सामान्यतो विशेषतश्च, प्रमाणप्रमेयेत्यादिराद्यः, प्रत्यक्षानुमानेत्यादिर्द्वितीयः, किञ्चिद्धर्ममवच्छेदकीकृत्यासाधारणधर्मवत्त्वप्रतिपादकवचनं लक्षणं यथा गौः सास्नाऽऽदिमतीति, धात्वर्थताऽवच्छेदकफलशालित्वं कर्मत्वमित्यादि, उद्देशादावतिप्रसङ्गवारणाय किञ्चिद्धर्ममवच्छेदकीकृत्येति, लक्षणस्य तेन निर्णीतलक्ष्यस्य च सम्भवासम्भवविचारः परीक्षेति दिक् ।

प्राचीननव्यान्निखिलान्निबन्धान्
विलोक्य निर्णीय तदर्थजातम् ।

कृताऽनुमानीयपरिष्कृतिर्या
समर्पिता साऽस्तु शिवस्य पादे ॥
महादेवेनानुमानं संक्षेपेणेह वर्णितम् ।
भवन्तु तेन सुप्रीताः सत्तर्करसिका बुधाः ॥

इति श्रीमत्पदवाक्यप्रमाणज्ञमुकुन्दपण्डितात्मजपुणतामकरोप-
नामकमहादेवपण्डितराचिते न्यायकौस्तुभेऽ-
नुमानकौस्तुभः समाप्तः ।